The Asiatic Society Of Bombay
THIS MANUSCRIPT HAS BEEN ADOPTED FOR
MICROFILMING BY :-
SHREE. P. H. KARANI
Date 17-10-2008

1/19/3

18

ZZ. a. 19.

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

3/1913

Shankara Acharya, Vyasa Sutra Bhashyam

140756
a

॥अथशारीरकभाष्यप्रथमाध्यायप्रारंभः॥ ॥श्रीः॥

5/1913

श्रीगणेशाय नमः ॥ युष्मदस्मत्प्रत्ययगोचरयोर्विषयविषयिणोस्तमःप्रकाशवद्विरुद्धस्वभावयोरितरेतरभावानुपपत्तौ सिद्धायां त
द्धर्माणामपि सुतरामितरेतरभावानुपपत्तिरित्यतोस्मत्प्रत्ययगोचरे विषयिणि चिदात्मके युष्मत्प्रत्ययगोचरस्य विषयस्य तद्धर्माणां चा
ध्यासस्तद्विपर्ययेण विषयिणस्तद्धर्माणां च विषयेऽध्यासो मिथ्येति भवितुं युक्तं ॥ तथाप्यन्योन्यस्मिन्नन्योन्यात्मकतामन्योन्यधर्मांश्चा
ध्यस्येतरेतराविवेकेनात्यंतविविक्तयोर्धर्मधर्मिणोर्मिथ्याज्ञाननिमित्तः सत्यानृते मिथुनीकृत्याहमिदं ममेदमिति नैसर्गिकोयं लोकव्य
वहारः ॥ आह कोयमध्यासो नामेति ॥ उच्यते ॥ स्मृतिरूपः परत्र पूर्वदृष्टावभासः ॥ तं केचिदन्यत्रान्यधर्माध्यास इति वदंति ॥ केचित्तु यत्र यद
ध्यासस्तद्विवेकाग्रहणनिबंधनो भ्रम इति ॥ अन्ये तु यत्र यदध्यासस्तस्यैव विपरीतधर्मत्वकल्पनामाचक्षते ॥ सर्वथापि त्वन्यस्यान्यधर्मावभा
सतां न व्यभिचरति ॥ तथा च लोकेनुभवः ॥ शुक्तिका हि रजतवदवभासते ॥ एकश्चंद्रः सद्वितीयवदिति ॥ कथं पुनः प्रत्यगात्मन्यविषयेऽध्यासो
विषयतद्धर्माणां ॥ सर्वो हि पुरोवस्थित एव विषये विषयांतरमध्यस्यति ॥ युष्मत्प्रत्ययापेतस्य च प्रत्यगात्मनोऽविषयत्वं ब्रवीषि ॥ उच्यते ॥ न ताव
दयमेकांतेनाविषयः ॥ अस्मत्प्रत्ययविषयत्वादपरोक्षत्वाच्च प्रत्यगात्मप्रसिद्धेः ॥ न चायमस्ति नियमः ॥ पुरोवस्थित एव विषये विषयांतर
मध्यसितव्यमिति ॥ अप्रत्यक्षेपि ह्याकाशे बालास्तलमलिनताद्यध्यस्यंति ॥ एवमविरुद्धः प्रत्यगात्मन्यप्यनात्माध्यासः ॥ तमेतमेवंविधलक्ष
णमध्यासं पंडिता अविद्येति मन्यंते ॥ तद्विवेकेन च वस्तुस्वरूपावधारणं विद्यामाहुः ॥ तत्रैवं सति यत्र यदध्यासस्तत्कृतेन गुणेन दोषेण वाणुमात्रेणा
पि स न संबध्यते ॥ तमेतमविद्याख्यमात्मानात्मनोरितरेतराध्यासं पुरस्कृत्य सर्वे प्रमाणप्रमेयव्यवहारा लौकिका वैदिकाश्च प्रवृत्ताः सर्वा
णि च शास्त्राणि विधिप्रतिषेधमोक्षपराणीति कथं पुनरविद्यावद्विषयाणि प्रत्यक्षादीनि प्रमाणानि शास्त्राणि चेति ॥ उच्यते ॥ देहेंद्रियादिष्वहं
ममाभिमानहीनस्य प्रमातृत्वानुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्तेः ॥ न हींद्रियाण्यनुपादाय प्रत्यक्षादिव्यवहारः संभवति ॥ न चाधिष्ठानमंतरें
द्रियव्यापारः संभवति ॥ न चानध्यस्तात्मभावेन देहेन कश्चिद्व्याप्रियते ॥ न चैतस्मिन्सर्वस्मिन्नसत्यसंगस्यात्मनः प्रमातृत्वमुपपद्यते ॥ न
च प्रमातृत्वमंतरेण प्रमाणप्रवृत्तिरस्ति ॥ तस्मादविद्यावद्विषयाण्येव प्रत्यक्षादीनि प्रमाणानि शास्त्राणि चेति ॥ पश्वादिभिश्चाविशेषात् ॥
यथा हि ॥ पश्वादयः शब्दादिभिः श्रोत्रादीनां संबंधे सति शब्दादिविज्ञाने प्रतिकूले जाते ततो निवर्तंते अनुकूले प्रवर्तंते ॥ यथा दंडोद्यत
करं पुरुषमभिमुखमुपलभ्य मामयं हंतुमिच्छतीति पलायितुमारभंते ॥ हरिततृणपूर्णपाणिमुपलभ्य तं प्रत्यभिमुखीभवंति ॥ एवं पुरुषाः

अपि व्युत्पन्नचित्ताः क्रूरदृष्टीनाक्रोशतः खड्गोद्यतकरान्बलवत उपलभ्य ततो निवर्तंते॥ तद्विपरीतान्प्रति प्रवर्तंते अतः समानः पश्वादिभिः पुरु
षाणां प्रमाणप्रमेयव्यवहारः॥ पश्वादीनां च प्रसिद्धोऽविवेकपूर्वकः प्रत्यक्षादिव्यवहारः॥ तत्सामान्यदर्शनात्॥ व्युत्पत्तिमतामपि पुरुषाणां प्रत्य
क्षादिव्यवहारस्तत्कालः समान इति॥ निश्चीयते॥ शास्त्रीये तु व्यवहारे यद्यपि बुद्धिपूर्वकारी नाविदित्वात्मनः परलोकसंबंधमधिक्रियते॥ त
थापि न वेदांतवेद्यमशनायाद्यतीतमपेतब्रह्मक्षत्रादिभेदमसंसार्यात्मतत्त्वमधिकारेऽपेक्षते॥ अनुपयोगादधिकारविरोधाच्च॥ प्राक् तथाभूता
त्मविज्ञानात्प्रवर्तमानं शास्त्रमविद्यावद्विषयत्वं नातिवर्तते॥ तथा हि ब्राह्मणो यजेतेत्यादीनि शास्त्राणि आत्मनि वर्णाश्रमवयोवस्थादिविशेषाध्या
समाश्रित्य प्रवर्तंते॥ अध्यासो नामातस्मिंस्तद्बुद्धिरित्यवोचाम॥ तद्यथा॥ पुत्रभार्यादिषु विकलेषु सकलेषु वाहमेव विकलः सकलो वेति बाह्यध
र्मानात्मन्यध्यस्यति॥ तथा देहधर्मान् स्थूलोऽहं कृशोऽहं गौरोऽहं तिष्ठामि गच्छामि लंघयामि चेति॥ तथेंद्रियधर्मान् मूकः काणः क्लीबो बधिरोऽन्धोऽहमिति॥
तथांतःकरणधर्मान् कामसंकल्पविचिकित्साध्यवसायादीन्॥ एवमहंप्रत्ययिनमशेषस्वप्रचारसाक्षिणि प्रत्यगात्मन्यध्यस्यति॥ तं च प्रत्य
गात्मानं सर्वसाक्षिणं तद्विपर्ययेणांतःकरणादिष्वध्यस्यति॥ एवमयमनादिरनंतो नैसर्गिकोऽध्यासो मिथ्याप्रत्ययरूपः कर्तृत्वभोक्तृत्वप्रवर्तकः
सर्वलोकप्रत्यक्षः॥ अस्यानर्थहेतोः प्रहाणायात्मैकत्वविद्याप्रतिपत्तये सर्वे वेदांता आरभ्यंते॥ यथा चायमर्थः सर्वेषां वेदांतानां तथा वयमस्यां शारी
रकमीमांसायां प्रदर्शयिष्यामः॥ वेदांतमीमांसाशास्त्रस्य व्याचिख्यासितस्येदमादिमं सूत्रं॥ अथातो ब्रह्मजिज्ञासेति॥ तत्राथशब्द आनंतर्यार्थः
परिगृह्यते॥ नाधिकारार्थः॥ ब्रह्मजिज्ञासाया अनधिकार्यत्वात्॥ मंगलस्य च वाक्यार्थे समन्वयाभावात्॥ अर्थांतरप्रयुक्त एव ह्यथशब्दः श्रुत्या
मंगलप्रयोजनो भवति॥ पूर्वप्रकृतापेक्षायाश्च फलत आनंतर्याव्यतिरेकात्॥ सति चानंतर्यार्थत्वे यथा धर्मजिज्ञासा पूर्ववृत्तं वेदाध्ययनं नियमेना
पेक्षते एवं ब्रह्मजिज्ञासापि यत्पूर्ववृत्तं नियमेनापेक्षते तद्वक्तव्यं॥ स्वाध्यायानंतर्यं तु समानं॥ नन्विह कर्मावबोधानंतर्यं विशेषः॥ न ध
र्मजिज्ञासायाः पूर्वमप्यधीतवेदांतस्य ब्रह्मजिज्ञासोपपत्तेः॥ यथा च हृदयाद्यवदानानामानंतर्यनियमः॥ क्रमस्य विवक्षितत्वान्न तथेह क्र
मो विवक्षितः॥ शेषशेषित्वेऽधिकृताधिकारे वा प्रमाणाभावात्॥ धर्मब्रह्मजिज्ञासयोः फलजिज्ञास्यभेदाच्च॥ अभ्युदयफलं हि धर्मज्ञानं
तच्चानुष्ठानापेक्षं॥ निःश्रेयसफलं तु ब्रह्मज्ञानं॥ न चानुष्ठानांतरापेक्षं॥ भव्यश्च धर्मो जिज्ञास्यो न ज्ञानकालेऽस्ति॥ पुरुषव्यापारतंत्रत्वात्॥
इह तु भूतं ब्रह्म जिज्ञास्यं॥ नित्यनिर्वृत्तत्वात्॥ न पुरुषव्यापारतंत्रं॥ चोदनाप्रवृत्तिभेदाच्च॥ या हि चोदना धर्मस्य लक्षणं सा च स्वविषये

नियुंजानैव पुरुषमवबोधयति॥ ब्रह्मचोदना तु पुरुषमवबोधयत्येव केवलं॥ न पुरुषोऽवबोधे नियुज्यते॥ अवबोधस्य चोदनाजन्यत्वात्॥ यथाक्षा
र्थसंनिकर्षेणार्थावबोधः॥ तद्वत्॥ तस्मात्किमपि वक्तव्यं यदनंतरं ब्रह्मजिज्ञासोपदिश्यत इति उच्यते॥ नित्यानित्यवस्तुविवेक इहामुत्रार्थफलभो
गविरागः शमादिसाधनसंपत् मुमुक्षुत्वं च॥ तेषु हि सत्सु प्रागपि धर्मजिज्ञासाया ऊर्ध्वं च शक्यते ब्रह्म जिज्ञासितुं ज्ञातुं च न विपर्यये॥ तस्मादथ
शब्देन यथोक्तसाधनसंपत्त्यानंतर्यमुच्यते॥ अतःशब्दो हेत्वर्थः॥ यस्माद्वेद एवाग्निहोत्रादीनां श्रेयःसाधनानामनित्यफलतां दर्शयति॥ त
द्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयत इत्यादिः॥ तथा ब्रह्मविज्ञानादपि परं पुरुषार्थं दर्शयति॥ ब्रह्मविदाप्नोति पर
मित्यादिः॥ तस्माद्यथोक्तसाधनसंपत्त्यनंतरं ब्रह्मजिज्ञासा कर्तव्या॥ ब्रह्मणो जिज्ञासा ब्रह्मजिज्ञासा॥ ब्रह्म च वक्ष्यमाणलक्षणं॥ जन्माद्यस्य य
त इति॥ अत एव न ब्रह्मशब्दस्य जात्याद्यर्थांतरमाशंकितव्यं॥ ब्रह्मण इति कर्मणि षष्ठी॥ न शेषे॥ जिज्ञास्यापेक्षित्वाज्जिज्ञासायाः॥ जिज्ञास्यांतरा
निर्देशाच्च॥ ननु शेषषष्ठीपरिग्रहेऽपि ब्रह्मणो जिज्ञासाकर्मत्वं न विरुध्यते॥ संबंधसामान्यस्य विशेषनिष्ठत्वात्॥ एवमपि प्रत्यक्षं ब्रह्मणः कर्म
त्वमुत्सृज्य सामान्यद्वारेण परोक्षं कर्मत्वं कल्पयतो व्यर्थः प्रयासः स्यात्॥ न व्यर्थो ब्रह्माश्रिताशेषविचारप्रतिज्ञानार्थत्वादिति चेत्॥ न प्रधानपरि
ग्रहे तदपेक्षितानामर्थाक्षिप्तत्वात्॥ ब्रह्म हि ज्ञानेनाप्तुमिष्टतमत्वात्प्रधानं॥ तस्मिन्प्रधाने जिज्ञासाकर्मणि परिगृहीते यैर्जिज्ञासितैर्विना ब्र
ह्म जिज्ञासितं न भवति तान्यर्थाक्षिप्तान्येवेति न पृथक् सूत्रयितव्यानि॥ यथा राजासौ गच्छतीत्युक्ते सपरिवारस्य राज्ञो गमनमुक्तं भवति तद्वत्॥ श्रुत्यनु
गमाच्च॥ यतो वा इमानि भूतानि जायंते इत्याद्याः श्रुतयः॥ तद्विजिज्ञासस्व तद्ब्रह्मेति प्रत्यक्षमेव ब्रह्मणो जिज्ञासाकर्मत्वं दर्शयंति॥ तच्च कर्मणि षष्ठी
परिग्रहे सूत्रेणानुगतं भवति॥ तस्माद्ब्रह्मण इति कर्मणि षष्ठी॥ ज्ञातुमिच्छा जिज्ञासा॥ अवगतिपर्यंतं ज्ञानं॥ सन्वाच्याया इच्छायाः कर्म॥ फलविषयत्वा
दिच्छायाः॥ ज्ञानेन हि प्रमाणेनावगंतुमिष्टं ब्रह्म॥ ब्रह्मावगतिर्हि पुरुषार्थो निःशेषसंसारबीजाविद्याद्यनर्थनिबर्हणात्॥ तस्माद्ब्रह्म जिज्ञासितव्यं॥
तत्पुनर्ब्रह्म प्रसिद्धं वा स्यात्॥ यदि प्रसिद्धं न जिज्ञासितव्यं॥ अथाप्रसिद्धं नैव शक्यं जिज्ञासितुमिति॥ उच्यते॥ अस्ति तावद्ब्रह्म नित्यशुद्धबुद्धमुक्तस्व
भावं सर्वज्ञं सर्वशक्तिसमन्वितं॥ ब्रह्मशब्दस्य हि व्युत्पाद्यमानस्य नित्यशुद्धत्वादयोऽर्थाः प्रतीयंते॥ बृंहतेर्धातोरर्थानुगमात्॥ सर्वस्यात्मत्वाच्च ब्र
ह्मास्तित्वप्रसिद्धिः॥ सर्वो ह्यात्मास्तित्वं प्रत्येति न नाहमस्मीति॥ यदि हि नात्मास्तित्वप्रसिद्धिः स्यात्सर्वो लोको नाहमस्मीति प्रतीयात्॥ आ
त्मा च ब्रह्म॥ यदि तर्हि लोके ब्रह्मात्मत्वेन प्रसिद्धमस्ति ततो ज्ञातमेवेत्यजिज्ञास्यत्वं पुनरापन्नं॥ न॥ तद्विशेषं प्रति विप्रतिपत्तेः॥ देहमात्रं चैतन्य

शां०भा० ॥२॥

विशिष्टमात्मेतिप्राकृताजनालोकायतिकाश्चप्रतिपन्नाः॥इंद्रियाण्येवचेतनान्यात्मेत्यपरे॥मनइत्यन्ये॥विज्ञानमात्रंक्षणिकमित्येके॥शून्यमि
त्यपरे॥अस्तिदेहव्यतिरिक्तःसंसारीकर्ताभोक्तेत्यपरे॥भोक्तैवकेवलंनकर्तेत्येके॥अस्तितद्व्यतिरिक्तः॥ईश्वरःसर्वज्ञःसर्वशक्तिरितिकेचित्॥आ
त्मासभोक्तुरित्यपरे॥एवंबहवोविप्रतिपन्नायुक्तिवाक्यतदाभाससमाश्रयाःसंतः॥तत्राविचार्ययत्किंचित्प्रतिपद्यमानोनिःश्रेयसात्प्रतिहन्येता
नर्थंचेयात्॥तस्माद्ब्रह्मजिज्ञासोपन्यासमुखेनवेदांतवाक्यमीमांसातदविरोधितर्कोपकरणानिःश्रेयसप्रयोजनाप्रस्तूयते॥ब्रह्मजिज्ञासि
तव्यमित्युक्तं॥किंलक्षणंपुनस्तद्ब्रह्मेत्यतआहभगवान्सूत्रकारः॥जन्माद्यस्ययतइति॥जन्मोत्पत्तिरादिरस्येतितद्गुणसंविज्ञानोबहुव्रीहिः॥
जन्मस्थितिभंगंसमासार्थः॥जन्मनश्चादित्वंश्रुतिनिर्देशापेक्षंवस्तुवृत्तापेक्षंच॥श्रुतिनिर्देशस्तावद्यतोवाइमानिभूतानिजायंतइत्यस्मिन्वा
क्येजन्मस्थितिप्रलयानांक्रमदर्शनात्॥वस्तुवृत्तमपिजन्मनालब्धसत्ताकस्यधर्मिणःस्थितिप्रलयसंभवात्॥अस्येतिप्रत्यक्षादिप्रमाणस
न्निधापितस्यधर्मिणइदमानिर्देशः॥षष्ठीजन्मादिधर्मसंबंधार्था॥यतइतिकारणनिर्देशः॥अस्यजगतोनामरूपव्यापारकृतस्यानेकक
र्तृभोक्तृसंयुक्तस्यप्रतिनियतदेशकालनिमित्तक्रियाफलाश्रयस्यमनसाप्यचिंत्यरचनारूपस्यजन्मस्थितिभंगं॥यतःसर्वज्ञात्सर्वश
क्तेःकारणाद्भवतितद्ब्रह्मेतिवाक्यशेषः॥अन्येषामपिभावविकाराणांत्रिष्वेवांतर्भावइतिजन्मस्थितिनाशानामिहग्रहणं॥यास्कपरिपठि
तानांतुजायतेऽस्तीत्यादीनांग्रहणेतेषांजगतःस्थितिकालेसंभाव्यमानत्वान्मूलकारणादुत्पत्तिस्थितिनाशाजगतोनगृहीताःस्युरित्याशंक्ये
ततन्माशंकीति॥योत्पत्तिर्ब्रह्मणःतत्रैवस्थितिःप्रलयश्चतएवगृह्यंते॥नयथोक्तविशेषणस्यजगतोयथोक्तविशेषणमीश्वरंमुक्त्वान्यतःप्रधाना
दचेतनादणुभ्योऽभावात्॥नसंसारिणोवोत्पत्त्यादिसंभावयितुंशक्यं॥नचस्वभावतोविशिष्टदेशकालनिमित्तानामिहोपादानात्॥एतदेवानुमानंसं
सारिव्यतिरिक्तेश्वरास्तित्वादिसाधनमीश्वरकारणिनोमन्यंते॥नन्विहापितदेवोपन्यस्तंजन्मादिसूत्रे॥नवेदांतवाक्यग्रंथनार्थत्वात्सूत्राणां॥
वेदांतवाक्यानिहिसूत्रैरुदाहृत्यविचार्यंते॥वाक्यार्थविचारणाध्यवसाननिर्वृत्ताहिब्रह्मावगतिः॥नानुमानादिप्रमाणांतरनिर्वृत्ता॥स ॥२॥
त्सुवेदांतवाक्येषुजगतोजन्मादिकारणवादिषुतदर्थग्रहणदार्ढ्याय॥अनुमानमपिवेदांतवाक्याविरोधिप्रमाणंभवन्ननिवार्यते॥
श्रुत्यैवचसहायत्वेनतर्कस्याभ्युपेतत्वात्॥श्रोतव्योमंतव्यइतिश्रुतिः॥पंडितोमेधावीगंधारानेवोपसंपद्येतैवमेवेहाचार्यवान्पुरुषोवेदे
तिपुरुषबुद्धिसाहाय्यमात्मनोदर्शयति॥नधर्मजिज्ञासायामिवश्रुत्यादयएवप्रमाणंब्रह्मजिज्ञासायां॥किंतु॥श्रुत्यादयोनुभवादयश्चयथा

7/1913

संभवमिहप्रमाणमनुभवावसानत्वात्॥भूतवस्तुविषयत्वाच्चब्रह्मविज्ञानस्य॥कर्तव्येहिविषयेनानुभवापेक्षास्तीतिश्रुत्यादीना
मेवप्रामाण्यंस्यात्॥पुरुषाधीनात्मलाभत्वाच्चकर्तव्यस्य॥कर्तुमकर्तुमन्यथावाकर्तुंशक्यंलौकिकंवैदिकंचकर्म॥यथाश्वेनगच्छ
पद्भ्यामन्यथावानवागच्छतीति॥तथातिरात्रेषोडशिनंगृह्णातिनातिरात्रेषोडशिनंगृह्णातिउदितेजुहोत्यनुदितेजुहोतीति॥विधिप्रतिषेधा
श्चात्रार्थवंतःस्युर्विकल्पोत्सर्गापवादाश्च॥नतुवस्त्वेवंनैवमस्तिनास्तीतिवाविकल्प्यते॥विकल्पनास्तुपुरुषबुद्ध्यपेक्षाः॥नवस्तु
याथात्म्यज्ञानंपुरुषबुद्ध्यपेक्षं॥किंतर्हिवस्तुतंत्रमेवतत्॥नहिस्थाणावेकस्मिन्स्थाणुर्वापुरुषोन्योवेतितत्त्वज्ञानंभवति॥तत्र
न्यो पुरुषोवेतिमिथ्याज्ञानं॥स्थाणुरेवेतितत्त्वज्ञानं॥वस्तुतंत्रत्वात्॥एवंभूतवस्तुविषयाणांप्रामाण्यंवस्तुतंत्रं॥तत्रैवंसतिब्रह्मज्ञानमपि
वस्तुतंत्रमेवभूतवस्तुविषयत्वात्॥ननुभूतवस्तुत्वेब्रह्मणःप्रमाणांतरविषयत्वमेवेति॥वेदांतवाक्यविचारणाऽनर्थिकैवप्राप्ता॥नें
द्रियाविषयत्वेनसंबंधाग्रहणात्॥स्वभावतोविषयविषयाणींद्रियाणिनब्रह्मविषयाणि॥सतिहींद्रियविषयत्वेब्रह्मणइदंब्रह्मणासंबद्धंका
र्यमितिगृह्येत॥कार्यमात्रमेवगृह्यमाणंकिंब्रह्मणासंबद्धंकिमन्येनकेनचिद्वासंबद्धमितिनशक्यंनिश्चेतुं॥तस्माज्जन्मादिसू
त्रंनानुमानोपन्यासार्थं॥किंतर्हिवेदांतवाक्यप्रदर्शनार्थं॥किंपुनस्तद्वेदांतवाक्यंयत्सूत्रेणेहलिलक्षयिषितं॥भृगुर्वैवारुणिः॥वरुणं
पितरमुपससार॥अधीहिभगवोब्रह्मेत्युपक्रम्याह॥यतोवाइमानिभूतानिजायंते॥येनजातानिजीवंति॥यत्प्रयंत्यभिसंविशंतीति॥
तद्विजिज्ञासस्व॥तद्ब्रह्मेति॥तस्यचनिर्णयवाक्यमानंदाद्ध्येवखल्विमानिभूतानिजायंते॥आनंदेनजातानिजीवंति॥आनंदंप्रयं
त्यभिसंविशंतीति॥अन्यान्यप्येवंजातीयकानिवाक्यानिनित्यशुद्धबुद्धमुक्तसर्वज्ञस्वरूपकारणविषयाण्युदाहर्तव्यानि॥जगत्का
रणत्वप्रदर्शनेनसर्वज्ञंब्रह्मेत्युपक्षिप्तं॥तदेवद्रढयन्नाह॥शास्त्रयोनित्वादिति॥महतऋग्वेदादेःशास्त्रस्यानेकविद्यास्थानोपबृं
हितस्यप्रदीपवत्सर्वार्थावद्योतिनःसर्वज्ञकल्पस्ययोनिःकारणंब्रह्म॥नहीदृशस्यशास्त्रस्यऋग्वेदादिलक्षणस्यसर्वज्ञगुणा
न्वितस्यसर्वज्ञादन्यतःसंभवोस्ति॥यद्यद्विस्तरार्थंशास्त्रंयस्मात्पुरुषविशेषात्संभवतियथाव्याकरणादिपाणिन्यादेर्ज्ञेयैक
देशार्थमपिसततोप्यधिकतरविज्ञानइतिप्रसिद्धंलोके॥किमुवक्तव्यमनेकशाखाभेदभिन्नस्यदेवतिर्यङ्मनुष्यवर्णाश्रमादिप्र
विभागहेतोःऋग्वेदाद्याख्यस्यसर्वज्ञानाकरस्य॥अप्रयत्नेनैवलीलान्यायेनपुरुषनिश्वासवद्यस्मान्महतोभूताद्योनेःसंभवः।

शां०भा०
॥ ३ ॥

वास्य महतो भूतस्य निश्वसितमेवैतद्दृग्वेद इत्यादिश्रुतेस्तस्य महतो भूतस्य निरतिशयं सर्वज्ञत्वं सर्वशक्तित्वं चेति ॥ अथ वा यथोक्तमृ
ग्वेदादिशास्त्रं योनिः कारणं प्रमाणमस्य ब्रह्मणो यथावत्स्वरूपाधिगमे शास्त्रादेव प्रमाणाज्जगतो जन्मादिकारणं ब्रह्माधिगम्यत
इत्यभिप्रायः ॥ शास्त्रमुदाहृतं पूर्वसूत्रे यतो वा इमानि भूतानि जायंत इत्यादि ॥ किमर्थं तर्हीदं सूत्रं ॥ यावता पूर्वसूत्रे एवैवंजातीयकं शा
स्त्रमुदाहरता शास्त्रयोनित्वं ब्रह्मणो दर्शितं उच्यते ॥ तत्र पूर्वसूत्राक्षरेण स्पष्टं शास्त्रस्यानुदाहृतत्वाज्जगतो जन्मादिकारणं केवलमनु
मानगम्यमुपन्यस्तमित्याशंक्येत तामाशंकां निवर्तयितुमिदं सूत्रं प्रववृते ॥ शास्त्रयोनित्वादिति कथं पुनर्ब्रह्मणः शास्त्रप्रमाणकत्व
मुच्यते यावताम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानामिति ॥ क्रियापरत्वं शास्त्रस्य प्रदर्शितमतो वेदांतानामानर्थक्यमक्रियार्थ
त्वात् ॥ कर्तृदेवतादिप्रकाशनार्थत्वेन वा क्रियाविधिशेषत्वं वेदांतानामुपासनादिक्रियांतरविधानार्थत्वं वा ॥ नहि परिनिष्ठितवस्तुप्रतिपादनं
संभवति ॥ प्रत्यक्षादिविषयत्वात्परिनिष्ठितवस्तुनः ॥ तत्प्रतिपादने च हेयोपादेयरहिते पुरुषार्थाभावात् ॥ अत एव सोऽरोदीदित्यादीनामा
नर्थक्यं माभूदिति विधिमात्रैकवाक्यत्वात् ॥ स्तुत्यर्थेन विधीनां स्युरिति स्तावकत्वेनार्थत्वमुक्तं ॥ मंत्राणां चेषे त्वेत्यादीनां क्रियातत्सा
धनाभिधायित्वेन कर्मसमवायित्वमुक्तं ॥ न क्वचिदपि वेदवाक्यानां विधिसंस्पर्शमंतरेणार्थवत्ता दृष्टोपपन्ना वा न च परिनिष्ठिते वस्तुस्व
रूपे विधिः संभवति ॥ क्रियाविषयत्वाद्विधेः ॥ तस्मात्कर्मापेक्षितकर्तृस्वरूपदेवतादिप्रकाशनेन क्रियाविधिशेषत्वं वेदांतानामथ प्रक
रणांतरभयान्नैतदभ्युपगम्यते ॥ तथापि स्ववाक्यगतोपासनादिकर्मपरत्वं ॥ तस्मान्न ब्रह्मणः शास्त्रयोनित्वमिति प्राप्त उच्यते ॥ तत्
तु समन्वयात् ॥ तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः ॥ तद्ब्रह्म सर्वज्ञं सर्वशक्ति जगदुत्पत्तिस्थितिलयकारणं वेदांतशास्त्रादेवगम्यते ॥ कथं
समन्वयात् ॥ सर्वेषु हि वेदांतेषु वाक्यानि तात्पर्येणैतस्यार्थस्य प्रतिपादकत्वेन समनुगतानि ॥ सदेव सोम्येदमग्र आसीत् ॥ एकमे
वाद्वितीयमात्मा वा इदमेक एवाग्र आसीत् ॥ तदेतद्ब्रह्मापूर्वमनपरमनंतरमबाह्यं ॥ अयमात्मा ब्रह्म सर्वानुभूः ब्रह्मैवेदममृतं पु
रस्तादित्यादीनि ॥ न च तद्गतानां पदानां ब्रह्मस्वरूपविषये निश्चिते समन्वयेऽवगम्यमानेऽर्थांतरकल्पना युक्ता ॥ श्रुतहान्यश्रुत ॥ ३ ॥
कल्पनाप्रसंगात् ॥ न च तेषां कर्तृस्वरूपप्रतिपादनपरतावसीयते ॥ तत्केन कं पश्येदित्यादिक्रियाकारकफलनिराकरणश्रुतेः ॥
न च परिनिष्ठितवस्तुस्वरूपत्वेपि प्रत्यक्षादिविषयत्वं ॥ तत्त्वमसीति ब्रह्मात्मभावस्य शास्त्रमंतरेणानवगम्यमानत्वात् ॥ यत्तु हेयोपाद

9/1913

यरहितत्वात् ॥ उपदेशानर्थक्यमिति ॥ नैष दोषः ॥ हेयोपादेयशून्यब्रह्मात्मावगमादेव सर्वक्लेशप्रहाणात्पुरुषार्थसिद्धेः ॥ देवतादिप्रतिपा
दनस्य तु स्ववाक्यगतोपासनार्थत्वेपि न कश्चिद्विरोधः ॥ न तु तथा ब्रह्मण उपासनाविधिशेषत्वं संभवति ॥ एकत्वे हेयोपादेयशून्यतया
क्रियाकारकादिद्वैतविज्ञानोपमर्दोपपत्तेः ॥ न ह्येकत्वविज्ञानेनोन्मथितस्य द्वैतविज्ञानस्य पुनः संभवोस्ति येनोपासनाविधिशेषत्वं
ब्रह्म प्रतिपद्येत यद्यप्यन्यत्र वेदवाक्यानां विधिसंस्पर्शमंतरेण प्रमाणत्वं न दृष्टं ॥ तथाप्यात्मविज्ञानस्य फलपर्यंतत्वात्तन्न द्विषयस्य शा
स्त्रस्य प्रामाण्यं शक्यं प्रत्याख्यातुं ॥ न चानुमानगम्यं शास्त्रप्रामाण्यं ॥ येनान्यत्र दृष्टं निदर्शनमपेक्षेत ॥ तस्मात्सिद्धं ब्रह्मणः शास्त्र
प्रमाणकत्वं ॥ अत्रापरे प्रत्यवतिष्ठंते ॥ यद्यपि शास्त्रप्रमाणकं ब्रह्म तथापि प्रतिपत्तिविधिविषयतयैव शास्त्रेण ब्रह्म समर्प्यते ॥ यथा
यूपाहवनीयादीन्यलौकिकान्यपि विधिशेषतया शास्त्रेण समर्प्यंते ॥ तद्वत् ॥ कुत एतत् ॥ प्रवृत्तिनिवृत्तिप्रयोजनत्वाच्छास्त्रस्य ॥ तथाहि
शास्त्रतात्पर्यविद आहुः ॥ दृष्टो हि तस्यार्थः ॥ कर्मावबोधनं चोदनेति क्रियायाः प्रवर्तकं वचनं ॥ तस्य ज्ञानमुपदेशः ॥ तद्भूतानां क्रियार्थेन
समाम्नायः ॥ आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानामिति चातः पुरुषं क्वचिद्विषयविशेषे प्रवर्तयत् ॥ कुतश्चिद्विषयविशेषा
न्निवर्तयच्चार्थवच्छास्त्रं ॥ तच्छेषतया चान्यदुपयुक्तं ॥ तत्सामान्याद्वेदांतानामपि तथैवार्थवत्त्वं स्यात् ॥ सति च विधिपरत्वे यथा स्वर्गादि
कामस्याग्निहोत्रादिसाधनं विधीयते एवममृतत्वकामस्य ब्रह्मज्ञानं विधीयत इति युक्तं ॥ नन्विह जिज्ञास्यवैलक्षण्यमुक्तं ॥ कर्मकांडे
भव्यो धर्मो जिज्ञास्यः इह तु भूतं नित्यनिर्वृत्तं ब्रह्म जिज्ञास्यमिति तत्र धर्मज्ञानफलादनुष्ठानापेक्षाद्विलक्षणं ब्रह्मज्ञानफलं भवितुमर्ह
ति ॥ ॥ नार्हत्येवं भवितुं ॥ कार्यविधिप्रयुक्तस्यैव ब्रह्मणः प्रतिपाद्यमानत्वात् ॥ आत्मा वा अरे द्रष्टव्यः ॥ य आत्माऽपहतपाप्मा सोऽन्वे
ष्टव्यः स विजिज्ञासितव्यः आत्मेत्येवोपासीतात्मानमेव लोकमुपासीत ब्रह्म वेद ब्रह्मैव भवतीत्यादिषु हि विधानेषु सत्सु कोसावात्मा
ब्रह्मेत्याकांक्षायां तत्स्वरूपसमर्पणेन सर्वे वेदांता उपयुक्ताः नित्यः सर्वज्ञः सर्वगतो नित्यतृप्तो नित्यशुद्धबुद्धमुक्तस्वभावो विज्ञानमा
नंदं ब्रह्मेत्येवमादयस्तदुपासनाच्च शास्त्रदृष्टोऽदृष्टो मोक्षः फलं भविष्यतीति कर्तव्यविध्यननुप्रवेशे तु वस्तुमात्रकथने हानोपादानासं स्क
भवात् ॥ सप्तद्वीपा वसुमती राजासौ गच्छतीत्यादिवाक्यवद्वेदांतवाक्यानामानर्थक्यमेव स्यात् ॥ ननु वस्तुमात्रकथनेपि रज्जुरियं नायं स
र्प इत्यादौ भ्रांतिजनितभीतिनिवर्तनेनार्थवत्त्वं दृष्टं ॥ तथेहाप्यसंसार्यात्मवस्तुकथनेन संसारित्वभ्रांतिनिवर्तनेनार्थवत्त्वं स्यात् ॥

स्यादेतदेवंयदिरज्जुस्वरूपश्रवणाइवसर्पभ्रांतिःसंसारित्वभ्रांतिर्ब्रह्मस्वरूपश्रवणमात्रेणनिवर्तेतनतुनिवर्तते॥श्रुतब्रह्मणोपियथापूर्वंसु
खदुःखादिसंसारधर्मदर्शनात्॥श्रोतव्योमंतव्योनिदिध्यासितव्यइतिचश्रवणोत्तरकालयोर्मनननिदिध्यासनयोर्दर्शनात्तस्मात्प्रति
पत्तिविधिविषयतयैवशास्त्रप्रमाणकंब्रह्माभ्युपगंतव्यमितिअत्राभिधीयते॥नकर्मब्रह्मविद्याफलयोर्वैलक्षण्यात्शारीरंवाचिकंमा
नसंचकर्मश्रुतिस्मृतिप्रसिद्धंधर्माख्यंयद्विषयाजिज्ञासाथातोधर्मजिज्ञासेतिसूत्रिता॥अधर्मोपिहिंसादिप्रतिषेधचोदनालक्षणत्वा
ज्जिज्ञास्यःपरिहारायतयोश्चोदनालक्षणयोरर्थानर्थयोर्धर्माधर्मयोःफलेप्रत्यक्षेसुखदुःखेशरीरवाङ्मनोभिरेवोपभुज्यमानेविष
येंद्रियसंप्रयोगजन्येब्रह्मादिषुस्थावरांतेषुप्रसिद्धेमनुष्यत्वादारभ्यब्रह्मांतेषुदेहवत्सुसुखतारतम्यमनुश्रूयतेततश्चतद्धेतोर्धर्मस्यापि
तारतम्यंगम्यते॥धर्मतारतम्यादधिकारितारतम्यंप्रसिद्धंचार्थित्वसामर्थ्यविद्वत्तादिकृतमधिकारितारतम्यं॥तथाचयागाद्यनुष्ठायिनामे
वविद्यासमाधिविशेषादुत्तरेणपथागमनंकेवलैरिष्टापूर्तदत्तसाधनैर्धूमादिक्रमेणदक्षिणेनगमनंतत्रापिसुखतारतम्यंतत्साधनतारतम्यंचशास्त्रा
द्यावत्संपातमुषित्वेत्यस्माद्गम्यते॥तथामनुष्यादिषुनरकस्थावरांतेषुसुखलवश्चोदनालक्षणधर्मसाध्यएवेतिगम्यतेतारतम्येन
वर्तमानस्तथोर्ध्वगतेष्वधोगतेषुचदेहवत्सुदुःखतारतम्यदर्शनात्तद्धेतोरधर्मस्यप्रतिषेधचोदनालक्षणस्यतदनुष्ठायिनांचतार
तम्यंगम्यते॥एवमविद्यादिदोषवतांधर्माधर्मतारतम्यनिमित्तंशरीरोपादानपूर्वकंसुखदुःखतारतम्यमनित्यंसंसाररूपंश्रुतिस्मृ
तिन्यायप्रसिद्धं॥तथाचश्रुतिः॥नहवैसशरीरस्यसतःप्रियाप्रिययोरपहतिरस्तीतियथावर्णितंसंसाररूपमनुवदत्यशरीरंवाव
संतंनप्रियाप्रियेस्पृशतइतिप्रियाप्रियस्पर्शनप्रतिषेधात्॥चोदनालक्षणधर्मकार्यत्वंमोक्षाख्यस्याशरीरत्वस्यप्रतिषिध्यतइ
तिगम्यते॥धर्मकार्यत्वेहिप्रियाप्रियस्पर्शनप्रतिषेधोनोपपद्यते॥अशरीरत्वमेवधर्मकार्यमितिचेन्न।तस्यस्वाभाविकत्वादश
रीरंशरीरेष्वनवस्थेष्ववस्थितं॥महांतंविभुमात्मानंमत्वाधीरोनशोचति॥अप्राणोह्यमनाःशुभ्रोऽसंगोह्ययंपुरुषइत्यादिश्रुति
भ्योऽतएवानुष्ठेयफलविलक्षणंमोक्षाख्यमशरीरत्वंनित्यमितिसिद्धं॥तत्रकिंचित्परिणामिनित्यंस्याद्॥यस्मिन्विक्रियमाणे ॥ ४ ॥
पितदेवेदमितिबुद्धिर्नविहन्यते॥यथापृथिव्यादिजगन्नित्यत्ववादिनां॥यथाचसांख्यानांगुणाइदंतुपारमार्थिकंकूटस्थनित्यंव्यो
मवत्सर्वव्यापिसर्वक्रियारहितंनित्यतृप्तंनिरवयवंस्वयंज्योतिःस्वभावंयत्रधर्माधर्मौसहकार्येणकालत्रयंचनोपावर्तेते॥तद

रीरंमोक्षाख्यमन्यत्रधर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात्॥अन्यत्रभूताच्चभव्याच्चेत्यादिश्रुतिभ्योऽतस्तद्ब्रह्मयस्येयंजिज्ञासा
प्रस्तुता॥तद्यदिकर्तव्यशेषत्वेनोपदिश्येततेनचकर्तव्यत्वेनसाध्यश्चेन्मोक्षोभ्युपगम्येतानित्यएवस्यात्॥तत्रैवंसतियथोक्तक
र्मफलेष्वेवतारतम्यावस्थितेष्वनित्येषुकश्चिदतिशयोमोक्षइतिप्रसज्येत॥नित्यश्चमोक्षःसर्वैर्मोक्षवादिभिरभ्युपगम्यते॥अतोन
कर्तव्यशेषत्वेनब्रह्मोपदेशोयुक्तः॥अपिचब्रह्मवेदब्रह्मैवभवति॥क्षीयंतेचास्यकर्माणितस्मिन्दृष्टेपरावरे॥आनंदंब्रह्मणो
विद्वान्नबिभेतिकुतश्चनेति॥अभयंवैजनकप्राप्तोसि॥तदात्मानमेवावेदहंब्रह्मास्मीतितस्मात्तत्सर्वमभवत्॥तत्रकोमोहःकःशोक
एकत्वमनुपश्यतइत्येवमाद्याःश्रुतयोब्रह्मविद्यानंतरंमोक्षंदर्शयंत्योमध्येकर्तृकंकार्यांतरंवारयंति॥तद्धैतत्पश्यन्नृषिर्वामदे
वःप्रतिपेदेअहंमनुरभवंसूर्यश्चेतिब्रह्मदर्शनसर्वात्मभावयोर्मध्येकर्तव्यांतरवारणायोदाहार्यंयथातिष्ठन्गायतीतितिष्ठतिगाय
त्योर्मध्येतत्कर्तृकंकार्यांतरंनास्तीतिगम्यते॥त्वंहिनःपितायोस्माकमविद्यायाःपरंपारंतारयसिश्रुतंह्येवमेभगवद्दृशेभ्यस्तरति
शोकमात्मविदिति॥सोहंभगवःशोचामितंमाभगवाञ्छोकस्यपारंतारयत्वितितस्मैमृदितकषायायतमसःपारंदर्शयतिभगवान्
सनत्कुमारइतिचैवमाद्याःश्रुतयोमोक्षप्रतिबंधनिवृत्तिमात्रमेवात्मज्ञानस्यफलंदर्शयंति॥तथाचाचार्यप्रणीतंन्यायोपबृं
हितंसूत्रं॥दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापायेतदनंतरापायादपवर्गइति॥मिथ्याज्ञानापायमेवमोक्षंदर्शय
तिमिथ्याज्ञानापायश्चब्रह्मात्मैकत्वविज्ञानाद्भवति॥नचेदंब्रह्मात्मैकत्वविज्ञानंसंपद्रूपंयथानंतंवैमनोनंतावैविश्वेदेवाअ
नंतमेवसतेनलोकंजयतीति॥नचाध्यासरूपंयथामनोब्रह्मेत्युपासीतआदित्योब्रह्मेत्यादेशइतिचमनआदित्यादिषुब्रह्म
दृष्ट्यध्यासोनापिविशिष्टक्रियायोगनिमित्तंवायुर्वावसंवर्गःप्राणोवावसंवर्गइत्यादिवन्नाप्याज्यावेक्षणादिकर्मवत्कर्मा
गसंस्काररूपंसंपदादिरूपेहिब्रह्मात्मैकत्वविज्ञानेभ्युपगम्यमानेतत्त्वमस्यहंब्रह्मास्मिअयमात्माब्रह्मेत्येवमादीनांवा
क्यानांब्रह्मात्मैकत्ववस्तुप्रतिपादनपरःपदसमन्वयःपीड्येत॥भिद्यतेहृदयग्रंथिश्छिद्यंतेसर्वसंशयाः॥इतिचैवमादीनि
अविद्यानिवृत्तिफलश्रवणान्युपरुध्येरन्॥ब्रह्मवेदब्रह्मैवभवतीतिचैवमादीनितद्भावापत्तिवचनानिसंपदादिपक्षेनसा
मंजस्येनोपपद्येरन्॥तस्मान्नसंपदादिरूपंब्रह्मात्मैकत्वविज्ञानमतोनपुरुषव्यापारतंत्राब्रह्मविद्या॥किंतर्हिप्रत्यक्षादि

शं॰भा॰ ।। ५ ।।

प्रमाणाविषयवस्तुज्ञानवद्वस्तुतंत्रैवैवंभूतस्य च ब्रह्मणस्तज्ज्ञानस्य च न कयाचिद्युक्त्या शक्यः ।। कार्यानुप्रवेशः कल्पयितुं ।। न च वि
दिक्रियाकर्मत्वप्रतिषेधायैनेदं सर्वं विजानाति तं केन करणेन विजानीयादिति च ।। तथोपास्तिक्रियाकर्मत्वप्रतिषेधोपि भवति ।। य
द्वाचानभ्युदितं येन वागभ्युद्यत इत्यविषयत्वं ब्रह्मण उपन्यस्य तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासत इति ।। अविषयत्वे ब्रह्मणः शा
स्त्रयोनित्वानुपपत्तिरिति चेत ।। न ।। अविद्याकल्पितभेदनिवृत्तिपरत्वाच्छास्त्रस्य । न हि शास्त्रमिदंतया विषयभूतं ब्रह्म प्रतिपाद
यिषति ।। किं तर्हि प्रत्यगात्मत्वेनाविषयतया प्रतिपादयदविद्याकल्पितं वेद्यवेदितृवेदनादिभेदमपनयति ।। तथा च शास्त्रं यस्याम
तं तस्य मतं मतं यस्य न वेद सः ।। अविज्ञातं विजानतां विज्ञातमविजानतां ।। न दृष्टेर्द्रष्टारं पश्येर्न विज्ञातेर्विज्ञातारं विजानीयाः इति चैवमा
दि ।। अतोविद्याकल्पितसंसारित्वनिवर्तनेन नित्यमुक्तात्मस्वरूपसमर्पणान्न मोक्षस्यानित्यत्वदोषः ।। यस्य तूत्पाद्यो मोक्षस्तस्य
मानसं वाचिकं कायिकं वा कार्यमेवमपेक्षत इति युक्तं ।। तथा विकार्यत्वे च ।। तयोः पक्षयोर्मोक्षस्य ध्रुवमनित्यत्वं न हि दध्यादि विक
कार्यमुत्पाद्यं वा घटादि नित्यं दृष्टं लोके ।। न चाप्यत्वेनापि कार्यापेक्षा ।। आत्मस्वरूपत्वे सत्यनाप्यत्वात् स्वरूपव्यतिरिक्तत्वेपि ब्र
ह्मणोनाप्यत्वं सर्वगतत्वेन नित्याप्तस्वरूपत्वात्सर्वेण ब्रह्मण आकाशस्येव ।। नापि संस्कार्यो मोक्षो येन व्यापारमपेक्षेत ।। संस्कारो
हि नाम संस्कार्यस्य गुणाधानेन वा स्याद्दोषापनयनेन वा न तावद्गुणाधानेन संभवत्यनाधेयातिशयब्रह्मस्वरूपत्वान्मोक्षस्य ।। नापि
दोषापनयनेन नित्यशुद्धब्रह्मस्वरूपत्वान्मोक्षस्य स्वात्मधर्म एव संस्तिरोभूतो मोक्षः क्रिययात्मनि संस्क्रियमाणे भिव्यज्यते ।। यथाद
र्शे निघर्षणक्रियया संस्क्रियमाणे भास्वरत्वं धर्म इति चेन्न क्रियाश्रयत्वानुपपत्तेरात्मनो यदाश्रया क्रिया तमविकुर्वती नैवात्मानं ल
भते ।। यद्यात्मा क्रियया विक्रियेतानित्यत्वमात्मनः प्रसज्येत अविकार्योयमुच्यत इति चैवमादीनि वाक्यानि बाध्येरन् ।। तच्चानिष्टं तस्मा
न्न स्वाश्रया क्रियात्मनः संभवति ।। अन्याश्रयायास्तु क्रियायाः अविषयत्वान्न तयात्मा संस्क्रियेत ।। ननु देहाश्रयया स्नानाचमन
यज्ञोपवीतादिकया क्रियया देही संस्क्रियमाणो दृष्टः ।। न देहादिसंहतस्यैवाविद्यागृहीतस्यात्मनः संस्क्रियमाणत्वात् प्रत्यक्षं हि
स्नानाचमनादेर्देहसमवायित्वं ।। तया देहाश्रयया तत्संहत एव कश्चिदविद्ययात्मत्वेन परिगृहीतः संस्क्रियत इति युक्तं ।। यथा देहा ।।५।।
श्रयया चिकित्सया निमित्तेन धातुसाम्येन तत्संहतस्य तदभिमानिन आरोग्यफलमहमरोग इति यत्र बुद्धिरुत्पद्यत एवं स्नानाचमन

13/1913

यज्ञोपवीतादिनाहं शुद्धः संस्कृत इति यत्र बुद्धिरुत्पद्यते स संस्क्रियते । स च देहेन संहत एव । तेनैव ह्यहंकर्त्राहंप्रत्ययविषयेण प्रत्ययिना सर्वाः
क्रिया निर्वर्त्यन्ते । तत्फलं च स एवाश्नाति । तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति मंत्रवर्णात् । आत्मेन्द्रियमनोयुक्तं भो
क्तेत्याहुर्मनीषिण इति च । तथा एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा । कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केव
लो निर्गुणश्चेति । स पर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धमिति मंत्रावनाधेयातिशयतां नित्यशुद्धतां च ब्रह्म
णो दर्शयतः ब्रह्मभावश्च मोक्षस्तस्मान्न संस्कार्योपि मोक्षः अतोन्यन्मोक्षं प्रति क्रियानुप्रवेशद्वारं न शक्यं केनचिद्दर्शयितुं तज्ज्ञानमेकं
मुक्त्वा क्रियया गंधमात्रस्याप्यनुप्रवेश इह नोपपद्यते । ननु ज्ञानं नाम मानसी क्रिया । न । वैलक्षण्यात् । क्रिया हि नाम सा यत्र वस्तुस्व
रूपनिरपेक्षैव चोद्यते । पुरुषचित्तव्यापाराधीना च । यथा यस्यै देवताया हविर्गृहीतं स्यात्तां ध्यायेद्वषट्करिष्यन्निति संध्यां मनसा
ध्यायेदिति चैवमादिषु ।। ध्यानं ।। चिंतनं यद्यपि मानसं तथापि पुरुषेण कर्तुमकर्तुमन्यथा वा कर्तुं शक्यं । पुरुषतंत्रत्वात् । ज्ञानं तु प्रमा
णजन्यं । प्रमाणं तु यथाभूतवस्तुविषयमतो ज्ञानं कर्तुमकर्तुमन्यथा वा कर्तुमशक्यं । केवलवस्तुतंत्रमेव तन्न चोदनातंत्रं नापि पुरुषतंत्रं तस्मा
न्मानसत्वेपि ज्ञानस्य महद्वैलक्षण्यं ।। यथा च पुरुषो वाव गौतमाग्निर्योषा वाव गौतमाग्निरित्यत्र योषित्पुरुषयोरग्निबुद्धिर्मानसी
भवति केवलचोदनाजन्यत्वात् क्रियैव सा पुरुषतंत्रा च या तु प्रसिद्धेग्नावग्निबुद्धिर्न सा चोदनातंत्रा नापि पुरुषतंत्रा
किं तर्हि प्रत्यक्षविषयवस्तुतंत्रैवेति ज्ञानमेवैतन्न क्रिया एवं सर्वप्रमाणविषयवस्तुषु वेदितव्यं तत्रैवं सति यथाभूतब्रह्मात्मवि
षयमपि ज्ञानं न चोदनातंत्रं तद्विषये लिङादयः श्रूयमाणा अप्यनियोज्यविषयत्वात्कुंठीभवंत्युपलादिप्रयुक्तक्षुरतैक्ष्ण्या
दिवदहेयानुपादेयवस्तुविषयत्वात् किमर्थानि तर्हि आत्मा वा अरे द्रष्टव्य इत्यादीनि विधिच्छायानि वचनानि । स्वाभाविक
प्रवृत्तिविषयविमुखीकरणार्थानीति ब्रूमः । यो हि बहिर्मुखः प्रवर्तते पुरुष इष्टं मे भूयादनिष्टं मा भूदिति न च तत्र आत्यंति
कं पुरुषार्थं लभते तमात्यंतिकपुरुषार्थवांछिनं स्वाभाविकात्कार्यकरणसंघातप्रवृत्तिगोचराद्विमुखीकृत्य प्रत्यगात्मस्रोतस्त
या प्रवर्तयंत्यात्मा वा अरे द्रष्टव्य इत्यादीनि तस्याहेयमनुपादेयं चात्मतत्वमुपदिश्यत इदं सर्वं यदयमात्मा यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन

कंविजानीयाद्विज्ञातारमरेकेनविजानीयादयमात्माब्रह्मेत्यादिभिर्यद्यप्यकर्तव्यप्रधानमात्मज्ञानंहानायोपादानायवानभवतीतित
त्तथैवेत्यभ्युपगम्यते॥अलंकारोह्ययमस्माकंयद्ब्रह्मात्मावगतौसत्यांसत्यांसर्वकर्तव्यताहानिःकृतकृत्यताचेतितथाचश्रुति
रात्मानंचेद्विजानीयादयमस्मीतिपूरुषः॥किमिच्छन्कस्यकामायशरीरमनुसंज्वरेदिति॥एतद्बुद्ध्वाबुद्धिमान्स्यात्कृतकृत्यश्चभारतेति
चस्मृतेः॥तस्मान्नप्रतिपत्तिविधिविषयतयाब्रह्मणःसमर्पणं॥यदपिकेचिदाहुः॥प्रवृत्तिनिवृत्तिविधितच्छेषव्यतिरेकेणकेवलवस्तुवा
दीवेदभागोनास्तीति॥तन्न॥औपनिषदस्यपुरुषस्यानन्यशेषत्वात्॥योऽसावुपनिषत्स्वेवाधिगतःपुरुषोऽसंसारीब्रह्मोत्पाद्यादिच
तुर्विधद्रव्यविलक्षणःस्वप्रकरणस्थोऽनन्यशेषोनासौनास्तिनाधिगम्यतइतिवाशक्यंवदितुं॥सएषनेतिनेत्यात्मेत्यात्मशब्दात्॥
आत्मनश्चप्रत्याख्यानस्याशक्यत्वात्॥नन्वात्माहंप्रत्ययविषयत्वादुपनिषत्स्वेवविज्ञायतइत्यनुपपन्नं॥नतत्साक्षित्वेनप्रत्युक्तत्वा
त्॥नह्यहंप्रत्ययविषयकर्तृव्यतिरेकेणतत्साक्षीसर्वभूतस्थःसमएकरसःकूटस्थनित्यःपुरुषोविधिकांडेतर्कसमयेवाकेनचिदधिग
तःसर्वस्यात्मा॥अतःसनकेनचित्प्रत्याख्यातुंशक्यः॥विधिशेषत्वंवानेतुं॥आत्मत्वादेवचसर्वेषांनहेयोनाप्युपादेयः॥सर्वंहिविनश्यद्विका
रजातंपुरुषांतंविनश्यति॥पुरुषोविनाशहेत्वभावादविनाशीविक्रियाहेत्वभावाच्चकूटस्थनित्यः॥अतएवनित्यशुद्धबुद्धमुक्तस्वभावः॥
तस्मात्पुरुषान्नपरंकिंचित्साकाष्ठासापरागतिः॥तंत्वौपनिषदंपुरुषंपृच्छामीतिचौपनिषदत्वविशेषणंपुरुषस्योपनिषत्सुप्राधान्येन
प्रकाश्यमानत्वउपपद्यते॥अतोभूतवस्तुपरोवेदभागोनास्तीतिवचनंसाहसमात्रं॥यदपिशास्त्रतात्पर्यविदामनुक्रमणं॥दृष्टोहितस्यार्थः
कर्मावबोधनमित्येवमादितद्धर्मजिज्ञासाविषयत्वाद्विधिप्रतिषेधशास्त्राभिप्रायंद्रष्टव्यं॥अपिच॥आम्नायस्यक्रियार्थत्वा
दानर्थक्यमतदर्थानामित्येतदेकान्तेनाभ्युपगच्छतांभूतोपदेशानर्थक्यप्रसंगः॥प्रवृत्तिनिवृत्तिव्यतिरेकेणभूतंचेद्वस्तूपदिशतिभव्या
र्थत्वेनकूटस्थनित्यंभूतंनोपदिशतीतिकोहेतुः॥नहिभूतमुपदिश्यमानंक्रियाभवति॥अक्रियात्वेपिभूतस्यक्रियासाधनत्वात्क्रि
यार्थएवभूतोपदेशइतिचेत्॥नैवदोषः॥क्रियार्थत्वेपिक्रियानिर्वर्तनशक्तिमद्वस्तूपदिष्टमेव॥क्रियार्थत्वप्रयोजनंतस्य॥नचैता ॥ ६ ॥
वतावस्त्वनुपदिष्टंभवति॥यदिनामोपदिष्टंकिंतवतेनस्यादिति॥उच्यते॥अनवगतात्मवस्तूपदेशश्चतथैवभवितुमर्हति॥
तदवगत्यामिथ्याज्ञानस्यसंसारहेतोर्निवृत्तिःप्रयोजनंक्रियतइत्यविशिष्टमर्थवत्त्वंक्रियासाधनवस्तूपदेशेन॥अपिच॥ब्राह्म

णोनहंतव्यइत्येवमाद्यानिवृत्तिरुपदिश्यते॥नचसाक्रियानचक्रियासाधनं॥अक्रियार्थानामुपदेशोनर्थकश्चेत्ब्राह्मणोनहंतव्यइत्या
दिनिवृत्त्युपदेशानामानर्थक्यंप्राप्तंतच्चानिष्टं॥नचस्वभावप्राप्तंहंत्यर्थानुरागेणनञःशक्यमप्राप्तक्रियार्थत्वंकल्पयितुं॥हननक्रिया
निवृत्त्यौदासीन्यव्यतिरेकेण॥नञश्चैषस्वभावोयत्स्वसंबंधिनोऽभावंबोधयति॥अभावबुद्धिश्चौदासीन्यकारणं॥साचदग्धेंधनाग्निव
त्स्वयमेवोपशाम्यति॥तस्मात्प्रसक्तक्रियानिवृत्त्यौदासीन्यमेवब्राह्मणोनहंतव्यइत्यादिषुप्रतिषेधार्थंमन्यामहे॥अन्यत्रप्रजापति
व्रतादिभ्यः॥तस्मात्पुरुषार्थानुपयोग्युपाख्यानादिभूतार्थवादविषयमानर्थक्याभिधानंद्रष्टव्यं॥यदप्युक्तंकर्तव्यविध्यनुप्रवेशमंतरेण
वस्तुमात्रमुच्यमानमनर्थकंस्यात्सप्तद्वीपावसुमतीत्यादिवदिति॥तत्परिहृतं॥रज्जुरियंनायंसर्पइतिवस्तुमात्रकथनेपिप्रयोजनस्यदृष्ट
त्वात्॥ननुश्रुतब्रह्मणोपियथापूर्वंसंसारित्वदर्शनान्नरज्जुस्वरूपकथनवदर्थवत्त्वमित्युक्तं॥अत्रोच्यते॥नावगतब्रह्मात्मभावस्यय
थापूर्वंसंसारित्वंशक्यंदर्शयितुंब्रह्मात्मभावविरोधात्॥नहिशरीराद्यात्माभिमानिनोदुःखभयादिमत्त्वंदृष्टमितितस्यैववेदप्रमाणजनि
तब्रह्मात्मावगमेतदभिमाननिवृत्तौतदेवमिथ्याज्ञाननिमित्तंदुःखभयादिमत्त्वंभवतीतिशक्यंकल्पयितुं॥नहिधनिनोगृहस्थस्यधना
भिमानिनोधनापहारनिमित्तंदुःखंदृष्टमितितस्यैवप्रव्रजितस्यधनाभिमानरहितस्यतदेवधनापहारनिमित्तंदुःखंभवति॥नचकुं
डलिनःकुंडलित्वाभिमाननिमित्तंसुखंदृष्टमितितस्यैवकुंडलवियुक्तस्यकुंडलित्वाभिमानहीनस्यतदेवकुंडलित्वनिमित्तंसुखंभव
ति॥तदुक्तंश्रुत्या॥अशरीरंवावसंतंनप्रियाप्रियेस्पृशतइति॥शरीरेपतितेअशरीरत्वंस्यान्नजीवतइतिचेत्॥नसशरीरत्वस्यमिथ्याज्ञा
ननिमित्तत्वात्॥नह्यात्मनःशरीरात्माभिमानलक्षणंमिथ्याज्ञानंमुक्त्वान्यतःसशरीरत्वंशक्यं॥कल्पयितुंनित्यमशरीरत्वमकर्म
निमित्तत्वादित्यवोचाम॥तत्कृतधर्माधर्मनिमित्तंसशरीरत्वमितिचेत्॥नशरीरसंबंधस्यासिद्धत्वात्धर्माधर्मयोरात्मकृत
त्वासिद्धेः॥शरीरसंबंधस्यधर्माधर्मयोस्तत्कृतत्वस्यचेतरेतराश्रयत्वप्रसंगात्॥अंधपरंपरैषानादित्वकल्पना॥क्रियासमवायाभा
वाच्चात्मनःकर्तृत्वानुपपत्तेः॥सन्निधानमात्रेणराजप्रभृतीनांदृष्टंकर्तृत्वमितिचेत्॥न॥धनदानाद्युपार्जितभृत्यसंबंधित्वात्ते
षांकर्तृत्वोपपत्तेः॥नत्वात्मनोधनदानादिवच्छरीरादिभिःस्वस्वामिसंबंधनिमित्तंकिंचिच्छक्यंकल्पयितुं॥मिथ्याभिमान
स्तुप्रत्यक्षःसंबंधहेतुः॥एतेनयजमानत्वमात्मनोव्याख्यातं॥अत्राहुः॥देहादिव्यतिरिक्तस्यात्मनआत्मीयेदेहादावभिमानो

शां०भा०
॥७॥

गौणो न मिथ्येति। प्रसिद्धवस्तुभेदस्य गौणत्वमुख्यत्वप्रसिद्धेः॥ यस्य हि प्रसिद्धो वस्तुभेदो यथा केसरादिमानाकृतिविशेषोऽन्वयव्यतिरेका
भ्यां सिंहशब्दप्रत्ययभाङ्मुख्योऽन्यः सिद्धस्ततश्चान्यः पुरुषः प्रायिकैः क्रौर्यशौर्यादिभिः सिंहगुणैः सम्पन्नः सिद्धस्तस्य पुरुषे सिंहशब्द
प्रत्ययौ गौणौ भवतो नाप्रसिद्धवस्तुभेदस्य तस्य त्वन्यत्रान्यशब्दप्रत्ययौ भ्रान्तिनिमित्तावेव भवतो न गौणौ। यथा मंदांधकारे स्थाणुरय
मित्यगृह्यमाणविशेषे पुरुषशब्दप्रत्ययौ स्थाणुविषयौ यथा वा शुक्तिकायामकस्माद्रजतमिति निश्चितौ शब्दप्रत्ययौ स्थाणुविष
यौ यथा वा शुक्तिकायामकस्माद्रजतमिति निश्चितौ शब्दप्रत्ययौ। तद्वद्देहादिसंघातेऽहमिति निरुपचारेण शब्दप्रत्ययावात्मा
नात्माविवेकेनोत्पद्यमानौ कथं गौणौ शक्यौ वदितुं। आत्मानात्मविवेकिनामपि पंडितानामजाविपालानामिवाविविक्तौ शब्दप्र
त्ययौ भवतः। तस्माद्देहादिव्यतिरिक्तात्मास्तित्ववादिनां देहादावहंप्रत्ययो मिथ्यैव न गौणः। तस्मान्मिथ्याप्रत्ययनिमित्तत्वात्स
शरीरत्वस्य सिद्धं जीवतोऽपि विदुषोऽशरीरत्वं। तथा च ब्रह्मविद्विषया श्रुतिः। तद्यथाऽहिनिर्ल्वयनी वल्मीके मृता प्रत्यस्ता शयी
तैवमेवेदं शरीरं शेतेऽथायमशरीरोऽमृतः प्राणो ब्रह्मैव तेज एवेति। सचक्षुरचक्षुरिव सकर्णोऽकर्ण इव सवागवागिव समना अमना
इव सप्राणोऽप्राण इवेति च॥ स्मृतिरपि च। स्थितप्रज्ञस्य का भाषेत्याद्या स्थितप्रज्ञलक्षणान्याचक्षाणा विदुषः सर्वप्रवृत्त्यसंबंधं द
र्शयति। तस्मान्नावगतब्रह्मात्मभावस्य यथापूर्वं संसारित्वं नासाववगतब्रह्मात्मभाव इत्यनवद्यं॥ यत्पुनरुक्तं श्रवणात्पराचीनयोर्मन
ननिदिध्यासनयोर्दर्शनाद्विधिशेषत्वं ब्रह्मणो न स्वरूपपर्यवसायित्वमिति न। अवगत्यर्थत्वान्मनननिदिध्यासनयोः। यदि ह्यव
गतं ब्रह्मान्यत्र विनियुज्येत भवेत्तदा विधिशेषत्वं न तु तदस्ति मनननिदिध्यासनयोरपि श्रवणवदवगत्यर्थत्वात्॥ तस्मान्न प्रतिपत्ति
विधिविषयतया शास्त्रप्रमाणकत्वं ब्रह्मणः संभवतीति॥ अतः स्वतंत्रमेव ब्रह्म शास्त्रप्रमाणकं वेदांतवाक्यसमन्वयादिति सिद्धं॥
एवं च सत्यथातो ब्रह्मजिज्ञासेति शास्त्रारंभ उपपद्यते॥ प्रतिपत्तिविधिपरत्वे ह्यथातो धर्मजिज्ञासेत्येवारब्धत्वान्न पृथक्शास्त्र
मारभ्येत आरभ्यमाणं चैवमारभ्येताथातः परिशिष्टधर्मजिज्ञासेति॥ अथातः क्रत्वर्थपुरुषार्थयोर्जिज्ञासेतिवत् ब्रह्मात्मैक्या
वगतिस्त्वप्रतिज्ञातेति तदर्थो युक्तः शास्त्रारंभोऽथातो ब्रह्मजिज्ञासेति॥ तस्मादहं ब्रह्मास्मीत्येतदवसाना एव सर्वे विधयः
सर्वाणि चेतराणि प्रमाणानि॥ न ह्यहेयानुपादेयाद्वैतात्मावगतौ निर्विषयाण्यप्रमातृकाणि च प्रमाणानि भवितुमर्हंतीति॥ अ

पि चाहुः॥ गौणमिथ्यात्मनोऽसत्त्वे पुत्रदेहादिबाधनात्॥ सद्ब्रह्मात्माहमित्येवं बोधे कार्यं कथं भवेत्॥ अन्वेष्टव्यात्मविज्ञानात्प्राक्प्र
मातृत्वमात्मनः॥ अन्विष्टः स्यात्प्रमातैव पाप्मदोषादिवर्जितः॥ देहात्मप्रत्ययो यद्वत्प्रमाणत्वेन कल्पितः॥ लौकिकं तद्वदेवेदं प्रमाणं
त्वात्मनिश्चयादिति॥ एवं तावद्वेदांतवाक्यानां ब्रह्मात्मावगतिप्रयोजनानां तात्पर्येण समन्वितानामंतरेणापि कार्यानुप्रवेशं ब्रह्मणि
पर्यवसानमुक्तं ब्रह्म च सर्वज्ञं सर्वशक्ति जगदुत्पत्तिस्थितिनाशकारणमित्युक्तं सांख्यादयस्तु परिनिष्ठितं वस्तु प्रमाणांतरगम्यमेवे
ति मन्यमानाः प्रधानादीनि कारणांतराण्यनुमिमानास्तत्परतयैव वेदांतवाक्यानि योजयंति सर्वेष्वेव वेदांतवाक्येषु सृष्टिविषयेष्व
नुमानेनैव कार्येण कारणं लिलक्षयिषितं प्रधानपुरुषसंयोगा नित्यानुमेया इति सांख्या मन्यंते॥ काणादास्त्वेतेभ्य एव वाक्येभ्य
ईश्वरं निमित्तकारणमनुमिमते॥ अणूंश्च समवायिकारणमेवमन्येऽपि तार्किका वाक्याभासयुक्त्याभासावष्टंभाः पूर्वपक्षवादिन इहो
त्तिष्ठंते॥ तत्र पदवाक्यप्रमाणज्ञेनाचार्येण वेदांतवाक्यानां ब्रह्मावगतिपरत्वप्रदर्शनाय वाक्याभासयुक्त्याभासप्रतिपत्तयः पूर्वप
क्षीकृत्य निराक्रियंते॥ तत्र सांख्याः प्रधानं त्रिगुणमचेतनं जगतः कारणमिति मन्यमाना आहुर्यानि वेदांतवाक्यानि सर्वज्ञस्य सर्व
शक्तेर्ब्रह्मणो जगत्कारणत्वं प्रदर्शयंतीत्यवोचस्तानि प्रधानकारणपक्षेऽपि योजयितुं शक्यंते॥ सर्वशक्तित्वं तावत्प्रधानस्यापि स्ववि
कारविषयमुपपद्यते॥ एवं सर्वज्ञत्वमप्युपपद्यते॥ कथं यत्तु ज्ञानं मन्यसे स सत्त्वधर्मः॥ सत्त्वात्संजायते ज्ञानमिति स्मृतेः॥ तेन च सत्त्व
धर्मेण ज्ञानेन कार्यकारणवंतः पुरुषाः सर्वज्ञाः योगिनः प्रसिद्धाः॥ सत्त्वस्य हि निरतिशयोत्कर्षे सर्वज्ञत्वं प्रसिद्धं॥ न केवलस्याका
र्यकरणस्य पुरुषस्योपलब्धिमात्रस्य सर्वज्ञत्वं वा किंचिज्ज्ञत्वं वा कल्पयितुं शक्यं॥ त्रिगुणत्वात्तु प्रधानस्य सर्वज्ञानकरणभूतं सत्त्वं
प्रधानावस्थायामपि विद्यत इति प्रधानस्याचेतनस्यैव सतः सर्वज्ञत्वमुपचर्यते॥ वेदांतेष्ववश्यं च त्वयापि सर्वज्ञं च ब्रह्माभ्युपगच्छ
ता सर्वज्ञानशक्तिमत्त्वेनैव सर्वज्ञत्वमभ्युपगंतव्यं॥ न हि सर्वविषयं ज्ञानं कुर्वदेव ब्रह्म वर्तते॥ तथा हि ज्ञाननित्यत्वे ज्ञानक्रियां
प्रति स्वातंत्र्यं ब्रह्मणो हीयेत॥ अथानित्यं तदिति ज्ञानक्रियाया उपरमेतापि ब्रह्म॥ तदा सर्वज्ञानशक्तिमत्त्वेनैव सर्वज्ञत्वमापतति॥ अ
पि च प्रागुत्पत्तेः सर्वकारकशून्यं ब्रह्मेष्यते त्वया॥ न च साधनानां शरीरेंद्रियादीनामभावे ज्ञानोत्पत्तिः कस्यचिदुपपन्ना॥ अपि च प्र
धानस्यानेकात्मकस्य परिणामसंभवात्कारणत्वोपपत्तिर्मृदादिवत् संहतस्यैकात्मकस्य ब्रह्मण इत्येवं प्राप्ते इदं सूत्रमारभ्यते॥ ईक्षते

ब्रं०भा०
॥८॥

नीशब्दं॥ नसांख्यपरिकल्पितप्रधानमचेतनंजगतः कारणंशक्यंवेदांतेष्वाश्रयितुं॥ अशब्दंहितत्कथमशब्दत्वं॥ ईक्षतेरीक्षितृत्व
श्रवणात्कारणस्य॥ कथमेवंहिश्रूयते॥ सदेवसोम्येदमग्रआसीदेकमेवाद्वितीयमित्युपक्रम्यतदैक्षतबहुस्यांप्रजायेयेति॥ तत्तेजो
सृजतेति॥ तत्रेदंशब्दवाच्यंनामरूपव्याकृतंजगत्प्रागुत्पत्तेः सद्धात्मनावधार्यतस्यैवप्रकृतस्यसच्छब्दवाच्यस्येक्षणपूर्वकंतेजःप्र
भृतेःस्रष्टृत्वंदर्शयति॥ तथान्यत्रात्मावाइदमेकएवाग्रआसीन्नान्यत्किंचनमिषत् सईक्षतलोकान्नुसृजाइति सइमाँल्लोकानसृजतेति
ईक्षापूर्विकामेवसृष्टिमाचष्टे॥ क्वचिच्चषोडशकलंपुरुषंप्रस्तुत्याहसईक्षांचक्रे सप्राणमसृजतेतिईक्षापूर्विकामेवसृष्टिमाचष्टे॥ ईक्ष
तेरितिचधात्वर्थनिर्देशोऽभिप्रेतोयजतेरितिवन्नधातुनिर्देशस्तेनयःसर्वज्ञःसर्वविद्यस्यज्ञानमयंतपस्तस्मादेतद्ब्रह्मनामरूपमन्नंच
जायतइत्येवमादीन्यपिसर्वज्ञेश्वरकारणपराणिवाक्यान्युदाहर्तव्यानि॥ यत्तूक्तंसत्त्वधर्मेणज्ञानेनसर्वज्ञंप्रधानंभविष्यतीतितद
पिनोपपद्यते॥ नहिप्रधानावस्थायांगुणसाम्यात्सत्त्वधर्मोज्ञानंसंभवति॥ ननूक्तंसर्वज्ञानशक्तिमत्त्वेनसर्वज्ञत्वंभविष्यतीतितदपि
नोपपद्यते॥ यदिगुणसाम्येसतिसत्त्वव्यपाश्रयांज्ञानशक्तिमाश्रित्यसर्वज्ञंप्रधानमुच्येतकामंरजस्तमोव्यपाश्रयामपिज्ञानप्रतिबं
धशक्तिमाश्रित्याकिंचिज्ज्ञत्वमुच्येत॥ अपिचनासाक्षिकासत्त्ववृत्तिर्जानातिनाभिधीयते॥ नचाचेतनस्यप्रधानस्यसाक्षित्वमस्ति॥
तस्मादनुपपन्नंप्रधानस्यसर्वज्ञत्वं॥ योगिनांतुचेतनत्वात्सत्त्वोत्कर्षनिमित्तंसर्वज्ञत्वमुपपन्नमित्यनुदाहरणं॥ अथपुनःसाक्षिनिमि
त्तमीक्षितृत्वंप्रधानस्यकल्प्येत॥ यथाग्निनिमित्तमयःपिंडादेर्दग्धृत्वं॥ तथासतियन्निमित्तमीक्षितृत्वंप्रधानस्यतदेवसर्वज्ञंमुख्यं
ब्रह्मजगतःकारणमितियुक्तं॥ यत्पुनरुक्तंब्रह्मणोपिनमुख्यंसर्वज्ञत्वमुपपद्यते॥ नित्यज्ञानक्रियत्वेज्ञानक्रियांप्रतिस्वातंत्र्यासंभ
वादित्यत्रोच्यते॥ इदंतावद्भवान्प्रष्टव्यः॥ कथंनित्यज्ञानक्रियत्वेसर्वज्ञत्वहानिरिति॥ यस्यहिसर्वविषयावभासनक्षमंज्ञानंनित्य
मस्तिसोऽसर्वज्ञइतिविप्रतिषिद्धं॥ अनित्यत्वेहिज्ञानस्यकदाचिज्जानातिकदाचिन्नजानातीत्यसर्वज्ञत्वमपिस्यान्नासौज्ञाननित्य ॥८॥
त्वेदोषोस्ति॥ ज्ञाननित्यत्वेज्ञानविषयःस्वातंत्र्यव्यपदेशोनोपपद्यतइतिचेन्न॥ प्रततौष्ण्यप्रकाशेपिसवितरिदहतिप्रकाशयतीतिस्वा
तंत्र्यव्यपदेशदर्शनात्॥ ननुसवितुर्दाह्यप्रकाश्यसंयोगेदहतिप्रकाशयतीतिव्यपदेशःस्यात्॥ नतुब्रह्मणःप्रागुत्पत्तेर्ज्ञानकर्मसंयोगोस्ती-
तिविषमोदृष्टांतः॥ असत्यपिकर्मणिसविताप्रकाशतइतिकर्तृत्वव्यपदेशदर्शनादेवमसत्यपिज्ञानकर्मणिब्रह्मणस्तदैक्षतेतिकर्तृत्वव्यपदेशोपपत्ते

19/1913

नवैषम्यं॥ कर्मापेक्षयातुब्रह्मणईक्षितृत्वश्रुतयःसुतरामुपपन्नाः॥ किंपुनस्तत्कर्मयत्प्रागुत्पत्तेरीश्वरस्यज्ञानस्यविषयीभवतीति
तत्त्वान्यत्वाभ्यामनिर्वचनीयेनामरूपेअव्याकृतेव्याचिकीर्षितेइतिब्रूमः॥ यत्प्रसादाद्धियोगिनामप्यतीतानागतविषयंप्रत्यक्षंज्ञा
नमिच्छंतियोगशास्त्रविदः किमुवक्तव्यंतस्यनित्यसिद्धस्येश्वरस्यसृष्टिस्थितिसंहृतिविषयंनित्यज्ञानंभवतीति॥ यदप्युक्तंप्रागुत्पत्तेर्ब्र
ह्मणःशरीरादिसंबंधमंतरेणेक्षितृत्वमनुपपन्नमितिनतच्चोद्यमवतरति सवितृप्रकाशवद्ब्रह्मणोज्ञानस्वरूपनित्यत्वेज्ञानसाध
नापेक्षत्वानुपपत्तेः॥ अपिचाविद्यादिमतःसंसारिणःशरीराद्यपेक्षाज्ञानोत्पत्तिःस्यान्नज्ञानप्रतिबंधकारणरहितस्येश्वरस्य॥ मं
त्रौचेमावीश्वरस्यशरीराद्यनपेक्षतामनावरणज्ञानतांदर्शयतः॥ नतस्यकार्यंकरणंचविद्यतेनतत्समश्चाभ्यधिकश्चदृश्यते॥ प
रास्यशक्तिर्विविधैवश्रूयतेस्वाभाविकीज्ञानबलक्रियाचेति॥ अपाणिपादोजवनोग्रहीतापश्यत्यचक्षुःसशृणोत्यकर्णः॥ सवेत्तिवे
द्यंनचतस्यास्तिवेत्तातमाहुरग्र्यंपुरुषंमहांतमितिच॥ ननुनास्तितवज्ज्ञानप्रतिबंधकारणवानीश्वरादन्यःसंसारी॥ नान्योऽतोस्ति
द्रष्टानान्यतोस्तिश्रोतानान्योतोस्तिविज्ञातेत्यादिश्रुतेस्तत्रकिमिदमुच्यतेसंसारिणःशरीराद्यपेक्षाज्ञानोत्पत्तिर्नेश्वरस्येत्यत्रोच्यते॥
सत्यं॥ नेश्वरादन्यःसंसारी॥ तथापिदेहादिसंघातोपाधिसंबंधइष्यतएवघटकरकगिरिगुहाद्युपाधिसंबंधइवव्योम्नस्तत्कृतश्चशब्द
प्रत्ययव्यवहारोलोकस्यदृष्टोघटच्छिद्रंकरकादिच्छिद्रमित्यादिराकाशाव्यतिरेकेपितत्कृताचाकाशेघटाकाशादिभेदमिथ्याबुद्धिर्दृ
ष्टा॥ तथेहापिदेहादिसंघातोपाधिसंबंधाविवेककृतेश्वरसंसारिभेदमिथ्याबुद्धिः॥ दृश्यतेचात्मनएवसतोदेहादिसंघातेऽनात्मत्वा
भिनिवेशोमिथ्याबुद्धिमात्रेणपूर्वेण॥ सतिचैवंसंसारित्वेदेहाद्यपेक्षमीक्षितृत्वमुपपन्नंसंसारिणः॥ यदप्युक्तंप्रधानस्यानेकात्म
कत्वान्मृदादिवत्कारणत्वोपपत्तिः॥ नासंहतस्यब्रह्मणइति॥ तत्प्रधानस्याशब्दत्वेनैवप्रत्युक्तं॥ यथातुतर्केणापिब्रह्मणएवकारण
त्वंनिर्वोढुंशक्यते॥ नप्रधानादीनांतथाप्रपंचयिष्यति॥ नविलक्षणत्वादस्येत्येवमादिना॥ अत्राहयदुक्तंनाचेतनंप्रधानंजगत्कारण
मीक्षितृत्वश्रवणादितितदन्यथाप्युपपद्यते॥ अचेतनेपिचेतनवदुपचारदर्शनात्॥ प्रत्यासन्नपतनतांकूलस्यालक्ष्यकूलंपिप
तिषतीत्यचेतनेपिकूलेचेतनवदुपचारोदृष्टस्तद्वदचेतनेपिप्रधानेप्रत्यासन्नसर्गेचेतनवदुपचारोभविष्यतितदैक्षतेति॥ यथालो
केकश्चिच्चेतनःस्नात्वाभुक्त्वाचापराह्णेग्रामंरथेनगमिष्यामीतीक्षित्वानंतरंतथैवनियमेनप्रवर्तते॥ तस्माच्चेतनवदुपचर्यते॥ क

शां०भा० स्मात्पुनःकारणाद्विहायमुख्यमीक्षितृत्वमौपचारिकंकल्प्यते॥तत्तेजऐक्षतताआपऐक्षन्तेतिचाचेतनयोरप्यबन्तेजसोश्चेतनवदुप
॥१३॥ चारदर्शनात्तस्मात्सत्कर्तृकमपीक्षणमौपचारिकमितिगम्यते॥उपचारप्रायेवचनादित्येवंप्राप्तइदंसूत्रमारभ्यते॥गौणश्चेन्नात्मशब्दा
त्॥यदुक्तंप्रधानमचेतनंसच्छब्दवाच्यंतस्मिन्नौपचारिकईक्षतिः॥अप्तेजसोरिवेतितदसत्॥कस्मात्॥आत्मशब्दात्॥सदेवसोम्येद
मग्रआसीदित्युपक्रम्यतदैक्षततत्तेजोऽसृजतेतिच॥तेजोबन्नानांसृष्टिमुक्त्वातदेवप्रकृतंसदीक्षितृतानिचतेजोबन्नानिदेवताशब्दे
नपरामृश्याह॥सेयंदेवतैक्षतहन्ताहमिमास्तिस्रोदेवताअनेनजीवेनात्मनानुप्रविश्यनामरूपेव्याकरवाणीति॥तत्रयदिप्रधानमचेत
नंगुणवृत्त्येक्षितृकल्प्येत॥तदेवप्रकृतत्वात्सेयंदेवतेतिपरामृश्येत॥नतदादेवता॥जीवमात्मशब्देनाभिदध्यात्जीवोहिनामचेतनःश
रीराध्यक्षःप्राणानांधारयितातत्प्रसिद्धेः॥निर्वचनाच्च॥सकथमचेतनस्यप्रधानस्यात्माभवेत्॥आत्माहिनामस्वरूपंनाचेतनस्यप्रधा
नस्यचेतनोजीवःस्वरूपंभवितुमर्हति॥अथतुचेतनंब्रह्ममुख्यमीक्षितृपरिगृह्येततस्यजीवविषयआत्मशब्दप्रयोगउपपद्यते॥त
थासयएषोऽणिमैतदात्म्यमिदंसर्वंतत्सत्यंसआत्मातत्त्वमसिश्वेतकेतोइतिचेतनस्यश्वेतकेतोरात्मत्वेनोपदिशति॥अ
प्तेजसोस्तुविषयत्वादचेतनत्वंनामरूपव्याकरणादौचप्रयोज्यत्वेनैवनिर्देशान्नचात्मशब्दवत्किंचिन्मुख्यत्वेकारणमस्तीतियुक्तंकूलव
द्गौणत्वमीक्षितृत्वस्य॥तयोरपिसदधिष्ठितत्वापेक्षमेवेक्षितृत्वं॥सतस्त्वात्मशब्दान्नगौणमीक्षितृत्वमित्युक्तं॥अथोच्येताचेतनेपिप्र
धानेभवत्यात्मशब्दः॥आत्मनःसर्वार्थकारित्वाद्यथाराज्ञःसर्वार्थकारिणिभृत्येभवत्यात्मशब्दोममात्माभद्रसेनइति॥प्रधानंहिपुरुष-
स्यात्मनोभोगापवर्गौकुर्वदुपकरोतिराज्ञइवभृत्यःसंधिविग्रहादिषुवर्तमानः॥अथवैकएवात्मशब्दश्चेतनाचेतनविषयोभविष्यति॥भू
तात्मेंद्रियात्मेतिचप्रयोगदर्शनाद्यथैकएवज्योतिःशब्दःक्रतुज्वलनविषयः॥तत्रकुतएतत्॥आत्मशब्दादीक्षतेरगौणत्वमित्यतउत्त
रंपठति॥तन्निष्ठस्यमोक्षोपदेशात्॥नप्रधानमचेतनमात्मशब्दालंबनंभवितुमर्हति॥सआत्मेतिप्रकृतंसदणिमानमादायतत् ॥१३॥
त्वमसिश्वेतकेतोइतिश्वेतकेतोश्चेतनस्यमोक्षयितव्यस्यतन्निष्ठामुपदिश्याचार्यवान्पुरुषोवेदतस्यतावदेवचिरंयावन्नविमो
क्ष्येऽथसंपत्स्यइतिमोक्षोपदेशात्॥यदिह्यचेतनंप्रधानंसच्छब्दवाच्यंतदसीतिग्राहयेन्मुमुक्षुंचेतनंसंतमचेतनोसीतितदाविपरीतवादि
शास्त्रंपुरुषस्यानर्थायेत्यप्रमाणंस्यात्नतुनिर्दोषंशास्त्रमप्रमाणंकल्पयितुंयुक्तं॥यदिचाज्ञस्यसतोमुमुक्षोरचेतनमनात्मानमा

19/1913

त्मेत्युपदिशेत्प्रमाणभूतंशास्त्रंसश्रद्दधानतयांधगोलांगूलन्यायेनतदात्मदृष्टिंनपरित्यजेत्॥तद्व्यतिरिक्तंचात्मानंनप्रतिपद्येत॥तथासति
पुरुषार्थाद्विहन्येतानर्थंचार्छेत्तस्माद्यथास्वर्गाद्यर्थिनोऽग्निहोत्रादिसाधनंयथाभूतमुपदिशति॥तथामुमुक्षोरपिसआत्मातत्त्वमसिश्वेतके
तोइतियथाभूतमेवात्मानमुपदिशतीतियुक्तमेवंचसतितप्तपरशुग्रहणमोक्षदृष्टान्तेनसत्याभिसंधस्यमोक्षोपदेशउपपद्यते॥अन्य
थाह्यमुख्येसदात्मत्वोपदेशेऽहमुक्थमस्मीतिविद्यादितिवत्संपन्मात्रमिदमनित्यफलंस्यात्तत्रमोक्षोपदेशोनोपपद्येत॥तस्मान्नस
दणिमन्यात्मशब्दस्यगौणत्वं॥भृत्येतुस्वामिभृत्यभेदस्यप्रत्यक्षत्वादुपपन्नोगौणआत्मशब्दोममात्माभद्रसेनइति॥अपिचक्व-
चिद्गौणःशब्दोदृष्टइतिनैतावताशब्दप्रमाणकेऽर्थेगौणीकल्पनान्याय्यासर्वत्रानाश्वासप्रसंगात्॥यत्तूक्तंचेतनाचेतनयोःसाधारण
आत्मशब्दःक्रतुज्वलनयोरिवज्योतिःशब्दइतितन्नानेकार्थत्वस्यान्याय्यत्वात्तस्माच्चेतनविषयएवमुख्यआत्मशब्दश्चेतनत्वोपचा
राद्भूतादिषुप्रयुज्यतेभूतात्मेंद्रियात्मेतिचसाधारणत्वेप्यात्मशब्दस्यनप्रकरणमुपपदंवाकिंचिन्निश्चायकमंतरेणान्यतरवृत्तितानि
र्धारयितुंशक्यते॥नचात्राचेतनस्यनिश्चायकंकिंचित्कारणमस्ति॥प्रकृतंतुसदीक्षितृसन्निहितश्चचेतनःश्वेतकेतुः॥नहिचेतनस्य
श्वेतकेतोरचेतनआत्मासंभवतीत्यवोचाम॥तस्माच्चेतनविषयइहात्मशब्दइतिनिश्चीयते॥ज्योतिःशब्दोपिलौकिकेनप्रयोगेण
ज्वलनएवरूढोऽर्थवादप्रकल्पितेनतुज्वलनसादृश्येनक्रतौप्रवृत्तइत्यदृष्टान्तः॥ ॥अथवापूर्वसूत्रएवात्मशब्दं॥निरस्तसमस्तगौण
साधारणशंकतयाव्याख्यायततःस्वतंत्रएवप्रधानकारणनिराकरणहेतुर्व्याख्येयस्तन्निष्ठस्यमोक्षोपदेशादिति॥तस्मान्नाचे
तनंप्रधानंसच्छब्दवाच्यं॥हेयत्वावचनाच्च॥यद्यनात्मैवप्रधानंसच्छब्दवाच्यं॥सआत्मातत्त्वमसीतीहोपदिष्टंस्यात्॥सतदुपदे
शश्रवणादनात्मज्ञतयातन्निष्ठोमाभूदितिमुख्यमात्मानमुपदिदिक्षुस्तस्यहेयत्वंब्रूयाद्यथारुंधतींदिदर्शयिषुःस्तत्समीपस्थां
स्थूलांताराममुख्यांप्रथममरुंधतीतिग्राहयित्वातांप्रत्याख्यायपश्चादरुंधतीमेवग्राहयतितद्वन्नायमात्मेतिब्रूयात्॥नचैवमवोचत्सन्मात्रा
त्मावगतिनिष्ठैवहिषष्ठप्रपाठकपरिसमाप्तिर्दृश्यतेचशब्दःप्रतिज्ञाविरोधाभ्युच्चयप्रदर्शनार्थः॥सत्यपिहेयत्ववचनेप्रतिज्ञावि
रोधःप्रसज्येत॥कारणविज्ञानाद्धिसर्वंविज्ञातमितिप्रतिज्ञातमुततमादेशमप्राक्ष्योयेनाश्रुतंश्रुतंभवत्यमतंमतमविज्ञातंविज्ञात
मितिकथंनुभगवःसआदेशोभवतीति॥यथासोम्यैकेनमृत्पिंडेनसर्वंमृन्मयंविज्ञातंस्याद्वाचारंभणंविकारोनामधेयंमृत्तिकेत्येव

शं॰भा॰ ॥१०॥ सत्यमेवं सौम्य सः आदेशो भवतीति वाक्योपक्रमे श्रवणात् न तस्य छब्दवाच्ये प्रधाने भोग्यवर्गकारणे हेयत्वेनाहेयत्वेन वा विज्ञाते
भोक्तृवर्गो विज्ञातो भवत्यप्रधानविकारत्वाद्भोक्तृवर्गस्य॥ तस्मान्न प्रधानं सच्छब्दवाच्यं कुतश्च न प्रधानं सच्छब्दवाच्यं॥ स्वाप्ययात्॥
तदेव सच्छब्दवाच्यं कारणं प्रकृत्य श्रूयते॥ यत्रैतत्पुरुषः स्वपिति नाम सता सौम्य तदा संपन्नो भवति स्वमपीतो भवति॥ तस्मादेनं स्वपि
तीत्याचक्षते॥ स्वं ह्यपीतो भवतीति॥ एषा श्रुतिः स्वपितीत्येतत्पुरुषस्य लोकप्रसिद्धं नाम निर्वक्ति॥ स्वशब्देनेहात्मोच्यते॥ यः प्रकृतः स
च्छब्दवाच्यः समपीतो भवत्यपिगतो भवतीत्यर्थः॥ अपिपूर्वस्यैतेर्लयार्थत्वं प्रसिद्धं॥ प्रभवाप्ययावित्युत्पत्तिप्रलययोः प्रयोगदर्शना
त्॥ आत्मनः प्रचारोपाधिविशेषसंबंधादिंद्रियार्थान् गृह्णंस्तद्विशेषापन्नो जीवो जागर्ति तद्वासनाविशिष्टः स्वप्नान् पश्यन् मनःश
ब्दवाच्यो भवति॥ स उपाधिद्वयोपरमे सुषुप्तावस्थायामुपाधिकृतविशेषाभावात्स्वात्मनि प्रलीन इवेति स्वं ह्यपीतो भवतीत्युच्यते
यथा हृदयशब्दनिर्वचनं श्रुत्या दर्शितं॥ स वा एष आत्मा हृदि तस्यैतदेव निरुक्तं हृद्ययमिति तस्माद्धृदयमिति॥ यथा वाशनायोदन्या
शब्दस्य प्रवृत्तिमूलं दर्शयति॥ श्रुतिः आप एव तदशितं नयंते॥ तेज एव तत्पीतं नयत इति च एवं स्वमात्मानं सच्छब्दवाच्यमपीतो भवतीति
इममर्थं स्वपितिनामनिर्वचनेन दर्शयति॥ न च चेतन आत्मा चेतनं प्रधानं स्वरूपत्वेन प्रतिपद्येत॥ यदि पुनः प्रधानमेवात्मीयत्वात्
स्वशब्देनोच्येतैवमपि चेतनोऽचेतनमप्येतीति विरुद्धमापद्येत॥ श्रुत्यंतरं च॥ प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नांतरमि
ति सुषुप्तावस्थायां चेतनेऽप्ययं दर्शयति॥ अतो यस्मिन्नप्ययः सर्वेषां चेतनानां तच्चेतनं सच्छब्दवाच्यं जगतः कारणं न प्रधानं॥ कुतश्च
न प्रधानं जगतः कारणं॥ ॥गतिसामान्यात्॥ ॥यदि तार्किकसमय इव वेदांतेष्वपि भिन्ना कारणावगतिरभविष्यत्॥ क्वचिच्चेतनं
ब्रह्म जगतः कारणं क्वचिदचेतनं प्रधानं क्वचिदन्यदेवेति॥ ततः कदाचित्प्रधानकारणवादानुरोधेनापीक्षत्यादिश्रवणमकल्प
यिष्यत्॥ न त्वेतदस्ति॥ समानैव हि सर्वेषु वेदांतेषु चेतनकारणतावगतिः॥ यथाग्नेर्ज्वलतः सर्वा दिशो विस्फुलिंगा विप्रतिष्ठेरन्नेवमे ॥१०॥
वैतस्मादात्मनः सर्वे प्राणा यथायतनं विप्रतिष्ठंते॥ प्राणेभ्यो देवा देवेभ्यो लोका इति॥ तस्माद्वा एतस्मादात्मन आकाशः संभूत इति॥
च आत्मत एवेदं सर्वमिति॥ आत्मन एष प्राणो जायत इति॥ आत्मनः कारणत्वं दर्शयंति॥ सर्वे वेदांताः आत्मशब्दः चेतनवचन
इत्यवोचाम॥ महच्च प्रामाण्यकारणमेतद्यद्वेदांतवाक्यानां चेतनकारणत्वे समानगतित्वं चक्षुरादीनामिव रूपादिषु अतो गतिसामान्या

21/1913

सर्वज्ञं ब्रह्म जगतः कारणं॥ कुतश्च सर्वज्ञं ब्रह्म जगतः कारणं॥ श्रुतत्वाच्च॥ स्वशब्देनैव च सर्वज्ञ ईश्वरः जगतः कारणमिति॥ श्रूयते॥ श्वे
ताश्वतराणां मंत्रोपनिषदि सर्वमीश्वरं प्रकृत्य स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिप इति॥ तस्मात्सर्वज्ञं ब्र
ह्म जगतः कारणं नाचेतनं प्रधानमन्यद्वेति सिद्धं॥ जन्माद्यस्य यत इत्यारभ्य श्रुतत्वाच्चेत्येवमंतैः सूत्रैर्यान्युदाहृतानि वेदांतवाक्या-
नि तेषां सर्वज्ञः सर्वशक्तिरीश्वरो जगतो जन्मस्थितिलयकारणमित्येतस्यार्थस्य प्रतिपादकत्वं न्यायपूर्वकं प्रतिपादितं॥ गतिसा
मान्योपन्यासेन च सर्वे वेदांताश्चेतनकारणवादिन इति व्याख्यातमतः परस्य ग्रंथस्य किमुत्थानमुच्यते॥ द्विरूपं हि ब्रह्मावगम्यते॥
विकार नामरूपभेदोपाधिविशिष्टं॥ तद्विपरीतं च सर्वोपाधिवर्जितं॥ यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति॥ यत्र त्वस्य सर्वमात्मैवा
भूत्तत्केन कं पश्येत् यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा॥ अथ यत्रान्यत्पश्यत्यन्यच्छृणोत्यन्यद्विजानाति तदल्पं॥
यो वै भूमा तदमृतमथ यदल्पं तन्मर्त्यं॥ सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाभिवदन्यदास्ते॥ निष्कलं निष्क्रियं शांतं निरवद्यं
निरंजनं॥ अमृतस्य परं सेतुं दग्धेंधनमिवानलं॥ नेति नेति॥ अस्थूलमनण्वमह्रस्वमदीर्घमिति॥ न्यूनमन्यत्स्थानं संपूर्णमन्यदिति चैवं
सहस्रशो विद्याविद्याविषयभेदेन ब्रह्मणो द्विरूपतां दर्शयंति वाक्यानि॥ तत्राविद्यावस्थायां ब्रह्मण उपास्योपासकादिलक्षणः॥
सर्वो व्यवहारः तत्र कानिचिद्ब्रह्मण उपासनान्यभ्युदयार्थानि कानिचित्क्रममुक्त्यर्थानि कानिचित्कर्मसमृद्ध्यर्थानि तेषां गुणविशे
षोपाधिभेदेन भेदः एक एव तु परमेश्वरस्तैस्तैर्गुणविशेषैर्विशिष्ट उपास्यो यद्यपि भवति तथापि यथागुणोपासनमेव फलानि भिद्यं
ते यथा यथोपासते तदेव भवतीति श्रुतेः यथा क्रतुरस्मिँल्लोके पुरुषो भवति तथेतः प्रेत्य भवतीति च॥ यं यं वापि स्मरन्भावं त्यजत्यंते
कलेवरं॥ तं तमेवैति कौंतेय सदा तद्भावभावित इति यद्यप्येक आत्मा सर्वभूतेषु स्थावरजंगमेषु गूढस्तथापि चित्तोपाधिविशेषतारत
म्यादात्मनः कूटस्थनित्यस्यैकरूपस्याप्युत्तरोत्तरमाविष्कृतस्य तारतम्यमैश्वर्यशक्तिविशेषैः श्रूयते॥ तस्य य आत्मानमाविस्तरां
वेदेत्यत्र स्मृतावपि यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा॥ तत्तदेवावगच्छ त्वं मम तेजोंशसंभवमिति॥ यत्र यत्र विभूत्याद्यतिशयः स
स ईश्वर इत्युपास्यतया चोद्यते॥ एवमिहाप्यादित्यमंडले हिरण्मयः पुरुषः सर्वपाप्मोदयलिंगात् पर एवेति वक्ष्यति॥ एवमा
काशस्तल्लिंगादित्यादिषु द्रष्टव्यमेवं सद्योमुक्तिकारणमप्यात्मज्ञानमुपाधिविशेषद्वारेणोपदिश्यमानमप्यविवक्षितोपाधिविशे

शां० भा०
॥ ११॥

षं परापरविषयत्वेन संदिह्यमानं वाक्यगतिपर्यालोचनया निर्णेतव्यं भवति॥ तथेहैव तावदानंदमयोऽभ्यासादिति॥ एवमेकं ब्र
ह्मापेक्षितोपाधिसंबंधं वोपास्यत्वेन ज्ञेयत्वेन वेदांतेषूपदिश्यत इति प्रदर्शयितुं परो ग्रंथ आरभ्यते॥ तच्च गतिसामान्यादित्यचेत
नकारणनिराकरणमुक्तं॥ तदपि वाक्यांतराणि ब्रह्मविषयाणि व्याचक्षाणेन ब्रह्मविपरीतकारणनिषेधेन प्रपंच्यते॥ आनंदम
योऽभ्यासात्॥ तैत्तरीयके अन्नमयं प्राणमयं मनोमयं विज्ञानमयं चानुक्रम्याम्नायते॥ तस्माद्वा एतस्माद्विज्ञानमयादन्योंतर आ
त्मानंदमय इति॥ तत्र संशयः॥ किमिहानंदमयशब्देन परमेव ब्रह्मोच्यते यत्प्रकृतं सत्यं ज्ञानमनंतं ब्रह्मेति॥ किं वाऽन्नमयादि
वद्ब्रह्मणोऽर्थांतरमिति किं तावत्प्राप्तं ब्रह्मणोऽर्थांतरममुख्य आत्मानंदमयः स्यात् कस्मादन्नमयाद्यमुख्यात्मप्रवाहपतितत्वात् अथा
पि स्यात्॥ सर्वांतरत्वादानंदमयो मुख्य एवात्मेति॥ न स्यात्प्रियाद्यवयवयोगाच्छरीरत्वश्रवणाच्च॥ मुख्यश्चेदात्मा आनंदमयः
स्यान्न प्रियादिसंस्पर्शः स्यात्॥ इह तु तस्य प्रियमेव शिर इति श्रूयते॥ शारीरत्वं च श्रूयते॥ तस्यैष एव शारीर आत्मा यः पूर्वस्येति॥ त
स्य पूर्वस्य विज्ञानमयस्यैष एव शारीर आत्मा॥ य एष आनंदमय इत्यर्थः॥ न च सशरीरस्य सतः प्रियाप्रियसंस्पर्शो वारयितुं श
क्यः॥ तस्मात्संसार्येवानंदमय आत्मेत्येवं प्राप्त इदमुच्यते॥ आनंदमयोऽभ्यासात्॥ पर एवानंदमयो भवितुमर्हति॥ कुतो अभ्या
सात्॥ परस्मिन्नेवात्मन्यानंदशब्दो बहुकृत्वोऽभ्यस्यते॥ आनंदमयं प्रस्तुत्य रसो वै स इति तस्यैव रसत्वमुक्त्वोच्यते॥ रसं ह्येवायं
लब्ध्वानंदी भवति॥ को ह्येवान्यात्कः प्राण्यात् यदेष आकाश आनंदो न स्यात् एष ह्येवानंदयाति सैषानंदस्य मीमांसा भवति॥ एतमा
नंदमयमात्मानमुपसंक्रामति॥ आनंदं ब्रह्मणो विद्वान्न बिभेति कुतश्चनेति॥ आनंदो ब्रह्मेति व्यजानादिति च॥ श्रुत्यंतरे च वि
ज्ञानमानंदं॥ ब्रह्मण्येवानंदशब्दो दृष्टः एवमानंदशब्दस्य बहुकृत्वो ब्रह्मण्यभ्यासादानंदमय आत्मा ब्रह्मेति गम्यते॥ यत्तूक्तम
न्नमयाद्यमुख्यात्मप्रवाहपतितत्वादानंदमयस्याप्यमुख्यत्वमिति॥ नासौ दोषः॥ आनंदमयस्य सर्वांतरत्वात्॥ मुख्यमेव ह्या
त्मानमुपदिदिक्षु शास्त्रं लोकबुद्धिमनुसरदन्नमयं शरीरमनात्मानं मूढानामात्मत्वेन प्रसिद्धमनूद्य मूषानिषिक्तद्रु ॥ ११॥
तताम्रादिप्रतिमावत्ततोंतरं ततोंतरमित्येवं पूर्वेण पूर्वेण समानमुत्तरमुत्तरमनात्मानमात्मेति ग्राहयत्प्रतिपत्तिसौ
कर्यापेक्षया सर्वांतरं मुख्यमानंदमयमात्मानमुपदिदेशेति श्लिष्टतरं॥ यथारुंधतीनिदर्शने बह्वीष्वपि तारास्वमुख्यासु

शां० भा०
॥ १२॥

भार्गवी वारुणी विद्या॥ तस्मादानंदमयः पर एवात्मा॥ नेतरोऽनुपपत्तेः॥ ॥ इतश्चानंदमयः पर एवात्मा नेतरः॥ इतर ईश्वरादन्यः संसा
री जीव इत्यर्थः॥ न जीव आनंदमयशब्देनाभिधीयते॥ कस्मादनुपपत्तेरानंदमयं हि प्रकृत्य श्रूयते॥ सोऽकामयत॥ बहु स्यां प्रजायेयेति
स तपोऽतप्यत स तपस्तप्त्वा इदं सर्वमसृजत यदिदं किंचेति॥ तत्र प्राक्शरीराद्युत्पत्तेरभिध्यानं सृज्यमानानां च विकाराणां स्रष्टुरव्य
तिरेकः सर्वविकारसृष्टिश्च न परस्मादात्मनोऽन्यत्रोपपद्यते॥ भेदव्यपदेशाच्च॥ इतश्चानंदमयः संसारी यस्मादानंदमयाधिकारे रसो
वै सः॥ रसं ह्येवायं लब्ध्वानंदी भवतीति जीवानंदमयौ भेदेन व्यपदिशति॥ न हि लब्धैव लब्धव्यो भवतीत्युक्तं कथं तर्ह्यात्माऽन्वेष्टव्य
आत्मलाभान्न परं किंचिद्विद्यत इति च श्रुतिस्मृती॥ यावता न लब्धैव लब्धव्यो भवतीत्युक्तं॥ बाढं॥ तथाप्यात्मनोऽप्रच्युतात्मभावस्यै
व सतस्तत्त्वानवबोधनिमित्तो देहादिष्वनात्मस्वात्मत्वनिश्चयो लौकिको दृष्टस्तेन देहादिभूतस्यात्मनो आत्माऽनन्विष्टोऽन्वेष्टव्योऽलब्धो
लब्धव्योऽश्रुतः श्रोतव्योऽमतो मंतव्योऽविज्ञातो विज्ञातव्य इत्यादि भेदव्यपदेश उपपद्यते॥ प्रतिषिध्यत एव तु परमार्थतः सर्वज्ञात्प
रमेश्वरादन्यो द्रष्टा श्रोता वा॥ नान्योऽतोऽस्ति द्रष्टेत्यादिना॥ परमेश्वरस्त्वविद्याकल्पिताच्छारीरात्कर्तुर्भोक्तुर्विज्ञानात्माख्यात् अन्यो य
था मायाविनश्चर्मखड्गधरात्सूत्रेणाकाशमधिरोहतः स एव मायावी परमार्थरूपो भूमिष्ठोऽन्यो यथा वा घटाकाशादुपाधिपरि
रपविच्छिन्न आकाशोऽन्य ईदृशं च विज्ञानात्मपरमात्मभेदमाश्रित्य नेतरोऽनुपपत्तेर्भेदव्यपदेशाच्चेत्युक्तं॥ कामाच्च नानुमानापेक्षा॥
आनंदमयाधिकारे च सोऽकामयत बहु स्यां प्रजायेयेति कामयितृत्वनिर्देशान्नानुमानिकमपि सांख्यपरिकल्पितमचेतनं प्रधा
नमानंदमयत्वेन कारणत्वेन वापेक्षितव्यं॥ ईक्षतेर्नाशब्दमिति निराकृतमपि प्रधानं पूर्वसूत्रोदाहृतां कामयितृत्वश्रुतिमाश्रित्य
प्रसंगात्पुनर्निराक्रियते गतिसामान्यप्रपंचनाय॥ ॥ अस्मिन्नस्य च तद्योगं शास्ति॥ ॥ इतश्च न प्रधाने जीवे वानंदमयशब्दो
यस्मादस्मिन्नानंदमये प्रकृत आत्मनि प्रतिबुद्धस्यास्य जीवस्य तद्योगं शास्ति॥ तदात्मना योगस्तद्योगस्तद्भावापत्तिर्मुक्ति ॥ १२॥
रित्यर्थः॥ तद्योगं शास्ति शास्त्रं॥ यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विंदते॥ अथ सोऽभयं गतो
भवति॥ यदा ह्येवैष एतस्मिन्नुदरमंतरं कुरुते अथ तस्य भयं भवतीति एतदुक्तं भवति॥ यदैतस्मिन्नानंदमयेऽल्पमप्यंतर
मतादात्म्यरूपं पश्यति तदा संसारभयान्न निवर्तते॥ यदा त्वेतस्मिन्नानंदमये निरंतरं तादात्म्येन प्रतितिष्ठति तदा संसारभया

कं धतीमुदर्शितासु अंतं प्रदर्श्यते सा मुख्यैवारुंधती भवत्येवमिहाप्यानंदमयस्य सर्वांतरत्वान्मुख्यमात्मत्वं॥ यत्तूक्तं प्रियादी-
नां शिरस्त्वादिकल्पनानुपपन्ना मुख्यस्यात्मन इत्यतीतानंतरोपाधिजनिता सा न स्वाभाविकी न दोषः॥ विकारशब्दान्नेति चेन्न
प्राचुर्यात्॥ अत्राह नानंदमयः परमात्मा भवितुमर्हति॥ कस्माद्विकारशब्दात्प्रकृतिवचनात्॥ अयमन्यः शब्दो विकारः प्रकृतिवचनः
समधिगत आनंदमय इति मयटो विकारार्थत्वात्तस्मादन्नमयादिशब्दवद्विकारविषय एवायमानंदमयशब्द इति चेन्न॥ प्राचुर्यार्थे
पि मयटः स्मरणात्तत्प्रकृतवचने मयडिति हि प्रचुरतायामपि मयट् स्मर्यते॥ यथान्नमयो यज्ञ इत्यन्नप्रचुर उच्यते॥ एवमानंदप्रचुरं
ब्रह्मानंदमयमुच्यते॥ आनंदप्रचुरत्वं च॥ ब्रह्मणो मनुष्यत्वादारभ्योत्तरस्मिन्नुत्तरस्मिन्स्थाने शतगुण आनंद इत्युक्त्वा ब्रह्मानंद
स्य निरतिशयत्वावधारणात्तस्मात्प्राचुर्यार्थे मयट्॥ तद्धेतुव्यपदेशाच्च॥ इतश्च प्राचुर्यार्थे मयट्॥ यस्मादानंदहेतुत्वं ब्रह्मणो व्यपदि
शति॥ श्रुतिरेष ह्येवानंदयातीति॥ आनंदयतीत्यर्थः॥ यो ह्यन्यानानंदयति॥ स प्रचुरानंद इति प्रसिद्धं भवति॥ यथा लोके योन्येषां ध
निकत्वमापादयति स प्रचुरधन इति गम्यते॥ तद्वत्तस्मात्प्राचुर्यार्थेपि मयटः संभवादानंदमयः पर एव आत्मा॥ मांत्रवर्णिकमेव च
गीयते॥ ॥ इतश्चानंदमयः पर एवात्मा॥ यस्माद्ब्रह्मविदाप्नोति परमित्युपक्रम्य सत्यं ज्ञानमनंतं ब्रह्मेति यस्मिन्मंत्रे यद्ब्रह्म सत्यज्ञा
नानंतवि शेषणैर्निर्धारितं॥ यस्मादाकाशादिक्रमेण स्थावरजंगमानि भूतान्यजायंत यच्च भूतानि सृष्ट्वा तान्यनुप्रविश्य गुहायाम
वस्थितं सर्वांतरं॥ यस्य विज्ञानमयादन्योंतर आत्मेति प्रक्रांतं तन्मांत्रवर्णिकमेव ब्रह्मेह गीयते॥ अन्योंतर आत्मानंदमय इति मंत्रब्रा
ह्मणयोश्चैकार्थत्वं युक्तमविरोधादन्यथा हि प्रकृतहानाप्रकृतप्रक्रिये स्यातां॥ न चान्नमयादिभ्य इवानंदमयादन्योंतर आत्माभि
धीयते॥ एतन्निष्ठैव च सैषा भार्गवी वारुणी विद्या॥ तस्मादानंदमयः पर एवात्मा॥ नेतरोनुपपत्तेः॥ इतश्चानंदमयः पर ए
वात्मा यस्माद्ब्रह्मविदाप्नोति परमित्युपक्रम्य सत्यं ज्ञानमनंतं ब्रह्मेत्यस्मिन्मंत्रे यद्ब्रह्म सत्यज्ञानानंतविशेषणैर्निर्धारितं॥ यस्मादा
काशादिक्रमेण स्थावरजंगमानि भूतान्यजायंत यच्च भूतानि सृष्ट्वा तान्यनुप्रविश्य गुहायामवस्थितं सर्वांतरं यस्य विज्ञानमया
दन्योंतर आत्मेति प्रक्रांतं तन्मांत्रवर्णिकमेव ब्रह्मेह गीयते अन्योंतर आत्मानंदमय इति मंत्रब्राह्मणयोश्चैकार्थत्वं युक्तमविरोधा
दन्यथा हि प्रकृतहानाप्रकृतप्रक्रिये स्यातां॥ न चान्नमयादिभ्य इवानंदमयादन्योंतर आत्माभिधीयते॥ एतन्निष्ठैव च सैषा

25/1913

न्निवर्तत इति॥ न च परमात्मपरिग्रहे घटते॥ न प्रधानपरिग्रहे घटते॥ जीवपरिग्रहे वा॥ तस्मादानंदमयः परमात्मेति स्थितं॥ इदं त्विह व-
क्तव्यं॥ स वा एष पुरुषोन्नरसमयः तस्माद्वा एतस्मादन्नरसमयादन्योंतर आत्मा प्राणमयस्तस्मादन्योंतर आत्मा मनोमयस्तस्मा
दन्योंतर आत्मा विज्ञानमय इति च विकारार्थे मयट् प्रवाहे सत्यानंदमय एवाकस्मादर्धजरतीयन्यायेन कथमिवान्ययटः प्राचुर्यार्थत्वं
ब्रह्मविषयत्वं वा निश्चीयत इति॥ मांत्रवर्णिकब्रह्माधिकारादिति चेन्नान्नमयादीनामपि तर्हि ब्रह्मत्वप्रसंगः॥ अत्राह॥ युक्तमन्नम
यादीनामब्रह्मत्वं तस्मात्तस्मादांतरस्यांतरस्यान्यस्यात्मन उच्यमानत्वात्॥ आनंदमयात्तु न कश्चिदन्योंतर आत्मोच्यते तेनानंद
मयस्य ब्रह्मत्वं॥ अन्यथा प्रकृतहानाप्रकृतप्रक्रियाप्रसंगादिति॥ अत्रोच्यते॥ यद्यप्यन्नमयादिभ्य इवानंदमयादन्योंतर आत्मेति न श्रू
यते तथापि नानंदमयस्य ब्रह्मत्वं॥ यत आनंदमयं प्रकृत्य श्रूयते॥ तस्य प्रियमेव शिरः॥ मोदो दक्षिणः पक्षः प्रमोद उत्तरः पक्षः आनंद आ
त्मा॥ ब्रह्म पुच्छं प्रतिष्ठेति॥ तत्र यद्ब्रह्म मंत्रवर्णे प्रकृतं सत्यं ज्ञानमनंतं ब्रह्मेति॥ तदिह ब्रह्म पुच्छं प्रतिष्ठेत्युच्यते॥ तद्विजिज्ञासयिषये
वान्नमयादय आनंदमयांताः पंचकोशाः प्रकल्प्यंते॥ तत्र कुतः प्रकृतहानाप्रकृतक्रियाप्रसंगः॥ नन्वानंदमयस्या॥ वयवत्वेन ब्रह्म पुच्छं
प्रतिष्ठेत्युच्यते॥ अन्नमयादीनामिवेदं पुच्छं प्रतिष्ठेत्यादि तत्र कथं ब्रह्मणः स्वप्रधानत्वं शक्यं विज्ञातुं॥ प्रकृतत्वादिति धूमः॥ नत्वानंदम
यावयवत्वेनापि ब्रह्मणि विज्ञायमाने न प्रकृतत्वं हीयते॥ आनंदमयस्य ब्रह्मत्वादिति॥ अत्रोच्यते॥ तथा सति तदेव ब्रह्मानंदमयः
आत्मावयवी तदेव च ब्रह्म पुच्छं प्रतिष्ठावयव इत्यसामंजसं स्यात्॥ अन्यतरपरिग्रहे तु युक्तं॥ ब्रह्म पुच्छं प्रतिष्ठेत्यत्रैव ब्रह्मनिर्देश आ
श्रयितुं ब्रह्मशब्दसंयोगात्॥ आनंदमयवाक्ये॥ ब्रह्मशब्दसंयोगाभावात्॥ अपि च॥ ब्रह्म पुच्छं प्रतिष्ठेत्युक्त्वेदमुच्यते॥ तदप्येष श्लो
को भवति॥ असन्नेव स भवति॥ असद्ब्रह्मेति वेद चेत्॥ अस्ति ब्रह्मेति चेद्वेद॥ संतमेनं ततो विदुरिति॥ अस्मिंश्च श्लोके मुक्त्वा
नंदमयं ब्रह्मण एव भावाभावशंकोक्ता॥ प्रियमोदादिविशिष्टस्यानंदमयस्य सर्वलोकप्रसिद्धत्वात्कथं पुनः स्वप्रधानं सत् ब्रह्मा
नंदमयस्य पुच्छत्वेन निर्दिश्यते ब्रह्म पुच्छं प्रतिष्ठेति॥ नैष दोषः॥ पुच्छवत्पुच्छं प्रतिष्ठा परायणमेकनीडं लौकिकस्यानंदजातस्य ब्र-
ह्मानंद इत्येतदनेन विवक्ष्यति॥ नावयवत्वं॥ एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति श्रुत्यंतरादपि चानंदमयस्य ब्रह्म
त्वेपि आद्यवयवत्वेन सविशेषं ब्रह्माभ्युपगंतव्यं॥ निर्विशेषं तु ब्रह्मवाक्यशेषे श्रूयते॥ वाङ्मनसयोरगोचरत्वाभिधानाद्यतो वा

शां०भा० १३

चोनिवर्तंते अप्राप्य मनसा सह॥ आनंदं ब्रह्मणो विद्वान्न बिभेति कुतश्चनेति॥ अपि चानंदप्रचुर इत्युक्ते दुःखास्तित्वमपि गम्यते॥ प्राचुर्य
स्य लोके प्रतियोग्यकल्पत्वापेक्षत्वात्तथा च यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमेति भूम्नि ब्रह्मणि तद्व्यतिरि
क्ताभावश्रुतिरुपरुध्येत॥ प्रतिशरीरं च प्रियादिभेदादानंदमयस्यापि भिन्नत्वं॥ ब्रह्म तु प्रतिशरीरं न भिद्यते॥ सत्यं ज्ञानमनंतं ब्रह्मेत्यानं
त्यश्रुतेरेको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतांतरात्मा इति च श्रुतेरान्नेदमयाभ्यासः श्रूयते॥ ॥प्रातिपदिकार्थमात्रमे
व हि सर्वत्राभ्यस्यते॥ ॥यदेष आकाश आनंदो न स्यात् सैषानंदस्य मीमांसा भवत्यानंदं ब्रह्मणो विद्वान्न बिभेति कुतश्चनानंदो ब्रह्मे
ति व्यजानादिति च॥ यदि चानंदमयशब्दस्य ब्रह्मविषयत्वं निश्चितं भवेत्तत उत्तरेष्वानंदमात्रप्रयोगेष्वप्यानंदमयाभ्यासः कल्प्येत न त्वा
नंदमयस्य ब्रह्मत्वमस्ति प्रियशिरस्त्वादिभिरित्यवोचाम॥ तस्माच्छ्रुत्यंतरे विज्ञानमानंदं ब्रह्मेत्यानंदप्रातिपदिकस्य ब्रह्मणि प्रयोगदर्श
नाद्यदेष आकाश आनंदो न स्यादित्यादिर्ब्रह्मविषयप्रयोगो न त्वानंदमयाभ्यास इत्यवगंतव्यं॥ यत्त्वयं मयडंतस्यैवानंदशब्दस्या
भ्यास एतमानंदमयमात्मानमुपसंक्रामतीति॥ न तस्य ब्रह्मविषयत्वमस्ति॥ विकारात्मनामेवान्नमयादीनामनात्मनामुपसंक्रमि
तव्यानां प्रवाहे पठितत्वात्॥ नन्वानंदमयस्योपसंक्रमितव्यस्यान्नमयादिवदब्रह्मत्वे सति नैव विदुषो ब्रह्मप्राप्तिः॥ फलं निर्दिष्टं भ
वेत्॥ नैष दोषः॥ आनंदमयोपसंक्रमणनिर्देशेनैव विदुषः पुच्छप्रतिष्ठाभूतब्रह्मप्राप्तिफलस्य निर्दिष्टत्वात्॥ तदप्येष श्लोको
भवति॥ यतो वाचो निवर्तंत इत्यादिना च प्रपंच्यमानत्वात्॥ या त्वानंदमयसन्निधाने सोऽकामयत बहु स्यां प्रजायेयेतीयं श्रुतिरुदाहृता॥ सा
ब्रह्मपुच्छं प्रतिष्ठेत्यनेन सन्निहिततरेण ब्रह्मणा संबध्यमाना॥ नानंदमयस्य ब्रह्मतां प्रतिबोधयति॥ तदपेक्षत्वाच्चोत्तरस्य ग्रंथस्य रसो
वै स इत्यादेर्नानंदमयविषयता॥ ननु सोऽकामयतेति ब्रह्मणि पुल्लिंगनिर्देशो नोपपद्यते॥ नायं दोषः॥ तस्माद्वा एतस्मादात्मन आका ॥१३॥
शः संभूत इत्यत्र पुल्लिंगेनाप्यात्मशब्देन ब्रह्मणः प्रकृतत्वात्॥ या तु भार्गवी वारुणी विद्यानंदो ब्रह्मेति व्यजानादिति तस्यां मयडश्रव पि
णात् प्रियशिरस्त्वाद्यश्रवणाच्च युक्तमानंदस्य ब्रह्मत्वं॥ तस्मादणुमात्रमपि विशेषमनाश्रित्य न स्वत एव प्रियशिरस्त्वादि ब्रह्मण्यु
पपद्यते॥ न चेह सविशेषं ब्रह्म प्रतिपिपादयिषितं॥ वाङ्मनसगोचरातिक्रमश्रुतेः॥ तस्मादन्नमयादिष्विवानंदमयेऽपि विकारार्थ एव म
यड्विज्ञेयो न प्राचुर्यार्थः॥ सूत्राणि त्वेवं व्याख्येयानि॥ ब्रह्मपुच्छं प्रतिष्ठेत्यत्र किमानंदमयस्यावयवत्वेन ब्रह्म विवक्ष्यते॥ उत स्वप्रधानत्वे

27/1913

नेति॥ पुच्छशब्दादवयवत्वेनेति प्राप्त उच्यते॥ आनंदमय आत्मेत्यत्र ब्रह्म पुच्छं प्रतिष्ठेति स्वप्रधानमेव ब्रह्मोपदिश्यते॥ असन्नेव स भवती
त्यस्मिन्निगमनश्लोके ब्रह्मण एव केवलस्याभ्यस्यमानत्वात्॥ ॥विकारशब्दान्नेति चेन्न प्राचुर्यात्॥ ॥विकारशब्दोऽवयवशब्दोऽभिप्रेतः॥
पुच्छमित्यवयवशब्दान्न स्वप्रधानत्वं ब्रह्मण इति यदुक्तं तस्य परिहारो वक्तव्यः॥ अत्रोच्यते॥ नायं दोषः॥ प्राचुर्यादप्यवयवशब्दोपपत्तेः प्राचु
र्यं प्रायापत्तिरवयवप्रायेव वचनमित्यर्थोऽन्नमयादीनां हि शिरआदिषु पुच्छांतेष्ववयवेषूक्तेष्वानंदमयस्यापि शिरआदीन्यवयवांतराण्युक्त्वा
वयवप्रायापत्त्या ब्रह्म पुच्छं प्रतिष्ठेत्याह॥ नावयवविवक्षया यत्कारणमभ्यासादिति स्वप्रधानत्वं ब्रह्मणः समर्थितं॥ ॥तद्धेतुव्यपदेशाच्च॥
सर्वस्य च विकारजातस्य सानंदमयस्य कारणत्वेन ब्रह्म व्यपदिश्यते॥ इदं सर्वमसृजत॥ यदिदं किंचेति॥ न च कारणं सद्ब्रह्म स्वविकार
स्यानंदमयस्य मुख्यया वृत्त्यावयव उपपद्यते॥ अपराण्यपि सूत्राणि यथासंभवं पुच्छवाक्यनिर्दिष्टस्यैव ब्रह्मण उपपादकानि द्रष्टव्या
नि॥ ॥अंतस्तद्धर्मोपदेशात्॥ ॥इदमाम्नायते॥ अथ य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात्स
र्व एव सुवर्णस्तस्य यथा कप्यासं पुंडरीकमेवमक्षिणी तस्योदिति नाम। स एष सर्वेभ्यः पाप्मभ्य उदित उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वे
देत्याधिदैवतमथाध्यात्ममथ य एषोऽन्तरक्षिणि पुरुषो दृश्यत इत्यादिः॥ तत्र संशयः॥ किं विद्याकर्मातिशयवशात् प्राप्तोत्कर्षः कश्चित्संसा
री सूर्यमंडले चक्षुषि चोपास्यत्वेन श्रूयते॥ किं वा नित्यसिद्धः परमेश्वर इति॥ किं तावत्प्राप्तं संसारीति॥ कुतः रूपवत्त्वश्रवणादादित्यपु
रुषे तावद्धिरण्यश्मश्रुरित्यादि रूपमुदाहृतं अक्षिपुरुषेऽपि तदेवातिदेशेन प्राप्यते तस्यैतस्य तदेव रूपं यदमुष्य रूपमिति न च परमेश्वरस्य रूप
वत्त्वं युक्तं अशब्दमस्पर्शमरूपमव्ययमिति श्रुतेः॥ आधारश्रवणाच्च॥ य एषोऽन्तरादित्ये पुरुषोऽन्तरक्षिणीति॥ न ह्यनाधारस्य स्वमहिम
प्रतिष्ठितस्य सर्वव्यापिनः परमेश्वरस्याधार उपदिश्येत स भगवः कस्मिन्प्रतिष्ठित इति स्वे महिम्नीति॥ आकाशवत्सर्वगतश्च नि
त्य इति च श्रुती भवतः॥ ऐश्वर्यमर्यादाश्रुतेश्च॥ स एष ये चामुष्मात्पराञ्चो लोकास्तेषां चेष्टे देवकामानां चेत्यादित्यपुरुषस्यैश्वर्य
मर्यादा स एष ये चैतस्मादर्वाञ्चो लोकास्तेषां चेष्टे मनुष्यकामानां चेत्यक्षिपुरुषस्य॥ न च परमेश्वरस्य मर्यादावदैश्वर्यं युक्तमेष
सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसंभेदायेत्यविशेषश्रुतेस्तस्मान्नादित्याक्ष्योरंतः प
रमेश्वर इत्येवं प्राप्ते ब्रूमः॥ अंतस्तद्धर्मोपदेशादिति॥ य एषोऽन्तरादित्ये य एषोऽन्तरक्षिणीति च श्रूयमाणः पुरुषः परमेश्वर एव न सं॰

शां०भा० ३४

सारिा॥कुतस्तद्धर्मोपदेशात्॥य इह परमेश्वरस्य धर्मा इहोपदिष्टास्तद्यथा तस्योदिति नामेति श्रावयित्वा ऽस्यादित्यपुरुषस्य नाम स एष
सर्वेभ्यः पाप्मभ्य उदित इति सर्वपाप्मापगमेन निर्वक्ति॥तदेव च कृतनिर्वचनं नामाक्षिपुरुषस्यातिदिशति॥सर्वपाप्मापगमश्च
परमात्मन एव श्रूयते॥य आत्मापहतपाप्मेत्यादौ॥तथा चाक्षुषे पुरुषे स एव ऋक् तत्साम तदुक्थं तद्यजुस्तद्ब्रह्मेति ऋक्सामाद्यात्मकतां
निर्धारयति॥सा च परमेश्वरस्योपपद्यते सर्वकारणत्वात्सर्वात्मकत्वोपपत्तेः॥पृथिव्यग्न्याद्यात्मके चाधिदैवतमृक्सामे वाक्प्राणाद्यात्म
के चाध्यात्ममनुक्रम्याह॥तस्यर्क्च साम च गेष्णौ इत्यधिदैवतं॥तथाध्यात्ममपि यावमुष्य गेष्णौ तौ गेष्णाविति॥तच्च सर्वात्मन उ
पपद्यते॥तद्य इमे वीणायां गायन्त्येतं ते गायन्ति तस्मात्ते धनसनय इति च लौकिकेष्वपि गानेष्वस्यैव गीयमानत्वं दर्शयति॥तच्च परमे
श्वरपरिग्रहे घटते॥यद्यद्विभूतिमत्सत्वं श्रीमदूर्जितमेव वा॥तत्तदेवावगच्छ त्वं मम तेजोंशसंभवमिति भगवद्गीतादर्शनात्॥लोक
कामेशितृत्वमपि निरंकुशं श्रूयमाणं परमेश्वरं गमयति॥यत्तूक्तं हिरण्यश्मश्रुत्वादिरूपश्रवणं परमेश्वरे नोपपद्यत इत्य
त्र ब्रूमः॥स्यात्परमेश्वरस्यापीच्छावशान्मायामयं रूपं साधकानुग्रहार्थं॥माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद॥सर्व
भूतगुणैर्युक्तं न मां पश्यंति सूरय इति स्मरणात्॥अपि च यत्र निरस्तसर्वविशेषं पारमेश्वरं रूपमुपदिश्यते॥भवति तत्र शास्त्र
मशब्दमस्पर्शमरूपमव्ययमित्यादि सर्वकारणत्वात्तु विकारधर्मैरपि कैश्चिद्विशिष्टः परमेश्वर उपास्यत्वेन निर्दिश्यते॥सर्व
कर्मा सर्वकामः सर्वगंधः सर्वरस इत्यादिना॥तथा हिरण्यश्मश्रुत्वादिनिर्देशोपि भविष्यति॥यदप्याधारश्रवणान्न परमेश्वर
इत्यत्रोच्यते स्वमहिमप्रतिष्ठस्याप्याधारविशेषोपदेश उपासनार्थो भविष्यति॥सर्वगतत्वाद्ब्रह्मणो व्योमवत्सर्वान्तरत्वोप
पत्तेः॥ऐश्वर्यमर्यादाश्रवणमप्यध्यात्माधिदैवतविभागापेक्षमुपासनार्थमेव॥तस्मात्परमेश्वर एवाक्ष्यादित्ययोरन्तरुप
दिश्यते॥भेदव्यपदेशाच्च॥ ॥अस्ति चादित्यादिशरीराभिमानिभ्यो जीवेभ्योऽन्य ईश्वरोऽन्तर्यामी॥य आदित्ये तिष्ठन्नादित्यादन्तरो य
मादित्यो न वेद यस्यादित्यः शरीरं य आदित्यमन्तरो यमयत्येष त आत्मान्तर्याम्यमृत इति श्रुत्यन्तरे भेदव्यपदेशात्॥तत्र ह्यादित्या
दन्तरो यमादित्यो न वेदेति वेदितुरादित्यविज्ञानात्मनोऽन्योऽन्तर्यामीति स्पष्टं निर्दिश्यते॥स एवेहाप्यन्तरादित्ये पुरुषो भवितु ३४
मर्हति श्रुतिसामान्यात्॥तस्मात्परमेश्वर एवेहोपदिश्यत इति सिद्धं॥आकाशस्तल्लिंगात्॥ ॥इदमामनन्ति॥अस्य लोकस्य का

29/1913

गतिरित्याकाश इति होवाच॥सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्त आकाशं प्रत्यस्तं यन्त्याकाशो ह्येवैभ्यो ज्यायानाकाशः प
रायणमिति॥तत्र संशयः॥किमाकाशशब्देन परं ब्रह्माभिधीयते उत भूताकाशमिति॥कुतः संशयः॥उभयत्र प्रयोगदर्शनात्॥भूतवि
शेषे तावत्सुप्रसिद्धो लोकवेदयोराकाशशब्दः॥ब्रह्मण्यपि क्वचित्प्रयुज्यमानो दृश्यते॥यत्र वाक्यशेषवशादसाधारणश्रवणाद्वा
निर्धारितं ब्रह्म भवति॥यथा यदेष आकाश आनन्दो न स्यादिति॥आकाशो ह वै नाम नामरूपयोर्निर्वहिता॥ते यदन्तरा तद्ब्रह्मेत्येवमादावतः
संशयः॥किं पुनरत्र युक्तं भूताकाशमिति॥कुतस्तद्धि प्रसिद्धतरेण प्रयोगेण शीघ्रं बुद्धिमारोहति॥न चायमाकाशशब्द उभयोः साधार
णः शक्यो विज्ञातुमनेकार्थप्रसंगात्॥तस्माद्ब्रह्मणि गौण आकाशशब्दो भवितुमर्हति॥विभुत्वादिभिर्हि बहुभिर्धर्मैः सदृशमाका
शेन ब्रह्म भवति॥न च मुख्यसंभवे गौणोऽर्थो ग्रहणमर्हति॥संभवति चेह मुख्यस्यैवाकाशस्य ग्रहणं॥ननु भूताकाशपरिग्रहे वाक्य
शेषो नोपपद्यते॥सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्त इत्यादिः॥नैष दोषः॥भूताकाशस्यापि वाय्वादिक्रमेण कारणत्वो
पपत्तेः॥विज्ञायते हि॥तस्माद्वा एतस्मादात्मन आकाशः संभूतः आकाशाद्वायुः वायोरग्निरित्यादि॥ज्यायस्त्वपरायणत्वे अपि भूतान्तरापेक्ष
या उपपद्येते॥भूताकाशस्य॥तस्मादाकाशशब्देन भूताकाश इत्येवं प्राप्ते ब्रूमः॥आकाशस्तल्लिंगात्॥आकाशशब्देन ब्रह्मणो ग्रहणं
युक्तं॥कुतः॥तल्लिंगात्॥परस्य हि ब्रह्मण इदं लिंगं॥सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्त इति॥परस्माद्धि ब्रह्मणो भूता
नामुत्पत्तिरिति वेदान्तेषु मर्यादा॥ननु भूताकाशस्यापि वाय्वादिक्रमेण कारणत्वं दर्शितं॥सत्यं दर्शितं॥तथापि मूलकारणस्य ब्रह्मणो
ऽपरिग्रहादाकाशादेवेत्यवधारणं॥सर्वाणीति च भूतविशेषणं नानुकूलं स्यात्॥तथाकाशं प्रत्यस्तं यन्तीति ब्रह्मलिंगं॥आकाशो
ह्येवैभ्यो ज्यायानाकाशः परायणमिति च ज्यायस्त्वं ह्यनापेक्षिकं॥परमात्मन एव एकस्मिन्नाम्नातं ज्यायान्पृथिव्या ज्यायानन्तरि
क्षाज्ज्यायान्दिवो ज्यायानेभ्यो लोकेभ्य इति तथा परायणत्वमपि परमकारणत्वात्परमात्मन्येवोपपन्नतरं श्रुतिश्च भवति॥विज्ञा
नमानन्दं ब्रह्म रातिर्दातुः परायणमिति॥अपि चान्तवत्त्वदोषेण शालावत्यस्य पक्षं निंदित्वानन्तं किंचिद्वक्तुकामेन जैवलिनाका
शः परिगृहीतस्तं चाकाशमुद्गीथे संपाद्योपसंहरति॥स एष परोवरीयानुद्गीथः स एषोऽनन्त इति तच्चानन्त्यं ब्रह्मलिंगं॥यत्पुनरुक्तं
भूताकाशं प्रसिद्धिबलेन प्रथमतरं प्रतीयत इति अत्र ब्रूमः प्रथमतरं प्रतीतमपि सद्वाक्यशेषगतान्ब्रह्मगुणान्दृष्ट्वा न परिगृ
ह्यते॥दर्शितश्च॥ब्रह्मण्यप्याकाशशब्दः॥आकाशो ह वै नाम नामरूपयोर्निर्वहितेत्यादौ तथाकाशपर्यायवाचिनामपि ब्रह्मणि

शां० भा०
१५

प्रयोगो दृश्यते॥ ऋचो अक्षरे परमे व्योमन्यस्मिन्देवा अधि विश्वे निषेदुः॥ सैषा भार्गवी वारुणी विद्या परमे व्योमन्प्रतिष्ठिता॥
ॐ खं ब्रह्म सशं ब्रह्म खं ब्रह्म प्राणो ब्रह्म खं पुराणमित्येवमादौ वाक्योपक्रमेपि वर्तमानस्याकाशशब्दस्य वाक्यशेषवशाद्युक्ता ब्रह्म
विषयत्वावधारणा। अग्निरधीतेनुवाकमिति हि वाक्योपक्रमगतोप्यग्निशब्दो माणवकविषयो दृश्यते तस्मादाकाशशब्दं ब्र
ह्मेति सिद्धं॥ ॥अत एव प्राणः॥ ॥उद्गीथे प्रस्तोतर्या देवता॥ प्रस्तावमन्वायत्तेत्युपक्रम्य श्रूयते॥ कतमा सा देवतेति। प्राण इति
होवाच सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशंति॥ प्राणमभ्युज्जिहते॥ सैषा देवता प्रस्तावमन्वायत्तेति। तत्र संशयनिर्ण
यौ पूर्ववदेव द्रष्टव्यौ॥ प्राणबंधनं हि सोम्य मनः॥ प्राणस्य प्राणमिति चैवमादौ ब्रह्मविषयः प्राणशब्दो दृश्यते॥ वायुविकारे तु
प्रसिद्धतरो लोके वेदे च॥ अत इह प्राणशब्देन कतरस्योपादानं युक्तमिति॥ भवति संशयः॥ किं पुनरत्र युक्तं वायुविकारस्य पं
चवृत्तेः प्राणस्योपादानं युक्तं तत्र हि प्रसिद्धतरः प्राणशब्द इत्यवोचाम। ननु पूर्ववदिहापि तल्लिंगाद्ब्रह्मण एव ग्रहणं युक्तं इहापि वाक्य
शेषभूतानां संवेशनोद्गमनं पारमेश्वरं कर्म प्रतीयते। न मुख्येपि प्राणे भूतसंवेशनोद्गमनस्य दर्शनात्॥ एवं ह्याम्नायते॥ यदा वै पुरु
षः स्वपिति प्राणं तर्हि वागप्येति॥ प्राणं चक्षुः प्राणं श्रोत्रं॥ प्राणं मनः स यदा प्रबुध्यति प्राणादेवाधि पुनर्जायंत इति प्रत्यक्षं चैतत्
स्वापकाले प्राणवृत्तावपरिलुप्यमानायामिंद्रियवृत्तयः परिलुप्यंते प्रबोधकाले च प्रादुर्भवंतीति इंद्रियसारत्वाच्च भूतानामविरुद्धो
मुख्येपि प्राणे भूतसंवेशोद्गमनवादि वाक्यशेषः॥ अपि चादित्योन्नं चोद्गीथप्रतिहारयोर्देवते प्रस्तावदेवतायाः प्राणस्यानंतरं नि
र्दिश्येते न च तयोर्ब्रह्मत्वमस्ति तत्सामान्याच्च प्राणस्यापि न ब्रह्मत्वमित्येवं प्राप्ते सूत्रकार आह॥ अत एव प्राण इति॥ तल्लिंगादिति पूर्वसूत्रनि
र्दिष्टं अत एव तल्लिंगात्प्राणशब्दमपि परं ब्रह्म भवितुमर्हति प्राणस्यापि ब्रह्मलिंगसंबंधः श्रूयते सर्वाणि ह वा इमानि भूतानि
प्राणमेवाभिसंविशंति प्राणमभ्युज्जिहत इति प्राणनिमित्तौ सर्वेषां भूतानामुत्पत्तिप्रलयावुच्यमानौ॥ प्राणस्य ब्रह्मतां गमय १५
तः॥ ननूक्तं मुख्यप्राणपरिग्रहेपि संवेशनोद्गमनदर्शनमविरुद्धं॥ स्वापप्रबोधनयोर्दर्शनादिति अत्रोच्यते॥ स्वापप्र
बोधयोरिंद्रियाणामेव केवलानां प्राणाश्रयं संवेशनोद्गमनं दृश्यते न सर्वेषां भूतानामिह तु नेंद्रियाणां सशरीराणां च जीवानां जी
वानां जीवाधिष्ठानानां भूतानां च सर्वाणि ह वा इमानि भूतानीति श्रुतेः॥ यदापि भूतश्रुतिर्महाभूतविषया परिगृह्यते तदापि

31/1913

ब्रह्मलिंगत्वविरुद्धं॥ ननु सदापि विषयैरिंद्रियाणां स्वापप्रबोधयोः प्राणेप्ययं प्राणाच्च प्रभवं शृणुमः॥ यदा सुप्तः स्वप्नं न कंच
न पश्यत्यथास्मिन्प्राण एवैकधा भवति तदेनं वाक् सर्वैर्नामभिः सहाप्येतीत्यत्र तत्रापि तल्लिंगात्प्राणशब्दं ब्रह्मैव यत्पुनरन्नादि
त्यसन्निधानात्प्राणस्याब्रह्मत्वमिति तदयुक्तं॥ वाक्यशेषबलेन प्राणशब्दस्य ब्रह्मविषयतायां प्रतीमानायां सन्निधानस्या
किंचित्करत्वात्॥ यत्पुनः प्राणशब्दस्य पंचवृत्तेः प्रसिद्धतरत्वं तदाकाशशब्दस्येव प्रतिविधेयं यस्मात्सिद्धं प्रस्तावदेवतायाः प्राणस्य
ब्रह्मत्वं॥ अत्र केचिदाहरंति प्राणस्य प्राणं प्राणबंधनं हि सोम्य मन इति च तदयुक्तं॥ शब्दभेदात्प्रकरणाच्च संशयानुपपत्तेः यथा पि
तुः पितेति प्रयोगे अन्यः पिता षष्ठीनिर्दिष्टात् प्रथमानिर्दिष्टः पितुः पितेति गम्यते तद्वत्प्राणस्य प्राणमिति शब्दभेदात् प्रसिद्धात्प्राणा
दन्यः प्राणस्य प्राण इति निश्चीयते॥ न हि स एव तस्येति भेदनिर्देशार्हो भवति यस्य प्रकरणे यो निर्दिश्यते नामांतरेणापि स एव तत्र
प्रकरणे निर्दिष्ट इति गम्यते यथा ज्योतिष्टोमाधिकारे वसंते वसंते ज्योतिषा यजेतेत्यत्र ज्योतिःशब्दो ज्योतिष्टोमविषयो भवति तथा
परस्य ब्रह्मणः प्रकरणे प्राणबंधनं हि सोम्य मन इति श्रुतेः प्राणशब्दो वायुविकारमात्रं कथमवगमयेत् अतः संशयाविषयत्वात्॥
तदुदाहरणं युक्तं प्रस्तावदेवतायां तु प्राणे संशयपूर्वपक्षनिर्णया उपपादिताः॥ ॥ज्योतिश्चरणाभिधानात्॥ ॥इदमामनंति॥
अथ यदतः परो दिवो ज्योतिर्दीप्यते विश्वतःपृष्ठेषु सर्वतःपृष्ठेषु अनुत्तमेषु लोकेष्विदं वाव तद्यदिदमस्मिन्नंतः पुरुषे ज्योतिरिति॥
२ तत्र संशयः॥ किमिह ज्योतिःशब्देन आदित्यादि ज्योतिरभिधीयते किं वा परमात्मेति अर्थांतरविषयस्यापि शब्दस्य तल्लिंगात् ब्रह्म
शब्दविषयमुक्तं इह तल्लिंगमेवास्ति नास्तीति विचार्यते॥ किं तावत्प्राप्तं॥ आदित्यादिकमेव ज्योतिःशब्देन परिगृह्यत इति॥ कुतः प्र
सिद्धेः॥ तमो ज्योतिरिति हि इमौ शब्दौ परस्परप्रसिद्धं हि विषयौ प्रसिद्धौ चक्षुर्वृत्तेर्निरोधकं शार्वरादि तम उच्यते॥ तस्या एवानुग्राहकं
आदित्यादिकं ज्योतिस्तथा दीप्यत इतीयमपि श्रुतिरादित्यादिविषया प्रसिद्धा॥ न हि रूपादिहीनं ब्रह्म दीप्यत इति मुख्यां श्रुतिमर्ह
ति॥ द्युमर्यादात्वश्रुतेश्च॥ न हि चराचरबीजस्य ब्रह्मणः सर्वात्मकस्य द्यौर्मर्यादा युक्ता॥ कार्यस्य तु ज्योतिषः परिच्छिन्नस्य द्यौर्म
र्यादा स्यात् परो दिवो ज्योतिरिति च ब्राह्मणं॥ ननु कार्यस्यापि ज्योतिषः सर्वत्र गम्यमानत्वात् द्युमर्यादावत्त्वमसमंजसं अस्तु तर्हि त्रि
वृत्कृतं तेजः प्रथमजं॥ अत्रिवृत्कृतस्य तेजसः प्रयोजनाभावात्॥ इदमेव प्रयोजनं यदुपास्यत्वमिति चेन्न प्रयोजनांतरप्रयुक्तस्यैव आ

दिव्यादेपाध्यत्वदर्शनात्॥ तासांत्रिरत्रिवृतमेकैकां करवाणीति चाविशेषश्रुतेः॥ न चात्रिवृत्कृतस्यापि तेजसो द्युमर्यादत्वं प्र
सिद्धं॥ अस्तु तर्हि त्रिवृत्कृतमेव तेजो ज्योतिःशब्दं॥ ननूक्तमर्वागपि दिवो गम्यते अग्न्यादिकं ज्योतिरिति॥ नैष दोषः॥ सर्वत्रापि गम्यमा
नस्य ज्योतिषः परो दिव इत्युपासनार्थः॥ प्रदेशविशेषपरिग्रहो न विरुध्यते न तु निष्प्रदेशस्य ब्रह्मणः प्रदेशविशेषकल्पना भागि
नी॥ सर्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेष्विति चाधारबहुत्वश्रुतिः कार्ये ज्योतिष्युपपद्यते॥ इदं वाव तद्यदिदमस्मिन्नंतःपुरुष
ज्योतिरिति च कौक्षेये ज्योतिषि परं ज्योतिरध्यस्यमानं दृश्यते॥ सारूप्यनिमित्ताश्चाध्यासा भवंति॥ यथा तस्य भूरिति शिर एकं हि
शिर एकमेतदक्षरमिति॥ कौक्षेयस्य तु ज्योतिषः प्रसिद्धमब्रह्मत्वं तस्यैषा दृष्टिः तस्यैषा श्रुतिरिति चौष्ण्यघोषविशिष्टत्वश्रवणात् तु
नेवतद्दृष्टं च श्रुतं चेत्युपासीतेति श्रुतेश्च चक्षुष्यः श्रुतो भवतीति चाल्पफलत्वश्रवणात् ब्रह्मत्व महते फलाय ब्रह्मोपासनमिष्यते
न चान्यदपि किंचित्स्ववाक्ये प्राणाकाशवत् ज्योतिषोस्ति ब्रह्मलिंगं॥ न च पूर्वस्मिन्नपि वाक्ये ब्रह्म निर्दिष्टं स्यात्॥ एवमपि न तस्य
हप्रत्यभिज्ञानमस्ति तत्र हि त्रिपादस्यामृतं दिवीति द्यौरधिकरणत्वेन श्रूयते अत्र पुनः परो दिवो ज्योतिर्दीप्यत इति द्यौर्मर्या
दात्वेन तस्मात्प्राकृतं ज्योतिरिह ग्राह्यमित्येवं प्राप्ते ब्रूमः॥ ज्योतिश्चरणाभिधानात्॥ ज्योतिरितिह ब्रह्म ग्राह्यं॥ कुतः चरणाभिधा
नादित्यर्थः॥ पूर्वस्मिन्हि वाक्ये चतुष्पाद्ब्रह्म निर्दिष्टं एतावानस्य महिमा ततो ज्यायांश्च पुरुषः॥ पादोस्य सर्वा भूतानि त्रिपादस्या
मृतं दिवीत्यनेन मंत्रेण तत्र यच्चतुष्पादो ब्रह्मणः त्रिपादमृतं द्युसंबंधिरूपं निर्दिष्टं तदेवह द्युसंबंधान्निर्दिष्टमिति प्रत्यभिज्ञायते॥
तत्परित्यज्य प्राकृतं ज्योतिः कल्प्यतः प्रकृतहानाप्रकृतप्रक्रिये प्रसज्येयातां॥ न केवलं ज्योतिर्वाक्य एव ब्रह्मानुवृत्तिः परस्या ॥१६॥
मपि शांडिल्यविद्यायामनुवर्तिष्यते॥ ब्रह्म तस्मादिह ज्योतिरिति ब्रह्म प्रतिपत्तव्यं॥ यत्तूक्तं ज्योतिर्दीप्यत इति चैतौ शब्दौ कार्ये
ज्योतिषि प्रसिद्धाविति नायं दोषः॥ प्रकरणाद्ब्रह्मावगमे सति अनयोः शब्दयोः अविशेषकत्वात् दीप्यमानकार्यज्योतिरुपलक्षि
तेपि ब्रह्मणि ब्रह्मणि प्रयोगसंभवात्॥ येन सूर्यस्तपति तेजसेद्ध इति मंत्रवर्णात्॥ यद्वा नायं ज्योतिःशब्दश्चक्षुर्वृत्तेरेवानुग्राहके
तेजसि प्रवर्तते॥ अन्यत्रापि प्रयोगदर्शनात्॥ वाचैवायं ज्योतिषास्ते मनो ज्योतिर्जुषतामिति च तस्माद्यद्यत्कस्यचिदवभासकं
तत्तज्ज्योतिःशब्देनाभिधीयते तथा सति ब्रह्मणोपि चैतन्यरूपस्य समस्तजगदवभासहेतुत्वादुपपन्नो ज्योतिःशब्दः न मेव भा

33/1913

न्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति तं देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतमित्यादिश्रुतिभ्यश्च यदप्युक्तं द्युमर्या
दत्वं सर्वगतस्य ब्रह्मणो नोपपद्यत इति॥ अत्रोच्यते॥ सर्वगतस्यापि ब्रह्मणः उपासनार्थं सर्वगतस्य ब्रह्मणो॥ प्रदेशविशेषप
रिग्रहो न विरुध्यते॥ ननूक्तं निष्प्रदेशस्य ब्रह्मणः प्रदेशविशेषकल्पना नोपपद्यत इति॥ नायं दोषः॥ निष्प्रदेशस्यापि ब्रह्मण उपाधिसं
बंधात्प्रदेशविशेषकल्पनोपपत्तेः॥ तथा हि॥ आदित्ये चक्षुषि हृदय इति प्रदेशविशेषसंबंधानि ब्रह्मण उपासनानि श्रूयंते॥ एतेन
विश्वतः पृष्ठेष्वित्याधारबहुत्वमुपपादितं॥ यदप्युक्तमौष्ण्यघोषानुमितं कौक्षेये कार्यज्योतिषि अध्यस्यमानत्वात्परमपि दिवः
कार्यं ज्योतिरेवेति तदप्ययुक्तं॥ परस्यापि ब्रह्मणो नामादिप्रतीकवत्कौक्षेयज्योतिषः प्रतीकत्वोपपत्तेः॥ दृष्टं च श्रुतं चेत्युपासीतेती
तु प्रतीकद्वारकं दृष्टत्वं श्रुतत्वं च भविष्यति यदप्यल्पफलश्रवणान्न ब्रह्मेति तदप्यनुपपन्नं॥ न हि इयते फलाय ब्रह्माश्रयणी
यं नेयत इतीनीयमहेतुरस्ति यत्र हि निरस्तसर्वविशेषसंबंधं परं ब्रह्मात्मत्वेनोपदिश्यते तत्रैकरूपमेव फलं मोक्ष इत्यवगम्यते॥ यत्र
तु गुणविशेषसंबंधं वा ब्रह्मोपदिश्यंते तत्र संसारगोचराण्येवोच्चावचानि फलानि दृश्यंते॥ अन्नादो वसुदानो विंदते वसु य एवं वे
देत्यादिश्रुतिषु न स्ववाक्ये किंचित् ज्योतिषो ब्रह्मलिंगमस्ति तथापि पूर्वस्मिन्वाक्ये दृश्यमानं गृहीतव्यं भवति तदप्युक्तं सूत्रकारेण
ज्योतिश्चरणाभिधानादिति॥ कथं पुनर्वाक्यांतरगतेन ब्रह्मसंनिधानेन ज्योतिःश्रुतिः स्वविषयाच्छक्या व्यावर्तयितुं नैष दोषः॥ यदतः प
रो दिवो ज्योतिर्दीप्यत इति प्रथमतरपठितेन यच्छब्देन सर्वनाम्ना द्युसंबंधात् प्रत्यभिज्ञायमाने पूर्ववाक्यनिर्दिष्टे ब्रह्मणि स्वसामर्थ्ये
न परामृष्टे सत्यर्थात् ज्योतिःशब्दस्यापि तद्विषयत्वोपपत्तेः॥ तस्मादिह ज्योतिरिति ब्रह्म प्रतिपत्तव्यं॥ ॥ छंदोभिधानान्नेति चेन्न त
था चेतोर्पणनिगदात्तथा हि दर्शनं॥ ॥ अथ यदुक्तं पूर्वस्मिन्नपि वाक्ये न ब्रह्माभिहितमस्ति॥ गायत्री वा इदं सर्वं भूतं यदिदं किं
चेति गायत्र्याख्यस्य छंदसोभिधानादिति तत्परिहर्तव्यं॥ कथं पुनः छंदोभिधानान्न ब्रह्माभिहितमिति शक्यते वक्तुं॥ यावता ता
वानस्य महिमा इत्यस्यामृचि चतुष्पाद्ब्रह्म दर्शितं॥ नैतदस्ति। गायत्री वा इदं सर्वमिति गायत्रीमुपक्रम्य तामेव भूतपृथिवीशरीर
हृदयभेदैर्व्याख्याय सैषा चतुष्पदा षड्विधा गायत्री तदेतदृचाभ्यनूक्तं तावानस्य महिमेति तस्यामेव व्याख्यातरूपायां गायत्र्यामु
दाहृतो मंत्रः कथमकस्माद्ब्रह्म चतुष्पादभिदध्यात् योपि तत्र यद्वै तद्ब्रह्मेति ब्रह्मशब्दस्यापि छंदसः प्रकृतत्वाच्छंदोविषय एतामेवं ब्र

शं०भा०
॥१७॥

ह्योपनिषदं वेदे रहस्यं हि वेदोपनिषदमिति व्याचक्षते॥ तस्माच्छंदोभिधानान्न ब्रह्मणः प्रकृतत्वमिति चेन्नैष दोषः॥ तथा चेतोर्पणनिगदा
त्तथा गायत्र्याख्यछंदोद्वारेण तदनुगते ब्रह्मणि चेतसोर्पणं चित्तसमाधानमनेन ब्राह्मणवाक्येन निगद्यते॥ गायत्री वा इदं सर्वमिति।
न ह्यक्षरसन्निवेशमात्राया गायत्र्याः सर्वात्मत्वं संभवतीति तस्माद्यद्गायत्र्याख्यविकारे अनुगतं जगत्कारणं ब्रह्म तदिह सर्वमित्युच्यते॥
यथा सर्वं खल्विदं ब्रह्मेति कार्यं च कारणादव्यतिरिक्तमिति वक्ष्यामः॥ तदनन्यत्वमारंभणशब्दादिभ्य इत्यत्र तथान्यत्रापि विकारद्वा
रेण ब्रह्मण उपासनं दृश्यते॥ एतं ह्येव बह्वृचा महत्युक्थे मीमांसंते एतमग्नावध्वर्यव एतं महाव्रते छंदोगा इति॥ तस्मादस्ति छंदो
भिधानेपि पूर्वस्मिन्वाक्ये ब्रह्म निर्दिष्टं तदेव ज्योतिर्वाक्ये प्रतिपरामृश्यते उपासनांतरविधानाय अपर आह साक्षादेव गायत्रीशब्देन
ब्रह्म प्रतिपाद्यते॥ संख्यासामान्यात् यथा गायत्री चतुःषडक्षरैः पादैः तथा ब्रह्म चतुष्पात् तथान्यत्रापि छंदोभिधायी शब्दोर्थांतरे
संख्यासामान्यात्प्रयुज्यमानो दृश्यते॥ तद्यथा॥ ते वा एते पंचान्ये दश संतस्तत्कृतमित्युपक्रम्याह सैषा विराडन्नादीति अस्मिन्पक्षे ब्र
ह्माभिहितमिति॥ छंदोभिधानं सर्वथाप्यस्ति॥ पूर्वस्मिन्वाक्ये प्रकृतं ब्रह्म॥ ॥भूतादिपादव्यपदेशोपपत्तेश्चैवं॥ ॥इतश्चैवमभ्युपगंत
व्यं॥ अस्ति पूर्वस्मिन्वाक्ये प्रकृतं ब्रह्मेति॥ यतो भूतादीन्पादान्व्यपदिशति॥ भूतपृथिवीशरीरहृदयानीति हि निर्दिश्याह॥ सैषा च
तुष्पदा षड्विधा गायत्रीति नहि ब्रह्मानाश्रयणे केवलस्य छंदसो भूतादयः पादा उपपद्यंते॥ अपि च ब्रह्मानाश्रयणे नेयमृक् संबध्येत॥ तावा
नस्य महिमेति अनया हि ऋचा स्वरसेन ब्रह्मैवाभिधीयते पादोस्य सर्वा भूतानि त्रिपादस्यामृतं दिवीति सर्वात्मत्वोपपत्तेः पुरुषसू
क्तेपीयमृक् ब्रह्मपरतयैव समाम्नायते॥ स्मृतिश्च ब्रह्मण एवंरूपतां दर्शयति॥ विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदिति॥ य
द्वै तद्ब्रह्मेति च निर्देशः॥ एवं सति मुख्यार्थ उपपद्यते॥ ते वा एते पंच ब्रह्मपुरुषा इति च हृदयसुषिरेषु ब्रह्मपुरुषश्रुतिः ब्रह्मसंबंधितायां संभ
वति॥ तस्मादस्ति पूर्वस्मिन्वाक्ये ब्रह्म प्रकृतं तदेव ज्योतिर्वाक्ये द्युसंबंधात्प्रत्यभिज्ञायमानं परामृश्यत इति सिद्धं॥ ॥उपदेश
भेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात्॥ ॥यदप्येतदुक्तं पूर्वं त्रिपादस्यामृतं दिवीति सप्तम्या द्यौराधारत्वेनोपदिष्टा इह पुनर ॥१७॥
थ यदतः परो दिवो ज्योतिरिति पंचम्या मर्यादात्वेन तस्मादुपदेशभेदान्न तस्येह प्रत्यभिज्ञानमस्तीति तत्परिहर्तव्यं॥ अत्रोच्यते॥
नायं दोषः॥ उभयस्मिन्नप्यविरोधात्॥ उभयस्मिन्नपि सप्तम्यंते पंचम्यंते चोपदेशे न प्रत्यभिज्ञानं विरुध्यते॥ यथा लोके वृक्षाग्रे

35/1913

स्य संबंधोपि श्येन उभयथोपदिश्यते॥ वृक्षाग्रे श्येनो वृक्षाग्रात्परतः श्येन इति च एवं दिव्येव सद्ब्रह्म दिवः परमित्युपदिश्यते॥ अपर
आह। यथा लोके वृक्षाग्रेणासंबद्धोपि श्येन उभयथा उपदिश्यमानो दृश्यते वृक्षाग्रे श्येनो वृक्षाग्रात्परतः श्येन इति च एवं दिवः पर
मपि सद्ब्रह्म दिवीत्युपदिश्यते॥ तस्मादस्ति पूर्वस्मिन्निर्दिष्टस्य ब्रह्मण इह प्रत्यभिज्ञानं अतः परमेव ब्रह्म ज्योतिःशब्दमिति सिद्धं॥ ॥
प्राणस्तथानुगमात्॥ ॥अस्ति कौषीतकिब्राह्मणोपनिषदि इंद्रप्रतर्दनाख्यायिका॥ प्रतर्दनो ह वै दैवोदासिरिंद्रस्य प्रियं धामोप
जगाम युद्धेन च पौरुषेण चेत्यारभ्याम्नाता तस्यां श्रूयते स होवाच प्राणोस्मि प्रज्ञात्मा तं मामायुरमृतमित्युपास्स्वेति तथोत्तरत्राप्य
थ खलु प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्योत्थापयतीति तथा न वाचं विजिज्ञासीत वक्तारं विद्यादिति अंते च स एष प्राण एव प्रज्ञात्मानंदोज
रोमृत इत्यादि॥ तत्र संशयः॥ किमिह प्राणशब्देन वायुमात्रमभिधीयते उत देवतात्मा उत जीवः अथवा परं ब्रह्मेति॥ नन्वत एव प्राण इत्य
त्र वर्णितं प्राणशब्दस्य ब्रह्मत्वम् इहापि च ब्रह्मलिंगमस्ति आनंदोजरोमृत इत्यादि कथं पुनरिह संशयः संभवतीति॥ अनेकलिंगदर्शनादि
ति ब्रूमः॥ केवलमिहाह ब्रह्मलिंगमेवोपलभ्यते सन्ति हि इतरलिंगान्यपि मामेव विजानीहीतींद्रस्य वचनं॥ देवतात्मलिंगं इदं शरीरं परि
गृह्योत्थापयतीति प्राणलिंगं॥ न वाचं विजिज्ञासीत वक्तारं विद्यादिति जीवलिंगं॥ अत उपपन्नः संशयः॥ तत्र प्रसिद्धेर्वायुः प्राण इति प्राप्त
उच्यते॥ प्राणशब्दं ब्रह्म विज्ञेयं॥ कुतः तथानुगमात्॥ तथा हि॥ पौर्वापर्येण पर्यालोच्यमाने वाक्ये पदार्थानां समन्वयो ब्रह्मप्रतिपादन
पर उपलभ्यते॥ उपक्रमे तावद्वरं वृणीष्वेतींद्रेणोक्तः॥ प्रतर्दनः परमपुरुषार्थं वरमुपचिक्षेप त्वमेव मे वृणीष्व यं त्वं मनुष्याय हिततमं
मन्यस इति तस्मै हिततमत्वेनोपदिश्यमानः प्राणः कथं परमात्मा न स्यात्॥ नह्यन्यत्र परमात्मज्ञानाद्धिततमप्राप्तिरस्ति॥ तमेव विदि
त्वाति मृत्युमेति नान्यः पंथा विद्यतेयनायेत्यादिश्रुतिभ्यः तथा स यो मां वेद न ह वै तस्य केन च न कर्मणा लोको मीयते न स्तेयेन न भ्रूणह
त्ययेत्यादि च ब्रह्मपरिग्रहे घटते॥ ब्रह्मविज्ञानेन हि सर्वकर्मक्षयः प्रसिद्धः॥ क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावरे इत्याद्यासु
श्रुतिषु प्रज्ञात्मत्वं च ब्रह्मपक्ष एवोपपद्यते॥ न ह्यचेतनस्य वायोः प्रज्ञात्मत्वं संभवति॥ तथोपसंहारेपि आनंदोजरोमृत इत्यानंदत्वा
दीनि च ब्रह्मणोन्यत्र न सम्यक् संभवंति॥ स न साधुना कर्मणा भूयान्भवति नो एवासाधुना कनीयान्॥ एष ह्येव साधु कर्म कारयति तं यमेभ्यो
लोकेभ्य उन्निनीषत एष उ एवासाधु कर्म कारयति तं यमधो निनीषते॥ एष लोकाधिपतिरेष लोकपाल एष लोकेश इति च सर्वमेतत्पर

शां०भा०
१८

स्मिन्ब्रह्मणिआश्रियमाणेअनन्वयंतप्राक्यतेसमुद्बंध्यप्राणात्तस्मात्प्राणोब्रह्म॥ ॥नवक्तुरात्मोपदेशादितिचेदध्यात्मसंबंधभूमा
ह्यस्मिन्॥ ॥यदुक्तंप्राणोब्रह्मेतितदाक्षिप्यते॥नपरंब्रह्मप्राणशब्दं।कस्मात्वक्तुरात्मोपदेशात्।वक्ताहींद्रोनामकश्चिद्विग्रहवान्देव
ताविशेषः॥स्वमात्मानंप्रतर्दनायाचचक्षे।मामेवविजानीहीत्युपक्रम्यप्राणोस्मिप्रज्ञात्मेत्यहंकारवादेन।सएषवक्तुरात्मत्वेनोपदिश्यमानः
प्राणःकथंब्रह्मस्यात्।नहिब्रह्मणोवक्तृत्वंसंभवतिअवागमनाइत्यादिश्रुतिभ्यः।तथाविग्रहसंबंधिभिरेवब्रह्मण्यसंभवद्भिर्धर्मैरात्मानं
तुष्टावत्रिशीर्षाणंत्वाष्ट्रमहनमरुन्मुखान्यतीन्सालावृकेभ्यःप्रायच्छमित्येवमादिभिः।प्राणत्वंचेंद्रस्यबलवत्त्वादुपपद्यते॥प्राणोवै
बलमितिहिविज्ञायते।बलस्यचेंद्रोदेवताप्रसिद्धा।याकाचिद्बलकृतिरिंद्रकर्मैवतदितिहिवदंति॥प्रज्ञात्मत्वमप्यप्रतिहतज्ञानत्वा
द्देवतात्मनःसंभवति॥अप्रतिहतज्ञानादेवताइतिवदंति।निश्चितेचैवंदेवतात्मोपदेशेहिततमत्वादिवचनानियथासंभवंतद्विषयाण्ये
वयोजयितव्यानि।तस्मादिंद्रस्यात्मोपदेशान्नप्राणोब्रह्मेत्याक्षिप्यप्रतिसमाधीयते॥अध्यात्मसंबंधभूमाह्यस्मिन्निति।अध्यात्म
संबंधःप्रत्यगात्मसंबंधःतस्यभूमाबाहुल्यंअस्मिन्नध्यायउपलभ्यते।यावद्ध्यस्मिञ्छरीरेप्राणोवसतितावदायुरितिप्राणस्यैवप्रज्ञा
त्मनःप्रत्यग्भूतस्यायुःप्रदानोपसंहरयोःस्वातंत्र्यंदर्शयति।नदेवताविशेषस्यपराचीनस्यतथा।अस्तित्वेचप्राणानांनिःश्रेयसमित्यध्या
त्मेवेंद्रियाश्रयंप्राणंदर्शयति।तथाप्राणएवप्रज्ञात्मेदंशरीरंपरिगृह्योत्थापयतीति।नवाचंविजिज्ञासीतवक्तारंविद्यादितिचोपक्रम्यत
द्यथारथस्यारेषुनेमिरर्पितानाभावराअर्पिताएवमेवैताभूतमात्राःप्रज्ञामात्रासुसमर्पिताःप्राणेअर्पिताःसएषप्राणएवप्रज्ञात्माआनं
दोजरोमृतइतिविषयेंद्रियव्यवहारानभिभूतंप्रत्यगात्मानमेवोपसंहरति।समआत्मेतिविद्यादितिचोपसंहारःप्रत्यगात्मपरिग्रहेसाधु
नपराचीनपरिग्रहे।अयमात्माब्रह्मसर्वानुभूरितिचश्रुत्यंतरं।तस्मादध्यात्मसंबंधबाहुल्याद्ब्रह्मोपदेशएवायंनदेवतात्मोपदे
शः॥कथंतर्हिवक्तुरात्मोपदेशः॥ ॥शास्त्रदृष्ट्यातूपदेशोवामदेववत्॥ ॥इंद्रोनामदेवतात्मास्वमात्मानंपरमात्मत्वेनाहमेवपरंब्रह्मे १८
त्यार्षेणदर्शनेनयथाशास्त्रंपश्यन्नुपदिशतिस्म॥मामेवविजानीहीतियथातद्धैतत्पश्यन्नृषिर्वामदेवःप्रतिपेदेअहंमनुरभवंसू
र्यश्चेतितद्वत्।तद्योयोदेवानांप्रत्यबुध्यतसएवतदभवदितिश्रुतिः॥यत्पुनरुक्तंमामेवविजानीहीत्युक्त्वाविग्रहधर्मैरिंद्रःस्वात्मानं
तुष्टावत्वाष्ट्रवधादिभिरितितत्परिहर्तव्यं।अत्रोच्यते।नतावत्त्वाष्ट्रवधादीनांविज्ञेयेंद्रस्तुत्यर्थत्वेनयत्कारणंत्वाष्ट्रवधादीनिसाहसान्युप

37/1913

न्यस्यपरेणविज्ञानस्तुतिमनुसंदधातितस्यमेतत्रलोमचमीयतेसयोमांवेदनहवैतस्यकेनचकर्मणालोकोमीयतइत्यादिना।एतदु
क्तंभवति।यस्मादीदृशान्यपिक्रूराणिकर्माणिकृतवतोममब्रह्मभूतस्यलोमापिनहिंस्यतेसयोन्योपिमांवेदनहवैतस्यकेनचित्कर्
मणालोकोहिंस्यतइति॥विज्ञेयंतुब्रह्मैवप्राणोस्मिप्रज्ञात्मेतिवक्ष्यमाणंतस्माद्ब्रह्मवाक्यमेतत्॥ ॥जीवमुख्यप्राणलिंगान्नेतिचेन्नो
पासनात्रैविध्यादाश्रितत्वादिहतद्योगात्॥ ॥यद्यप्यध्यात्मसंबंधभूमदर्शनान्नपराचीनस्यदेवतात्मनउपदेशस्तथापिनब्रह्मवाक्यं
भवितुमर्हति।कुतः।जीवलिंगान्मुख्यप्राणलिंगाच्च॥जीवस्यतावदस्मिन्वाक्येविस्पष्टंलिंगमुपलभ्यते॥नवाचंविजिज्ञासीतवक्तारं
विद्यादित्यादि।अत्रहिवागादिभिःकरणैर्व्यापृतस्यकार्यकारणाध्यक्षस्यजीवस्यविज्ञेयत्वमभिधीयते।तथामुख्यप्रा
णलिंगमपि।अथखलुप्राणएवप्रज्ञात्मेदंशरीरंपरिगृह्योत्थापयतीति।शरीरधारणंचमुख्यस्यप्राणस्यधर्मः।प्राणसंवादेवागादीन्
प्राणान्प्रकृत्यतानुपदिष्टतःप्राणउवाचमामोहमापद्यथाहमेवैतत्पंचधात्मानंप्रविभज्यैतद्बाणमवष्टभ्यविधारयामीतिश्रवणात्।ये
त्विमंशरीरंपरिगृह्योत्थापयतीतिपठंतितेषामिमंजीवमिंद्रियग्रामंवापरिगृह्यशरीरमुत्थापयतीतिव्याख्येयं॥प्रज्ञात्मत्वमपिजीवेतावच्चेतन
त्वादुपपन्नंमेवंजीवमुख्यप्राणपरिग्रहेचप्राणप्रज्ञात्मनोःसहवृत्तित्वेनाभेदेननिर्देशःस्वरूपेणचभेदनिर्देशइत्युभयथानिर्देशउ
पपद्यते।योवैप्राणःसाप्रज्ञायावैप्रज्ञासप्राणःसहह्येतावस्मिञ्छरीरेवसतःसहोत्क्रामतइति।ब्रह्मपरिग्रहेतुकिंकस्माद्भिद्यते।तस्मादि
हजीवमुख्यप्राणयोरन्यतरःउभौवाप्रतीयेयातांनब्रह्मेतिचेन्नैतदेवं।उपासनात्रैविध्यात्।एवंसतित्रिविधमुपासनंप्रसज्येत।जीवो
पासनंमुख्यप्राणोपासनंब्रह्मोपासनंचेति।नचैतदेकस्मिन्वाक्येभ्युपगंतुंयुक्तं।उपक्रमोपसंहाराभ्यांहिवाक्यैकत्वमुपगम्यते।मामे
वविजानीहीत्युपक्रम्यप्राणोस्मिप्रज्ञात्मातंमामायुरमृतमित्युपास्स्वेत्युक्त्वांतेसएषप्राणएवप्रज्ञात्मानंदोजरोमृतइत्येकरूपावुपक्रमो
पसंहारौदृश्येते।तत्रार्थैकत्वंयुक्तमाश्रयितुं।नचब्रह्मलिंगमन्यपरत्वेनपरिणेतुंशक्यं।दशानांभूतमात्राणांचब्रह्मणोन्यत्रार्पणानुप
पत्तेः।आश्रितत्वाच्च।अन्यत्रापिब्रह्मलिंगवशात्प्राणशब्दस्यब्रह्मणिवृत्तेः।इहापिचहिततमोपन्यासादिब्रह्मलिंगयोगाद्ब्रह्मोपदेशएवा
यमितिगम्यते।यत्तुमुख्यप्राणलिंगदर्शितंइदंशरीरंपरिगृह्योत्थापयतीतितदसत्।प्राणव्यापारस्यापिपरमात्मायत्तत्वात्परमात्मन्युपच
रितुंशक्यत्वात्।नप्राणेननापानेनमर्त्योजीवतिकश्चन।इतरेणतुजीवंतियस्मिन्नेतावुपाश्रितावितिश्रुतेः।यदपिनवाचंविजिज्ञासीतव

वकारं विद्यादिति जीवलिंगदर्शितं तदपि न ब्रह्मपक्षं निवारयति॥ नहि जीवो नामात्यंतभिन्नो ब्रह्मणः॥ तत्त्वमसि अहं ब्रह्मास्मीत्यादिश्रुतिभ्यः बुद्ध्याद्यु
पाधिकृतं तु विशेषमाश्रित्य ब्रह्मैव सन्जीवः कर्ता भोक्ता चेत्युच्यते॥ तस्योपाधिकृतविशेषपरित्यागेन स्वरूपं ब्रह्म दर्शयितुं न वाचं विजिज्ञासीत वक्ता
रं विद्यादित्यादिना प्रत्यगात्माभिमुखीकरणार्थ उपदेशो न विरुध्यते॥ यद्वाचानभ्युदितं येन वागभ्युद्यते तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासत इत्या
दि च श्रुत्यंतरं वचनादिक्रियाव्यापृतस्यात्मनो ब्रह्मत्वं दर्शयति॥ यत्पुनरेतदुक्तं सह ह्येतावस्मिन्शरीरे वसतः सहोत्क्रामत इति प्राणप्रज्ञात्मनोर्भे
ददर्शनं ब्रह्मवादे नोपपद्यत इति नैष दोषः॥ ज्ञानक्रियाशक्तिद्वयाश्रययोर्बुद्धिप्राणयोः प्रत्यगात्मोपाधिभूतयोर्भेदनिर्देशोपपत्तेः॥ उपाधिद्वयो
पहितस्य तु प्रत्यगात्मनः स्वरूपेणाभेद इत्यतः प्राण एव प्रज्ञात्मेत्येकीकरणमविरुद्धं॥ अथवा नोपासनात्रैविध्यादाश्रितत्वादिह तद्योगादित्यस्या
यमन्योर्थः॥ ब्रह्मवाक्येपि जीवमुख्यप्राणलिंगं न विरुध्यते॥ कथं उपासात्रैविध्यात्॥ त्रिविधमिह ब्रह्मणः उपासनं विवक्षितं॥ प्राणधर्मेण प्रज्ञाधर्मे
ण स्वधर्मेण च॥ तत्रायुरमृतमित्युपास्स्व आयुः प्राण इतीदं शरीरं परिगृह्योत्थापयति तस्मादेतदेवोक्थमुपासीतेति च प्राणधर्मः॥ अथ यथास्यै प्र
ज्ञायै सर्वाणि भूतान्येकं भवंति तद्व्याख्यास्यामीत्युपक्रम्य वागेवास्या एकमंगमदूदुहत्तस्यै नाम परस्तात्प्रतिविहिता भूतमात्रा प्रज्ञया वाचं स
मारुह्य वाचा सर्वाणि नामान्याप्नोतीत्यादि प्रज्ञाधर्मः॥ ता वा एता दशैव भूतमात्रा अधिप्रज्ञं दश प्रज्ञामात्रा अधिभूतं यद्धि भूतमात्रा न स्युः प्र
ज्ञामात्रा न स्युः यद्धि प्रज्ञामात्रा न स्युः न भूतमात्राः स्युः न ह्यन्यतरतो रूपं किंचन सिध्येन्नो एतन्नाना तद्यथा रथस्यारेषु नेमिरर्पिता नाभाव
रा अर्पिता एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्राणेर्पिताः स एष प्राण एव प्रज्ञात्मेत्यादि ब्रह्मधर्मः॥ तस्माद्ब्रह्मण ए
वैतदुपाधिद्वयधर्मेण स्वधर्मेण चैकमुपासनं त्रिविधं विवक्षितं॥ अन्यत्रापि मनोमयः प्राणशरीर इत्यादावुपाधिधर्मेण ब्रह्मण उपा
सनमाश्रितमिहापि तद्युज्यते॥ वाक्यस्योपक्रमोपसंहाराभ्यामेकार्थत्वावगमात् प्राणप्रज्ञात्मब्रह्मलिंगावगमाच्च तस्माद्ब्रह्म
वाक्यमेतदिति सिद्धं॥ ॥इति श्रीमच्छारीरकमीमांसाभाष्ये श्रीमद्गोविंदभगवत्पूज्यशिष्यश्रीमच्छंकरभगवत्पादकृतौ प्रथ
माध्यायस्य प्रथमः पादः॥१॥ श्रीकृष्णार्पणमस्तु॥१॥ प्रथमे पादे जन्माद्यस्य यत इत्याकाशादेः समस्तस्य जगतो जन्मादिकार ॥३६॥
णं ब्रह्मेत्युक्तं॥ तस्य समस्तजगत्कारणस्य ब्रह्मणो व्यापित्वं नित्यत्वं सर्वज्ञत्वं सर्वात्मत्वमित्येवंजातीयका धर्मा उक्ता एव भ
वंति॥ अर्थांतरप्रसिद्धानां च केषांचिच्छब्दानां ब्रह्मविषयत्वहेतुप्रतिपादनेन कानिचिद्वाक्यानि संदिह्यमानानि ब्रह्मपरतया निर्णीता

39/19/3

नि॥ पुनरप्यन्यानि वाक्यानि अस्पष्टब्रह्मलिंगानि संदिह्यंते॥ किं परं ब्रह्म प्रतिपादयंत्याहोस्विदर्थांतरं किंचिदिति॥ तन्निर्णयाय द्वि
तीयतृतीयौ पादावारभ्येते॥ ॥सर्वत्र प्रसिद्धोपदेशात्॥१॥ इदमाम्नायते॥ सर्वं खल्विदं ब्रह्म तज्जलानिति शांत उपासीत॥ अथ खलु क्रतु
संकल्पमयः पुरुषो यथाक्रतुरस्मिन्लोके पुरुषो भवति तथेतः प्रेत्य भवति स क्रतुं कुर्वीत मनोमयः प्राणशरीर इत्यादि॥ तत्र संशयः
किमिह मनोमयत्वादिभिर्धर्मैः शारीर आत्मोपास्यत्वेनोपदिश्यते आहोस्वित्परं ब्रह्मेति॥ किं तावत्प्राप्तं शारीर इति॥ कुतः॥ तस्य हि का
र्यकरणाधिपतेः प्रसिद्धो मनआदिभिः संबंधो न परस्य ब्रह्मणः अप्राणो ह्यमनाः शुभ्र इत्यादिश्रुतिभ्यः॥ ननु सर्वं खल्विदं ब्रह्मेति स्वशब्देनै
व ब्रह्मोपात्तं कथमिह शारीर आत्मोपास्य आशंक्यते नैष दोषः॥ नेदं वाक्यं ब्रह्मोपासनविधिपरं किं तर्हि शमविधिपरं यत्कारणं सर्वं
खल्विदं ब्रह्म तज्जलानिति शांत उपासीतेत्याह॥ एतदुक्तं भवति॥ यस्मात्सर्वमिदं विकारजातं ब्रह्मैव तज्जत्वात्तल्लत्वात्तदनत्वाच्च सर्वस्य
कालत्रये रागादयः संभवंति तस्माच्छांत उपासीतेति॥ न च शमविधिपरत्वे सत्यनेन वाक्येन ब्रह्मोपासनं नियंतुं शक्यते॥ उपासनं तु स क्रतुं कु
र्वीतेत्यनेन विधीयते क्रतुः संकल्पो ध्यानमित्यर्थः॥ तस्य च विषयत्वेन श्रूयते मनोमयः प्राणशरीर इति जीवलिंगं अतो ब्रूमो जीवविषयमेत
दुपासनमिति॥ सर्वकर्मा सर्वकाम इत्यपि श्रूयमाणं पर्यायेण जीवविषयमुपपद्यते॥ एष आत्मांतर्हृदयेऽणीयान्व्रीहेर्वा यवाद्वेति च
हृदयायतनत्वमणीयस्त्वं चाराग्रमात्रस्य जीवस्यावकल्पते नापरिच्छिन्नस्य ब्रह्मणः॥ ननु ज्यायान्पृथिव्या इत्याद्यपि न परिच्छिन्ने कल्पत इत्यत्र ब्रू
मः न तावदणीयस्त्वं ज्यायस्त्वं चोभयं समाश्रयितुं शक्यं विरोधात्॥ अन्यतराश्रयणे च प्रथमश्रुतत्वादणीयस्त्वं युक्तमाश्रयितुं॥ ज्यायस्त्वं तु ब
ह्मभावापेक्षया भविष्यतीति निश्चिते तु जीवविषयत्वे यदंते ब्रह्मत्वकीर्तनमेतद्ब्रह्मेति तदपि प्रकृतपरामर्शार्थत्वाज्जीवविषयमेव तस्मान्मनोमयत्वा
दिभिर्धर्मैर्जीव उपास्य इत्येवं प्राप्ते ब्रूमः॥ ब्रह्मैव परमेव ब्रह्मेति तन्मनोमयत्वादिभिर्धर्मैरुपास्यं कुतः सर्वत्र प्रसिद्धोपदेशात्॥ यत्सर्वेषु वेदां
तेषु प्रसिद्धं ब्रह्मशब्दस्यालंबनं जगत्कारणं इह च सर्वं खल्विदं ब्रह्मेति वाक्योपक्रमे श्रुतं॥ तदेव मनोमयत्वादिभिर्धर्मैर्विशिष्टमुपदिश्यत इ
ति युक्तं॥ एवं प्रकृतहानाप्रकृतप्रक्रिये न भविष्यतः॥ ननु वाक्योपक्रमे शमविधिविवक्षया ब्रह्म निर्दिष्टं न स्वविवक्षयेत्युक्तं॥ अत्रोच्यते॥
यद्यपि शमविवक्षया ब्रह्म निर्दिष्टं तथापि मनोमयत्वादिषूपदिश्यमानेषु तत्संनिहितं भवति॥ जीवस्तु न संनिहितो न च स्वशब्देनोपात्त इति

ब्रं॰भा॰
२०

वेषयत्वं॥ विवक्षितगुणोपपत्तेश्च॥२॥ वक्तुमिष्टा विवक्षिताः॥ यद्यप्यपौरुषेये वेदे वक्तुरभावान्नेच्छार्थः॥ संभवति तथाप्युपादेयत्वेन फलेनोप
चर्यते॥ लोके हि यच्छब्दाभिहितमुपादेयं भवति तद्विवक्षितमित्युच्यते यदनुपादेयं तदविवक्षितमिति॥ तद्वद्वेदेप्युपादेयत्वेनाभिहितं वि
वक्षितं भवतीतरदविवक्षितं॥ उपादानानुपादाने तु वेदवाक्यतात्पर्यातात्पर्याभ्यामवगम्येते॥ तदिह ये विवक्षिता गुणा उपासनायामुपाद
यत्वेनोपदिष्टाः सत्यसंकल्पप्रभृतयस्ते परस्मिन्ब्रह्मण्युपपद्यंते॥ सत्यसंकल्पत्वं हि सृष्टिस्थितिसंहारेष्वप्रतिहतशक्तित्वात्परमात्मनो वक
ल्प्यते॥ परमात्मगुणत्वेन च य आत्मापहतपाप्मेत्यत्र सत्यकामः सत्यसंकल्प इति श्रुत आकाशात्मेत्याकाशवदात्मास्येत्यर्थः॥ सर्वगतत्वादिभिर्ध
र्मैः संभवत्याकाशेन साम्यं ज्यायान्पृथिव्या इत्यादिना चैतद्दर्शयति॥ यदाप्याकाश आत्मा स्येति व्याख्यायते तदापि संभवति स
र्वजगत्कारणस्य सर्वात्मनो ब्रह्मण आकाशात्मत्वम् अत एव सर्वकर्मेत्यादि एवमिहोपास्यतया विवक्षिता गुणा ब्रह्मण्युपपद्यंते॥ यदुक्तं मनो
मयः प्राणशरीर इति जीवलिंगं न तद्ब्रह्मण्युपपद्यत इति तदपि ब्रह्मण्युपपद्यत इति क्रमः॥ सर्वात्मत्वाद्धि ब्रह्मणो जीवसंबंधीनि मनोमयत्वा
दीनि ब्रह्मसंबंधीनि भवंति॥ तथा च ब्रह्मविषये श्रुतिस्मृती भवतः॥ त्वं स्त्री त्वं पुमानसि त्वं कुमार उत वा कुमारी त्वं जीर्णो दंडेन वं गछसि वि
भि त्वं जातो भवसि विश्वतोमुख इति॥ सर्वतः पाणिपादं तत्सर्वतोक्षिशिरोमुखं॥ सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठतीति च॥ अप्राणो ह्य
मनाः शुभ्र इति श्रुतिः शुद्धब्रह्मविषया इयं तु मनोमयः प्राणशरीर इति सगुणब्रह्मविषयेति विशेषः॥ अतो विवक्षितगुणोपपत्तेः परमेव ब्रह्मो
पास्यत्वेनोपदिष्टमिति गम्यते॥ अनुपपत्तेस्तु न शारीरः॥३॥ पूर्वसूत्रेण ब्रह्मणि विवक्षितानां गुणानामुपपत्तिरुक्ता॥ अनेन तु शारीरे तेषा
मनुपपत्तिरुच्यते॥ तु शब्दोवधारणार्थो ब्रह्मैवोक्तेन न्यायेन मनोमयत्वादिगुणं न तु शारीरो जीवो मनोमयत्वादिगुणो यत्कारणं स
त्यसंकल्प आकाशात्मा अवाक्यनादरो ज्यायान्पृथिव्या इत्येवंजातीयका गुणा न शारीरे आंजस्येनोपपद्यंते॥ शारीर इति शरीरे भव इ ॥२०॥
त्यर्थः॥ न श्वरोपि शारीरे भवति सत्यं शारीरे भवति॥ न तु शारीर एव भवति॥ ज्यायान्पृथिव्या ज्यायानंतरिक्षादाकाशवत्सर्वगतश्च
नित्य इति च व्यापित्वश्रवणात्॥ जीवस्तु शारीर एव भवति तस्य भोगाधिष्ठानाच्छरीरादन्यत्र वृत्त्यभावात्॥ कर्मकर्तृव्यपदेशाच्च॥४॥
इतश्च न शारीरो मनोमयत्वादिगुणो यस्मात्कर्मकर्तृव्यपदेशो भवति एतमितः प्रेत्याभिसंभवितास्मीति एतमिति प्रकृतं मनोमयत्वादि

41/1913

गुणमुपास्यमात्मानं कर्मत्वेन प्राप्यत्वेन व्यपदिशति॥ अभिसंभवितास्मीति शारीरमुपासकं कर्तृत्वेन अभिसंभविता अस्मि प्राप्तास्मीत्यर्थः
न च सत्यां गतावेकस्य कर्मकर्तृव्यपदेशो युक्तः॥ उपास्योपासकभावोपि भेदाधिष्ठान एव॥ तस्मादपि न शारीरो मनोमयत्वादिविशिष्टः॥ श
ब्दविशेषात्॥५॥ इतश्च शारीरादन्यो मनोमयत्वादिगुणो यस्माच्छब्दविशेषो भवति समानप्रकरणे श्रुत्यंतरे यथा व्रीहिर्वा यवो वा श्यामाको वा
श्यामाकतंदुलो वा एवमयमंतरात्मन्पुरुषो हिरण्मय इति शारीरस्यात्मनोन्यः शब्दोभिधायकः सप्तम्यंतोंतरात्मन्निति तस्माद्विशिष्टोन्यः
प्रथमांतः पुरुषशब्दो मनोमयत्वादिविशिष्टस्यात्मनोभिधायकः तस्मात्तयोर्भेदोधिगम्यते॥ स्मृतेश्च॥६॥ स्मृतिश्च शारीरपरमात्मनोर्भे
दं दर्शयति ईश्वरः सर्वभूतानां हृद्देशेर्जुन तिष्ठति॥ भ्रामयन्सर्वभूतानि यंत्रारूढानि मायया इत्याद्या॥ अत्राह॥ कः पुनरयं शारीरो नाम परमात्म
नोन्यो यः प्रतिषिध्यते अनुपपत्तेस्तु न शारीर इत्यादिना॥ श्रुतिर्हि नान्योतोस्ति द्रष्टा नान्योतोस्ति श्रोता इत्येवंजातीयका परमात्मनोन्यमात्मा
नं वारयति॥ यथा स्मृतिरपि॥ क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत इत्येवंजातीयकेत्यत्रोच्यते॥ सत्यमेवैतत्पर एव त्वात्मा देहेंद्रियमनोबु
द्ध्युपाधिभिः परिच्छिद्यमानो बालैः शारीर इत्युपचर्यते॥ यथा घटकरकाद्युपाधिवशादपरिच्छिन्नमपि नभः परिच्छिन्नवदवभासते तद्वत्॥
तदपेक्षया च कर्मकर्तृत्वादिभेदव्यवहारो न विरुध्यते प्राक्तत्त्वमसीत्यात्मैकत्वोपदेशग्रहणात्॥ गृहीते त्वात्मैकत्वे बंधमोक्षादिसर्वव्य
वहारपरिसमाप्तिरेव स्यात्॥ अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च॥७॥ अर्भकमल्पमोको नीडं एष म आ
त्मांतर्हृदय इति परिच्छिन्नायतनत्वात्स्वशब्देन चाणीयान्व्रीहेर्वा यवाद्वेत्यणीयस्त्वव्यपदेशाच्छारीर एवाराग्रमात्रो जीव इहोपदिश्य
ते न सर्वगतः परमात्मेति यदुक्तं तत्परिहर्तव्यं॥ अत्रोच्यते॥ नायं दोषः॥ न तावत्परिच्छिन्नदेशस्य सर्वगतव्यपदेशः कथमप्युपपद्यते सर्व
गतस्य तु सर्वदेशेषु विद्यमानत्वात्परिच्छिन्नव्यपदेशोपि कयाचिदपेक्षया संभवति यथा समस्तवसुधाधिपतिरपि सन्नयोध्याधि
पतिरिति व्यपदिश्यते॥ कया पुनरपेक्षया सर्वगतः सन्नीश्वरोर्भकौका अणीयांश्च व्यपदिश्यत इति निचाय्यत्वादेवमिति क्रमः॥ ए
वमणीयस्त्वादिगुणगणोपेत ईश्वरस्तत्र हृदयपुंडरीके निचाय्यो द्रष्टव्य उपदिश्यते॥ यथा सालग्रामे हरिस्तत्रास्य बुद्धिविज्ञानं ग्राहकं सर्व
गतोपीश्वरस्तत्रोपास्यमानः प्रसीदति॥ व्योमवच्चैतद्द्रष्टव्यं यथा सर्वगतमपि सद्व्योम सूच्याद्यपेक्षया अर्भकौकोणीयश्च व्यपदि
श्यते एवं ब्रह्मापि तदेवं निचाय्यत्वापेक्षं ब्रह्मणोर्भकौकस्त्वमणीयस्त्वं च न पारमार्थिकम् अत्र यदाशंक्यते हृदयायतनत्वाद्ब्रह्मणो हृदयानां च प्र

निशारीरं भिन्नत्वाद्भिन्नायतनानां च श्येनभकादीनामनेकत्वसावयवत्वानित्यत्वादिदोषदर्शनात ब्रह्मणोपि तत्प्रसंग इति तदपि परिहृतं भव
ति॥ संभोगप्राप्तिरिति चेन्न वैशेष्यात॥८॥ व्योमवत्सर्वगतस्य ब्रह्मणः सर्वप्राणिहृदयसंबंधाच्चिद्रूपतया च शारीरादविशिष्टत्वात्सुखदुःखा
दिसंभोगोप्यविशिष्टः प्रसज्येतैकत्वाच्च न हि परस्मादात्मनोन्यः कश्चिदात्मा संसारी विद्यते नान्योतोस्ति विज्ञातेत्यादिश्रुतिभ्यः॥ तस्मात्परस्यै
व संसारसंभोगप्राप्तिरिति चेन्न॥ वैशेष्यात॥ न तावत्सर्वप्राणिहृदयसंबंधाच्छारीरवद्ब्रह्मणः संभोगप्रसंगो वैशेष्याद्धि भवति शारीरपरमे
श्वरयोः एकः कर्ता भोक्ता धर्माधर्मसाधनः सुखदुःखादिमांश्च एकस्तद्विपरीतोपहतपाप्मत्वादिगुणः एतस्मादनयोर्विशेषादेकस्य भो
गो नेतरस्य॥ यदि च संनिधानमात्रेण वस्तुशक्तिमनाश्रित्य कार्यसंबंधोभ्युपगम्येत आकाशादीनामपि दाहादिप्रसंगः सर्वगतानेका
त्मवादिनामपि समावेतौ चोद्यपरिहारौ॥ यदप्येकत्वाद्ब्रह्मण आत्मांतराभावाच्छारीरस्य भोगेन ब्रह्मणो भोगप्रसंग इत्यत्र वदामः॥ इदं तावद्देवा
नांप्रियः प्रष्टव्यः॥ कथमयं त्वयात्मांतराभावोध्यवसित इति॥ तत्त्वमसि अहं ब्रह्मास्मि नान्योतोस्ति विज्ञातेत्यादिशास्त्रेभ्य इति चेद्यथाशास्त्रं त
र्हि शास्त्रीयोर्थः प्रतिपत्तव्यो न तत्रार्धजरतीयं लभ्यं शास्त्रं च तत्त्वमसीत्यपहतपाप्मत्वादिविशेषणं ब्रह्म शारीरस्यात्मत्वेनोपदिशच्छारीर
स्यैव तावत्तदुपभोक्तृत्वं वारयति॥ कुतस्तदुपभोगेन ब्रह्मण उपभोगप्रसंगः॥ यथागृहीतं शारीरस्य ब्रह्मणैकत्वं तदा मिथ्याज्ञाननिमि
त्तः शारीरस्योपभोगो न तेन परमार्थरूपस्य ब्रह्मणः संस्पर्शः न हि बालैस्तलमलिनतादिभिर्व्योम्नि विकल्प्यमाने तलमलिनतादिविशिष्ट
मेव परमार्थतो व्योम भवति॥ तदाह न वैशेष्यादिति॥ नैकत्वेपि शारीरस्योपभोगेन ब्रह्मण उपभोगप्रसंगो वैशेष्याद्विशेषो हि भवति मि
थ्याज्ञानसम्यग्ज्ञानयोर्मिथ्याज्ञानकल्पित उपभोगः सम्यग्ज्ञानदृष्टमेकत्वं न च मिथ्याज्ञानकल्पितेनोपभोगेन सम्यग्ज्ञानदृष्टं वस्तु ग्र
संस्पृश्यते॥ तस्मान्नोपभोगगंधोपि शक्य ईश्वरस्य कल्पयितुं॥ अत्ता चराचरग्रहणात॥९॥ कठवल्लीषु पठ्यते॥ यस्य ब्रह्म च क्षत्रं चो
भे भवत ओदनः मृत्युर्यस्योपसेचनं क इत्था वेद यत्र स इति॥ अत्र कश्चिदोदनोपसेचनसूचितोत्ता प्रतीयते॥ तत्र किमग्नि ॥२३॥
रत्ता स्यादुत जीवोथवा परमात्मेति संशयो विशेषानवधारणात॥ त्रयाणां चाग्निजीवपरमात्मनामस्मिन्ग्रंथे प्रश्नोपन्यासोपलब्धेः॥
किं तावत्प्राप्तमग्निरत्तेति कुतः अग्निरन्नाद इति श्रुतिप्रसिद्धिभ्यां जीवो वात्ता स्यात्तयोरन्यः पिप्पलं स्वाद्वत्तीति दर्शनान्न परमात्मा अनश्नन्न
न्यो अभिचाकशीतीति दर्शनादित्येवं प्राप्ते ब्रूमः अत्तात्र परमात्मा भवितुमर्हति॥ कुतश्चराचरग्रहणात् चराचरं हि स्थावरजंगमं मृत्यूपसे

43/1913

चनमिहाद्यत्वेन प्रतीयते॥ तादृशस्य चाद्यस्य न परमात्मनोन्यः कार्त्स्न्येनात्ता संभवति॥ परमात्मा तु विकारजातं संहरन्सर्वमत्तीत्युपपद्यते॥ न
न्विह चराचरग्रहणं नोपलभ्यते॥ कथं सिद्धवच्चराचरग्रहणं हेतुत्वेनोपादीयते॥ नैष दोषः॥ मृत्यूपसेचनत्वेन सर्वस्य प्राणिनिकायस्य प्रतीयमान
त्वात्॥ ब्रह्मक्षत्रयोश्च प्राधान्यात्प्रदर्शनार्थत्वोपपत्तेः॥ यत्तु परमात्मनोपि नात्तृत्वं संभवत्यनश्नन्नन्यो अभिचाकशीतीति दर्शनादिति॥ अत्रो
च्यते॥ कर्मफलोपभोगस्य प्रतिषेधकमेतद्दर्शनं तस्य संनिहितत्वात्॥ न विकारसंहारस्य प्रतिषेधकं सर्ववेदांतेषु सृष्टिस्थितिसंहारकारण
त्वेन ब्रह्मणः प्रसिद्धत्वात्तस्मात्परमात्मैवेहात्ता भवितुमर्हति॥ प्रकरणाच्च॥१०॥ ॐ इतश्च परमात्मैवेहात्ता भवितुमर्हति॥ यत्कारणं प्रक
रणमिदं परमात्मनो न जायते म्रियते वा विपश्चिदित्यादि प्रकृतग्रहणं च न्याय्यं॥ क इत्था वेद यत्र स इति दुर्विज्ञानत्वं परमात्मलिंगं॥ गुहां प्रवि
ष्टावात्मानौ हि तद्दर्शनात्॥११॥ कठवल्लीष्वेव पठ्यते॥ ऋतं पिबंतौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्धे छायातपौ ब्रह्मविदो वदंति पंचा
ग्नयो ये च त्रिणाचिकेता इति॥ तत्र संशयः किमिह बुद्धिजीवौ निर्दिष्टावुत जीवपरमात्मानाविति यदि बुद्धिजीवौ ततो बुद्धिप्रधानात्कार्यकरण
संघाताद्विलक्षणो जीवः प्रतिपादितो भवति॥ तदपीह प्रतिपादयितव्यं॥ येयं प्रेते विचिकित्सा मनुष्ये अस्तीत्येके नायमस्तीति चैके॥ एत
द्विद्यामनुशिष्टस्त्वयाहमिति पृष्टत्वात्॥ अथ जीवपरमात्मानौ ततो जीवाद्विलक्षणः परमात्मा प्रतिपादितो भवति तदपीह प्रतिपादयि
तव्यं॥ अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात्॥ अन्यत्र भूताच्च भव्याच्च यत्तत्पश्यसि तद्वदेति पृष्टत्वात्॥ अत्राह आक्षेप्ता
उभावप्येतौ पक्षौ न संभवतः॥ कस्मात् ऋतपानं कर्मफलोपभोगः सुकृतस्य लोक इति लिंगात्तच्चेतनस्य क्षेत्रज्ञस्य संभवति नाचे
तनाया बुद्धेः पिबंताविति च द्विवचनेन द्वयोः पानं दर्शयति श्रुतिः अतो बुद्धिक्षेत्रज्ञपक्षस्तावन्न संभवति॥ अत एव क्षेत्रज्ञपरमात्मप
क्षोपि न संभवति चेतनेपि परमात्मन्यृतपानासंभवात्॥ अनश्नन्नन्यो अभिचाकशीतीति मंत्रवर्णादिति॥ अत्रोच्यते॥ नैष दोषः॥
छत्रिणो गच्छंतीत्येकेनापि छत्रिणा बहूनामछत्रिणां छत्रित्वोपचारदर्शनादेवमेकेनापि पिबता द्वौ पिबंतावुच्येयातां॥ यद्वा जीवस्तावत्पिबति
ईश्वरस्तु पाययति पाययन्नपि पिबतीत्युच्यते॥ पाचयितर्यपि पक्तृत्वप्रसिद्धिदर्शनात्॥ बुद्धिक्षेत्रज्ञपरिग्रहेपि संभवति करणे कर्तृत्वो
पचारात् एधांसि पचंतीति प्रयोगदर्शनात्॥ न चाध्यात्माधिकारेन्यौ कौचिदृतं पिबंतौ संभवतः॥ तस्माद्बुद्धिजीवौ स्यातां जीवपरमा
त्मानौ वेति संशयः॥ किं तावत्प्राप्तं बुद्धिक्षेत्रज्ञाविति कुतः॥ गुहां प्रविष्टाविति विशेषणात्॥ यदि शरीरं गुहा यदि वा हृदयमुभयथा

शां०भा०
२२

पि बुद्धिक्षेत्रज्ञौ गुहां प्रविष्टावुपपद्येते॥ न च सति संभवे सर्वगतस्य ब्रह्मणो विशिष्टदेशत्वं युक्तं कल्पयितुं॥ सुकृतस्य लोक इति च कर्मगो
चरत्वं दर्शयति॥ परमात्मा तु न सुकृतस्य वा दुःकृतस्य वा गोचरे वर्तते न कर्मणा वर्द्धते नो कनीयानिति श्रुतेः॥ छायातपाविति चेतनाचे
तनयोर्निर्देश उपपद्यते॥ छायातपवत्परस्परविलक्षणत्वात्॥ तस्माद्बुद्धिक्षेत्रज्ञाविहोच्येयातामिति प्राप्त एवं प्राप्ते ब्रूमः॥ विज्ञानात्मपर
मात्मानाविहोच्येयातां॥ कस्मात्॥ आत्मानौ हि तावुभावपि चेतनौ समानस्वभावौ॥ संख्याश्रवणे च समानस्वभावेष्वेव लोके प्रतीतिर्दृश्य
ते अस्य गोर्द्वितीयोन्वेष्टव्य इत्युक्ते गौरेव द्वितीयोन्विष्यते नाश्वः पुरुषो वा तदिह ऋतपानेन लिंगेन निश्चिते विज्ञानात्मनि द्वितीयान्वेषणा
यां समानस्वभावश्चेतनः परमात्मैव प्रतीयते॥ ननूक्तं गुहाहितत्वदर्शनान्न परमात्मा प्रत्येतव्य इति गुहाहितत्वदर्शनादेव परमा
त्मा प्रत्येतव्य इति वदामः॥ गुहाहितत्वं तु श्रुतिस्मृतिष्वसकृत्परमात्मन एव दृश्यते॥ गुहाहितं गह्वरेष्ठं पुराणं यो वेद निहितं गुहायां परमे
व्योमन्॥ आत्मानमन्विच्छ गुहां प्रविष्टमित्याद्यासु॥ सर्वगतस्यापि ब्रह्मण उपलब्ध्यर्थो देशविशेषोपदेशो न विरुध्यत इत्येतदप्युक्तमेव॥ सुकृ
तलोकवर्तित्वं तु छत्रित्ववदेकस्मिन्नपि वर्तमानमुभयोरविरुद्धं॥ छायातपावित्यप्यविरुद्धं॥ छायातपवत्परस्परविलक्षणत्वात्सं
सारित्वासंसारित्वयोरविद्याकृतत्वात्संसारित्वस्य पारमार्थिकत्वाच्चासंसारित्वस्य॥ तस्माद्विज्ञाना=
त्मपरमात्मानौ गुहां प्रविष्टौ गृह्येते॥ कुतश्च विज्ञानात्मपरमात्मानौ गृह्येते॥ विशेषणाच्च॥१२॥ विशेषणं च विज्ञानात्मपरमात्मनोरे
व भवति॥ आत्मानं रथिनं विद्धि शरीरं रथमेव तु इत्यादिना परेण ग्रन्थेन रथिरथादिरूपककल्पनया विज्ञानात्मानं रथिनं संसारमोक्षयोर्गन्ता
रं कल्पयति॥ सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदमिति परमात्मानं गन्तव्यं कल्पयति॥ तथा तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्व
रेष्ठं पुराणं॥ अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहातीति पूर्वस्मिन्नपि ग्रन्थे मन्तृमन्तव्यत्वेनैतावेव विशेषितौ प्रकरणं चे
दं परमात्मनः॥ ब्रह्मविदो वदन्तीति च वक्तृविशेषोपादानं परमात्मपरिग्रहे घटते॥ तस्मादिह जीवपरमात्मानावुच्येयातां॥ एष एव न्या २२
यो द्वा सुपर्णा सयुजा सखाया इत्येवमादिष्वपि॥ तत्रापि ह्यध्यात्माधिकारान्न प्राकृतौ सुपर्णावुच्येते॥ तयोरन्यः पिप्पलं स्वाद्वत्तीति
अदनलिंगाद्विज्ञानात्मा भवति॥ अनश्नन्नन्योऽभिचाकशीतीत्यनशनचेतनत्वाभ्यां परमात्मा॥ अनंतरे च मंत्रे तावेव द्रष्टृद्र
ष्टव्यभावेन विशिनष्टि॥ समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः॥ जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीत

45/1913

शोक इति॥ अपर आह॥ द्वा सुपर्णेति नेयमृगस्याधिकरणस्य सिद्धान्तं भजते पैङ्गिरहस्यब्राह्मणेनान्यथा व्याख्यातत्वात्॥ तयोरन्यः पिप्पलं स्वा
द्वत्तीति सत्त्वमनश्नन्नन्योऽभिचाकशीतीत्यनश्नन्नन्योऽभिपश्यति ज्ञस्तावेतौ सत्त्वक्षेत्रज्ञाविति॥ सत्त्वशब्दो जीवः क्षेत्रज्ञशब्दः परमा
त्मेति यदुच्यते॥ तन्न सत्त्वक्षेत्रज्ञशब्दयोरन्तःकरणशारीरपरतया प्रसिद्धत्वात्तत्रैव च व्याख्यातत्वात्॥ तदेतत्सत्त्वं येन स्वप्नं पश्यत्यथ योऽयं
शारीर उपद्रष्टा स क्षेत्रज्ञस्तावेतौ सत्त्वक्षेत्रज्ञाविति॥ नाप्यस्याधिकरणस्य पूर्वपक्षं भजते॥ नह्यत्र शारीरः क्षेत्रज्ञः कर्तृत्वभोक्तृत्वादिना सं
सारधर्मेणोपेतो विवक्ष्यते॥ कथं तर्हि सर्वसंसारधर्मातीतो ब्रह्मस्वभावश्चैतन्यमात्रस्वरूपः अनश्नन्नन्योऽभिचाकशीतीति अनश्नन्नन्योऽ
भिपश्यति ज्ञ इति वचनात्॥ तत्त्वमसि क्षेत्रज्ञं चापि मां विद्धीत्यादिश्रुतिस्मृतिभ्यश्च॥ तावता च विद्योपसंहारदर्शनमेवावकल्पते॥ तावेतौ सत्त्व
क्षेत्रज्ञौ न ह वा एवंविदि किंचन रज आध्वंसत इत्यादि॥ कथं पुनरस्मिन्पक्षे तयोरन्यः पिप्पलं स्वाद्वत्तीति सत्त्वमिति अचेतने सत्त्वे भोक्तृत्ववचन
मिति उच्यते॥ नेयं श्रुतिरचेतनस्य सत्त्वस्य भोक्तृत्वं वक्ष्यामीति प्रवृत्ता॥ किं तर्हि चेतनस्य क्षेत्रज्ञस्याभोक्तृत्वं ब्रह्मस्वभावतां वक्ष्यामीति तद
र्थं सुखादिविक्रियावति सत्त्वे भोक्तृत्वमध्यारोपयति॥ इदं हि कर्तृत्वं भोक्तृत्वं सत्त्वक्षेत्रज्ञयोरितरेतरस्वभावाविवेककृतं कल्प्यते॥ परमार्थत
स्तु नान्यतरस्यापि संभवति॥ यस्यापि तत्स्वभावत्वाच्च सत्त्वस्य सुतरां न संभवति॥ तथा च श्रुतिः यत्र वा अन्यदिव स्यात्तत्रान्योऽन्यत्पश्ये
दित्या- अचेतनत्वात्सत्त्वस्याविक्रियत्वाच्च क्षेत्रज्ञस्य॥ अविद्याप्रत्य१॥ दिना स्वप्नदृष्टहस्त्यादिव्यवहारवदविद्याविषय एव कर्तृत्वादिव्यवहा
रं दर्शयति॥ यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदित्यादिना च विवेकिनः कर्तृत्वादिव्यवहारं वारयति॥ अन्तर उपपत्तेः॥१३॥ य एषो
ऽक्षिणि पुरुषो दृश्यत एष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति तद्यद्यप्यस्मिन्सर्पिर्वोदकं वा सिंचति वर्त्मनी एव गच्छतीत्यादि श्रू
यते॥ तत्र संशयः॥ किमयं प्रतिबिम्बात्माक्ष्यधिकरणो निर्दिश्यते अथवा विज्ञानात्मा उत देवतात्मेन्द्रियस्याधिष्ठाता अथवेश्वर इति॥ किं
तावत्प्राप्तं छायात्मा पुरुषप्रतिरूप इति॥ कुतः तस्य दृश्यमानत्वप्रसिद्धेः य एषोऽक्षिणि पुरुषो दृश्यत इति च प्रसिद्धवदुपदेशात्॥ विज्ञानात्म
नो वायं निर्देश इति युक्तं॥ स हि चक्षुषा रूपं पश्यंश्चक्षुषि संनिहितो भवति॥ आत्मशब्दश्चास्मिन्पक्षेऽनुकूलो भवति॥ आदित्यपुरुषो
वा चक्षुषोऽनुग्राहकः॥ प्रतीयते रश्मिभिरेषोऽस्मिन्प्रतिष्ठित इति श्रुतेः॥ अमृतत्वादीनां च देवतात्मन्यपि कथंचित्संभवात्॥ नेश्वरः स्थानवि
शेषनिर्देशात्॥ इत्येवं प्राप्ते ब्रूमः॥ परमेश्वर एवाक्षिण्यभ्यन्तरः पुरुष इहोपदिष्ट इति कस्मात्॥ उपपत्तेः॥ उपपद्यते हि परमेश्वरे गुणजातमि

शां०भा०
२३

द्योपदिश्यमानमात्मत्वंतावन्मुख्यया वृत्त्या परमेश्वर उपपद्यते स आत्मा तत्त्वमसीति श्रुतेः॥ अमृतत्वाभयत्वे च तस्मिन्नसकृत्श्रुते॥ तथा
परमेश्वरानुरूपमेतदक्षिस्थानं॥ यथा हि परमेश्वरः सर्वदोषैरलिप्तो पहतपाप्मत्वादिश्रवणात् तथाक्षिस्थानं सर्वलेपरहितमुपदिष्टं॥
तद्यद्यप्यस्मिन्सर्पिर्वोदकं वा सिंचति वर्त्मनी एव गच्छतीति श्रुतेः॥ संयद्वामादिगुणोपदेशश्च तस्मिन्नवकल्प्यते॥ एतं संयद्वाम इत्याचक्षत
एतं हि सर्वाणि वामान्यभिसंयंति॥ एष उ एव वामनीरेष हि सर्वाणि वामानि नयति एष उ एव भामनीरेष हि सर्वेषु लोकेषु भातीति च॥ अत उप
पत्तेरंतरः॥ स्थानादिव्यपदेशाच्च॥१४॥ कथं पुनराकाशवत्सर्वगतस्य ब्रह्मणोऽक्ष्यल्पं स्थानमुपपद्यत इत्यत्रोच्यते॥ भवेदेषाऽनवक्लृप्तिर्य
द्येतदेकं स्थानमस्य निर्दिष्टं भवेत्॥ संति ह्यन्यान्यपि पृथिव्यादीनि स्थानान्यस्य निर्दिष्टानि यः पृथिव्यां तिष्ठन्नित्यादिना तेषु हि चक्षुरपि नि
र्दिष्टं यश्चक्षुषि तिष्ठन्निति॥ स्थानादिव्यपदेशादित्यादिग्रहणेनैतद्दर्शयति न केवलं स्थानमेवैकमनुचितं ब्रह्मणो निर्दिश्यते किं तर्हि ना
मरूपमित्येवंजातीयकमनामरूपस्य ब्रह्मणोनुचितं निर्दिश्यमानं दृश्यते॥ तस्योदिति नाम हिरण्यश्मश्रुरित्यादि निर्गुणमपि सद्ब्रह्म ना
मरूपगतैर्गुणैः सगुणमुपासनार्थं तत्र तत्रोपदिश्यत इत्येतदप्युक्तमेवं सर्वगतस्यापि ब्रह्मण उपलब्ध्यर्थं स्थानविशेषो न विरुध्यते॥ शाल
ग्राम इव विष्णोरित्येतदप्युक्तमेव॥ सुखविशिष्टाभिधानादेव च॥१५॥ अपि च नैवात्र विवदितव्यं किं ब्रह्मास्मिन्वाक्येऽभिधीयते न वेति॥
सुखविशिष्टाभिधानादेव च ब्रह्मत्वसिद्धेः॥ सुखविशिष्टं हि ब्रह्म यद्वाक्योपक्रमे प्रक्रांतं प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति॥ तदेवेहाभिहितं
प्रकृतपरिग्रहस्य न्याय्यत्वात्॥ आरणिः आचार्यस्तु ते गतिं वक्तेति च गतिमात्राभिधानप्रतिज्ञानात्॥ कथं पुनर्वाक्योपक्रमे सुख
विशिष्टं ब्रह्म विज्ञायत इत्युच्यते॥ प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेत्येतदग्नीनां वचनं श्रुत्वोपकोसल उवाच विजानाम्यहं यत्प्राणो ब्रह्म कं च
तु खं च न विजानामीति तं प्रति वचनमिदमुक्तं यद्वाव कं तदेव खं यदेव खं तदेव कमिति॥ तत्र खंशब्दो भूताकाशे निरूढो लोके यदि तस्य विशे
षणत्वेन कंशब्दः सुखवाची नोपादीयेत तथा सति केवले भूताकाशे ब्रह्मशब्दो नामादिष्विव प्रतीकाभिप्रायेण प्रयुक्त इति प्रतीतिः २३
स्यात्॥ तथा कंशब्दस्य विषयेंद्रियसंपर्कजनिते सामये सुखे प्रसिद्धत्वात् यदि तस्य खंशब्दो विशेषणत्वेन नोपादीयेत लौकिकं
सुखं ब्रह्मेति प्रतीतिः स्यात्॥ इतरेतरविशेषितौ तु कंखंशब्दौ सुखात्मकं ब्रह्म गमयतः॥ तत्र द्वितीये ब्रह्मशब्देनुपादीयमाने कं खं
ब्रह्मेत्येवोच्यमाने कंशब्दस्य विशेषणत्वेनैवोपयुक्तत्वात्॥ सुखस्य गुणस्याध्येयत्वं स्यात्तन्माभूदित्युभयोः कंखंशब्दयोर्ब्रह्मशि

47/1913

रस्त्वं कं ब्रह्म खं ब्रह्मेति॥ इष्टं हि सुखस्यापि गुणस्य गुणवद्ध्येयत्वं तदेवं वाक्योपक्रमे सुखविशिष्टं ब्रह्मोपदिष्टं॥ प्रत्येकं च गार्हपत्या
दयोऽग्नयः स्वं स्वं महिमानमुपदिश्यैषा सोम्य तेऽस्मद्विद्यात्मविद्या चेत्युपसंहरंतः पूर्वत्र ब्रह्म निर्दिष्टमिति ज्ञापयंति॥ आचार्यस्तु ते गतिं व
क्तेति च गतिमात्राभिधानप्रतिज्ञानमर्थांतरविवक्षां वारयति॥ यथा पुष्करपलाश आपो न श्लिष्यंत एवमेवंविदि पापं कर्म न श्लिष्यत इति
चाक्षिस्थानं पुरुषं विजानतः पापेनानुपघातं ब्रुवन्नक्षिस्थानस्य पुरुषस्य ब्रह्मत्वं दर्शयति॥ तस्मात्प्रकृतस्यैव ब्रह्मणोऽक्षिस्थानतां संय
द्वामत्वादिगुणतां चोक्त्वाऽर्चिरादिकां तद्विदो गतिं वक्ष्यामीत्युपक्रमते य एषोऽक्षिणि पुरुषो दृश्यत एष आत्मेति होवाचेति॥ श्रुतोपनि
षत्कगत्यभिधानाच्च॥१६॥ इतश्चाक्षिस्थानः पुरुषः परमेश्वरो यस्मात्॥ श्रुतोपनिषत्कस्य श्रुतरहस्यविज्ञानस्य ब्रह्मविदो या गति
र्देवयानाख्या उत्तरा प्रसिद्धा श्रुतौ अथोत्तरेण तपसा ब्रह्मचर्येण श्रद्धयात्मानमन्विष्यादित्यमभिजायंत एतद्वै प्राणानामायतनमेत
दमृतमभयमेतत्परायणमेतस्मान्न पुनरावर्तंत इति स्मृतावप्यग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणं॥ तत्र प्रयाता गच्छंति
ब्रह्म ब्रह्मविदो जना इति सैवेहाक्षिपुरुषविदोऽभिधीयमाना दृश्यते॥ अथ यदु चैवास्मिञ्छव्यं कुर्वंति यदु च नार्चिषमे
वाभिसंभवंतीत्युपक्रम्य आदित्याच्चंद्रमसं चंद्रमसो विद्युतं तत्पुरुषोऽमानवः स एनान्ब्रह्म गमयत्येष देवपथो ब्रह्मपथ एतेन प्र
तिपद्यमाना इमं मानवमावर्तं नावर्तंत इति॥ तदिह ब्रह्मविषयया प्रसिद्धया गत्याक्षिस्थानस्य ब्रह्मत्वं निश्चीयते॥ अनवस्थितेरसंभवा
च्च नेतरः॥१७॥ यत्पुनरुक्तं छायात्मा विज्ञानात्मा देवतात्मा वा स्यादक्षिस्थान इत्यत्रोच्यते॥ न छायात्मादिरितर इह ग्रहणमर्हति।
कस्मादनवस्थितेः॥ न तावत् छायात्मनश्चक्षुषि नित्यमवस्थानं संभवति॥ यदैव हि कश्चित्पुरुषश्चक्षुरासीदति तदा चक्षुषि पुरु
षछाया दृश्यते अपगते तस्मिन्न दृश्यते॥ य एषोऽक्षिणि पुरुष इति च श्रुतिः संनिधानात्स्वचक्षुषि दृश्यमानं पुरुषमुपास्यत्वेनो
पदिशति॥ न च उपासनकाले छायाकरं कंचित्पुरुषं चक्षुःसमीपे संनिधाप्योपास्त इति युक्तं कल्पयितुमस्यैव शरीरस्य ना
शमन्वेष नश्यतीति च श्रुतिः छायात्मनोऽनित्यत्वं दर्शयति॥ असंभवाच्च तस्मिन्नमृतत्वादीनां गुणानां न छायात्मनि प्रतीतिः
तथा विज्ञानात्मनोपि साधारणे कृत्स्नशरीरेंद्रियसंबंधे सति चक्षुष्येवावस्थितत्वं वक्तुं न शक्यं ब्रह्मणस्तु व्यापिनोपि दृष्ट उपल
ब्ध्यर्थो हृदयादिदेशविशेषसंबंधः॥ समानश्च विज्ञानात्मन्यप्यमृतत्वादीनां गुणानामसंभवः॥ यद्यपि विज्ञानात्मा परमात्म

ब्र०भा० नोनन्यएवतथाविद्याकामकर्मकृतंतस्मिन्मर्त्यत्वमध्यारोपितंभयंचेत्यमृतत्वाभयत्वेनोपपद्येते॥संयद्वामत्वादयश्चैतस्मिन्नै
॥२४॥ श्वर्यादनुपपन्नाएवदेवतात्मनस्तुरश्मिभिरेषोस्मिन्प्रतिष्ठितइतिश्रुतेर्यद्यपिचक्षुष्यवस्थानंस्यात्तथाप्यात्मत्वंतावन्नसंभवति
पराग्रूपत्वादमृतत्वादयोपिनसंभवंत्युत्पत्तिप्रलयश्रवणादमृतत्वमपिदेवानांचिरकालावस्थानापेक्षमैश्वर्यमपिपरमेश्वराय
त्तंनस्वाभाविकंभीषास्माद्वातःपवतेभीषोदेतिसूर्यः॥भीषास्मादग्निश्चेंद्रश्चमृत्युर्धावतिपंचमइतिमंत्रवर्णात्॥तस्मात्परमेश्वर
एवायमक्षिस्थानःप्रत्येतव्यः॥अस्मिंश्चपक्षेगृह्यतइतिप्रसिद्धवदुपादानंशास्त्राद्यपेक्षंद्रष्टव्यंप्ररोचनार्थमितिव्याख्येयं॥अं
तर्याम्यधिदैवादिषुतद्धर्मव्यपदेशात्॥१८॥इमंचलोकंपरंचलोकंसर्वाणिचभूतान्यंतरोयमयतीत्युपक्रम्यश्रूयते।यःपृथि
व्यांतिष्ठन्पृथिव्याअंतरोयंपृथिवीनवेदयस्यपृथिवीशरीरंयःपृथिवीमंतरोयमयत्येषतआत्मांतर्याम्यमृतइत्यादि॥अत्राधिदैवत
मधिलोकमधियज्ञमधिभूतमध्यात्मंचकश्चिदंतरवस्थितोयमयितांतर्यामीतिश्रूयते॥सकिमधिदेवाद्यभिमानीदेवतात्माकश्चित्किं
वाप्राप्ताणिमाद्यैश्वर्यःकश्चिद्योगीकिंवापरमात्माकिंवार्थांतरंकिंचिदित्यपूर्वसंज्ञादर्शनात्संशयः॥किंतावन्नःप्रतिभाति॥संज्ञाया
अप्रसिद्धत्वात्संज्ञिनाप्यप्रसिद्धेनार्थांतरेणकेनचिद्भवितव्यमित्यथवानानिरूपितरूपमर्थांतरंशक्यमस्तीत्यभ्युपगंतुमंतर्यामिशब्द
श्चांतर्यमनयोगेनप्रवृत्तोनात्यंतमप्रसिद्धस्तस्मात्पृथिव्याद्यभिमानीकश्चिद्देवोंऽतर्यामीस्यात्॥तथाचश्रूयते॥पृथिव्येवयस्या
यतनमग्निर्लोकोमनोज्योतिरित्यादि॥सचकार्यकरणवत्त्वात्पृथिव्यादीनामंतस्तिष्ठन्यमयतीतियुक्तंदेवतात्मनोयमयितृत्वं॥यो
गिनोवाकस्यचित्सिद्धस्य॥सर्वानुप्रवेशेनयमयितृत्वंस्यात्॥नतुपरमात्माप्रतीयेताकार्यकरणत्वादित्येवंप्राप्तइदमुच्यते॥योंतर्या
म्यधिदैवादिषुश्रूयतेसपरमात्मैवस्यात्॥नान्यइति॥कुतस्तद्धर्मव्यपदेशात्॥तस्यहिपरमात्मनोधर्माइहनिर्दिश्यमानादृश्यंते।
पृथिव्यादितावदधिदैवादिभेदभिन्नंसमस्तविकारजातमंतस्तिष्ठन्यमयतीतिपरमात्मनोयमयितृत्वंधर्मउपपद्यतेसर्व ॥२४॥
विकारकारणत्वेसतिसर्वशक्त्युपपत्तेः॥एषतआत्मांतर्याम्यमृतइतिचात्मत्वामृतत्वेमुख्येपरमात्मनउपपद्येते॥यंपृथिवीनवे
देतिचपृथिवीदेवतायाअविज्ञेयमंतर्यामिणंब्रुवन्देवतात्मनोन्यमंतर्यामिणंदर्शयतिपृथिवीदेवताह्यहमस्मिपृथिवीत्यात्मानं
विजानीयात्॥तथाऽदृष्टोश्रुतइत्यादिर्व्यपदेशोरूपादिविहीनत्वात्परमात्मनउपपद्यते॥यत्त्वकार्यकरणस्यपरमात्मनोयमयितृ

49/1913

त्वंनोपपद्यतइतिनैषदोषः॥यन्नियच्छतितत्कार्यकरणैरेवतस्यकार्यकरणवत्त्वोपपत्तेः॥तस्याप्यन्योनियंतेत्यनवस्थादोषश्चनसंभ
वतिभेदाभावात्॥भेदेहिसत्यनवस्थादोषोपपत्तिः॥तस्मात्परमात्मैवांतर्यामी॥नचस्मार्तमतद्धर्माभिलापात्॥१९॥स्यादेतद्दृ
ष्टत्वादयोधर्माःसांख्यस्मृतिकल्पितस्यप्रधानस्याप्युपपद्यंते॥रूपादिहीनतयातस्यतैरभ्युपगमात्॥अप्रतर्क्यमविज्ञेयंप्रसु
प्तमिवसर्वतइतिहिस्मरंति॥तस्यापिनियंतृत्वंसर्वविकारकारणत्वादुपपद्यते॥तस्मात्प्रधानमंतर्यामिशब्दंस्यात्॥ईक्षतेर्नाशब्द
मित्यत्रनिराकृतमपिसत्प्रधानमिहादृष्टत्वादिव्यपदेशसंभवेनपुनराशंक्यते॥ततउत्तरमुच्यतेनचस्मार्तंप्रधानमंतर्यामिशब्दं
कथनात् भवितुमर्हति॥कस्मादतद्धर्माभिलापात्॥यद्यदृष्टत्वादिव्यपदेशःप्रधानस्यसंभवतितथापिनद्रष्टृत्वादिव्यपदेशःसंभवतिप्र
धानस्याचेतनत्वेनतैरभ्युपगमात्॥अदृष्टोद्रष्टाऽश्रुतःश्रोताऽमतोमंताऽविज्ञातोविज्ञातेतिहिवाक्यशेषइहभवति॥आत्मत्वमपिन
प्रधानस्योपपद्यते॥यदिप्रधानमात्मत्वद्रष्टृत्वाद्यसंभवान्नांतर्याम्यभ्युपगम्यतेशारीरस्तर्ह्यंतर्यामीभवतुशारीरोहिचेतनत्वात्
द्रष्टाश्रोतामंताविज्ञाताचभवत्यात्माचप्रत्यक्त्वादमृतश्चधर्माधर्मफलोपभोगोपपत्तेरदृष्टत्वादयश्चधर्माःशारीरेप्रसिद्धादर्शना
दिक्रियायाःकर्तरिप्रवृत्तिविरोधात्॥नदृष्टेर्द्रष्टारंपश्येरित्यादिश्रुतिभ्यश्च॥तस्यकार्यकरणसंघातमंतर्यमयितुंशीलंभोक्तृत्वात्
तस्माच्छारीरोंतर्यामीत्यतउत्तरंपठति॥शारीरश्चोभयेपिहिभेदेनैनमधीयते॥२०॥नेतिपूर्वसूत्रादनुवर्तते॥शारीरश्चनांतर्यामीस्या
त्कस्माद्यद्यपिद्रष्टृत्वादयोधर्मास्तस्यसंभवंतितथापिघटाकाशवदुपाधिपरिच्छिन्नत्वान्नकार्त्स्न्येनपृथिव्यादिष्वंतरवस्था
तुंचशक्नोति॥अपिचउभयेपिहिकाण्वामाध्यंदिनाश्चांतर्यामिणोभेदेनेनंशारीरंपृथिव्यादिवदधिष्ठानत्वेननियम्यत्वेनचाधी
यते॥योविज्ञानेतिष्ठन्नितिकाण्वाः॥यआत्मनितिष्ठन्नितिमाध्यंदिनाः॥यआत्मनितिष्ठन्नित्यस्मिंस्तावत्पाठेभवत्यात्मशब्दः
शारीरस्यवाचकः॥योविज्ञानेतिष्ठन्नित्यस्मिन्नपिपाठेविज्ञानशब्देनशारीरउच्यते॥विज्ञानमयोहिशारीरइतितस्माच्छा
रीरादन्यईश्वरोंतर्यामीतिसिद्धं॥कथंपुनरेकस्मिन्देहेद्वौद्रष्टारावुपपद्येतेयश्चायमीश्वरोंतर्यामीयश्चायमितरःशारीरः॥
कापुनरिहानुपपत्तिः॥नान्योतोस्तिद्रष्टेत्यादिश्रुतिवचनंविरुध्येत॥अत्रहिप्रकृतादंतर्यामिणोन्यंद्रष्टारंश्रोतारंमंतारंवि
ज्ञातारंचात्मानंप्रतिषेधतिनियंत्रंतरप्रतिषेधार्थमेतद्वचनमितिचेत्॥न॥नियंत्रंतराप्रसंगादविशेषश्रवणाच्च॥अत्रो

शां०भा०
॥२५॥

च्यते। अविद्याप्रत्युपस्थापितकार्यकरणोपाधिनिमित्तोयंशारीरांतर्यामिणोर्भेदव्यपदेशोन पारमार्थिकः। एकोहिप्रत्यगा
त्माभवतिनद्वौप्रत्यगात्मानौसंभवतः। एकस्यैवतुभेदव्यवहारउपाधिकृतः यथाघटाकाशोमहाकाशइति॥ ततश्चज्ञातृज्ञेया
दिभेदश्रुतयः प्रत्यक्षादीनिचप्रमाणानिसंसारानुभवोविधिप्रतिषेधशास्त्रंचेतिसर्वमेतदुपपद्यते॥ तथाचश्रुतिः। यत्रहिद्वै
तमिवभवति। तदितरइतरंपश्यतीत्यविद्याविषयेसर्वंव्यवहारंदर्शयति। यत्रत्वस्यसर्वमात्मैवाभूत्तत्केनकंपश्येदितिविद्यावि
षयेसर्वंव्यवहारंवारयति॥ अदृश्यत्वादिगुणकोधर्मोक्तेः॥२१॥ अथपराययातदक्षरमधिगम्यते। यत्तदद्रेश्यमग्राह्यमगोत्र
मवर्णमचक्षुःश्रोत्रंतदपाणिपादंनित्यंविभुंसर्वगतंसुसूक्ष्मंतदव्ययंयद्भूतयोनिंपरिपश्यंतिधीराइतिश्रूयतेतत्रसंशयः॥ किमय
मदृश्यत्वादिगुणकोभूतयोनिः प्रधानंस्यादुतशारीरआहोस्वित्परमेश्वरइति॥ तत्रप्रधानमचेतनंभूतयोनिरितियुक्तं। अचेतना
नामेवतस्यदृष्टांतत्वेनोपादानात्॥ यथोर्णनाभिःसृजतेगृह्णतेचयथापृथिव्यामोषधयःसंभवंति। यथासतःपुरुषात्केशलोमा
नितथाक्षरात्संभवतीहविश्वमिति। ननूर्णनाभिःपुरुषश्चचेतनाविहदृष्टांतत्वेनोपात्तो। नेतिक्रमोनदिकेवलस्यचेतनस्यत
त्रसूत्रयोनित्वंकेशलोमयोनित्वंचास्ति॥ चेतनाधिष्ठितंह्यचेतनमूर्णनाभिशरीरंसूत्रस्ययोनिः। पुरुषशरीरंचकेशलोम्नामि
तिप्रसिद्धं। अपिचपूर्वत्राद्रेष्टत्वाद्यभिलापसंभवेपिद्रष्टत्वाद्यभिलापासंभवात्तत्रप्रधानमभ्युपगतमिहत्वदृश्यत्वादयो
धर्माःप्रधानेसंभवंति। नचात्रविरुध्यमानोधर्मःकश्चिदभिलप्यते। ननुयःसर्वज्ञःसर्वविदित्ययंवाक्यशेषोचेतनेप्रधा
नेनसंभवतिकथंप्रधानंभूतयोनिः प्रतिज्ञायतइत्यत्रोच्यते॥ ययातदक्षरमधिगम्यतेयत्तदद्रेश्यमित्यक्षरशब्देनादृश्यत्वा
दिगुणकंभूतयोनिंश्रावयित्वापुनःश्रावयिष्यत्यक्षरात्परतःपरइति। तत्रयःपरोक्षरात्श्रुतःससर्वज्ञःसर्वविच्चभविष्यति॥
प्रधानमेवत्वक्षरशब्दनिर्दिष्टंभूतयोनिः। यदातुयोनिशब्दोनिमित्तवाचीतदाशारीरोपिभूतयोनिःस्यात्॥ धर्माधर्माभ्यांभू
तजातस्योपार्जनादित्येवंप्राप्तेभिधीयते। योयमदृश्यत्वादिगुणकोभूतयोनिःसपरमेश्वरएवस्यान्नान्यइति॥ कथमेतद
वगम्यतेधर्मोक्तेः परमेश्वरस्यहिधर्मइहोच्यमानोदृश्यते॥ यःसर्वज्ञःसर्वविदिति। नहिप्रधानस्याचेतनस्यशारीरस्य
वोपाधिपरिच्छिन्नदृष्टेःसर्वज्ञत्वंसर्वविच्चंवनभूतयोनिविषयमित्युक्तं॥ अत्रोच्यते॥ नैवसंभवतियत्कारणमक्षरात्संभ ॥२५॥ स

SI/1913

वतीहविश्वमितिप्रकृतंभूतयोनिंजायमानप्रकृतित्वेननिर्दिश्यानंतरमपिजायमानप्रकृतित्वेनैवसर्वज्ञंनिर्दिशतियःस
र्वज्ञःसर्वविद्यस्यज्ञानमयंतपः॥ तस्मादेतद्ब्रह्मनामरूपमन्नंचजायतइतितस्मान्निर्देशसाम्येनप्रत्यभिज्ञायमानत्वात्प्रकृत
स्यैवाक्षरस्यभूतयोनेःसर्वज्ञत्वंसर्ववित्त्वंचधर्मउच्यतइतिगम्यते॥ अक्षरात्परतःपरइत्यत्रापिनप्रकृताद्भूतयोनेरक्षरात्परःक
श्चिदभिधीयतेकथमेतदवगम्यतेयेनाक्षरंपुरुषंवेदसत्यंप्रोवाचतांतत्वतोब्रह्मविद्यामितिप्रकृतस्यैवाक्षरस्यभूतयोनेरदृश्यत्वा
दिगुणकस्यवक्तव्यत्वेनप्रतिज्ञातत्वात्कथंतर्ह्यक्षरात्परतःपरइतिव्यपदिश्यतइत्युत्तरसूत्रेतद्वक्ष्यामः। अपिचात्रद्वेविद्येवेदि
तव्येउक्तेपराचैवापराचेति। तत्रापरामृग्वेदादिलक्षणांविद्यामुक्त्वाब्रवीत्अथपरायथातदक्षरमधिगम्यतइत्यादितत्रपरस्याविद्यावि
षयत्वेनाक्षरंश्रुतं॥ यदिपुनःपरमेश्वरादन्यददृश्यत्वादिगुणकमक्षरंपरिकल्प्येतनेयंपराविद्यास्यात्॥ परापरविभागोह्ययंविद्ययो
रभ्युदयनिःश्रेयसफलतयापरिकल्प्यते॥ नचप्रधानविद्यानिःश्रेयसफलाकेनचिदभ्युपगम्यतइति। तिस्रश्चविद्याःप्रतिज्ञायेरंस्त्व
त्पक्षेऽक्षराद्भूतयोनेःपरस्यपरमात्मनःप्रतिपाद्यमानत्वात्। द्वेएवतुविद्येवेदितव्येइहनिर्दिष्टे। कस्मिन्नुभगवोविज्ञातेसर्वमिदंविज्ञातं
भवतीतिचैकविज्ञानेनसर्वविज्ञानापेक्षणंसर्वात्मकेब्रह्मणिविवक्ष्यमाणेवकल्प्यतेनाचेतनमात्रैकायतनेप्रधानेभोग्यव्यतिरि
क्तेवाभोक्तरि। अपिच॥ सब्रह्मविद्यांसर्वविद्याप्रतिष्ठामथर्वायज्येष्ठपुत्रायप्राहेतिब्रह्मविद्यांप्राधान्येनोपक्रम्यपरापरविभागेन
परांविद्यामक्षराधिगमनीयांदर्शयंस्तस्याब्रह्मविद्यात्वंदर्शयति॥ साचब्रह्मविद्यासमाख्यातदधिगम्यस्याक्षरस्याब्रह्मत्वेबा
धितास्यात्॥ अपराऋग्वेदादिलक्षणाकर्मविद्याब्रह्मविद्योपक्रमेउपन्यस्यतेब्रह्मविद्याप्रशंसायै॥ प्लवाह्येतेअदृढायज्ञरूपाअ
ष्टादशोक्तमवरंयेषुकर्म। एतच्छ्रेयोयेभिनंदंतिमूढाजरामृत्युंतेपुनरेवापियंतीत्येवमादिनिंदावचनात्। निंदित्वाचापरांविद्यां
ततोविरक्तस्यपरविद्याधिकारंदर्शयति। परीक्ष्यलोकान्कर्मचितान्ब्राह्मणोनिर्वेदमायान्नास्त्यकृतःकृतेन। तद्विज्ञानार्थंसगुरुमे
वाभिगच्छेत्समित्पाणिःश्रोत्रियंब्रह्मनिष्ठमिति॥ यत्तूक्तमचेतनानांपृथिव्यादीनांदृष्टांतत्वेनोपादानाद्दार्ष्टांतिकेनाप्यचेते
नभूतयोनिनाभवितव्यमितितदयुक्तं। नहिदृष्टांतदार्ष्टांतिकयोरत्यंतसाम्येनभवितव्यमितिनियमोस्ति॥ अपिचस्थूलाःपृथिव्या
दयोदृष्टांतत्वेनोपात्ताइतिनस्थूलदार्ष्टांतिकोभूतयोनिरभ्युपगम्यते॥ तस्माददृश्यत्वादिधर्मकोभूतयोनिःपरमेश्वरः। विशेषण

शां०भा०
॥२९॥

भेदव्यपदेशाभ्यां च नेतरौ॥२२॥ इतश्च परमेश्वर एव भूतयोनिर्नेतरौ शारीरः प्रधानं वा कस्मात् विशेषणभेदव्यपदेशाभ्यां विशिनष्टि
हि प्रकृतं भूतयोनिं शारीराद्विलक्षणत्वेन दिव्यो ह्यमूर्तः पुरुषः सबाह्याभ्यंतरो ह्यजः॥ अप्राणो ह्यमनाः शुभ्र इति॥ न ह्येतद्दिव्यत्वादि
विशेषणमविद्याप्रत्युपस्थापितनामरूपपरिच्छेदाभिमानिनः तद्धर्मान्स्वात्मनि कल्पयतः शारीरस्योपपद्यते॥ तस्मात्साक्षादौपनिषदः
पुरुष इहोच्यते॥ तथा प्रधानादपि प्रकृतं भूतयोनिं भेदेन व्यपदिशति॥ अक्षरात्परतः पर इति॥ अक्षरमव्याकृतं नामरूपबीजशक्तिरू
पं भूतसूक्ष्ममीश्वराश्रयं तस्यैवोपाधिभूतं सर्वस्माद्विकारात्परो योऽविकारस्तस्मात्परतः पर इति भेदेन व्यपदिशत्परमात्मानमिह वि
वक्षितं दर्शयति॥ नात्र प्रधानं नाम किंचित्स्वतंत्रं तत्त्वमभ्युपगम्य तस्माद्भेदव्यपदेश उच्यते॥ किं तर्हि यदि प्रधानमपि कल्प्यमा
ने कल्प्यमानं श्रुत्यविरोधेनाव्याकृतादिशब्दवाच्यं भूतसूक्ष्मं परिकल्प्यतां तस्माद्भेदव्यपदेशात्परमेश्वरो भूतयोनिरित्येतदिह प्र
तिपद्यते॥ कुतश्च परमेश्वरो भूतयोनिः॥ रूपोपन्यासाच्च॥ अपि चाक्षरात्परतः पर इत्यस्यानंतरमेतस्माज्जायते प्राण इति प्राणप्र
भृतीनां तत्त्वानां पृथिवीपर्यंतानां सर्गमुक्त्वा तस्यैव भूतयोनेः सर्वविकारात्मकं रूपमुपन्यस्यमानं पश्यामो अग्निर्मूर्धा चक्षुषी चंद्र
सूर्यौ दिशः श्रोत्रे वाग्विवृताश्च वेदाः॥ वायुः प्राणो हृदयं विश्वमस्य पद्भ्यां पृथिवी ह्येष सर्वभूतांतरात्मेति॥ तच्च परमेश्वरस्यैवोचितं
सर्वविकारकारणत्वात् न शारीरस्य तनुमहिम्नो नापि प्रधानस्यायं रूपोपन्यासः संभवति सर्वभूतांतरात्मत्वासंभवात्॥ तस्मात्परमे
श्वर एव भूतयोनिर्नेतराविति गम्यते॥ कथं पुनर्भूतयोनेरयं रूपोपन्यास इति गम्यते प्रकरणात् एष इति च प्रकृतानुकर्षणात् भूत
योनिं हि प्रकृत्यैतस्माज्जायते प्राण एष सर्वभूतांतरात्मेति वचनं भूतयोनिविषयमेव भवति। यथोपाध्यायं प्रकृत्य तस्मादधी
ष्वैष वेदवेदांगपारग इति वचनमुपाध्यायविषयं भवति तद्वत् कथं पुनरदृश्यत्वादिगुणकस्य भूतयोनेर्विग्रहवद्रूपं संभवति॥ २९
सर्वात्मत्वविवक्षयेदमुच्यते न तु विग्रहवत्त्वविवक्षयेत्यदोषः अहमन्नमहमन्नादः इत्यादिवत्॥ अन्ये पुनर्मन्यंते॥ नायं भूतयोने
रूपोपन्यासो जायमानत्वेनोपन्यासात् एतस्माज्जायते प्राणो मनः सर्वेंद्रियाणि च॥ खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी
ति हि पूर्वत्र प्राणादिपृथिव्यंतं तत्त्वजातं जायमानत्वेन निरदिक्षदुत्तरत्रापि च तस्मादग्निः समिधो यस्य सूर्य इत्येवमादि सर्वा
ओषधयो रसश्चेत्येवमंतं जायमानत्वेनैव निर्देक्ष्यतीव कथमकस्मादंतराले भूतयोने रूपमुपन्यस्येत॥ सर्वात्मत्वमपि सृष्टिं प

53/1913

रिसमाप्योपदेक्ष्यति पुरुष एवेदं विश्वं कर्मेत्यादिना श्रुतिस्मृत्योश्च त्रैलोक्यशरीरस्य प्रजापतेर्जन्म निर्दिश्यमानमुपलभामहे॥ हि
रण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्॥ स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेमेति॥ समवर्तत इति जा
यत इत्यर्थः॥ तथा स वै शरीरी प्रथमः स वै पुरुष उच्यते। आदिकर्ता स भूतानां ब्रह्माग्रे समवर्ततेति च॥ विकारपुरुषस्यापि सर्वभूतांतरात्
मत्वं संभवति प्राणात्मना सर्वभूतानामध्यात्ममवस्थानात् अस्मिन्पक्षे पुरुष एवेदं विश्वं कर्मेत्यादि सर्वरूपोपन्यासः परमेश्वरप्रतिप
त्तिहेतुरिति व्याख्येयं॥ वैश्वानरः साधारणशब्दविशेषात्॥२४॥ को न आत्मा किं ब्रह्मेति आत्मानमेवेमं वैश्वानरं संप्रत्यध्येषि त
मेव नो ब्रूहीति चोपक्रम्य द्युसूर्यवाय्वाकाशवारिपृथिवीनां सुतेजस्त्वादिगुणयोगमेकैकोपासननिंदया च मूर्धादिभावमुपदिश्या
म्नायते॥ यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ति तस्य ह वा एतस्या जेलेः
त्मनो वैश्वानरस्य मूर्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मात्मा संदेहो बहुलो वस्तिरेव रयिः पृथिव्येव पादावुर एव वेदिर्लोमानि ब
र्हिर्हृदयं गार्हपत्यो मनोऽन्वाहार्यपचन आस्यमाहवनीय इति॥ तत्र संशयः किं वैश्वानरशब्देन जाठरोऽग्निरुपदिश्यत भूताग्निस्तदभिमा
निनी देवता अथवा शारीर आहोस्वित्परमेश्वर इति किं पुनरत्र संशयकारणं॥ वैश्वानर इति जाठरभूताग्निदेवतानां साधारणशब्दप्रयो
गादात्मेति च शारीरपरमेश्वरयोस्तत्र कस्योपादानं न्याय्यं कस्य वा हानमिति भवति संशयः॥ किं तावत्प्राप्तं जाठरोऽग्निरिति॥ कुतस्तत्र
हि विशेषेण क्वचित्प्रयोगो दृश्यते॥ अयमग्निर्वैश्वानरो योऽयमंतः पुरुषे येनेदमन्नं पच्यते यदिदमद्यत इत्यादौ॥ अग्निमात्रं वा स्यात्
सामान्येनापि प्रयोगदर्शनात्॥ विश्वस्मा अग्निं भुवनाय देवा वैश्वानरं केतुमह्नामकृण्वन्नित्यादौ अग्निशरीरा वा देवता स्यात्तस्या विस्तारयन्
मपि प्रयोगदर्शनात् वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानामभिश्रीरित्येवमाद्यायाः श्रुतेर्देवतायामैश्वर्याद्युपेतायां संभ
वात् अथात्मशब्दसामानाधिकरण्यादुपक्रमे च को न आत्मा किं ब्रह्मेति केवलात्मशब्दप्रयोगादात्मशब्दवशेनैव वैश्वानरशब्दः
परिणेय इत्युच्यते तथापि शारीर आत्मा स्यात्तस्य भोक्तृत्वेन वैश्वानरसन्निकर्षात् प्रादेशमात्रमिति च विशेषणस्य तस्मिन्नुपाधिपरिच्छि
न्ने संभवात्॥ तस्मान्नेश्वरो वैश्वानर इत्येवं प्राप्ते तत इदमुच्यते॥ वैश्वानरः परमात्मा भवितुमर्हति कुतः साधारणशब्दविशेषात् साधा
रणशब्दयोर्विशेषः साधारणशब्दविशेषः तस्मादुपपद्यते उभावपि आत्मवैश्वानरशब्दौ साधारणशब्दौ वैश्वानरस्य शब्दस्त्रयस्य सा

शां०भा०
॥ २७ ॥

साधारणआत्मशब्दश्च द्वयस्य तथापि विशेषो दृश्यते येन परमेश्वरपरत्वं तयोरवगम्यते॥ तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्द्धैव सु
तेजा इत्यादि अत्र हि परमेश्वर एव द्युमूर्धत्वादिविशिष्टावस्थांतरगतः प्रत्यगात्मत्वेनोपन्यस्त आध्यानायेति गम्यते कारणत्वात्॥ कार
णस्य हि सर्वाभिः कार्यगताभिरवस्थाभिरवस्थावत्त्वात् द्युलोकाद्यवयवत्वमुपपद्यते॥ स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्तीति च
सर्वलोकाद्याश्रयं फलं श्रूयमाणं परमकारणपरिग्रहे संभवति॥ एवं हास्य सर्वे पाप्मानः प्रदूयंत इति विद्वदः सर्वपाप्मप्रदाहश्रवणं चो
न आत्मा किं ब्रह्मेति च आत्मब्रह्मशब्दाभ्यामुपक्रम इत्येवमेतानि लिंगानि परमेवावगमयंति॥ तस्मात्परमेश्वर एव वैश्वानरः॥ स्मर्यमाणमनु
मानं स्यादिति॥ २५॥ इतश्च परमेश्वर एव वैश्वानरो यस्मात्परमेश्वरस्यैवाग्निरास्यं द्युमूर्धेतीदृशं त्रैलोक्यात्मकं रूपं स्मर्यते॥ यस्या
ग्निरास्यं द्यौर्मूर्धा खं नाभिश्चरणौ क्षितिः सूर्यश्चक्षुर्दिशः श्रोत्रं तस्मै लोकात्मने नम इति एतत्स्मर्यमाणं रूपं मूलभूतां श्रुतिमनुमाप
यदस्य वैश्वानरशब्दस्य परमेश्वरपरत्वे अनुमानं लिंगं गमकं स्यादित्यर्थः॥ इति शब्दो हेत्वर्थो यस्मादिदं गमकं लिंगं तस्मादपि वैश्वानरः
परमात्मैवेत्यर्थः॥ यद्यपि स्तुतिरियं तस्मै लोकात्मने नम इति स्तुतित्वमपि नासति मूलभूते वेदवाक्ये सम्यगीदृशेन रूपेण संभवति
द्यां मूर्धानं यस्य विप्रा वदंति खं वै नाभिं चंद्रसूर्यौ च नेत्रे। दिशः श्रोत्रे विद्धि पादौ क्षितिं च सोऽचिंत्यात्मा सर्वभूतप्रणेतेत्येवंजातीयिका च
स्मृतिरिहोदाहर्तव्या॥ शब्दादिभ्योऽन्तः प्रतिष्ठानाच्च नेति चेन्न तथा दृष्ट्युपदेशादसंभवात्पुरुषमपि चैनमधीयते॥ २६॥ अत्राह
न परमेश्वरो वैश्वानरो भवितुमर्हति॥ कुतः॥ शब्दादिभ्योऽन्तः प्रतिष्ठानाच्च॥ शब्दस्तावद्वैश्वानरशब्दो न परमेश्वरे संभवति अर्था
तरे रूढत्वात्॥ तथाग्निशब्दः स एषोऽग्निर्वैश्वानर इत्यादिशब्दात् हृदयं गार्हपत्य इत्याद्यग्नित्रेताप्रकल्पनं तद्यद्भक्तं प्रथममाग
च्छेत्तद्धोमीयमित्यादिना च प्राणाहुत्यधिकरणतासंकीर्तनमेतेभ्यो हेतुभ्यो जाठरो वैश्वानरः प्रत्येतव्यः॥ तथांतः॥ प्रतिष्ठानमपि श्रू
यते॥ पुरुषेऽन्तः प्रतिष्ठितं वेदेति तच्च जाठरे संभवति॥ यदप्युक्तं मूर्धैव सुतेजा इत्यादेर्विशेषात्कारणात्मा वैश्वानर इत्यत्र ब्रूमः॥ कुतो
ह्येष निर्णयो यदुभयथापि विशेषप्रतिभाने सति परमेश्वरविषय एव विशेष आश्रयणीयो न जाठरविषय इति॥ अथवा भूताग्नेरंत २७
र्बहिश्चावतिष्ठमानस्यैष निर्देशो भविष्यति तस्यापि हि द्युलोकादिसंबंधो मंत्रवर्णादवगम्यते॥ यो भानुना पृथिवीं द्यामुतेमामाततान
रोदसी अंतरिक्षमित्यादौ अथवा तच्छरीराया देवताया ऐश्वर्ययोगात् द्युलोकाद्यवयवत्वं भविष्यति॥ तस्मान्न परमेश्वरो वैश्वानर

55/1913

इत्यत्रोच्यते॥ न तथा दृष्ट्युपदेशादिति॥ न शब्दादिभ्यः कारणेभ्यः परमेश्वरप्रत्याख्यानं युक्तं कुतः तथा जाठराग्निपरित्यागेन दृष्ट्युपदे
शात् परमेश्वरदृष्टिर्हि जाठरे वैश्वानर इहोपदिश्यते॥ मनो ब्रह्मेत्युपासीतेत्यादिवत्। अथवा जाठरवैश्वानरोपाधिः परमेश्वर इह द्रष्टव्य
त्वेनोपदिश्यते मनोमयः प्राणशरीरो भारूप इत्यादिवत् यदि चेह परमेश्वरो न विवक्ष्येत केवल एव जाठरोऽग्निर्विवक्ष्येत ततो मूर्धैव सुतेजा
इत्यादि विशेषासंभव एव स्यात्॥ यथा तु देवताभूताग्निव्यपाश्रयेणाप्ययं विशेष उपपादयितुं न शक्यते तथोत्तरसूत्रे वक्ष्यामः॥ य
दि च केवल एव जाठरो विवक्षितः पुरुषेंतः प्रतिष्ठितत्वं केवलं तस्य स्यात् न तु पुरुषत्वं पुरुषमपि चैनमधीयते वाजसनेयिनः॥ स एषो
ग्निर्वैश्वानरो यत्पुरुषः स यो हैतमेवमग्निं वैश्वानरं पुरुषविधं पुरुषेंतः प्रतिष्ठितं वेदेति परमेश्वरस्य तु सर्वात्मत्वात्पुरुषत्वं पुरुषेंतः
प्रतिष्ठितत्वं चोभयमप्युपपद्यते। ये तु पुरुषविधमपि चैनमधीयत इति सूत्रावयवं पठंति तेषामेषोऽर्थः केवलजाठरपरिग्रहे पुरुषेंतः प्र
तिष्ठितत्वं केवलं स्यात् न पुरुषविधत्वं पुरुषविधमपि चैनमधीयते वाजसनेयिनः॥ पुरुषविधं पुरुषेंतः प्रतिष्ठितं वेदेति पुरुषविधत्वं च प्र
करणात् यदधिदैवतं द्युमूर्धत्वादि पृथिवीप्रतिष्ठत्वांतं यदध्यात्मं प्रसिद्धं मूर्धत्वादि चिबुकप्रतिष्ठितत्वांतं तत्परिगृह्यते॥ अतएव न दे
वताभूतश्च॥ २७॥ यत्पुनरुक्तं भूताग्नेरपि मंत्रवर्णे द्युलोकादिसंबंधदर्शनान्मूर्धैव सुतेजा इत्याद्यवयवकल्पनं तस्यैव भविष्य
तीति तच्छरीराया देवताया ऐश्वर्ययोगादिति तत्परिहर्तव्यमत्रोच्यते॥ अतएवोक्तेभ्यो हेतुभ्यो न देवता वैश्वानरस्तथा भूताग्निरपि
न वैश्वानरो न हि भूताग्नेरौष्ण्यप्रकाशमात्रात्मकस्य द्युमूर्धत्वादिकल्पनोपपद्यते विकारस्य विकारांतरात्मत्वासंभवात्॥ तथा देवता
याः सत्यप्यैश्वर्ये न द्युमूर्धत्वादिकल्पना संभवत्यकारणत्वात् परमेश्वराधीनैश्वर्यत्वाच्च। आत्मशब्दासंभवश्च सर्वेष्वेषु पक्षेषु स्थि
त एव॥ साक्षादप्यविरोधं जैमिनिः॥ २८॥ पूर्वं जाठराग्निप्रतीको जाठराग्न्युपाधिको वा परमेश्वर उपास्य इत्युक्तमंतः प्रतिष्ठित
त्वाद्यनुरोधेन॥ इदानीं तु विनैव प्रतीकोपाधिकल्पनाभ्यां साक्षादपि परमेश्वरोपासनपरिग्रहे न कश्चिद्विरोध इति जैमिनिराचा
र्यो मन्यते॥ ननु जाठराग्न्यपरिग्रहेंतः प्रतिष्ठितत्ववचनं शब्दादीनि च कारणानि विरुध्येरन्निति अत्रोच्यते॥ अन्तः प्रतिष्ठितत्व
वचनं तावन्न विरुध्यते॥ न हीह पुरुषविधं पुरुषेंतः प्रतिष्ठितं वेदेति जाठराग्न्यभिप्रायेणेदमुच्यते॥ तस्याप्रकृतत्वादसंशब्दित
त्वाच्च॥ कथं तर्हि यत्प्रकृतं मूर्धादिषु चिबुकांतेषु पुरुषावयवेषु पुरुषविधत्वं कल्पितं तदभिप्रायेणेदमुच्यते॥ पुरुषविधं पुरुषेंतः

शं०भा०
॥२८॥

प्रतिष्ठितंवेदेतियथावृक्षशाखांप्रतिष्ठितांपश्यतीतितद्वत्‌॥अथवायःप्रकृतःपरमात्माध्यात्माधिदैवतंचपुरुषविधत्वोपाधिःतस्य
यत्केवलंसाक्षिरूपंतदभिप्रायेणेदमुच्यतेपुरुषेन्तःप्रतिष्ठितंवेदेतिनिश्चितेतदपूर्वापरालोचनवशेनपरमात्मपरिग्रहेतद्विषयंचवैश्वानर
शब्दःकेनचिद्योगेनवर्तिष्यतेविश्वश्चायंनरश्चेतिविश्वेषांवायंनरोविश्वेवानराअस्येतिविश्वानरःपरमात्मासर्वात्मत्वात्‌॥विश्वानरएव
वैश्वानरस्तद्धितोऽनन्यार्थोराक्षसवायसादिवत्‌॥अग्निशब्दोप्यग्रणीत्वादियोगाश्रयेणेनपरमात्मविषयएवभविष्यति॥गार्हप
त्यादिप्रकल्पनंप्राणाहुत्यधिकरणत्वंचपरमात्मनोपिसर्वात्मत्वादुपपद्यते॥कथंपुनःपरमेश्वरपरिग्रहेप्रादेशमात्रश्रुतिरुपपद्यतइ
तितांव्याख्यातुमारभते॥अभिव्यक्तेरित्याश्मरथ्यः॥२९॥अतिमात्रस्यापिपरमेश्वरस्यप्रादेशमात्रत्वमभिव्यक्तिनिमित्तंस्यादभिव्य
ज्यतेकिलप्रादेशमात्रपरिमाणःपरमेश्वरउपासकानांकृतेप्रदेशविशेषेषुवाहृदयादिषूपलब्धिस्थानेषुविशेषेणाभिव्यज्यतेऽतः
परमेश्वरेपिप्रादेशमात्रश्रुतिरभिव्यक्तेरुपपद्यतइत्याश्मरथ्यआचार्योमन्यते॥अनुस्मृतेर्बादरिः॥३०॥प्रादेशमात्रहृदयप्रतिष्ठेनवा
यमनसानुस्मर्यते॥तेनप्रादेशमात्रइत्युच्यते॥यथाप्रस्थमितायवाःप्रस्थाइत्युच्यंतेतद्वत्‌॥यद्यपिचयवेषुस्वगतमेवपरिमाणंप्रस्थ
संबंधाद्व्यज्यतेनेहपरमेश्वरगतंकिंचित्परिमाणमस्तियद्धृदयसंबंधाद्व्यज्येततथापिप्रयुक्तायाःप्रादेशमात्रश्रुतेःसंभवतिय
थाकथंचिदनुस्मरणमालंबनमित्युच्यते॥प्रादेशमात्रत्वेनचायमप्रादेशमात्रोप्यनुस्मरणीयःप्रादेशमात्रश्रुत्यर्थवत्तायै।ए
वमनुस्मृतिनिमित्तापरमेश्वरेप्रादेशमात्रश्रुतिरितिबादरिराचार्योमन्यते।संपत्तेरितिजैमिनिस्तथाहिदर्शयति॥३१॥सं
पत्तिनिमित्तावास्यांप्रादेशमात्रश्रुतिः।कुतस्तथाहिसमानप्रकरणंवाजसनेयिब्राह्मणंद्युप्रभृतीन्पृथिवीपर्यंतान्‌त्रैलोक्या [illegible]
त्मनोवैश्वानरस्यावयवानध्यात्मंमूर्धप्रभृतिषुचिबुकपर्यंतेषुदेहावयवेषुसंपादयत्प्रादेशमात्रसंपत्तिंपरमेश्वरस्यदर्शयतिप्रा
देशमात्रमिवहवैदेवाःसुविदिताअभिसंपन्नास्तथातुवएतान्वक्ष्यामियथाप्रादेशमात्रमेवाभिसंपादयिष्यामीतिसहोवाच ॥२८॥
मूर्धानमुपदिशन्नुवाचैषवाअतिष्ठावैश्वानरइतिचक्षुषीउपदिशन्नुवाचैषवैसुतेजावैश्वानरइतिनासिकेउपदिशन्नुवा
चैषवैपृथग्वर्त्मात्मावैश्वानरइतिमुख्यमाकाशमुपदिशन्नुवाचैषवैबहुलोवैश्वानरइतिमुख्याअपउपदिशन्नुवाचैषवैरयि
वैश्वानरइतिचिबुकमुपदिशन्नुवाचैषवैप्रतिष्ठावैश्वानरइतिचिबुकमित्यधरमुखफलकमुच्यते॥यद्यपिवाजसनेयकेद्यौ

57/1913

रतिष्ठात्वाद्गुणासमाम्नायंतेआदित्यश्चसुतेजस्त्वगुणश्छांदोग्येपुनर्द्यौःसुतेजस्त्वगुणासमाम्नायतेआदित्यश्चविश्वरूपत्वगुणस्तथा
पिनैतावताविशेषेणकिंचिद्धीयतेप्रादेशमात्रश्रुतेरविशेषात्सर्वशाखाप्रत्ययत्वाच्च॥संपत्तिनिमित्तांप्रादेशमात्रश्रुतिंयुक्ततरां
जैमिनिराचार्योमन्यते॥आमनंतिचैनमस्मिन्‌॥३२॥आमनंतिचैनंपरमेश्वरमस्मिन्मूर्धचिबुकांतरालेजाबालायएषोनंतोव्य
क्तआत्मासोविमुक्तेप्रतिष्ठितःसोविमुक्तःकस्मिन्प्रतिष्ठितइतिवरणायांनास्यांचमध्येप्रतिष्ठितइतिकावैवरणाकाचनासीतितत्रै याँवाँकश्रुतौ
वेमामेवनासिकावरणानासीतिनिरुच्यपुनरप्यामनंतिकतमच्चास्यस्थानंभवतिभ्रुवोःप्राणस्यचयःसंधिःसएषद्युलोकस्यप
रस्यचसंधिर्भवतीतितस्मादुपपन्नापरमेश्वरेप्रादेशमात्रश्रुतिः।अभिविमानश्रुतिःप्रत्यगात्मत्वाभिप्रायाप्रत्यगात्मतयासर्वैःप्राणि
भिरभिविमीयतइत्यभिविमानः॥अभिगतोवायंप्रत्यगात्मत्वाद्विमानश्चमानवियोगादित्यभिविमानोऽभिविमिमितेवासर्वंजग
त्कारणत्वादित्यभिविमानस्तस्मात्परमेश्वरएववैश्वानरइतिसिद्धं॥ ॥इतिश्रीशंकरभगवत्पादकृतौशारीरकमीमांसाभाष्ये
प्रथमाध्यायस्यद्वितीयःपादः॥२॥ ॥इदंश्रूयते।यस्मिन्द्यौःपृथिवीचांतरिक्षमोतंमनःसहप्राणैश्चसर्वैस्तमेवैकंजानथआत्मा
नमन्यावाचोविमुंचथामृतस्यैषसेतुरिति॥अत्रयदेतद्द्युप्रभृतीनामोतत्ववचनादायतनंकिंचिदवगम्यतेतत्किंपरंब्रह्मस्यादाहो
स्विदर्थांतरमितिसंदिह्यते॥तत्रार्थांतरंकिमप्यायतनंस्यादितिप्राप्तंकस्मादमृतस्यैषसेतुरितिश्रवणात्‌॥पारवान्हिलोकेसे
तुःप्रख्यातोनचपरस्यब्रह्मणःपारवत्त्वंशक्यमभ्युपगंतुमनंतमपारमितिश्रवणात्‌।अर्थांतरेचायतनेपरिगृह्यमाणेस्मृतिप्रसि
द्धंप्रधानंपरिग्रहीतव्यंतस्यकारणत्वादायतनत्वोपपत्तेः॥श्रुतिप्रसिद्धोवावायुःस्यात्‌॥वायुर्वैगौतमसूत्रंवायुनावैगौतमसू
त्रेणायंचलोकःपरश्चलोकःसर्वाणिचभूतानिसंदृब्धानिभवंतीतिवायोरपिविधारणत्वश्रवणात्‌शारीरोवास्यात्‌॥तस्या
पिभोक्तृत्वाद्भोग्यंप्रत्यायतनत्वोपपत्तेरित्येवंप्राप्तइदमाह॥द्युभ्वाद्यायतनमिति॥द्यौश्चभूश्चद्युभुवौद्युभुवादीयस्यतदिदंद्युभ्वा
दियदेतस्मिन्वाक्येद्यौःपृथिव्यंतरिक्षंमनःप्राणइत्येवमात्मकंजगदोतत्वेननिर्दिष्टंतस्यायतनंपरंब्रह्मभवितुमर्हति॥कुतःस्व
शब्दादात्मशब्दादित्यर्थः॥आत्मशब्दोहिभवति॥तमेवैकंजानथआत्मानमिति॥आत्मशब्दश्चपरमात्मपरिग्रहेसम्यगवक
ल्पतेनार्थांतरपरिग्रहे॥क्वचिच्चस्वशब्देनैवब्रह्मणआयतनत्वंश्रूयते॥सन्मूलाःसोम्येमाःप्रजाःसदायतनाःसत्प्रतिष्ठा

इति स्वशब्देनैव चेह परस्तादुपरिष्टाच्च ब्रह्म संकीर्त्यते पुरुष एवेदं विश्वं कर्म तपो ब्रह्म परामृतमिति ॥ ब्रह्मैवेदममृतं पुरस्ताद्ब्रह्म पश्चाद्ब्रह्म दक्षिणतश्चोत्तरेण तिच ॥ तत्र त्वायतनायतनवद्भावश्रवणात्सर्वं ब्रह्मेति च सामानाधिकरण्याद्यथानेकात्मको वृक्षः शाखास्कंधमूलं चैवं नानारसो विचित्र आत्मेत्याशंका संभवति तां निवर्तयितुं सावधारणमाह तमेवैकं जानथ आत्मानमिति ॥ एतदुक्तं भवति न कार्यप्रपंचविशिष्टो विचित्र आत्मा विज्ञेयः किं तर्ह्यविद्याकृतं कार्यप्रपंचं विद्यया प्रविलापयंतस्तमेवैकमायतनभूतमात्मानं जानीथैकरसमिति ॥ यथा यस्मिन्नास्ते देवदत्तस्तदानयेत्युक्त आसनमेवानयति न देवदत्तं ॥ तद्वदायतनभूतस्यैवैकरसस्यात्मनो विज्ञेयत्वमुपदिश्यते ॥ विकारानृताभिसंधस्य चापवादः श्रूयते ॥ मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यतीति सर्वं ब्रह्मेति तु सामानाधिकरणं प्रपंचप्रविलापनार्थं नानेकरसताप्रतिपादनार्थं ॥ स यथा सैंधवघनोऽनंतरोऽबाह्यः कृत्स्नो रसघन एवैवं वा अरेयमात्मानंतरोऽबाह्यः कृत्स्नः प्रज्ञानघन एवेत्येकरसताश्रवणात् तस्माद्द्युभ्वाद्यायतनं परं ब्रह्म ॥ यत्तूक्तं सेतुश्रुतेः ॥ सेतोश्च पारवत्वोपपत्तेर्ब्रह्मणोऽर्थांतरेण द्युभ्वाद्यायतनेन भवितव्यमित्यत्रोच्यते ॥ विधरणत्वमात्रमत्र सेतुश्रुत्या विवक्ष्यते न पारवत्वादि न हि मृद्दारुमयो लोके सेतुर्दृष्ट इत्यत्रापि मृद्दारुमय एव सेतुरभ्युपगम्यते ॥ सेतुशब्दार्थोऽपि विधरणत्वमात्रं न पारवत्वादि षिञो बंधनकर्मणः सेतुशब्दव्युत्पत्तेः ॥ अपर आह तमेवैकं जानथ आत्मानमिति यदेतत्संकीर्तितमात्मज्ञानं यच्चैतदन्या वाचो विमुंचथेति वाग्विमोचनं तदत्रामृतत्वसाधनत्वादमृतस्यैष सेतुरिति सेतुश्रुत्या संकीर्त्यते न तु द्युभ्वाद्यायतनं ॥ तत्र यदुक्तं सेतुश्रुतेर्ब्रह्मणोऽर्थांतरेण द्युभ्वाद्यायतनेन भवितव्यमित्येतदयुक्तं ॥ मुक्तोपसृप्यव्यपदेशात् ॥२॥ इतश्च परमेव ब्रह्म द्युभ्वाद्यायतनं यस्मान्मुक्तोपसृप्यतास्य व्यपदिश्यमाना दृश्यते ॥ मुक्तैरुपसृप्यं मुक्तोपसृप्यं ॥ देहादिष्वनात्मस्वहमस्मीत्यात्मबुद्धिरविद्या ॥ ततस्तत्पूजनादौ रागस्तत्परिभवादौ द्वेषः तदुच्छेददर्शनाद्भयं मोहश्चेत्येवमयमनंतभेदोऽनर्थव्रातः संततः सर्वेषां नः प्रत्यक्षः ॥ तद्विपर्ययेणाविद्यारागद्वेषादिदोषैर्मुक्तैरुपसृप्यं गम्यमेतदिति द्युभ्वाद्यायतनं प्रकृत्य व्यपदेशो भवति ॥ कथं भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावरे इत्युक्त्वा ब्रवीति ॥ तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यमिति ब्रह्मणश्च मुक्तोपसृप्यत्वं प्रसिद्धं शास्त्रे ॥ यदा सर्वे प्रमुच्यंते कामा येऽस्य हृदि श्रिताः ॥ अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत इत्येवमादौ प्रधा

59/193

नादीनां तु न क्वचिन्मुक्तोपसृप्यत्वं प्रसिद्धमस्ति ॥ अपि च तमेवैकं जानथ आत्मानमन्या वाचो विमुंचथेति वाग्विमोचनपूर्वकं विज्ञेयत्वमिह द्युभ्वाद्यायतनस्योच्यते तच्च श्रुत्यंतरे ब्रह्मणो दृष्टं ॥ तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः ॥ नानुध्यायाद्बहूञ्शब्दान्वाचो विग्लापनं हि तदिति ॥ तस्मादपि द्युभ्वाद्यायतनं परं ब्रह्म ॥ नानुमानिकमतच्छब्दात् ॥३॥ यथा ब्रह्मणः प्रतिपादको वैशेषिको हेतुरुक्तो नैवमर्थांतरस्य वैशेषिको हेतुः प्रतिपादकोऽस्तीत्याह नानुमानिकं सांख्यस्मृतिपरिकल्पितं प्रधानमिह द्युभ्वाद्यायतनत्वेन प्रतिपत्तव्यं ॥ कस्मात् अतच्छब्दात् ॥ तस्याचेतनस्य प्रधानस्य प्रतिपादकः शब्दस्तच्छब्दो न तच्छब्दोऽतच्छब्दः न ह्यत्राचेतनस्य प्रधानस्य प्रतिपादकः कश्चिच्छब्दोऽस्ति येनाचेतनं प्रधानं कारणत्वेनायतनत्वेन वावगम्येत तद्विपरीतस्य चेतनस्य प्रतिपादकः शब्दोऽत्रास्ति यः सर्वज्ञः सर्वविदित्यादिः ॥ अत एव च न वायुरपीह द्युभ्वाद्यायतनत्वेनाश्रीयते ॥ प्राणभृच्च ॥४॥ यद्यपि प्राणभृतो विज्ञानात्मन आत्मत्वं चेतनत्वं च संभवति तथाप्युपाधिपरिच्छिन्नज्ञानस्य सर्वज्ञत्वाद्यसंभवे सत्यस्मादेवातच्छब्दात्प्राणभृदपि न द्युभ्वाद्यायतनत्वेनाश्रयितव्यः ॥ न चोपाधिपरिच्छिन्नस्याविभोः प्राणभृतो द्युभ्वाद्यायतनत्वमपि सम्यक् संभवति ॥ पृथग्योगकरणमुत्तरार्थं कुतश्च न प्राणभृत् द्युभ्वाद्यायतनत्वेनाश्रयितव्यः ॥ भेदव्यपदेशात् ॥५॥ भेदव्यपदेशश्चेह भवति ॥ तमेवैकं जानथ आत्मानमिति ज्ञेयज्ञातृभावेन तत्र प्राणभृत्तावन्मुमुक्षुत्वात् ज्ञाता परिशेषादात्मशब्दवाच्यं ब्रह्म ज्ञेयं द्युभ्वाद्यायतनमिति गम्यते न प्राणभृत् कुतश्च न प्राणभृद्द्युभ्वाद्यायतनत्वेनाश्रयितव्यः ॥ प्रकरणात् ॥६॥ प्रकरणं चेदं परमात्मनः कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीत्येकविज्ञाने न सर्वविज्ञानापेक्षणात् ॥ परमात्मनि हि सर्वात्मके विज्ञाते सर्वमिदं विज्ञातं स्यात् ॥ न केवले प्राणभृति कुतश्च न प्राणभृत् द्युभ्वाद्यायतनत्वेनाश्रयितव्यः ॥ स्थित्यदनाभ्यां च ॥७॥ द्युभ्वाद्यायतनं च प्रकृत्य द्वा सुपर्णा सयुजा सखायेत्यत्र स्थित्यदने निर्दिश्येते ॥ तयोरन्यः पिप्पलं स्वाद्वत्तीति कर्मफलाशनमनश्नन्नन्यो अभिचाकशीतीत्यौदासीन्येनावस्थानं च ॥ ताभ्यां च स्थित्यदनाभ्यामीश्वरक्षेत्रज्ञौ तत्र गृह्येते ॥ यदि चेश्वरो द्युभ्वाद्यायतनत्वेन विवक्षितस्ततस्तस्य प्रकृतस्येश्वरस्य क्षेत्रज्ञात्पृथग्वचनमवकल्पते ॥ अन्यथा ह्यप्रकृतवचनमाकस्मिकमसंबद्धं स्यात् ॥ ननु तवापि क्षेत्रज्ञस्येश्वरात्पृथग्वचनमाकस्मिकमेव प्रसज्येत न तस्याविवक्षितत्वात् ॥ क्षेत्रज्ञो हि कर्तृत्वेन भोक्तृत्वेन च प्रतिशरीरं बुद्ध्याद्युपाधिसंबद्धो लोकत एव प्रसिद्धो नासौ श्रुत्या तात्पर्येण

शां०भा० विवक्ष्यते॥ ईश्वरस्तु लोकेऽप्रसिद्धत्वाच्छ्रुत्यात्मसंयोगेन विवक्षित इति न तस्य कस्मिंश्चिद्वचने स्वक्तं॥ गुहां प्रविष्टावात्मानौ हीत्यत्राप्ये
॥ ३०॥ तद्दर्शितं द्वा सुपर्णेत्यस्यामपीश्वरक्षेत्रज्ञावुच्येते॥ यद्यपि पैङ्ग्युपनिषत्कृतेन व्याख्यानेनास्यामृचि सत्त्वक्षेत्रज्ञावुच्येते तदापि न वि
रोधः कश्चित्। कथं प्राणभृदिह घटादिच्छिद्रवत्सत्त्वाद्युपाध्यभिमानित्वेन प्रतिशरीरं गृह्यमाणो द्युभ्वाद्यायतनं न भवतीति प्रति-
षिध्यते॥ यस्तु सर्वशरीरेषूपाधिभिर्विनोपलक्ष्यते पर एव स भवति॥ यथा घटादिच्छिद्राणि घटादिभिरुपाधिभिर्विनोपलक्ष्यमाणा
नि महाकाश एव भवंति॥ तद्वत्प्राणभृतः परस्मात्परमेव ब्रह्म द्युभ्वाद्यायतनं॥ तदेतदक्षरत्वादिगुणको धर्मोक्तेरित्यनेनैव सिद्धं
तस्यैव हि भूतयोनिवाक्यस्य मध्य इदं पठितं यस्मिन्द्यौः पृथिवी चांतरिक्षमिति प्रपंचार्थं तु पुनरुपन्यस्तं॥ भूमा संप्रसादादध्यु
पदेशात्॥८॥ इदं समामनंति भूमा त्वेव विजिज्ञासितव्य इति भूमानं भगवो विजिज्ञास इति यत्र नान्यत्पश्यति नान्यच्छृणोति नान्य
द्विजानाति स भूमाथ यत्रान्यत्पश्यत्यन्यच्छृणोत्यन्यद्विजानाति तदल्पमित्यादि॥ तत्र संशयः॥ किं प्राणो भूमा स्यादाहोस्वित्परमात्मे
ति॥ कुतः संशयः॥ भूमेति तावद्बहुत्वमभिधीयते बहोर्लोपो भू च बहोरिति भूमशब्दस्य भावप्रत्ययांततास्मरणात्॥ किमात्मकं पु
नस्तद्बहुत्वमिति विशेषाकांक्षायां प्राणो वा आशाया भूयानिति सन्निकर्षात्प्राणो भूमेति प्रतिभाति॥ तथा श्रुतं ह्येव मे भगवद्दृ
शेभ्यस्तरति शोकमात्मविदिति सोहं भगवः शोचामि तं मा भगवाञ्छोकस्य पारं तारयत्विति प्रकरणोत्थानात्परमात्मा भूमेत्यपि प्रति
भाति॥ तत्र कस्योपादानं न्याय्यं कस्य वा हानमिति भवति संशयः॥ किं तावत्प्राप्तं प्राणो भूमेति॥ कस्मात्॥ भूयः प्रश्नप्रतिवचनादर्श
नात्॥ यथा अस्ति भगवो नाम्नो भूय इति वाग्वाव नाम्नो भूयसीति तथास्ति भगवो वाचो भूय इति मनो वाव वाचो भूय इति च नामादिभ्यो
ह्या प्राणाद्भूयः प्रश्नप्रतिवचनप्रवाहः प्रवृत्तो नैवं प्राणात्परं भूयः प्रश्नप्रतिवचनं दृश्यते अस्ति भगवः प्राणाद्भूय इति अदो वाव प्राणा ॥३०॥
द्भूय इति॥ प्राणमेव तु नामादिभ्य आशांतेभ्यो भूयांसं प्राणो वा आशाया भूयानित्यादिना सप्रपंचमुक्त्वा प्राणदर्शिनश्चातिवादित्व
मतिवाद्यसीत्यतिवाद्यस्मीति ब्रूयान्नापह्नुवीतेत्यभ्यनुज्ञायैष तु वा अतिवदति यः सत्येनातिवदतीति प्राणव्रतमतिवादित्वमनुकृष्य
परित्यज्यैव प्राणं सत्यादिपरंपरया भूमानमवतारयन्प्राणमेव भूमानं मन्यत इति गम्यते॥ कथं पुनः प्राणे भूमनि व्याख्यायमाने य
त्र नान्यत्पश्यतीत्येतद्भूम्नो लक्षणपरवचनं व्याख्यायेतेति उच्यते सुषुप्तावस्थायां प्राणग्रस्तेषु करणेषु दर्शनादिव्यवहारनिवृत्तिद

61/1913

र्शनात्॥ संभवति प्राणस्यापि यत्र नान्यत्पश्यतीत्येतल्लक्षणं॥ तथा च श्रुतिर्न शृणोति न पश्यतीत्यादिना सर्वकरणव्यापारप्रत्यस्त
मयरूपां सुषुप्तावस्थामुक्त्वा प्राणाग्नय एवैतस्मिन्पुरे जाग्रतीति तस्यामेवावस्थायां पंचवृत्तेः प्राणस्य जागरणं ब्रुवंती प्राणप्रधा
नां सुषुप्तावस्थां दर्शयति॥ यच्चैतद्भूम्नः सुखत्वं श्रुतं यो वै भूमा तत्सुखमिति तदप्यविरुद्धमत्रैष देवः स्वप्नान्न पश्यत्यथ यदेतस्मिञ्छरी
रे सुखं भवतीति सुषुप्तावस्थायामेव सुखश्रवणात्॥ यच्च यो वै भूमा तदमृतमिति तदपि प्राणस्याविरुद्धं प्राणो वा अमृतमिति श्रुतेः॥
कथं पुनः प्राणं भूमानं मन्यमानस्य तरति शोकमात्मविदित्यात्मविविदिषया प्रकरणस्योत्थानमुपपद्यते प्राण एवेहात्मा विव
क्षित इति ब्रूमः॥ तथा हि प्राणो ह पिता प्राणो माता प्राणो भ्राता प्राणः स्वसा प्राण आचार्यः प्राणो ब्राह्मण इति प्राणमेव सर्वात्मानं
करोति॥ यथा वा अरा नाभौ समर्पिता एवमस्मिन्प्राणे सर्वं समर्पितमिति च॥ सर्वात्मत्वारनाभिनिदर्शनाभ्यां च संभवति वैपुल्यात्मि
का भूमरूपता प्राणस्य तस्मात्प्राणो भूमेत्येवं प्राप्त इदमुच्यते॥ परमात्मैवेह भूमा भवितुमर्हति न प्राणः॥ कस्मात्॥ संप्रसादाद
ध्युपदेशात्॥ संप्रसाद इति सुषुप्तस्थानमुच्यते॥ सम्यक्प्रसीदत्यस्मिन्निति निर्वचनात्॥ बृहदारण्यके च स्वप्नजागरितस्थानाभ्यां सह
पाठात्॥ तस्यां च संप्रसादावस्थायां प्राणो जागर्तीति प्राणोऽत्र संप्रसादोऽभिप्रेयते॥ प्राणादूर्ध्वं भूम्न उपदिश्यमानत्वादित्यर्थः॥ प्राण ए
व चेद्भूमा स्यात्॥ स एव तस्मादूर्ध्वमुपदिश्येतेत्यश्लिष्टमेव स्यात्॥ न हि नामैव नाम्नो भूय इति नाम्न ऊर्ध्वमुपदिष्टं किं तर्हि ना
म्नोऽन्यदर्थांतरमुपदिष्टं वागाख्यं वाग्वाव नाम्नो भूयसीति तथा वागादिभ्योऽप्या प्राणादर्थांतरमेव तत्र तत्रोर्ध्वमुपदिष्टं तद्वत्प्राणा
दप्यूर्ध्वमुपदिश्यमानो भूमा प्राणादर्थांतरभूतो भवितुमर्हति॥ नन्विह नास्ति प्रश्नोऽस्ति भगवः प्राणाद्भूय इति नापि प्रतिवचनम
स्ति अदो वाव प्राणाद्भूयोऽस्तीति कथं प्राणादधि भूमोपदिश्यत इत्युच्यते॥ प्राणविषयमेवातिवादित्वमुत्तरत्रानुकृष्यमाणं
पश्यामः एष तु वा अतिवदति यः सत्येनातिवदतीति तस्मान्नास्ति प्राणादध्युपदेश इति॥ अत्रोच्यते॥ न तावत्प्राणविषयस्यैवा
तिवादित्वस्यैतदनुकर्षणमिति शक्यं॥ विशेषवादाद्यः सत्येनातिवदतीति॥ ननु विशेषवादोऽप्ययं प्राणविषय एव भविष्यतीति कथं॥ यथै
षोऽग्निहोत्री यः सत्यं वदतीत्युक्तेन सत्यवदनेनाग्निहोत्रित्वं केन तर्हि अग्निहोत्रेणैव सत्यवदनं त्वग्निहोत्रिणो विशेष उच्यते॥
तथैष तु वा अतिवदति यः सत्येनातिवदतीत्युक्ते न सत्यवदनेनातिवादित्वं केन तर्हि प्रकृतेन प्राणविज्ञानेनैव सत्यवदनं तु प्रा

शं॰भा॰
॥३३॥

णविदोशेषो विवक्ष्यत इति॥ नेति क्रमः॥ श्रुत्यर्थपरित्यागप्रसंगात्॥ श्रुत्या ह्यत्र सत्यवदनेनातिवादित्वं प्रतीयते यः सत्येनातिवदति
सोऽतिवदतीति नात्र प्राणविज्ञानस्य संकीर्तनमस्ति॥ करणात्तु प्राणविज्ञानसंबध्येत तत्र प्रकरणानुरोधेन श्रुतिः परित्यक्ता स्यात्॥
प्रकृतव्यावृत्त्यर्थश्च तुशब्दो न संगच्छते एष तु वा अतिवदतीति सत्यं त्वेव विजिज्ञासितव्यमिति च प्रयत्नांतरकरणमर्थांतरविवक्षां सूचय
ति॥ तस्मादेकवेदप्रशंसायां प्रकृतायामेष तु महान्ब्राह्मणो यश्चतुरो वेदानधीत इत्येकवेदेभ्योऽर्थांतरभूतश्चतुर्वेदः प्रशस्यते ताद
गेतद्द्रष्टव्यं॥ न च प्रश्नप्रतिवचनरूपयैवार्थांतरविवक्षया भवितव्यमिति नियमोऽस्ति प्रकृतसंबंधासंभवकारितत्वादर्थांतरविवक्षा
याः॥ तत्र प्राणांतमनुशासनं श्रुत्वा तूष्णीभूतं नारदं स्वयमेव सनत्कुमारो व्युत्पादयति यत्प्राणविज्ञानेन विकारानृतविषयेणाति
वादित्वमनतिवादित्वं तदेष तु वा अतिवदति यः सत्येनातिवदतीति तत्र सत्यमिति परं ब्रह्मोच्यते परमार्थरूपत्वात् सत्यं ज्ञानमनंतं
ब्रह्मेति च श्रुत्यंतरात्। तथा व्युत्पादिताय नारदाय सोऽहं भगवः सत्येनातिवदानीत्येवं प्रवृत्ताय विज्ञानादिसाधनपरंपरया भूमा
नमुपदिशति। तत्र यत्प्राणादधि सत्यं वक्तव्यं प्रतिज्ञातं तदेवेह भूमेत्युच्यत इति गम्यते॥ तस्मादस्ति प्राणादधि भूम्न उपदेश इत्य
तः प्राणादन्यः परमात्मा भूमा भवितुमर्हति॥ एवं चात्मविदिदिषया प्रकरणस्योत्थानमुपपन्नं भविष्यति॥ प्राण एवेहात्मा
विवक्षित इत्येतदपि नोपपद्यते॥ न हि प्राणस्य मुख्ययावृत्त्यात्मत्वमस्ति॥ न चान्यत्र परमज्ञानाच्छोकविनिवृत्तिरस्ति नान्यः पंथा
विद्यतेऽयनायेति श्रुत्यंतरात्॥ तं मां भगवाञ्छोकस्य पारं तारयत्विति चोपक्रम्योपसंहरति तस्मै मृदितकषायाय तमसः पारं
दर्शयति भगवान्सनत्कुमार इति॥ तम इति शोकादिकारणमविद्योच्यते॥ प्राणांते चानुशासने न प्राणस्यान्यायत्ततोच्येतात्म ३३
नः प्राण इति॥ ब्राह्मणं प्रकरणांते परमात्मविवक्षा भविष्यति भूमा तु प्राण एवेति चेत्॥ न स भगवः कस्मिन्प्रतिष्ठित इति
स्वे महिम्नीत्यादिना भूम्न एवा प्रकरणसमाप्तेरनुकर्षणात्॥ वैपुल्यात्मिका च भूमरूपता सर्वकारणत्वात्परमात्मनः सुत
रामुपपद्यते॥ धर्मोपपत्तेश्च॥९॥ अपि च ये भूम्नि श्रूयंते धर्मास्ते परमात्मन्युपपद्यंते॥ यत्र नान्यत्तात्स्टणोति नान्यद्विजा
नाति स भूमेति दर्शनादिव्यवहाराभावं भूम्न्यवगमयति परमात्मनि चायं दर्शनादिव्यवहाराभावोऽवगम्यते यत्र त्वस्य स
र्वमात्मैवाभूत्तत्केन कं पश्येदित्यादिश्रुत्यंतरात्॥ योऽप्यसौ सुषुप्तावस्थायां दर्शनादिव्यवहाराभाव उक्तः सोऽप्यात्मन एवासंग

63/1913

त्वविवक्षयोक्तो न प्राणस्वभावविवक्षया परमात्मप्रकरणात्॥ यदपि तस्यामवस्थायां सुखमुक्तं तदप्यात्मन एव सुखरूपत्व
विवक्षयोक्तं॥ यत आह एषोऽस्य परम आनंद एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति इहापि यो वै भूमा तत्सुखं नाल्पे
सुखमस्ति भूमैव सुखमिति सामयाधिसमयसुखनिखकरणेन ब्रह्मैव सुखं भूमानं दर्शयति॥ यो वै भूमा तदमृतमिति
मृतत्वमपीह श्रूयमाणं परमकारणं गमयति विकाराणाममृतत्वस्यापेक्षिकत्वादतोऽन्यदार्तमिति च श्रुत्यंतरात्॥ तथा सत्य
त्वं स्वमहिमप्रतिष्ठितत्वं सर्वगतत्वं सर्वात्मत्वमिति चैते धर्माः श्रूयमाणाः परमात्मन्येवोपपद्यंते नान्यत्र॥ तस्माद्भूमा परमात्मेति सि
द्धं॥ अक्षरमंबरांतधृतेः॥१०॥ कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्चेति स होवाच एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदंत्यस्थूलमन
ण्वित्यादि श्रूयते॥ तत्र संशयः॥ किमक्षरशब्देन वर्ण उच्यते॥ किं वा परमेश्वर इति॥ तत्राक्षरसमाम्नाय इत्यादावक्षरशब्दस्य वर्णे प्रसि
द्धत्वात् प्रसिद्ध्यतिक्रमस्य चायुक्तत्वात् ओंकार एवेदं सर्वमित्यादौ च श्रुत्यंतरे वर्णस्याप्युपास्यत्वेन सर्वात्मत्वावधारणाद्वर्ण एवाक्षरशब्द
इत्येवं प्राप्त उच्यते पर एवात्माक्षरशब्दः॥ कस्मादंबरांतधृतेः पृथिव्यादेराकाशांतस्य विकारजातस्य धारणात्॥ तत्र हि पृथिव्यादेः
समस्तस्य विकारजातस्य कालत्रयप्रविभक्तस्याकाश एव तदोतं च प्रोतं चेत्याकाशे प्रतिष्ठितत्वमुक्त्वा कस्मिन्नु खल्वाकाश ओतश्च प्रो
तश्चेत्यनेन प्रश्नेनेदमक्षरमवतारितं॥ तथा चोपसंहरतमेतस्मिन्नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्चेति॥ न चेयमंबरांतधृतिर्ब्रह्म
णोऽन्यत्र संभवति॥ यदप्योंकार एवेदं सर्वमिति तदपि ब्रह्मप्रतिपत्तिसाधनत्वात्स्तुत्यर्थं द्रष्टव्यं॥ तस्मान्न क्षरत्यश्नुते चेति नित्यत्वव्यापि
त्वाभ्यामक्षरं परमेव ब्रह्म स्यादिति तत्॥ कार्यस्य चेत्कारणाधीनत्वमंबरांतधृतेरभ्युपगम्यते॥ प्रधानकारणवादिनोऽपीयमुपपद्यते
कथमंबरांतधृत्वे ब्रह्मप्रतिपत्तिरिति अत उत्तरं पठति सा च प्रशासनात्॥११॥ सा चांबरांतधृतिः परमेश्वरस्यैव कर्म॥ कस्मात्प्रशास
नात्॥ प्रशासनं हीह श्रूयते॥ एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचंद्रमसौ विधृतौ तिष्ठत इत्यादि प्रशासनं च पारमेश्वरं कर्म
नाचेतनस्य प्रधानस्य प्रशासनं संभवति॥ न ह्यचेतनानां घटादिकारणानां मृदादीनां घटादिविषयं प्रशासनमस्ति॥ अन्यभावव्या
वृत्तेश्च॥१२॥ अन्यभावव्यावृत्तेश्च कारणाद्ब्रह्मैवाक्षरशब्दवाच्यं॥ तस्यैवांबरांतधृतिः कर्म नान्यस्य कस्यचित्॥ किमिदमन्यभाव
व्यावृत्तेरिति॥ अन्यस्य भावोऽन्यभावस्तस्माद्व्यावृत्तिरन्यभावव्यावृत्तिरिति॥ एतदुक्तं भवति॥ यदन्यब्रह्मणोऽक्षरशब्दवाच्यमिहाशं

ब्रं०भा०
॥३२॥

र्ष्यते॥तद्वावादिदमेवरांतविधरणमक्षरंव्यावर्तयतिश्रुतिः॥तद्वाएतदक्षरंगार्ग्यदृष्टंद्रष्टृश्रुतंश्रोतृमतंमंतृविज्ञातंविज्ञातृइति॥तत्रादृष्ट
त्वादिव्यपदेशःप्रधानस्यापिसंभवति॥द्रष्टृत्वादिव्यपदेशस्तुनसंभवत्यचेतनत्वात्॥तथानान्यदतोऽस्ति॥द्रष्टृनान्यदतोऽस्तिश्रोतृनान्य
दतोऽस्तिमंतृनान्यदतोऽस्तिविज्ञातृइत्यात्मभेदप्रतिषेधातनशारीरस्याप्युपाधिमतोऽक्षरशब्दवाच्यत्वंअचक्षुष्कमश्रोत्रमवागमनइति
चोपाधिमत्ताप्रतिषेधात॥नहिनिरुपाधिकशारीरोनामभवतितस्मात्परमेवब्रह्माक्षरमितिनिश्चयः॥४॥ईक्षतिकर्मव्यपदेशात्सः
॥१३॥एतद्वैसत्यकामपरंचापरंचब्रह्मयदोंकारस्तस्माद्विद्वानेतेनैवायतनेनैकतरमन्वेतीतिप्रकृत्यश्रूयते॥यःपुनरेतंत्रिमात्रेणो
मित्येतेनैवाक्षरेणपरंपुरुषमभिध्यायीतेति॥किमस्मिन्वाक्येपरंब्रह्माभिध्यातव्यं॥उपदिश्यतआहोस्विदपरमिति॥एतेनैवायतने
नपरमपरंवैकतरमन्वेतीतिप्रकृतत्वात्संशयः॥तत्रापरमिदंब्रह्मेतिप्राप्तंकस्मात्॥सतेजसिसूर्येसंपन्नःससामभिरुन्नीयतेब्र
ह्मलोकमितिचतद्विदोदेशपरिच्छिन्नस्यफलस्योच्यमानत्वात्॥नहिपरब्रह्मविदोदेशपरिच्छिन्नंफलमश्नुवीतेतियुक्तंसर्वगतत्वा
त्परस्यब्रह्मणः॥नन्वपरब्रह्मपरिग्रहेपरंपुरुषमितिविशेषणंनोपपद्यते॥नैषदोषः॥पिंडा पेक्षयाप्राणस्यपरत्वोपपत्तेरित्येवंप्रा
प्तेभिधीयतेपरमेवब्रह्मेहाभिध्यातव्यमुपदिश्यते॥कस्मात्॥ईक्षतिकर्मव्यपदेशात्॥ईक्षतिर्दर्शनंदर्शनव्याप्यमीक्षतिकर्मई
क्षतिकर्मत्वेनास्याभिध्यातव्यस्यपुरुषस्यवाक्यशेषेव्यपदेशोभवतिसएतस्माज्जीवघनात्परात्परंपुरिशयंपुरुषमीक्षतइति
तत्राभिध्यायतेरतथाभूतमपिवस्तुकर्मभवतिमनोरथपरिकल्पितस्याप्यभिध्यायतिकर्मत्वादीक्षतेस्तुतथाभूतमेववस्तुलो
केकर्मदृष्टमित्यतःपरमात्मैवायंसम्यग्दर्शनविषयभूतईक्षतिकर्मत्वेनव्यपदिष्टइतिगम्यतेसःएवेहपरपुरुषशब्दाभ्याम
भिध्यातव्यःप्रत्यभिज्ञायते॥नन्वभिध्यानेपरःपुरुषउक्तःईक्षणेतुपरात्परः॥कथमितरइत्यत्रप्रत्यभिज्ञायतइत्यत्रोच्यते॥प
रपुरुषशब्दौतावदुभयत्रसाधारणौ॥नचात्रजीवघनशब्देनप्रकृतोभिध्यातव्यःपरःपुरुषःपरामृश्यतेयेनतस्मात्परात्प
रोयमीक्षितव्यःपुरुषोन्यःस्यात॥कस्तर्हिजीवघनइत्युच्यते॥घनोमूर्तिः॥जीवलक्षणोघनोजीवघनःसैंधवखिल्यवद्यः
परमात्मनोजीवरूपःखिल्यभावउपाधिकृतःपरश्चविषयेंद्रियेभ्यःसोत्रजीवघनइति॥अपरआह॥ससामभिरुन्नीयते
ब्रह्मलोकमित्यतीतानंतरवाक्यनिर्दिष्टोयोब्रह्मलोकःपरश्चलोकांतरेभ्यःसोत्रजीवघनइत्युच्यते॥जीवानांहिसर्वेषांक ३२

65/1913

रणपरिवृतानांसर्वकरणात्मनिहिरण्यगर्भेब्रह्मलोकनिवासिनिसंघातोपपत्तेर्भवतिब्रह्मलोकोजीवघनः॥तस्मात्परोयःप
रमात्मेक्षणकर्मभूतःसएवाभिध्यानेपिकर्मभूतइतिगम्यते॥परंपुरुषमितिचविशेषणंपरमात्मपरिग्रहएवावकल्पते॥
परोहिपुरुषःपरमात्मैवभवतियस्मात्परंकिंचिदन्यन्नास्ति॥पुरुषान्नपरंकिंचित्साकाष्ठासापरागतिरितिचश्रुत्यंतरात्॥परं
चापरंचब्रह्मयदोंकारइतिचविभज्यानंतरमोंकारेणपरंपुरुषमभिध्यातव्यंब्रुवन्परमेवब्रह्मपरंपुरुषंगमयति॥यथापादोद
रस्त्वचाविनिर्मुच्यतएवंहवैसपाप्मनाविनिर्मुच्यतइतिपाप्मविनिर्मोकफलवचनंपरमात्मानमिहाभिध्यातव्यंसूचयति
अथयदुक्तंपरमात्माभिध्यायिनोनदेशपरिच्छिन्नंफलंयुज्यतइति॥अत्रोच्यते॥त्रिमात्रेणोंकारेणालंबनेनपरमात्मानम
भिध्यायतःफलंब्रह्मलोकप्राप्तिः॥क्रमेणचसम्यग्दर्शनोत्पत्तिरितिक्रममुक्त्यभिप्रायमेतद्भविष्यतीत्यदोषः॥दहरउत्तरे-
अन्यं भ्यः॥१४॥अथयदिदमस्मिन्ब्रह्मपुरेदहरंपुंडरीकंवेश्मदहरोस्मिन्नंतराकाशस्तस्मिन्यदंतस्तदन्वेष्टव्यंतद्वावविजिज्ञासितव्य
मित्यादिवाक्यंसमाम्नायते॥तत्रयोयंदहरेहृदयपुंडरीकेदहरआकाशःश्रुतःसकिंभूताकाशोऽथविज्ञानात्माऽथवापरमा
त्मेतिसंशय्यते॥कुतः॥आकाशब्रह्मपुरशब्दाभ्यां॥आकाशशब्दोह्ययंभूताकाशेपरस्मिंश्चप्रयुज्यमानोदृश्यते॥तत्रकिंभू
ताकाशएवदहरःस्यातकिंवापरइतिसंशयः॥तथाब्रह्मपुरमिति।किंजीवोत्रब्रह्मनामातस्येदंपुरंब्रह्मपुरंअथपरस्यैवब्रह्म
णःपुरंब्रह्मपुरमिति॥तत्रजीवस्यपरस्यवाऽन्यतरस्यपुरस्वामिनोदहराकाशत्वेसंशयः॥तत्राकाशशब्दस्यभूताकाशेरूढ
त्वातभूताकाशएवदहरशब्दइतिप्राप्तं॥तस्यचदहरायतनापेक्षयादहरत्वंयावान्वाअयमाकाशस्तावानेषोंतर्हृदयआका
शइतिचबाह्याभ्यंतरभावकृतभेदस्योपमानोपमेयभावोद्यावापृथिव्यादिचतस्मिन्नंतःसमाहितमवकाशात्मनाका
शस्यैकत्वात॥अथवाजीवोदहरइतिप्राप्तंब्रह्मपुरशब्दातजीवस्यहीदंपुरंसच्छरीरंब्रह्मपुरमित्युच्यते॥तस्यस्वकर्मणोपा
र्जितत्वात्॥भक्त्याचतस्यब्रह्मशब्दवाच्यत्वं॥नहिपरस्यब्रह्मणःशरीरेणस्वस्वामिभावलक्षणःसंबंधोस्तितत्रपुरस्वामिनः
पुरैकदेशेवस्थानंदृष्टंयथाराज्ञः॥मनउपाधिकश्चजीवोमनश्चप्रायेणहृदयेप्रतिष्ठितमित्यतोजीवस्यैवेदंहृदयेंतरवस्थानं
स्यात्॥दहरत्वमपितस्यैवाराग्रोपमितत्वादवकल्पते॥आकाशोपमितत्वादिचब्रह्माभेदविवक्षयाभविष्यति॥नचात्रद

रस्याकाशस्यान्वेष्टव्यत्वं विजिज्ञास्यत्वं च श्रूयते तस्मिन्यदंतरिति परविशेषणत्वेनोपादानादित्यत उत्तरक्रमः॥ परमेश्वर एव दं
हराकाशो भवितुमर्हति न भूताकाशो जीवो वा॥ कस्मादुत्तरेभ्यो वाक्यशेषगतेभ्यो हेतुभ्यः॥ तथाहि द्रष्टव्यतया विहितस्य दहरस्या
काशस्य तं चेद्ब्रूयुरित्युपक्रम्य किं तदत्र विद्यते यदन्वेष्टव्यं यद्वाव विजिज्ञासितव्यमित्येवमाक्षेपपूर्वकं प्रतिसमाधानवचनं भवति
स ब्रूयाद्यावान्वा अयमाकाशस्तावानेषोंतर्हृदय आकाश उभे अस्मिन्द्यावापृथिवी अंतरेव समाहिते इत्यादि॥ तत्र पुंडरीक
दहरत्वेन प्राप्तदहरत्वस्य प्रसिद्धाकाशौपम्येन दहरत्वं निवर्तयन्भूताकाशत्वं दहराकाशस्य निवर्तयतीति गम्यते॥ यद्यप्याका
शशब्दो भूताकाशे रूढस्तथापि तेनैव तस्योपमानोपपद्यत इति भूताकाशशंका निवर्तिता भवति॥ ननु कस्याप्याकाशस्य बा
ह्याभ्यंतरत्वकल्पितेन भेदेनोपमानोपमेयभावः संभवतीत्युक्तम्॥ नैवं संभवत्यगतिका हीयं गतिर्यत्काल्पनिकभेदाश्र
यणमपि च कल्प्यमानेपि भेदमुपमानोपमेयभाववर्णनं यतः परिच्छिन्नत्वादभ्यंतराकाशस्य न बाह्याकाशपरिमाणत्वमुपपद्येत।
ननु परमेश्वरस्यापि ज्यायानाकाशादिति श्रुत्यंतरान्नैवाकाशपरिमाणत्वमुपपद्येत॥ नैष दोषः॥ पुंडरीकवेष्टनप्राप्तदहरत्व
निवृत्तिपरत्वाद्वाक्यस्य न तावत्त्वप्रतिपादनपरत्वम्॥ उभयं प्रतिपादने हि वाक्यं भिद्येत॥ न च कल्पितभेदे पुंडरीकवेष्टित आकाश
कदेशे द्यावापृथिव्यादीनामंतः समाधानमुपपद्यते॥ एष आत्मापहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्य
कामः सत्यसंकल्प इति चात्मत्वमपहतपाप्मत्वादयश्च गुणा न भूताकाशे संभवंति॥ यद्यप्यात्मशब्दो जीवे संभवति तथापी
तरेभ्यः कारणेभ्यो जीवाशंकापि निवर्तिता भवति॥ न ह्युपाधिपरिच्छिन्नस्याराग्रोपमितस्य जीवस्य पुंडरीकवेष्टनकृतं दहर
त्वं शक्यं निवर्तयितुम्॥ ब्रह्माभेदविवक्षया जीवस्य सर्वगतत्वादि विवक्ष्येतेति चेत्॥ यदात्मतया जीवस्य सर्वगतत्वादि विवक्ष्यं
तस्यैव ब्रह्मणः साक्षात्सर्वगतत्वादि विवक्ष्यतामिति युक्तम्॥ यदप्युक्तं ब्रह्मपुरमिति जीवेन पुरस्योपलक्षितत्वाद्राज्ञ इव जी
वस्यैवेदं पुरं स्वामिनः पुरैकदेशवर्तित्वमस्त्विति अत्र ब्रूमः॥ परस्यैवेदं ब्रह्मणः पुरं सच्छरीरं ब्रह्मपुरमित्युच्यते॥ ब्रह्मश ३३
ब्दस्य तस्मिन्मुख्यत्वात्॥ तस्याप्यस्ति पुरेणानेन संबंध उपलब्ध्यधिष्ठानत्वात्॥ स एतस्माज्जीवघनात्परात्परं पुरिशयं पु
रुषमीक्षते॥ स वा अयं पुरुषः सर्वासु पूर्षु पुरिशय इत्यादिश्रुतिभ्यः॥ अथवा जीवपुर एवास्मिन्ब्रह्म संनिहितमुपलक्ष्यते॥ यथा

67/1913

यथा शालग्रामे विष्णुः संनिहित इति तद्वत्॥ तद्यथेह कर्मजितो लोकः क्षीयत एवमेवामुत्र पुण्यजितो लोकः क्षीयत इति च कर्मणामं
तवत्फलत्वमुक्त्वाथ य इहात्मानमनुविद्य व्रजंत्येतांश्च सत्यान्कामांस्तेषां सर्वेषु लोकेषु कामचारो भवतीति प्रकृतदहरा
काशविज्ञानस्यानंतफलत्वं वदन्परमात्मत्वमस्य सूचयति॥ यदप्येतदुक्तं न दहरस्याकाशस्यान्वेष्टव्यत्वं विजिज्ञासितव्यत्वं च श्रु
तं परविशेषणत्वेनोपादानादिति अत्र ब्रूमः॥ यद्याकाशो नान्वेष्टव्यत्वेनोक्तः स्याद्यावान्वा अयमाकाशस्तावानेषोंतर्हृदय आकाश
इत्याकाशस्वरूपप्रदर्शनं नोपयुज्येत॥ ननु तदंतर्वर्तिवस्तुसद्भावप्रदर्शनायैतदपि प्रदर्श्यते॥ तं चेद्ब्रूयुर्यदिदमस्मिन्ब्रह्मपुरे दह
रं पुंडरीकं वेश्म दहरोऽस्मिन्नंतराकाशः किं तदत्र विद्यते यदन्वेष्टव्यं यद्वाव विजिज्ञासितव्यमित्याक्षिप्य परिहारावसर आका
शौपम्योपक्रमेण द्यावापृथिव्यादीनामंतः समाहितत्वदर्शनात् नैतदेवम्॥ एवं हि सति यदंतः समाहितं द्यावापृथिव्यादि
तदन्वेष्टव्यं विजिज्ञासितव्यं चोक्तं स्यात्॥ तत्र वाक्यशेषो नोपपद्येत॥ अस्मिन्कामाः समाहिता एष आत्मापहतपाप्मेति
हि प्रकृतं द्यावापृथिव्यादिसमाधानाधारमाकाशमाकृष्याथ य इहात्मानमनुविद्य व्रजंत्येतांश्च सत्यान्कामानिति समु
क्य च्चयार्थेन चशब्देनात्मानं च कामाधारमाश्रितांश्च कामान्विज्ञेयान्वाक्यशेषो दर्शयति॥ तस्मादुपक्रमेपि दहर एवाकाशो हृ
दयपुंडरीकाधिष्ठानः सहांतःसमाहितैः पृथिव्यादिभिः सत्यैश्च कामैर्विज्ञेय उक्त इति गम्यते॥ स चोक्तेभ्यो हेतुभ्यः परमेश्वर इ
ति॥ गतिशब्दाभ्यां तथा हि दृष्टं लिंगं च॥ १५॥ दहरः परमेश्वर उत्तरेभ्यो हेतुभ्य इत्युक्तं त एवोत्तरे हेतव इदानीं प्रपंच्यंते॥ इतश्च प
रमेश्वर एव दहरो यस्माद्दहरवाक्यशेषे परमेश्वरस्यैव प्रतिपादकौ गतिशब्दौ भवतः॥ इमाः सर्वाः प्रजा अहरहर्गच्छंत्य एतं
ब्रह्मलोकं न विंदंतीति तत्र प्रकृतं दहरं ब्रह्मलोकशब्देनाभिधाय तद्विषया गतिः प्रजाशब्दवाच्यानां जीवानामभिधीयमा
ना दहरस्य ब्रह्मतां गमयति॥ तथा ह्यहरहर्जीवानां सुषुप्तावस्थायां ब्रह्मविषयं गमनं दृष्टं श्रुत्यंतरे सता सोम्य तदा संपन्नो
भवतीत्येवमादौ लोकेपि किल गाढं सुषुप्तमाचक्षते ब्रह्मीभूतो ब्रह्मतां गत इति तथा ब्रह्मलोकशब्दोपि प्रकृते दहरे प्रयुज्यमानो
जीवभूताकाशाशंकां निवर्तयन्ब्रह्मतामस्य गमयतीति ननु कमलासनलोकमपि ब्रह्मलोकशब्दो गमयेत्॥ गमयेद्यदि ब्र
ह्मणो लोक इति षष्ठीसमासवृत्त्या व्युत्पाद्येत समानाधिकरणवृत्त्या तु व्युत्पाद्यमानो ब्रह्मैव लोको ब्रह्मलोक इति परमेव ब्रह्म ग

शां०भा० ३४

ष्यति॥ एतदेव चाहरहर्ब्रह्मलोकगमनं ब्रह्मलोकशब्दस्य सामानाधिकरण्यवृत्तिपरिग्रहे लिंगं॥ न ह्यहरहरिमाः प्रजाः का
र्यब्रह्मलोकं सत्यलोकाख्यं गच्छंतीति शक्यं कल्पयितुं॥ धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः॥ १६॥ धृतेश्च हेतोः परमेश्वर एवायं द
हरः कथं दहरोऽस्मिन्नंतर आकाश इति हि प्रकृत्याकाशौपम्यपूर्वकं तस्मिन् सर्वसमाधानमुक्त्वा तस्मिन्नेव चात्मशब्दं प्रयुज्यापह
तपाप्मत्वादिगुणयोगं चोपदिश्य तमेवानतिवृत्तप्रकरणं निर्दिशत्यथ य आत्मा स सेतुर्विधृतिरेषां लोकानामसंभेदायेति॥ त
त्र विधृतिरित्यात्मशब्दसामानाधिकरण्याद्विधारयितोच्यते॥ क्तिचः कर्तरि स्मरणात्॥ यथोदकसंतानस्य विधारयिता लोके से
तुः क्षेत्रसंपदामसंभेदायैवमयमात्मा एषामध्यात्मादिभेदभिन्नानां लोकानां वर्णाश्रमादीनां च विधारयिता सेतुरसंभेदायासंक
रायेति॥ एवमिह प्रकृते दहरे विधरणलक्षणं महिमानं दर्शयन्नयं परमहिमा परमेश्वर एव श्रुत्यंतरादुपलभ्यते॥ एतस्य वा अक्ष
रस्य प्रशासने गार्गि सूर्याचंद्रमसौ विधृतौ तिष्ठत इत्यादेः॥ तथान्यत्रापि निश्चिते परमेश्वरवाक्ये श्रूयते एष सर्वेश्वर एष भूताधि
पतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसंभेदायेति॥ एवं विधृतेश्च हेतोः परमेश्वर एवायं दहरः प्रसिद्धेश्च॥ १७॥ इतश्च प
रमेश्वर एव दहरोऽस्मिन्नंतर आकाश इत्युच्यते यत्कारणमाकाशशब्दः॥ परमेश्वरे प्रसिद्ध आकाशो वै नामरूपयोर्निर्वहिता सर्वाणि
ह वा इमानि भूतान्याकाशादेव समुत्पद्यंत इत्यादिप्रयोगदर्शनात् जीवे तु न क्वचिदाकाशशब्दः प्रयुज्यमानो दृश्यते॥ भूताकाशस्तु
सत्यामप्याकाशशब्दप्रसिद्धावुपमानोपमेयभावाद्यसंभवान्न गृहीष्यत इत्युक्तं॥ इतरपरामर्शात्स इति चेन्नासंभवात्॥ १८॥
यदि वाक्यशेषबलेन दहर इति परमेश्वरः परिगृह्येतास्ति तस्यापि जीवस्य वाक्यशेषे परामर्शोऽथ य एष संप्रसादोऽस्माच्छरीरा
त्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत एष आत्मेति होवाचेति॥ अत्र हि संप्रसादशब्दः श्रुत्यंतरे सुषुप्तावस्था
यां दृष्टत्वात्तदवस्थावंतं जीवं शक्नोत्युपस्थापयितुं नार्थांतरं॥ तथा शरीरव्यपाश्रयस्यैव जीवस्य शरीरात्समुत्थानं संभवति॥ यथा ॥ ३४॥
काशव्यपाश्रयाणां वाय्वादीनामाकाशात्समुत्थानं तद्वत्॥ यथा वाऽदृष्टोऽपि लोके परमेश्वरविषय आकाशशब्दः परमेश्वरध
र्मसमभिव्याहारादाकाशो वै नामरूपयोर्निर्वहितेत्येवमादौ परमेश्वरविषयोऽभ्युपगत एवं जीवविषयोऽपि भविष्यति॥ तस्मा
दितरपरामर्शाद्दहरोऽस्मिन्नंतर आकाश इत्यत्र स एव जीव उच्यत इति चेत्तन्नैवं स्यात्॥ कस्मादसंभवात्॥ न हि जीवो बुद्ध्याद्युपाधिप

रिच्छेदाभिमानी सन्नाकाशेनोपमीयेत॥ न चोपाधिधर्मानभिमन्यमानस्यापहतपाप्मत्वादयो धर्माः संभवंति॥ अयं
चितचेतत्स्यमे सूत्रेऽसतिरेकाशंकापरिहाराय तु पुनरुपन्यस्तं पठिष्यति चोपरिष्टादन्यार्थश्च परामर्श इति॥ उत्तराच्चेदावि
र्भूतस्वरूपस्तु॥ १९॥ परामर्शाज्जीवाशंका जाता सासंभवान्निराकृता॥ इदानीं मृतस्य वामृतसेकात्पुनः समुत्थापनं जी
वाशंकायाः क्रियते उत्तरस्मात्प्राजापत्याद्वाक्यात्॥ तत्र हि य आत्मापहतपाप्मेत्यपहतपाप्मत्वादिगुणकमात्मानमन्वे
ष्टव्यं विजिज्ञासितव्यं च प्रतिज्ञाय य एषोऽक्षिणि पुरुषो दृश्यते एष आत्मेति ब्रुवन्नक्षिस्थं द्रष्टारं जीवमात्मानं निर्दिशति॥ ए
तं त्वेव ते भूयोऽनुव्याख्यास्यामीति च तमेव पुनः पुनः परामृश्य य एष स्वप्ने महीयमानश्चरत्येष आत्मेति॥ तद्यत्रैतत्सुप्तः सम
स्तः संप्रसन्नः स्वप्नं न विजानात्येष आत्मेति जीवमेवावस्थांतरगतं व्याचष्टे तस्यैव चापहतपाप्मत्वादि दर्शयत्येतदमृतम
भयमेतद्ब्रह्मेति॥ नाह खल्वयमेवं संप्रत्यात्मानं जानात्ययमहमस्मीति च सुषुप्तावस्थायां दोषमुपलभ्यैतं त्वेव ते भूयोऽनुव्या
ख्यास्यामि नो एवान्यत्रैतस्मादिति चोपक्रम्य शरीरसंबंधनिंदापूर्वकमेष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसं
पद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमपुरुष इति जीवमेव शरीरात्समुत्थितमुत्तमपुरुषं दर्शयति तस्मादस्ति संभवो जीवे परमे
श्वराणां धर्माणामतो दहरोऽस्मिन्नंतर आकाश इति जीव एवोक्त इति चेत्कश्चिद्ब्रूयात्तं प्रति ब्रूयादाविर्भूतस्वरूपस्त्विति॥ तुशब्दः॥
पक्षव्यावृत्त्यर्थो नोत्तरस्मादपि वाक्याद्दहरे जीवाशंका संभवतीत्यर्थः॥ कस्मात् यतस्तत्रापि आविर्भूतस्वरूपो जीवो विवक्ष्यते
आविर्भूतस्वरूपमस्य स्यादाविर्भूतस्वरूपः भूतपूर्वगत्या जीववचनं॥ एतदुक्तं भवति॥ य एषोऽक्षिणीत्यक्षिलक्षितं द्रष्टारं नि
र्दिश्योदशरावब्राह्मणेन तं शरीरात्मताया व्युत्थाप्यैतं त्वेव त इति पुनः पुनस्तमेव व्याख्येयत्वेनाकृष्य स्वप्नसुषुप्तोपन्यासो
पक्रमेण परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत इति यदस्य पारमार्थिकं स्वरूपं परं ब्रह्म तद्रूपतयैनं जीवं व्याचष्टे
न जैवेन रूपेण यत्तत्परं ज्योतिरुपसंपत्तव्यं श्रुतं तत्परं ब्रह्म॥ तच्चापहतपाप्मत्वादिधर्मकं तदेव च जीवस्य पारमार्थिकं रूपं
तत्त्वमसीत्यादिशास्त्रेभ्यो नेतरदुपाधिकल्पितं यावदेव हि स्थाणाविव पुरुषबुद्धिं द्वैतलक्षणामविद्यां निवर्तयन् कूटस्थनि
त्यदृक्स्वरूपमात्मानमहं ब्रह्मास्मीति न प्रतिपद्यते तावज्जीवस्य जीवत्वं॥ यदा तु देहेंद्रियमनोबुद्धिसंघाताद्व्युत्थाप्य श्रुत्या प्र

69/1913

शां०भा० ३४ धिष्यति॥ एतदेव चाहरहर्ब्रह्मलोकगमनं ब्रह्मलोकशब्दस्य सामानाधिकरण्यवृत्तिपरिग्रहे लिंगं॥ न ह्यहरहरिमाः प्रजाः का
र्यं ब्रह्मलोकं सत्यलोकाख्यं गच्छंतीति शक्यं कल्पयितुं॥ धृतेश्च महिम्नोस्यास्मिन्नुपलब्धेः॥१६॥ धृतेश्च हेतोः परमेश्वर एवायं द
हरः कथं दहरोस्मिन्नंतराकाश इति हि प्रकृत्याकाशोपमापूर्वकं तस्मिन्सर्वसमाधानमुक्त्वा तस्मिन्नेव चात्मशब्दं प्रयुज्यापह
तपाप्मत्वादिगुणयोगं चोपदिश्य तमेवानतिवृत्तप्रकरणं निर्दिशत्यथ य आत्मा स सेतुर्विधृतिरेषां लोकानामसंभेदायेति। त
त्र विधृतिरित्यात्मशब्दसामानाधिकरण्याद्विधारयितोच्यते॥ क्तिचः कर्तरि स्मरणात्॥ यथोदकसंतानस्य विधारयिता लोके से
तुः क्षेत्रसंपदामसंभेदायेवमयमात्मा एषामध्यात्मादिभेदभिन्नानां लोकानां वर्णाश्रमादीनां च विधारयिता सेतुरसंभेदायासंक
रायेति॥ एवमिह प्रकृते दहरे विधरणलक्षणं महिमानं दर्शयत्ययं च महिमा परमेश्वर एव श्रुत्यंतरादुपलभ्यते॥ एतस्य वा अक्ष
रस्य प्रशासने गार्गि सूर्याचंद्रमसौ विधृतौ तिष्ठत इत्यादेः॥ तथान्यत्रापि निश्चिते परमेश्वरवाक्ये श्रूयते एष सर्वेश्वर एष भूताधि
पतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसंभेदायेति॥ एवं विधृतेश्च हेतोः परमेश्वर एवायं दहरः प्रसिद्धेश्च॥१७॥ इतश्च प
रमेश्वर एव दहरोस्मिन्नंतराकाश इत्युच्यते यत्कारणमाकाशशब्दः॥ परमेश्वरे प्रसिद्ध आकाशो वै नामरूपयोर्निर्वहिता सर्वाणि
ह वा इमानि भूतान्याकाशादेव समुत्पद्यंत इत्यादिप्रयोगदर्शनात् जीवे तु न क्वचिदाकाशशब्दः प्रयुज्यमानो दृश्यते॥ भूताकाशस्तु
सत्यामप्याकाशशब्दप्रसिद्धावुपमानोपमेयभावाद्यसंभवान्न गृहीष्यत इत्युक्तं॥ इतरपरामर्शात्स इति चेन्नासंभवात्॥१८॥
यदि वाक्यशेषबलेन दहर इति परमेश्वरः परिगृह्येतास्तीतरस्यापि जीवस्य वाक्यशेषे परामर्शोऽथ य एष संप्रसादोस्माच्छरीरा
त्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत एष आत्मेति होवाचेति॥ अत्र हि संप्रसादशब्दः श्रुत्यंतरे सुषुप्तावस्था
यां दृष्टत्वात्तदवस्थावंतं जीवं शक्नोत्युपस्थापयितुं नार्थांतरं॥ तथा शरीरव्यपाश्रयस्यैव जीवस्य शरीरात्समुत्थानं संभवति॥ यथा
काशव्यपाश्रयाणां वाय्वादीनामाकाशात्समुत्थानं तद्वत्॥ यथा वा दृष्टोपि लोके परमेश्वरविषय आकाशशब्दः परमेश्वरध ॥३४॥
र्मसमभिव्याहारादाकाशो वै नाम नामरूपयोर्निर्वहितेत्येवमादौ परमेश्वरविषयोभ्युपगत एवं जीवविषयोपि भविष्यति॥ तस्मा
दितरपरामर्शाद्दहरोस्मिन्नंतराकाश इत्यत्र स एव जीव उच्यत इति चेन्नैतदेवं स्यात्॥ कस्मादसंभवात्॥ न हि जीवो बुद्ध्याद्युपाधिप

69/1913

रिच्छेदाभिमानी सन्नाकाशेनोपमीयेत॥ न चोपाधिधर्मानभिमन्यमानस्यापहतपाप्मत्वादयो धर्माः संभवंति॥ प्रपं
चितं चैतत्प्रथमसूत्रे अतिरेकाशंकापरिहारार्थं तु पुनरुपन्यस्तं पठिष्यति चोपरिष्टादन्यार्थश्च परामर्श इति॥ उत्तराच्चेदावि
र्भूतस्वरूपस्तु॥१९॥ परामर्शाद्या जीवाशंका जाता सा संभवान्निराकृता अथेदानीं मृतस्येवामृतसेकात्पुनः समुत्थापनं जी
वाशंकायाः क्रियते उत्तरस्मात्प्राजापत्याद्वाक्यात्॥ तत्र हि य आत्मापहतपाप्मेत्यपहतपाप्मत्वादिगुणकमात्मानमन्वे
ष्टव्यं विजिज्ञासितव्यं च प्रतिज्ञाय य एषोक्षिणि पुरुषो दृश्यत एष आत्मेति ब्रुवन्नक्षिस्थं द्रष्टारं जीवमात्मानं निर्दिशति॥ ए
तं त्वेव ते भूयोनुव्याख्यास्यामीति च तमेव पुनः पुनः परामृश्य य एष स्वप्ने महीयमानश्चरत्येष आत्मेति॥ तद्यत्रैतत्सुप्तः सम
स्तः संप्रसन्नः स्वप्नं न विजानात्येष आत्मेति च जीवमेवावस्थांतरगतं व्याचष्टे तस्यैव चापहतपाप्मत्वादि दर्शयत्येतदमृतम
भयमेतद्ब्रह्मेति॥ नाह खल्वयमेवं संप्रत्यात्मानं जानात्ययमहमस्मीति च सुषुप्तावस्थायां दोषमुपलभ्यैतं त्वेव ते भूयोनुव्या
ख्यास्यामि नो एवान्यत्रैतस्मादिति चोपक्रम्य शरीरसंबंधनिंदापूर्वकमेष संप्रसादोस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसं
पद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमपुरुष इति जीवमेव शरीरात्समुत्थितमुत्तमपुरुषं दर्शयति तस्मादस्ति संभवो जीवे पारमे
श्वराणां धर्माणामतो दहरोस्मिन्नंतराकाश इति जीव एवोक्त इति चेत्कश्चिद्ब्रूयात्तं प्रतिब्रूयादाविर्भूतस्वरूपस्त्विति॥ तुशब्दः॥
पक्षव्यावृत्त्यर्थो नोत्तरस्मादपि वाक्यादिह जीवाशंका संभवतीत्यर्थः॥ कस्माद्यतस्तत्रापि आविर्भूतस्वरूपो जीवो विवक्ष्यते
आविर्भूतस्वरूपमस्येत्याविर्भूतस्वरूपः भूतपूर्वगत्या जीववचनं॥ एतदुक्तं भवति॥ य एषोक्षिणीत्यक्षिलक्षितं द्रष्टारं नि
र्दिश्योदशरावब्राह्मणेन शरीरात्मतायां व्युत्थाप्यैतं त्वेव त इति पुनः पुनस्तमेव व्याख्येयत्वेनाकृष्य स्वप्नसुषुप्तोपन्यासो
पक्रमेण परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत इति यदस्य पारमार्थिकं स्वरूपं परं ब्रह्म तद्रूपतयैनं जीवं व्याचष्टे
न जैवेन रूपेण। यत्तत्परं ज्योतिरुपसंपत्तव्यं श्रुतं तत्परं ब्रह्म॥ तच्चापहतपाप्मत्वादिधर्मकं तदेव च जीवस्य पारमार्थिकं रूपं
तत्त्वमसीत्यादिशास्त्रेभ्यो नेतरदुपाधिकल्पितं यावदेव हि स्थाणाविव पुरुषबुद्धिं द्वैतलक्षणामविद्यां निवर्तयन्कूटस्थनि
त्यदृक्स्वरूपमात्मानमहं ब्रह्मास्मीति न प्रतिपद्यते तावज्जीवस्य जीवत्वं॥ यदा तु देहेंद्रियमनोबुद्धिसंघातादुत्थाप्य श्रुत्या प्र

शं०भा० ॥३५॥ तिबोध्यते नाभित्वं देहेन्द्रियमनोबुद्धिसंघातो नासि संसारी॥ किं तर्हि॥ स यत्सत्यं स आत्मा चैतन्यमात्रस्वरूपस्तत्त्वमसीति॥
तदा कूटस्थनित्यदृक्स्वरूपमात्मानं प्रतिबुध्यास्माच्छरीराद्यभिमानात्समुत्तिष्ठन्स एव कूटस्थनित्यदृक्स्वरूप आत्मा भवति।
स यो ह वै तत्परं ब्रह्म वेद ब्रह्मैव भवतीत्यादिश्रुतिभ्यः॥ तदेव चास्य पारमार्थिकं स्वरूपं येन शारीरात्समुत्थाय स्वेन रूपेणाभिनि
ष्पद्यते॥ कथं पुनः स्वरूपेणैव निष्पद्यत इति संभवति कूटस्थनित्यस्य सुवर्णादीनां तु द्रव्यान्तरसंपर्कादभिभूतस्वरूपाणामनभि
व्यक्तासाधारणविशेषाणां क्षारप्रक्षेपादिभिः शोध्यमानानां स्वरूपेणाभिनिष्पत्तिः स्यात्॥ तथा नक्षत्रादीनामहन्यभिभू
तप्रकाशानामभिभावकवियोगे रात्रौ स्वरूपेणाभिनिष्पत्तिः स्यात्॥ न तु तथा चैतन्यज्योतिषो नित्यस्य केनचिदभिभवः संभ
वत्यसंसर्गित्वात् व्योम्न इव दृष्टविरोधाच्च॥ दृष्टिश्रुतिमतिविज्ञातयो हि जीवस्य रूपं॥ तच्छरीरादसमुत्थितस्यापि जीवस्य सदा
निष्पन्नमेव दृश्यते सर्वो हि जीवः पश्यन्शृण्वन्मन्वानो विजानन्व्यवहरत्यन्यथा व्यवहारानुपपत्तेः॥ न चेच्छरीरात्समुत्थितस्य नि
ष्पद्येत॥ प्राक्समुत्थानात् दृष्ट्यादिव्यवहारो विरुध्येत॥ अतः किमात्मकमिदं शरीरात्समुत्थानं किमात्मिका वा स्वरूपेणाभिनिष्पत्ति
रित्युच्यते॥ प्राग्विवेकविज्ञानोत्पत्तेः शरीरेन्द्रियमनोबुद्धिविषयवेदनोपाधिभिरविविक्तमिव जीवस्य दृष्ट्यादिज्योतिः स्वरूपं भ
वति यथा शुद्धस्य स्फटिकस्य स्वाच्छ्यं शौक्ल्यं च स्वरूपं प्राग्विवेकग्रहणाद्रक्तनीलाद्युपाधिभिरविविक्तमिव भवति प्रमाणजनितवि
वेकग्रहणात्तु पराचीनः स्फटिकः स्वाच्छ्येन शौक्ल्येन च स्वरूपेणाभिनिष्पद्यत इत्युच्यते प्रागपि तथैव सन्॥ तथा देहाद्युपाध्य
विविक्तस्यैव सतो जीवस्य श्रुतिविवेकविज्ञानं शरीरात्समुत्थानं विवेकविज्ञानफलं स्वरूपेणाभिनिष्पत्तिः केवलात्मस्वरूपा
वगतिः॥ तथा विवेकाविवेकमात्रेणैवात्मनोऽशरीरत्वं सशरीरत्वं च मन्त्रवर्णात् अशरीरं शरीरेष्विति॥ शरीरस्थोऽपि कौन्तेय न क
रोति न लिप्यत इति च सशरीरत्वाशरीरत्वविशेषाभावस्मरणात्॥ तस्माद्विवेकविज्ञानाभावादनाविर्भूतस्वरूपः सन्विवेक ॥३५॥
विज्ञानादाविर्भूतस्वरूप इत्युच्यते॥ न त्वन्यादृशाविर्भावानाविर्भावौ स्वरूपस्य संभवतः स्वरूपत्वादेव एवं मिथ्याज्ञानकृत
एव जीवपरमेश्वरयोर्भेदो न वस्तुकृतो व्योमवदसंगत्वाविशेषात्॥ कुतश्चैतदेवं प्रतिपत्तव्यं॥ यतो य एषोऽक्षिणि पुरुषो दृ
श्यत इत्युपदिश्यैतदमृतमभयमेतद्ब्रह्मेत्युपदिशति॥ योऽक्षिणि प्रसिद्धो द्रष्टा द्रष्टृत्वेन विभाव्यते सोऽमृताभयलक्षणाद्ब्रह्मणो

71/1913

ऽन्यश्चेत्स्यात्ततोऽमृताभयब्रह्मसामानाधिकरण्यं न स्यात्॥ नापि प्रतिच्छायात्मायमक्षिलक्षितो निर्दिश्यते प्रजापतेर्मृषावादि
त्वप्रसंगात्॥ तथा द्वितीयेऽपि पर्याये य एष स्वप्ने महीयमानश्चरतीति न प्रथमपर्यायनिर्दिष्टादक्षिपुरुषाद्द्रष्टुरन्यो निर्दिष्ट एतं त्वे
व ते भूयोऽनुव्याख्यास्यामीत्युपक्रमात्॥ किं चाहमद्य स्वप्ने हस्तिनमद्राक्षं नेदानीं तं पश्यामीति दृष्टमेव प्रतिबुद्धः॥ प्रत्याचष्टे द्रष्टा
रं तु तमेव प्रत्यभिजानाति य एवाहं स्वप्नमद्राक्षं स एवाहं जागरितं पश्यामीति॥ तथा तृतीयपर्याये नाह खल्वयमेवं संप्रत्यात्मानं
जानात्ययमहमस्मीति नो एवेमानि भूतानीति सुषुप्तावस्थायां विशेषविज्ञानाभावमेव दर्शयति न विज्ञातारं प्रतिषेधति यत्तु
तत्र विनाशमेवापीतो भवतीति तदपि विशेषविज्ञानविनाशाभिप्रायमेव न विज्ञातृविनाशाभिप्रायं॥ न हि विज्ञातुर्विज्ञातेर्वि
परिलोपो विद्यतेऽविनाशित्वादिति श्रुत्यन्तरात्॥ तथा चतुर्थेऽपि पर्याये एतं त्वेव ते भूयोऽनुव्याख्यास्यामि नो एवान्यत्रैतस्मादित्यु
पक्रम्य मघवन्मर्त्यं वा इदं शरीरमित्यादिना प्रपंचेन शरीराद्युपाधिसंबन्धप्रत्याख्यानेन संप्रसादशब्दोदितं जीवं स्वेन रूपेणाभि
निष्पद्यत इति ब्रह्मस्वरूपापन्नं दर्शयन्न परस्माद्ब्रह्मणोऽमृताभयस्वरूपादन्यं जीवं दर्शयति॥ केचित्तु परमात्मविवक्षायामेतं
त्वेव त इति जीवाकर्षणमन्याय्यं मन्यमाना एतमेव वाक्योपक्रमसूचितमपहतपाप्मत्वादिगुणकमात्मानं ते भूयोऽनुव्या
ख्यास्यामीति कल्पयन्ति तेषामेतमिति संनिहितावलंबिनी सर्वनामश्रुतिर्विप्रकृष्येत भूयःश्रुतिश्चोपरुध्येत पर्यायान्तराभि
हितस्य पर्यायान्तरेणानभिधीयमानत्वात्॥ एतं त्वेव त इति च प्रतिज्ञाय प्राक्चतुर्थात्पर्यायादन्यमन्यं व्याचक्षाणस्य प्रजापते
प्रतारकत्वं प्रसज्येत॥ तस्माद्यदविद्याप्रत्युपस्थापितमपारमार्थिकं जैवं रूपं कर्तृभोक्तृरागद्वेषादिदोषकलुषितमनेकानर्थ
योगि तद्विलयनेन तद्विपरीतमपहतपाप्मत्वादिगुणकं परमेश्वरस्वरूपं विद्यया प्रतिपद्यते॥ सर्पादिविलयनेनेव रज्ज्वादी
नाम्॥ परे तु वादिनः पारमार्थिकमेव जैवं रूपमिति मन्यन्ते॥ अस्मदीयाश्च केचित्॥ तेषां सर्वेषामात्मैकत्वसम्यग्दर्शनप्रतिपक्ष
भूतान्यां प्रतिषेधायेदं शारीरकमारब्धं एक एव परमेश्वरः कूटस्थनित्यो विज्ञानधातुरस्तीति॥ यत्त्विदं पारमेश्वरवाक्ये जी
वमाशंक्य प्रतिषेधति सूत्रकारो नासंभवादित्यादिना तत्रायमभिप्रायः॥ नित्यशुद्धबुद्धमुक्तसत्यस्वभावे कूटस्थनित्य एक
स्मिन्नसंगे परमात्मनि तद्विपरीतं जैवं रूपं व्योम्नीव तलमलादि परिकल्पितं तदात्मैकत्वप्रतिपादनपरैर्वाक्यैर्न्यायोपेतैर्द्वैत

वादप्रतिषेधेश्चापनेष्यामीतिपरमात्मनोजीवादन्यत्वंदर्शयति॥जीवस्यतुनपरस्मादन्यत्वंपिपादयिष्यति॥किंत्वनुवदत्ये
वाविद्याकल्पितंलोकप्रसिद्धंजीवभेदं॥एवंहिस्वाभाविककर्तृत्वभोक्तृत्वानुवादेनप्रवृत्ताःकर्मविधयोनविरुध्यंतइतिमन्य
ते॥प्रतिपाद्यंतुशास्त्रार्थमात्मैकत्वमेवदर्शयतिशास्त्रदृष्ट्यातूपदेशोवामदेववदित्यादिनावर्णितश्चास्माभिर्विद्वदविद्वद्भेदेन
कर्मविधिविरोधपरिहारः॥अन्यार्थश्चपरामर्शः॥२०॥अथयोदहरवाक्यशेषेजीवपरामर्शोदर्शितोऽथयएषसंप्रसादइ
त्यादिःसदहरेपरमेश्वरेव्याख्यायमानेनजीवोपासनोपदेशोनप्रकृतविशेषोपदेशइत्यनर्थकःप्राप्नोत्यतआहान्यार्थोयंजी
वपरामर्शोनजीवस्वरूपपर्यवसायीकिंतर्हिपरमेश्वरस्वरूपपर्यवसायीकथंसंप्रसादशब्दोदितोजीवोजागरितव्यवहारेदेहे
द्रियपंजराध्यक्षोभूत्वातद्वासनानिर्मितांश्चस्वप्नान्नाडीश्चरन्ननुभूयश्रांतःशरणंप्रेप्सुरुभयरूपादपिशरीराभिमानात्समुत्था
यसुषुप्तावस्थायांपरंज्योतिराकाशशब्दितंपरंब्रह्मोपसंपद्यविशेषविज्ञानवत्त्वंपरित्यज्यस्वेनरूपेणाभिनिष्पद्यते॥यदस्योप
संपत्तव्यंपरंज्योतिर्येनस्वरूपेणायमभिनिष्पद्यतेयआत्मापहतपाप्मत्वादिगुणउपास्यइत्येवमर्थोयंजीवपरामर्शःपरमे
श्वरवादिनोप्युपपद्यते॥अल्पश्रुतेरितिचेत्तदुक्तं॥२१॥यदप्युक्तंदहरोस्मिन्नंतराकाशइत्याकाशस्याल्पत्वंश्रूयमाणंपरमे
श्वरत्वेनोपपद्यतेजीवस्यत्वाराग्रोपमितस्याल्पत्वंसचकल्प्यतइतितस्यपरिहारोवक्तव्यः॥उक्तोस्यपरिहारः॥परमेश्वरस्या
पेक्षिकमल्पत्वमवकल्प्यतइत्यर्भकौकस्त्वात्तद्व्यपदेशाच्चनेतिचेन्ननिचाय्यत्वादेवंव्योमवच्चेत्यत्रसएवपरिहारोनुसंधातव्य
इतिसूचयति॥श्रुत्यैवचेदमल्पत्वंप्रत्युक्तंप्रसिद्धेनाकाशेनोपमिमानयावान्वाअयमाकाशस्तावानेषोंतर्हृदयआकाशइति॥अ
नुकृतेस्तस्यच॥२२॥नतत्रसूर्योभातिनचंद्रतारकंनेमाविद्युतोभांतिकुतोयमग्निः॥तमेवभांतमनुभातिसर्वंतस्यभासास
र्वमिदंविभातीतिसमामनंतितत्रयंभांतमनुभातिसर्वंयस्यचभासासर्वमिदंविभातिसकिंतेजोधातुःकश्चिदुतप्राज्ञआत्मेतिविचि
कित्सायांतेजोधातुरितितावत्प्राप्तं॥कुतस्तेजोधातूनामेवसूर्यादीनांभानप्रतिषेधात्॥तेजःस्वभावकंहिचंद्रतारकादितेजः
स्वभावएवसूर्योभासमानेऽहनिनभासतइतिप्रसिद्धंतथासहसूर्येणसर्वमिदंचंद्रतारकादियस्मिन्नभासतेसोपितेजःस्वभा
वकएवकश्चिदित्यवगम्यते॥अनुभानमपितेजःस्वभावकएवोपपद्यते॥समानस्वभावकेष्वनुकारदर्शनात्गच्छंतमनुगच्छती ३६

73/1913

तितस्मात्तेजोधातुःकश्चिदित्येवंप्राप्तेब्रूमः॥प्राज्ञएवायमात्माभवितुमर्हति॥तस्मादनुकृतेरनुकरणमनुकृतिः॥यदेतत्तमेवभां
तमनुभातिसर्वमित्यनुभानंतत्प्राज्ञपरिग्रहेऽवकल्प्यते॥भारूपःसत्यसंकल्पइतिहिप्राज्ञमात्मानमामनंति॥नतुतेजोधातुं
कंचित्सूर्यादयोनुभांतीतिप्रसिद्धं॥समत्वाच्चतेजोधातूनांसूर्यादीनांनतेजोधातुमन्यंप्रत्यपेक्षास्तियंभांतमनुभायुः॥नहिप्रदी
पःप्रदीपांतरमनुभाति॥यदप्युक्तंसमानस्वभावकेष्वनुकारोदृश्यतइतिनायमेकांतोस्तिभिन्नस्वभावकेष्वपिह्यनुकारोदृश्यते॥
सुतप्तोयःपिंडोग्न्यनुकृतिरग्निंदहंतमनुदहतिभौमंवारजोवायुंवहंतमनुवहतीति॥अनुकृतेरित्यनुभानमसूसूचत्तस्यचे
तिचतुर्थंपादमन्यश्लोकस्यसूत्रयतितस्यभासासर्वमिदंविभातीतितद्धेतुकंभानंसूर्यादेरुच्यमानंप्राज्ञमात्मानंगमयतित
द्देवाज्योतिषांज्योतिरायुर्होपासतेऽमृतमितिहिप्राज्ञमात्मानमामनंतितेजोंतरेणतुसूर्यादितेजोविभातीत्यप्रसिद्धंविरुद्धंच
तेजोंतरेणतेजोंतरस्यप्रतीघातात्॥अथवानसूर्यादीनामेवश्लोकपरिपठितानामिदंतद्धेतुकंविभानमुच्यतेकिंतर्हिसर्वमि
दमित्यविशेषश्रुतेःसर्वस्यैवास्यनामरूपक्रियाकारकफलजातस्याभिव्यक्तिःसाब्रह्मज्योतिःसत्तानिमित्ता॥यथासूर्य
ज्योतिःसत्तानिमित्तासर्वस्यरूपजातस्याभिव्यक्तिस्तद्वत्॥नतत्रसूर्योभातीतिचतत्रशब्दमाहरन्प्रकृतग्रहणंदर्शयतिप्रकृ
तंचब्रह्मयस्मिन्द्यौःपृथिवीचांतरिक्षमोतमित्यादिनाअनंतरंचहिरण्मयेपरेकोशेविरजंब्रह्मनिष्कलं॥तच्छुभ्रंज्योति
स्तद्यदात्मविदोविदुरिति॥कथंतज्ज्योतिषांज्योतिरित्यतइदमुत्थितंनतत्रसूर्योभातीतियदप्युक्तंसूर्यादीनांतेजसांभानप्रतिषे
धस्तेजोधातावेवान्यस्मिन्नवकल्प्यतेसूर्यइवेतरेषामिति॥तत्रतुसएवतेजोधातुरन्योनसंभवतीत्युपपादितं॥ब्रह्मण्यपिचैषां
भानप्रतिषेधोऽवकल्प्यते॥यतोयदुपलभ्यतेतत्सर्वंब्रह्मज्योतिषैवोपलभ्यते॥ब्रह्मतुनान्येनज्योतिषोपलभ्यतेस्वयं
ज्योतिःस्वरूपत्वात्येनसूर्यादयस्तस्मिन्नभायुःब्रह्मह्यन्यद्व्यनक्तिनतुब्रह्मान्येनव्यज्यतेआत्मनैवायंज्योतिषास्तेअगृह्यो
नहिगृह्यतइत्यादिश्रुतिभ्यः॥अपिचस्मर्यते॥२३॥अपिचेदृशत्वंप्राज्ञस्यैवात्मनःस्मर्यतेभगवद्गीतासु॥नतद्भासयते
सूर्योनशशांकोनपावकः॥यद्गत्वाननिवर्तंतेतद्धामपरमंमम॥यदादित्यगतंतेजोजगद्भासयतेऽखिलं॥यच्चंद्रमसियच्चाग्नौत
त्तेजोविद्धिमामकमितिच॥शब्दादेवप्रमितः॥२४॥अंगुष्ठमात्रःपुरुषोमध्यआत्मनितिष्ठतीतिश्रूयते॥तथाअंगुष्ठमा

शं०भा०
॥ ३७॥

नः पुरुषो ज्योतिरिवाधूमकः ॥ ईशानो भूतभव्यस्य स एवाद्य स उ श्व एतद्वै तदिति च ॥ तत्र योयमंगुष्ठमात्रः पुरुषः श्रूयते स
किं विज्ञानात्मा किं वा परमात्मेति संशयः ॥ तत्र परिमाणोपदेशात्तावद्विज्ञानात्मेति प्राप्तं ॥ न ह्यनंतायामस्य विस्तारस्य परमा
त्मनोंगुष्ठपरिमाणमुपदिश्येत ॥ विज्ञानात्मनस्तूपाधिमत्त्वात्संभवति कयाचित्कल्पनयांगुष्ठमात्रत्वं स्मृतेश्च ॥ अथ सत्यवतः
कायात्पाशबद्धं वशं गतं ॥ अंगुष्ठमात्रं पुरुषं निश्चकर्ष यमो बलादिति ॥ न हि परमेश्वरो बलाद्यमेन निःक्रष्टुं शक्यस्तेन तत्र संसा
र्यंगुष्ठमात्रो निश्चितः ॥ स एवेहापीत्येवं प्राप्ते क्रमः ॥ परमात्मैवायमंगुष्ठमात्रः पुरुषो भवितुमर्हति ॥ कस्मात् शब्दात् ईशानो भूत
भव्यस्येति ॥ न ह्यन्यः परमेश्वराद्भूतभव्यस्य निरंकुशमीशिता ॥ एतद्वै तदिति च प्रकृतं पृष्टमिहानुसंदधाति ॥ एतद्वै तद्यत्पृष्टं ब्रह्मे
त्यर्थः ॥ पृष्टं चेह ब्रह्म अन्यत्र धर्मादन्यत्रास्मात्कृताकृतादन्यत्र भूताच्च भव्याच्च यत्तत्पश्यसि तद्वदेति ॥ शब्दादेवेत्यभिधानश्रुतेरेवे
न इति परमेश्वरोवगम्यत इत्यर्थः ॥ कथं पुनः सर्वगतस्य परमात्मनः परिमाणोपदेश इत्यत्र क्रमः ॥ हृद्यपेक्षया तु मनुष्याधिकारत्वा
त् ॥ २५ ॥ सर्वगतस्यापि परमात्मनो हृदयेवस्थानमपेक्ष्यांगुष्ठमात्रत्वमिदमुच्यते ॥ आकाशस्येव वंशपर्वापेक्षमरत्निमात्रत्वं
न ह्यंजसातिमात्रस्य परमात्मनोंगुष्ठमात्रत्वमुपपद्यते ॥ न चान्यः परमात्मन इह ग्रहणमर्हतीशानशब्दादिभ्य इत्युक्तं ॥ ननु प्र
तिप्राणिभेदं हृदयानामनवस्थितत्वात्तदपेक्षमाणांगुष्ठमात्रत्वं नोपपद्यत इत्यत उत्तरमुच्यते ॥ मनुष्याधिकारत्वादिति ॥ शा
स्त्रं ह्यविशेषप्रवृत्तमपि मनुष्यानेवाधिकरोति अपर्युदस्तत्वात् ॥ शक्तत्वादर्थित्वादुपनयनादिशास्त्राच्चेति वर्णितमेतदधि
कारलक्षणे ॥ मनुष्याणां च नियतपरिमाणः कायः औचित्येन नियतपरिमाणमेव चैषामंगुष्ठमात्रं हृदयं ॥ अतो मनुष्याधिकारत्वा
च्छास्त्रस्य मनुष्यहृदयावस्थानापेक्षमंगुष्ठमात्रत्वमुपपन्नं परमात्मनः ॥ यदप्युक्तं परिमाणोपदेशात्स्मृतेश्च संसार्येवायमंगु
ष्ठमात्रः प्रत्येतव्य इति ॥ तत्प्रत्युच्यते ॥ स आत्मा तत्त्वमसीत्यादिवत् संसारिण एव सतोंगुष्ठमात्रस्य ब्रह्मत्वमिदमुपदिश्यत इ
ति ॥ द्विरूपा हि वेदांतवाक्यानां प्रवृत्तिः ॥ क्वचित्परमात्मस्वरूपनिरूपणपरा क्वचिद्विज्ञानात्मनः परमात्मनैकत्वोपदेशपरा ॥ त
दत्र विज्ञानात्मनः परमात्मनैकत्वमुपदिश्यते नांगुष्ठमात्रत्वं कस्यचित् ॥ एतमेवार्थं परेण स्फुटीकरिष्यति ॥ अंगुष्ठमात्रः पुरु
षोंतरात्मा सदा जनानां हृदये संनिविष्टः ॥ तं स्वाच्छरीरात्प्रवृहेन्मुंजादिवेषीकां धैर्येण तं विद्याच्छुक्रममृतमिति ॥ तदुपर्यपि बा

दरायणः संभवात् ॥ २६ ॥ अंगुष्ठमात्रश्रुतिर्मनुष्यहृदयापेक्षा मनुष्याधिकारत्वाच्छास्त्रस्येत्युक्तं तत्प्रसंगेनेदमुच्यते ॥ बाढं मनु
ष्यानधिकरोति शास्त्रं न तु मनुष्यानेवेति ह ब्रह्मविज्ञाने नियमोस्ति ॥ तेषां मनुष्याणामुपरिष्टाद्ये देवादयस्तानप्यधिकरोति
शास्त्रमिति बादरायण आचार्यो मन्यते ॥ कस्मात् संभवात् ॥ संभवति हि तेषामप्यर्थित्वाद्यधिकारकारणं ॥ तत्रार्थित्वं तावन्मोक्षवि
षयं देवादीनामपि संभवति विकारविषयविभूत्यनित्यत्वालोचनादिनिमित्तं ॥ तथा सामर्थ्यमपि तेषां संभवति ॥ मंत्रार्थवादेति
हासपुराणलोकेभ्यो विग्रहवत्त्वाद्यवगमात् ॥ न च तेषां कश्चित्प्रतिषेधोस्ति ॥ न चोपनयनशास्त्रेणैषामधिकारो निवर्त्येत उपन
यनस्य वेदाध्ययनार्थत्वात्तेषां च स्वयंप्रतिभातवेदत्वात् ॥ अपि चैषां विद्याग्रहणार्थं ब्रह्मचर्यादि दर्शयति एकशतं ह वै वर्षाणि मघवा
न्प्रजापतौ ब्रह्मचर्यमुवास भृगुर्वै वारुणिर्वरुणं पितरमुपससार अधीहि भगवो ब्रह्मेत्यादि ॥ यदपि कर्मस्वनधिकारकारणमु
क्तं न देवानां देवतांतराभावादृषीणामार्षेयाभावादिति न तद्विद्यास्वस्ति ॥ न हींद्रादीनां विद्यास्वधिक्रियमाणानामिंद्राद्युद्देशेन
किंचित्कृत्यमस्ति न च भृग्वादीनां भृग्वादिसगोत्रतया ॥ तस्माद्देवादीनामपि विद्यास्वधिकारः केन वार्यते ॥ देवाद्यधिकारेप्यंगुष्ठमात्र
श्रुतिः स्वांगुष्ठापेक्षया न विरुध्यते ॥ विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात् ॥ २७ ॥ स्यादेतद्यदि विग्रहवत्त्वाद्युपगमेन देवादी
नां विद्यास्वधिकारो वर्ण्येत विग्रहवत्त्वादृत्विगादिवदिंद्रादीनामपि स्वरूपसंनिधानेन कर्मांगभावोभ्युपगम्येत तदा च विरोधः कर्म
णि स्यात् न हींद्रादीनां स्वरूपसंनिधानेन यागांगभावो दृश्यते ॥ न च संभवति बहुषु यागेषु युगपदेकस्येंद्रस्य स्वरूपसंनिधानता
नुपपन्नेति चेत् ॥ नायमस्ति विरोधः ॥ कस्मात् अनेकप्रतिपत्तेः ॥ एकस्यापि देवतात्मनो युगपदनेकरूपप्रतिपत्तिः संभवति ॥ क
थमवगम्यते दर्शनात् ॥ तथा हि कति देवा इत्युपक्रम्य त्रयश्च त्री च शता त्रयश्च त्री च सहस्रेति निरुच्य कतमे त इत्यस्यां
पृच्छायां महिमान एवैषामेते त्रयस्त्रिंशत्त्वेव देवा इति ब्रुवती श्रुतिरेकैकस्य देवतात्मनो युगपदनेकरूपतां दर्शयति ॥ त
था त्रयस्त्रिंशतोपि षडाद्यंतर्भावक्रमेण कतम एको देव इति प्राण इत्येकरूपतां देवतानां दर्शयंती तस्यैवैकस्य प्राणस्य युगपद
नेकरूपतां दर्शयति ॥ तथा स्मृतिरपि ॥ आत्मनो वै सहस्राणि बहूनि भरतर्षभ ॥ योगी कुर्याद्बलं प्राप्य तैश्च सर्वैर्महीं चरे
त् ॥ प्राप्नुयाद्विषयान्कैश्चित्कैश्चिदुग्रं तपश्चरेत् ॥ संक्षिपेच्च पुनस्तानि सूर्यो रश्मिगणानिव ॥ एवं जातीयका प्राप्ताणिमा

शां०भा० ॥३८॥ यैश्वर्याणांयोगिनामपियुगपदनेकशरीरयोगंदर्शयति॥किमुवक्तव्यमाजानसिद्धानांदेवानां॥अनेकरूपप्रतिपत्तिसंभवाच्चै
कैकादेवताबहुभीरूपैरात्मानंप्रविभज्यबहुषुयागेषुयुगपदंगभावंगच्छतिपरैश्चनदृश्यतेऽन्तर्धानादिशक्तियोगादित्युपपद्यते।
अनेकप्रतिपत्तिदर्शनादित्यस्यापराव्याख्याविग्रहवतामपिकर्मांगभावचोदनास्वनेकाप्रतिपत्तिर्दृश्यते॥क्वचिदेकोविग्रह
वाननेकत्रयुगपदंगभावंनगच्छति॥यथाबहुभिर्भोजयद्भिर्नैकोब्राह्मणोयुगपद्भोज्यते॥क्वचिच्चैकोविग्रहवाननेकत्रयुगपदंग
भावंगच्छति॥यथाबहुभिर्नमस्कुर्वाणैरेकोब्राह्मणोयुगपन्नमस्क्रियते।तद्वदिहोद्देशपरित्यागात्मकत्वाद्यागस्यविग्रहवतीमप्ये
कांदेवतामुद्दिश्यबहवःस्वंस्वंद्रव्यंयुगपत्परित्यक्ष्यंतीतिविग्रहवत्त्वेपिदेवादीनांनकिंचित्कर्मणिविरुध्यते॥शब्दइतिचेन्नातः
प्रभवात्प्रत्यक्षानुमानाभ्यां॥२८॥मनामविग्रहवत्त्वेपिदेवादीनामभ्युपगम्यमानेकर्मणिकश्चिद्विरोधःप्रसंजिशब्देतुविरोधः
प्रसत।कथं।औत्पत्तिकंहिशब्दस्यार्थेनसंबंधमाश्रित्यानपेक्षत्वादितिवेदस्यप्रामाण्यंस्थापितमिदानींतुविग्रहवतीदेवताभ्युप
गम्यमानायद्यप्यैश्वर्ययोगाद्युगपदनेककर्मसंबंधीनिहवींषिभुंजीततथापिविग्रहयोगादस्मदादिवज्जननमरणवतीमिति
नित्यस्यशब्दस्यार्थेननित्येसंबंधेप्रलीयमानेषुवैदिकेशब्देप्रामाण्यंस्थितंतस्यविरोधःस्यादितिचेत्॥नायमप्यस्तिविरोधःक
स्मादतःप्रभवात्।अतएवहिवैदिकाच्छब्दाद्देवादिकंजगत्प्रभवति॥ननुजन्माद्यस्ययतइत्यत्रब्रह्मप्रभवत्वंजगतोवधारितंकथमिह
शब्दप्रभवत्वमुच्यते।अपिचयदिनामवैदिकाच्छब्दादस्यप्रभवोभ्युपगतःकथमेतावताविरोधःशब्देपरिहृतोयावतावस
वोरुद्राआदित्याविश्वेदेवामरुतइत्येतेर्थाअनित्याएवोत्पत्तिमत्त्वात्॥तदनित्यत्वेचतद्वाचिनांवैदिकानांवस्वादिशब्दाना
मनित्यत्वंकेनवार्यते॥प्रसिद्धंहिलोकेदेवदत्तस्यपुत्रउत्पन्नेयज्ञदत्तइतितस्यनामक्रियतइति॥तस्माद्विरोधएवशब्दइतिचेत् ॥२८॥
नागवादिशब्दार्थसंबंधनित्यत्वदर्शनात्॥नहिगवादिव्यक्तीनामुत्पत्तिमत्त्वेतदाकृतीनामप्युत्पत्तिमत्त्वंस्यात्॥द्रव्यगुण
कर्मणांहिव्यक्तयएवोत्पद्यंतेनाकृतयःआकृतिभिश्चशब्दानांसंबंधोनव्यक्तिभिर्व्यक्तीनामानंत्यात्संबंधग्रहणानुपपत्तेः।
व्यक्तिषूत्पद्यमानास्वाकृतीनांनित्यत्वान्नगवादिशब्देषुकश्चिद्विरोधोदृश्यते॥तथादेवादिव्यक्तिप्रभवाभ्युपगमेप्याकृति
नित्यत्वान्नकश्चिद्वस्वादिशब्देषुविरोधइतिद्रष्टव्यं॥आकृतिविशेषस्तुदेवादीनांमंत्रादिभ्योविग्रहवत्त्वाद्यवगमादवगंतव्यः

77/1913

स्थानविशेषसंबंधनिमित्ताश्चेंद्रादिशब्दाःसेनापत्यादिशब्दवत्॥ततश्चयोयस्तत्तत्स्थानमधितिष्ठतिससइंद्रादिशब्दैरभिधी
यतइतिनदोषोभवति॥नचेदंशब्दप्रभवत्वंब्रह्मप्रभवत्ववदुपादानकारणाभिप्रायेणोच्यते॥कथंतर्हिस्थितेवाचकात्मनानित्येशब्दे
नित्यार्थसंबंधिनिशब्दव्यवहारयोग्यार्थव्यक्तिनिष्पत्तिरतःप्रभवइत्युच्यते॥कथंपुनरवगम्यते॥शब्दात्प्रभवतिजगदितिप्रत्य
क्षानुमानाभ्यां॥प्रत्यक्षंश्रुतिःप्रामाण्यंप्रत्यनपेक्षत्वादनुमानंस्मृतिःप्रामाण्यंप्रतिसापेक्षत्वात्॥तेहिशब्दपूर्वांसृष्टिंदर्शयतः॥
एतइतिवैप्रजापतिर्देवानसृजतासृग्रमितिमनुष्यानिंदवइतिपितॄंस्तिरःपवित्रमितिग्रहानाशवइतिस्तोत्रंविश्वानीतिशस्त्रमभि
सौभगेत्यन्याःप्रजाइतिश्रुतिः॥तथान्यत्रापिसमनसावाचंमिथुनंसमभवदित्यादिनातत्रतत्रशब्दपूर्विकासृष्टिःश्राव्यते॥स्मृति
रपिअनादिनिधनानित्यावागुत्सृष्टास्वयंभुवा॥आदौवेदमयीदिव्यायतःसर्वाःप्रवृत्तयइतिउत्सर्गोप्ययंवाचःसंप्रदायप्रवर्तनात्म
कोद्रष्टव्योनादिनिधनायाअन्यादृशस्योत्सर्गस्यासंभवात्॥तथानामरूपंचभूतानांकर्मणांचप्रवर्तनं।वेदशब्देभ्यएवादौनिर्ममे
समहेश्वरइति॥सर्वेषांतुसनामानिकर्माणिचपृथक्पृथक्।वेदशब्देभ्यएवादौपृथक्संस्थाश्चनिर्ममइति॥अपिचचिकीर्षित
मर्थमनुतिष्ठंस्तस्यवाचकंशब्दंपूर्वंस्मृत्वापश्चात्तमर्थमनुतिष्ठतीतिसर्वेषांनःप्रत्यक्षमेतत्॥तथाप्रजापतेरपिस्रष्टुःपूर्ववैदि
काःशब्दामनसिप्रादुर्बभूवुःपश्चात्तदनुगतानर्थान्ससर्जेतिगम्यते॥तथाचश्रुतिःसभूरितिव्याहरन्सभूमिमसृजतेत्येवमादि
का॥भूरादिशब्देभ्यएवमनसिप्रादुर्भूतेभ्योभूरादिलोकान्सृष्टान्दर्शयति॥किमात्मकंपुनःशब्दमभिप्रेत्येदंशब्दप्रभव
त्वमुच्यते॥स्फोटमित्याह।वर्णपक्षेहितेषामुत्पन्नप्रध्वंसित्वान्नित्येभ्यःशब्देभ्योदेवादिव्यक्तीनांप्रभवइत्यनुपपन्नंस्यात्उत्प
न्नप्रध्वंसिनश्चवर्णाःप्रत्युच्चारणमन्यथान्यथाचप्रतीयमानत्वात्॥तथाह्यदृश्यमानोपिपुरुषविशेषोध्ययनध्वनिश्रवणादेववि
शेषतोनिर्धार्यतेदेवदत्तोयमधीतेयज्ञदत्तोयमधीतेयज्ञदत्तोयमधीतइति॥नचायंवर्णविषयोन्यथात्वप्रत्ययोमिथ्याज्ञानंबा
धकप्रत्ययाभावात्॥नचवर्णेभ्योर्थावगतिर्युक्ता॥नह्येकैकोवर्णोर्थंप्रत्याययेद्व्यभिचारात्॥नचवर्णसमुदायप्रत्ययोस्ति
क्रमवत्त्वाद्वर्णानां॥पूर्वपूर्ववर्णजनितसंस्कारसहितोंत्योवर्णोर्थंप्रत्याययिष्यतीतियद्युच्येत।तन्न।संबंधग्रहणापेक्षोहिशब्दः
स्वयंप्रतीयमानोर्थंप्रत्याययेत्धूमादिवत्॥नचपूर्वपूर्ववर्णजनितसंस्कारसहितस्यांत्यस्यवर्णस्यप्रतीतिरस्त्यप्रत्यक्षत्वात्संस्काराणां॥त्वा

कार्यप्रत्यायिताः संस्कारैः सहिता ये वर्णाः प्रत्येष्यन्त इति चेन्न॥ नासंस्कारकार्यस्यापि स्मरणस्य क्रमवर्तित्वात्॥ तस्मात्स्फोटः
शब्दः॥ स चैकैकवर्णप्रत्ययाहितसंस्कारबीजेऽन्त्यवर्णप्रत्ययजनितपरिपाके प्रत्ययिन्येकप्रत्ययविषयतया झटिति प्रत्यव
भासते॥ न चायमेकप्रत्ययो वर्णविषयः स्मृतिर्वर्णानामनेकत्वादेकप्रत्ययविषयत्वानुपपत्तेः॥ तस्य च प्रत्युच्चारणं प्रत्य
भिज्ञायमानत्वान्नित्यत्वं भेदप्रत्ययस्य वर्णविषयत्वात्। तस्मान्नित्याच्छब्दादभिधाक्रियाकारकफललक्षणं जगदभि
धेयभूतं प्रभवतीति॥ वर्णा एव तु शब्द इति भगवानुपवर्षः॥ ननूत्पन्नप्रध्वंसित्वं वर्णानामुक्तं तन्न त एवेति प्रत्यभिज्ञानात्।
सादृश्यात्प्रत्यभिज्ञानं केशादिष्विवेति चेन्न। प्रत्यभिज्ञानस्य प्रमाणान्तरेणाबाधानुपपत्तेः प्रत्यभिज्ञानमाकृतिनिमित्तमि
ति चेन्न। नाव्यक्तिप्रत्यभिज्ञानात्। यदि हि प्रत्युच्चारणं गवादिव्यक्तिवदन्यान्या वर्णव्यक्तयः प्रतीयेरंस्तत आकृतिनिमित्तं प्र
त्यभिज्ञानं स्यात्। न त्वेतदस्ति वर्णव्यक्तय एव हि प्रत्युच्चारणं प्रत्यभिज्ञायन्ते॥ द्विर्गोशब्द उच्चरित इति हि प्रतिपत्तिर्न द्वौ गोशब्दावि
ति। ननु वर्णा अप्युच्चारणभेदेन भिन्नाः प्रतीयन्ते देवदत्तयज्ञदत्ताध्ययनध्वनिश्रवणादेव भेदप्रतीतिरित्युक्तमत्राभिधीयते
सति वर्णविषये निश्चिते प्रत्यभिज्ञाने संयोगविभागाभिव्यङ्ग्यत्वाद्वर्णानामभिव्यञ्जकवैचित्र्यनिमित्तोऽयं वर्णविषयो विचित्रः प्र
त्ययो न स्वरूपनिमित्तः॥ अपि च वर्णव्यक्तिभेदवादिनापि प्रत्यभिज्ञानसिद्धये वर्णाकृतयः कल्पयितव्यास्तासु च रोपा स्मा
धिको भेदप्रत्ययोऽभ्युपगन्तव्यः॥ तद्वरं वर्णव्यक्तिष्वेव परोपाधिको भेदप्रत्ययः स्वरूपनिमित्तं तु प्रत्यभिज्ञानमिति कल्पनालाघवं
एवमेव च वर्णविषयस्य भेदप्रत्ययस्य बाधकः प्रत्ययोऽयं प्रत्यभिज्ञानं॥ कथं ह्येकस्मिन्काले बहूनामुच्चारयतामेक एव सन्न
कारो युगपदनेकरूपः स्यात्। उदात्तश्चानुदात्तश्च स्वरितश्च सानुनासिकश्च निरनुनासिकश्चेति॥ अथवा ध्वनिकृतोऽयं प्रत्ययभेदो
न वर्णकृतः। कः पुनरयं ध्वनिर्नाम यो दूरादाकर्णयतो वर्णविवेकमप्रतिपद्यमानस्य कर्णपथमवतरति प्रत्यासीदतश्च पटुमृ ॥३९॥
दुत्वादिभेदं वर्णेष्वासञ्जयति॥ तन्निबन्धनाश्चोदात्तादयो विशेषा न वर्णस्वरूपनिबन्धना वर्णानां प्रत्युच्चारणं प्रत्यभिज्ञायमान
त्वात्॥ एवं सति सालम्बना उदात्तादिप्रत्यया भविष्यन्ति इतरथा हि वर्णानां प्रत्यभिज्ञायमानानां निर्भेदत्वात्संयोगविभागैर्विकृता
उदात्तादिविशेषाः कल्प्येरन्॥ संयोगविभागानां वा प्रत्यक्षत्वात्तदाश्रया विशेषा वर्णेष्वध्यवसातुं शक्यन्त इत्यतो निरालम्बना ए

79/191

वैत उदात्तादिप्रत्ययाः स्युः॥ अपि चैनैतदभिनिवेष्टव्यमुदात्तादिभेदेन वर्णानां प्रत्यभिज्ञायमानानां भेदो भवेदिति॥ न ह्यन्यस्य भेदेना
न्यस्याभिद्यमानस्य भेदो भवितुमर्हति। न हि व्यक्तिभेदेन जातिं भिन्नामभिमन्यन्ते वर्णेभ्यश्चार्थप्रतीतेः संभवात्स्फोटकल्पनानर्थिका॥
न तत्कल्पयाम्यहं स्फोटं प्रत्यक्षमेव त्वेनमवगच्छामि एकैकवर्णग्रहणाहितसंस्कारायां बुद्धावुदेति प्रत्यवभासनादिति चेत्। नाऽ
स्यामपि बुद्धौ वर्णविषयत्वादेकैकवर्णग्रहणोत्तरकालाहीयमेकबुद्धिर्गौरिति समस्तवर्णविषया नार्थान्तरविषया॥ कथमेतदव
गम्यते॥ यतोऽस्यामपि बुद्धौ गकारादयो वर्णा अनुवर्तन्ते न तु दकारादयः॥ यदि त्वस्यां बुद्धौ गकारादिभ्योऽर्थान्तरं स्फोटो विषयः स्यात्
न ततो दकारादय इव गकारादयोऽप्यस्या बुद्धेर्व्यावर्तेरन्॥ ननु तथा तस्मादियमेकबुद्धिर्वर्णविषयैव स्मृतिः॥ न त्वनेकत्वाद्वर्णानां नैकबुद्धि
विषयतोपपद्यत इत्युक्तं॥ तत्प्रतिक्रमः॥ संभवत्यनेकस्याप्येकबुद्धिविषयत्वं पंक्तिर्वनं सेना दश शतं सहस्रमित्यादिदर्शनात्॥
या तु गौरित्येकोऽयं शब्द इति बुद्धिः सा बहुष्वेव वर्णेष्वेकार्थावच्छेदनिबन्धनौपचारिकी वनसेनादिबुद्धिवदेव॥ अत्राह यदि वर्णा एव सास-
स्येनैकबुद्धिविषयतामापद्यमानाः पदं स्युस्ततो जरा राजा कपिः पिक इत्यादिषु पदविशेषप्रतिपत्तिर्न स्यात्॥ त एव हि वर्णा इतरत्र
चेतरत्र प्रत्यवभासन्ते॥ अत्र वदामः॥ सत्यपि समस्तवर्णप्रत्यवमर्शे यथाक्रममनुरोधिन्य एव पिपीलिकाः पंक्तिबुद्धिमारोहन्त्येवं क्र
मानुरोधिन एव वर्णाः पदबुद्धिमारोक्ष्यन्ति। तत्र वर्णानामविशेषेऽपि क्रमविशेषकृता पदविशेषप्रतिपत्तिर्न विरुध्यते॥ वृद्धव्यवहारे
चेमे वर्णाः क्रमाद्यनुगृहीतार्थविशेषसंबन्धाः सन्तः स्वव्यवहारेऽप्येकैकवर्णग्रहणानन्तरं समस्तप्रत्यवमर्शिन्यां बुद्धौ तादृशा एव
प्रत्यवभासमानास्तं तमर्थमव्यभिचारेण प्रत्याययिष्यन्तीति वर्णवादिनो लघीयसी कल्पना॥ स्फोटवादिनस्तु दृष्टहानिरदृष्टक
ल्पना॥ वर्णाश्चेमे क्रमेण गृह्यमाणाः स्फोटं व्यञ्जयन्ति स्फोटोऽर्थं व्यनक्तीति गरीयसी कल्पना स्यात्॥ अथापि नाम प्रत्युच्चारणम
न्येन्ये वर्णाः स्युस्तथापि प्रत्यभिज्ञालम्बनभावेन वर्णसामान्यानामवश्याभ्युपगन्तव्यत्वाद्या वर्णेष्वर्थप्रतिपादनप्रक्रिया रचिता सा
सामान्येषु संचारयितव्या॥ ततश्च नित्येभ्यः शब्देभ्यो देवादिव्यक्तीनां प्रभव इत्यविरुद्धं॥ अत एव च नित्यत्वं॥२९॥ स्वतन्त्रस्य क
र्तुरस्मरणादिभिः स्थिते वेदस्य नित्यत्वे देवादिव्यक्तिप्रभवाभ्युपगमेन तस्य विरोधमाशङ्क्यातः प्रभवादिति परिहृत्येदानीं
तदेव वेदनित्यत्वं स्थितं द्रढयत्यत एव च नित्यत्वमिति॥ अत एव नियताकृतेर्देवादेर्जगतो वेदशब्दप्रभवत्वाद्वेदशब्दे नित्यत्वम

मप्रत्येतव्यं॥ तथाच मंत्रवर्णः॥ यज्ञेन वाचः पदवीयमायन्तामन्वविंदन्नृषिषु प्रविष्टामिति॥ स्थितामेव वाचमनुविन्नां दर्शयति वेद
व्यासश्चैवमेव स्मरति॥ युगांते तर्हितान्वेदान्सेतिहासान्महर्षयः॥ लेभिरे तपसा पूर्वमनुज्ञाताः स्वयंभुवेति॥ समाननामरूप
त्वाच्चावृत्तावप्यविरोधो दर्शनात् स्मृतेश्च॥ ३०॥ अथापि स्याद्यदि पश्वादिव्यक्तिवद्देवादिव्यक्तयोपि संतत्यैवोत्पद्येरन्निरुध्ये
रंश्च ततोभिधानाभिधेयाभिधातृव्यवहाराविच्छेदात्संबंधनित्यत्वेन विरोधः शब्दे परिह्रियेत॥ यदा तु खलु सकलं त्रैलोक्यं परित्य
क्तनामरूपं निर्लेपं प्रलीयते प्रभवति चाभिनवमिति श्रुतिस्मृतिवादा वदंति तदा कथमविरोध इति॥ तत्रेदमभिधीयते समानना
मरूपत्वादिति॥ तदापि संसारस्यानादित्वं तावदभ्युपगंतव्यं॥ प्रतिपादयिष्यति चाचार्यः॥ संसारस्यादित्वमुपपद्यते चाप्युपलभ्य
ते चेति॥ अनादौ च संसारे यथा स्वापप्रबोधयोः प्रलयप्रभवश्रवणेपि पूर्वप्रबोधव्यवहारवदुत्तरप्रबोधव्यवहारान्न कश्चिद्विरो
धः एवं कल्पांतरप्रभवप्रलययोरपीति द्रष्टव्यं॥ स्वापप्रबोधयोश्च प्रलयप्रभवौ श्रूयेते॥ यदा सुप्तः स्वप्नं न कंचन पश्यत्यथास्मि
न्प्राण एवैकधा भवति तदैनं वाक्सर्वैर्नामभिः सहाप्येति चक्षुः सर्वैः रूपैः सहाप्येति श्रोत्रं सर्वैः शब्दैः सहाप्येति मनः सर्वैर्ध्या
नैः सहाप्येति स यदा प्रतिबुध्यते यथाग्नेर्ज्वलतः सर्वा दिशो विस्फुलिंगा विप्रतिष्ठेरन्नेवमेवैतस्मादात्मनः सर्वे प्राणा यथायतनं
विप्रतिष्ठंते प्राणेभ्यो देवा देवेभ्यो लोका इति॥ स्यादेतत् स्वापे पुरुषांतरव्यवहाराविच्छेदात्स्वयं च सुप्तप्रबुद्धस्य पूर्वप्रबोधव्यवहारा
नुसंधानसंभवादविरुद्धं॥ महाप्रलये तु सर्वव्यवहारोच्छेदाज्जन्मांतरव्यवहारवत्कल्पांतरव्यवहारस्यानुसंधातुमशक्यत्वाद्वि
षममिति॥ नैष दोषः॥ सत्यपि सर्वव्यवहारोच्छेदिनि महाप्रलये परमेश्वरानुग्रहादीश्वराणां हिरण्यगर्भादीनां कल्पांतरव्यवहा
रानुसंधानोपपत्तेः॥ यद्यपि प्राकृताः प्राणिनो न जन्मांतरव्यवहारमनुसंदधाना दृश्यंत इति न तथा प्राकृतवदीश्वराणां भवितव्यं॥
यथा हि प्राणित्वाविशेषेपि मनुष्यादिस्तंबपर्यंतेषु ज्ञानैश्वर्यादिप्रतिबंधः परेण परेण भूयान्भवन्दृश्यते॥ तथा मनुष्या ॥ ४०॥
दिष्वेव हिरण्यगर्भपर्यंतेषु ज्ञानैश्वर्याद्यभिव्यक्तिरपि परेण परेण भूयसी भवतीत्येतच्छ्रुतिस्मृतिवादेष्वसकृदनुश्रूयमा
णं न शक्यं नास्तीति वदितुं॥ ततश्चातीतकल्पानुष्ठितप्रकृष्टज्ञानकर्मणामीश्वराणां हिरण्यगर्भादीनां वर्तमानकल्पादौ प्रा
दुर्भवतां परमेश्वरानुगृहीतानां सुप्तप्रतिबुद्धवत्कल्पांतरव्यवहारानुसंधानोपपत्तिः॥ तथा च श्रुतिः॥ यो ब्रह्माणं विदधाति पूर्वं यो

81/1913

वेदांश्च प्रहिणोति तस्मै॥ तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये इति॥ स्मरंति च शौनकादयो मधुच्छंदःप्रभृतिभिः ऋषिभिर्दाश
तय्यो दृष्टा इति॥ प्रतिवेदं चैवमेव कांडर्ष्यादयः स्मर्यंते॥ श्रुतिरप्यृषिज्ञानपूर्वकमेव मंत्रेणानुष्ठानं दर्शयति॥ यो ह वा अविदितार्षे
यच्छंदोदैवत ब्राह्मणेन मंत्रेण याजयति वाध्यापयति वा स्थाणुं वर्छति गर्तं वा पद्यते इत्युपक्रम्य तस्मादेतानि मंत्रे मंत्रे विद्यादि
ति॥ प्राणिनां च सुखप्राप्तये धर्मो विधीयते दुःखपरिहाराय चाधर्मः प्रतिषिध्यते॥ दृष्टानुश्रविकसुखदुःखविषयौ च रागद्वेषौ
भवतो न विलक्षणविषयाविति॥ अतो धर्माधर्मफलभूतोत्तरा सृष्टिर्निष्पद्यमाना पूर्वसृष्टिसदृश्येव निष्पद्यते॥ स्मृतिश्च भवति॥
तेषां ये यानि कर्माणि प्राक्सृष्ट्यां प्रतिपेदिरे॥ तान्येव ते प्रतिपद्यंते सृज्यमानाः पुनः पुनः॥ हिंस्राहिंस्रे मृदुक्रूरे धर्माधर्मावृतानृते॥ तद्भा
विताः प्रपद्यंते तस्मात्तत्तस्य रोचत इति॥ प्रलीयमानमपि चेदं जगच्छक्त्यवशेषमेव प्रलीयते॥ शक्तिमूलमेव च प्रभवतीतरथाक
स्मिकत्वप्रसंगात्॥ न चानेकाकाराः शक्तयः शक्याः कल्पयितुं॥ ततश्च विच्छिद्य विच्छिद्याप्युद्भवतां भूरादिलोकप्रवाहाणां देवतिर्य
ग्मनुष्यलक्षणानां च प्राणिनिकायप्रवाहाणां वर्णाश्रमधर्मफलव्यवस्थानां चानादौ संसारे नियतत्वमिंद्रियविषयसंबंधनियतत्व
वत्प्रत्येतव्यं॥ न हींद्रियविषयसंबंधादेर्व्यवहारस्य प्रतिसर्गमन्यथात्वं षष्ठेंद्रियविषयकल्पं शक्यमुत्प्रेक्षितुं॥ अतश्च सर्वकल्पानां
तुल्यव्यवहारत्वात्कल्पांतरव्यवहारानुसंधानक्षमत्वाच्चेश्वराणां समाननामरूपा एव प्रतिसर्गं विशेषाः प्रादुर्भवंति॥ समाननाम
रूपत्वाच्चावृत्तावपि महासर्गमहाप्रलयलक्षणायां जगतोभ्युपगम्यमानायां न कश्चिच्छब्दप्रामाण्यादिविरोधः॥ समाननाम
रूपतां च श्रुतिस्मृती दर्शयतः॥ सूर्याचंद्रमसौ धाता यथापूर्वमकल्पयत्॥ दिवं च पृथिवीं चांतरिक्षमथो स्वरिति॥ यथा पूर्वस्मि
न्कल्पे सूर्याचंद्रमःप्रभृतीति जगत्कॢप्तं तथास्मिन्नपि कल्पे परमेश्वरोऽकल्पयदित्यर्थः॥ तथाग्निर्वा अकामयतान्नादो देवा
नां स्यामिति स एतमग्नये कृत्तिकाभ्यः पुरोडाशमष्टाकपालं निरवपदिति नक्षत्रेष्टिविधावग्निर्निरवपद्यस्मै चाग्नये निरवपत्त
योः समाननामरूपतां दर्शयतीत्येवंजातीयका श्रुतिरिहोदाहर्तव्या॥ स्मृतिरपि॥ ऋषीणां नामधेयानि याश्च वेदेषु दृष्टयः॥ श
र्वर्यंते प्रसूतानां तान्येवैभ्यो ददात्यजः॥ यथर्तुष्वृतुलिंगानि नानारूपाणि पर्यये॥ दृश्यंते तानि तान्येव तथा भावा युगादिषु॥ त
थाभिमानिनोतीतास्तुल्यास्ते सांप्रतैरिह॥ देवा देवैरतीतैर्हि रूपैर्नामभिरेव चेत्येवंजातीयका द्रष्टव्या॥ मध्वादिष्वसंभवादन

ब्रं०भा० धिकारं जैमिनिः॥३१॥ इहदेवादीनामपि ब्रह्मविद्यायामस्त्यधिकार इति यत्प्रतिज्ञातं तत्पर्यावर्त्यते देवादीनामनधिकारं जैमिनिराचा-
॥ ४३॥ र्यो मन्यते॥ कस्मात् मध्वादिष्वसंभवात्। ब्रह्मविद्याधिकाराभ्युपगमे हि विद्यात्वाविशेषात् मध्वादिविद्यास्वप्यधिकारोऽभ्युपगम्येत॥ न
चैवं संभवति कथमसौ वा आदित्यो देवमध्विति ह्यत्र मनुष्या आदित्यं मध्वध्यासेनोपासीरन्॥ देवादिषु ह्युपासकेष्वभ्युपगम्यमाने-
ष्वादित्यः कमन्यमादित्यमुपासीत (पुनश्चादित्यव्यपाश्रयाणि पंच रोहितादीन्यमृतान्युपक्रम्य वसवो रुद्रा आदित्या मरुतः सा-
ध्याश्च पंच देवगणाः क्रमेण तत्तदमृतमुपजीवंतीत्युपदिश्य स य एतदेवममृतं वेद वसूनामेवैको भूत्वाग्निनैव मुखेनैतदेवामृतं दृ-
ष्ट्वा तृप्यतीत्यादिना वस्वाद्युपजीव्यान्यमृतानि विजानतां वस्वादिमहिमप्राप्तिं दर्शयति॥ वस्वादयस्तु कानन्यान् वस्वादीनमृतोपजी-
विनो विजानीयुः कं वान्यं वस्वादिमहिमानं प्रेप्सेयुः तथाग्निः पादो वायुः पाद आदित्यः पादो वायुर्वाव संवर्ग आदित्यो ब्रह्मे-
त्यादेश इत्यादिषु देवतात्मनोपासनेषु न तेषामेव देवतात्मनामधिकारः संभवति। तथेमावेव गोतमभरद्वाजावयमेव गोतमोऽयं भ-
रद्वाज इत्यादिष्वपि संबंधि उपासनेषु न तेषामेव ऋषीणामधिकारः संभवति॥ कुतश्च देवादीनामनधिकारः॥ ज्योतिषि भा-
वाच्च॥३२॥ यदिदं ज्योतिर्मंडलं द्युस्थानमहोरात्राभ्यां बंभ्रमज्जगदवभासयति तस्मिन्नादित्यादयो देवतावचनाः शब्दाः
प्रयुज्यंते लोकप्रसिद्धेर्वाक्यशेषप्रसिद्धेश्च॥ न च ज्योतिर्मंडलस्य हृदयादिना विग्रहेण चेतनतयार्थित्वादिना वा योगोऽवगंतुं श-
क्यते मृदादिवदचेतनत्वावगमात्॥ एतेनाग्न्यादयो व्याख्याताः। स्यादेतत्॥ मंत्रार्थवादेतिहासपुराणलोकेभ्यो देवादीनां वि-
ग्रहवत्त्वाद्यवगमाददोष इति। नेत्युच्यते॥ न तावल्लोको नाम किंचित्स्वतंत्रं प्रमाणमस्ति॥ प्रत्यक्षादिभ्य एव ह्यविचारि-
तविशेषेभ्यः प्रमाणेभ्यः प्रसिध्यन्नर्थो लोकात्प्रसिध्यतीत्युच्यते॥ न चात्र प्रत्यक्षादीनामन्यतमं प्रमाणमस्ति॥ इतिहासपुरा- ॥ ४१॥
णमपि पौरुषेयत्वात्प्रमाणांतरमूलतामाकांक्षति॥ अर्थवादा अपि विधिनैकवाक्यत्वात्स्तुत्यर्थाः संतो न पार्थगर्थ्येन दे-
वादीनां विग्रहादिसद्भावे हेतुभावं प्रतिपद्यंते॥ मंत्रा अपि श्रुत्यादिविनियुक्ताः प्रयोगसमवायिनोऽभिधानार्था
न कस्यचिदर्थस्य प्रमाणमित्याचक्षते॥ तस्मादभावो देवादीनामधिकारस्य॥ भावं तु बादरायणोऽस्ति हि॥३३॥ तुशब्दः
पूर्वपक्षं व्यावर्तयति॥ बादरायणस्त्वाचार्यो भावमधिकारस्य देवादीनामपि मन्यते यद्यपि मध्वादिविद्यासु देवतादिव्यामि-

83/1913

श्रत्वादसंभवोऽधिकारस्य तथाप्यस्ति हि शुद्धायां ब्रह्मविद्यायां संभवोऽर्थित्वसामर्थ्याप्रतिषेधाद्यपेक्षत्वादधिकारस्य॥ न च
क्वचिदसंभव इत्येतावता यत्र संभवस्तत्राप्यधिकारोऽपोद्येत मनुष्याणामपि न सर्वेषां ब्राह्मणादीनां सर्वेषु राजसूयादिष्व-
धिकारः संभवति॥ तत्र यो न्यायः सोऽत्रापि भविष्यति॥ ब्रह्मविद्यां च प्रकृत्य भवति दर्शनं श्रौतं देवाद्यधिकारस्य सूचकं तद्यो यो
देवानां प्रत्यबुध्यत स एव तदभवत्तथर्षीणामिति ते होचुर्हंत तमात्मानमन्विच्छामो यमात्मानमन्विष्य
सर्वांश्च लोकानाप्नोति सर्वांश्च कामानिति इंद्रो ह वै देवानामभिप्रवव्राज विरोचनोऽसुराणामित्यादि च॥ स्मार्तमपि गंधर्वयाज्ञ-
वल्क्यसंवादादि॥ यदप्युक्तं ज्योतिषि भावाच्चेत्यत्रोच्यते॥ ज्योतिरादिविषया अप्यादित्यादयो देवतावचनाः शब्दाश्चेतनावंत-
मैश्वर्याद्युपेतं तं तं देवतात्मानं समर्पयंति मंत्रार्थवादादिषु तथा व्यवहारादस्ति ह्यैश्वर्ययोगाद्देवतानां ज्योतिराद्यात्मभिश्चाव-
स्थातुं यथेष्टं च तं तं विग्रहं ग्रहीतुं सामर्थ्यं॥ तथा हि श्रूयते सुब्रह्मण्यार्थवादे मेधातिथेर्मेषेति मेधातिथिं ह काण्वायनं मेषो
भूत्वा जहारेति स्मर्यते च॥ आदित्यः पुरुषो भूत्वा कुंतीमुपजगाम इति॥ मृदादिष्वपि चेतना अधिष्ठातारोऽभ्युपगम्यंते॥ मृदब्रवी-
दापोऽब्रुवन्नित्यादिदर्शनात्॥ ज्योतिरादेस्तु भूतधातोरादित्यादिष्वचेतनत्वमभ्युपगम्यते॥ चेतनास्त्वधिष्ठातारो देवता-
त्मानो मंत्रार्थवादादिषु व्यवहारादित्युक्तं॥ यदप्युक्तं मंत्रार्थवादयोरन्यार्थत्वान्न देवताविग्रहादिप्रकाशनसामर्थ्यमिति अत्रोच्यते
प्रत्ययाप्रत्ययौ हि सद्भावासद्भावयोः कारणं नान्यार्थत्वमनन्यार्थत्वं वा॥ तथा ह्यन्यार्थमपि प्रस्थितः पथि पतितं तृणप-
र्णाद्यस्तीत्येव प्रतिपद्यते॥ अत्राह विषम उपन्यासः॥ तत्र हि तृणपर्णादिविषयं प्रत्यक्षं प्रवृत्तमस्ति येन तदस्तित्वं प्रतिपद्यते॥
अत्र पुनर्विध्युद्देशैकवाक्यभावेन स्तुत्यर्थेऽर्थवादे पार्थगर्थ्येन वृत्तांतविषया प्रवृत्तिः शक्याऽध्यवसातुं नहि महावाक्ये प्रत्या-
यकत्वमस्ति॥ यथा न सुरां पिबेदिति नञ्वति वाक्ये पदत्रयसंबंधात्सुरापानप्रतिषेध एवैकोऽर्थोऽवगम्यते न पुनः सुरां पिबेदि-
ति पदद्वयसंबंधात्सुरापानविधिरपीति॥ अत्रोच्यते॥ विषम उपन्यासो युक्तं यत्सुरापानप्रतिषेधे पदान्वयस्यैकत्वाद-
वांतरवाक्यार्थस्याग्रहणं॥ विध्युद्देशार्थवादयोस्तु अर्थवादस्थानि पदानि पृथगन्वयं वृत्तांतविषयं प्रतिपद्यानंतरं कैम-
र्थ्यवशेन विधिस्तावकत्वं प्रतिपद्यंते॥ यथा हि वायव्यं श्वेतमालभेत भूतिकाम इत्यत्र विध्युद्देशवर्तिनां वायव्यादीनां पदा-

नां विधिना संबंधो नैवं वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोप धावति स एवैनं भूतिं गमयतीत्येवमर्थवादगतानामप
दानां॥ न हि भवति वायुर्वा। आलभेतेति क्षेपिष्ठा देवता आलभेत तस्मादिति वायुस्वभावसंकीर्तनेन त्ववांतरमन्वयं प्रतिपद्यैवं विशि
ष्टदैवत्यमिदं कर्मेति विधिं स्तुवंति॥ तत्र योऽवांतरवाक्यार्थः प्रमाणांतरगोचरो भवति तत्र तदनुवादेनार्थवादः प्रवर्तते॥ यत्र
प्रमाणांतरविरुद्धस्तत्र गुणवादेन॥ यत्र तदुभयं नास्ति तत्र किं प्रमाणांतराभावाद्गुणवादः स्यादाहोस्वित्प्रमाणांतराविरोधाद्विद्य
मानवाद इति प्रतीतिशरणैर्विद्यमानवाद आश्रयणीयो न गुणवादः एतेन मंत्रो व्याख्यातः॥ अपि च विधिभिरेवेंद्रादिदैवत्यानि ह
वींषि चोदयद्भिरपेक्षितमिंद्रादीनां स्वरूपं॥ न हि स्वरूपरहिता इंद्रादयश्चेतस्यारोपयितुं शक्यंते। न च चेतस्यनारूढायै तस्यै तस्यै दे
वतायै हविः प्रदातुं शक्यते॥ श्रावयति च यस्यै देवतायै हविर्गृहीतं स्यात्तां मनसा ध्यायेद्वषट्करिष्यन्निति॥ न च शब्दमात्रमर्थस्वरू
पं संभवति। शब्दार्थयोर्भेदात्॥ तत्र यादृशं मंत्रार्थवादयोरिंद्रादीनां स्वरूपमवगतं न तत्तादृशं शब्दप्रमाणकेन प्रत्याख्यातुं युक्तं।
इतिहासपुराणमपि व्याख्यातेन मार्गेण संभवन्मंत्रार्थवादमूलत्वात्प्रभवति देवतादिविग्रहादि प्रपंचयितुं प्रत्यक्षादिमूलमपि सं
भवति॥ भवति ह्यस्माकमप्रत्यक्षमपि चिरंतनानां प्रत्यक्षं॥ तथा च व्यासादयो देवादिभिः प्रत्यक्षं व्यवहरंतीति स्मर्यते॥ यस्तु ब्रूयादिदा
नींतनानामिव पूर्वेषामपि नास्ति देवादिभिर्व्यवहर्तुं सामर्थ्यमिति स जगद्वैचित्र्यं प्रतिषेधेत्॥ इदानीमिव च नान्यदापि सार्वभौमः
क्षत्रियोऽस्तीति ब्रूयात्ततश्च राजसूयादिचोदना उपरुंध्यात्। इदानीमिव च कालांतरेऽप्यव्यवस्थितप्रायान्वर्णाश्रमधर्मान्प्रतिजानीत
ततश्च व्यवस्थाविधायि शास्त्रमनर्थकं कुर्यात्॥ तस्माद्धर्मोत्कर्षवशाच्चिरंतना देवादिभिः प्रत्यक्षं चक्रुः व्यवजह्रु
रिति श्लिष्यते॥ अपि च स्मरंति॥ स्वाध्यायादिष्टदेवतासंप्रयोग इत्यादि॥ योगोऽणिमाद्यैश्वर्यप्राप्तिफलः स्मर्यमाणो न शक्य
ते साहसमात्रेण प्रत्याख्यातुं॥ श्रुतिश्च योगमाहात्म्यं प्रख्यापयति॥ पृथ्व्यप्तेजोऽनिलखे समुत्थिते पंचात्मके योगगुणे प्रवृत्ते
न तस्य रोगो न जरा न मृत्युः प्राप्तस्य योगाग्निमयं शरीरमिति॥ ऋषीणामपि मंत्रब्राह्मणदर्शिनां सामर्थ्यं नास्मदीयेन
सामर्थ्येनोपमातुं युक्तं॥ तस्मात्समूलमितिहासपुराणं लोकप्रसिद्धिरपि न सति संभवे निरालंबनाध्यवसातुं युक्ता॥ तस्मा
दुपपन्नो मंत्रादिभ्यो देवादीनां विग्रहवत्त्वाद्यवगमः॥ ततश्चार्थित्वादिसंभवादुपपन्नो देवादीनामपि ब्रह्मविद्यायामधि
कारः॥ क्रममुक्तिदर्शनान्यप्येवमेवोपपद्यंते॥ शुगस्य तदनादरश्रवणात्तदाद्रवणात्सूच्यते हि॥ ३५॥ यथा मनुष्याधिकारनि

85/1913

यमोऽपोद्य देवादीनामपि विद्यास्वधिकार उक्तस्तथैव द्विजात्यधिकारनियमापवादेन शूद्रस्याप्यधिकारः स्यादित्येतां शंकां नि
राकर्तुमिदमधिकरणमारभ्यते तत्र शूद्रस्याप्यधिकारः स्यादिति तावत्प्राप्तमर्थित्वसामर्थ्ययोः संभवात्तस्माच्छूद्रो यज्ञेऽनवक्लृ
प्त इति वच्छूद्रो विद्यायामनवक्लृप्त इति निषेधाश्रवणात्। यत्तु कर्मस्वनधिकारकारणं शूद्रस्यानग्नित्वं न तद्विद्यास्वधिकारस्याप
वादकं॥ न ह्याहवनीयादिरहितेन विद्या वेदितुं न शक्यते भवति च लिंगं शूद्राधिकारस्योपोद्बलकं संवर्गविद्यायां हि जानश्रुतिं पौत्र
यणं शुश्रूषुं शूद्रशब्देन परामृशति॥ अह हारेत्वा शूद्र तवैव सह गोभिरस्त्विति॥ विदुरप्रभृतयश्च शूद्रयोनिप्रभवा विशिष्टविज्ञानसंप
न्नाः स्मर्यंते॥ तस्मादधिक्रियते शूद्रो विद्यास्वित्येवं प्राप्ते ब्रूमः॥ न शूद्रस्याधिकारो वेदाध्ययनाभावादधीतवेदो हि विदितवेदार्थो वेदां
तेष्वधिक्रियते न च शूद्रस्य वेदाध्ययनमस्त्युपनयनपूर्वकत्वाद्वेदाध्ययनस्योपनयनस्य च वर्णत्रयविषयत्वात्॥ यत्त्वर्थित्वं न तदसति
सामर्थ्येऽधिकारकारणं भवति॥ सामर्थ्यमपि न लौकिकं केवलमधिकारकारणं भवति शास्त्रीयेऽर्थे शास्त्रीयस्य सामर्थ्यस्यापेक्षि
तत्वात्॥ शास्त्रीयस्य च सामर्थ्यस्याध्ययननिराकरणेन निराकृतत्वात्॥ यच्चेदं शूद्रो यज्ञेऽनवक्लृप्त इति तन्न्यायपूर्वकत्वाद्विद्याया
मप्यनवक्लृप्तत्वं द्योतयति न्यायस्य साधारणत्वात्। यत्पुनः संवर्गविद्यायां शूद्रशब्दश्रवणं लिंगं न्यायाभावात्। न्यायोक्ते हि लिंगदर्श
नं द्योतकं भवति॥ न चात्र न्यायोऽस्ति कामं चायं शूद्रशब्दः संवर्गविद्यायामेवैकस्यां शूद्रमधिकुर्यात्तद्विषयत्वात्सर्वासु विद्यासु
अर्थवादस्थत्वात्तु न क्वचिदप्ययं शूद्रमधिकर्तुमुत्सहते॥ शक्यते चायं शूद्रशब्दोऽधिकृतविषये योजयितुं कथमिति॥ उच्यते। कम्वर
एनमेतत्सन्तं सयुग्वानमिव रैक्वमात्थेत्यस्माद्धंसवाक्यादात्मनोऽनादरं श्रुतवतो जानश्रुतेः पौत्रायणस्य शुगुत्पेदे। तामृषी रैक्वः शूद्रशब्देना
नेन सूचयांबभूवात्मनः परोक्षज्ञताख्यापनायेति गम्यते॥ जातिशूद्रस्यानधिकारात्॥ कथं पुनः शूद्रशब्देन शुगुत्पन्ना सूच्यत
इति उच्यते॥ तदाद्रवणात्। शुचमभिदुद्राव शुचा वाभिदुद्रुवे शुचा वा रैक्वमभिदुद्रावेति शूद्रोऽवयवार्थसंभवात्। रूढ्यर्थस्य चा
संभवात् दृश्यते चायमर्थोऽस्यामाख्यायिकायां॥ क्षत्रियत्वगतेश्चोत्तरत्र चैत्ररथेन लिंगात्॥ ३६॥ इतश्च न जातिशूद्रो जानश्रु
तिः यत्कारणं प्रकरणनिरूपणेन क्षत्रियत्वमस्योत्तरत्र चैत्ररथेनाभिप्रतारिणा क्षत्रियेण समभिव्याहाराल्लिंगाद्गम्यते उत्तरत्र
हि संवर्गविद्यावाक्यशेषे चैत्ररथिरभिप्रतारी क्षत्रियः संकीर्त्यते॥ अथ ह शौनकं च कापेयमभिप्रतारिणं च काक्षसेनिं परिवि

ग्रं०भा०
४३

ष्यमाणो ब्रह्मचारी विभिक्ष इति। चैत्ररथित्वं चाभिप्रतारिणः कापेययोगादवगन्तव्यं॥ कापेययोगो हि चैत्ररथस्यावगतः। एतेन
वै चैत्ररथं कापेया अयाजयन्निति समानान्वयानां च प्रायेण समानान्वया याजका भवन्ति तस्माच्चैत्ररथिर्नामैकः क्षत्रपतिरजायत इति
च क्षत्रपतित्वावगमात् क्षत्रियत्वमस्यावगन्तव्यं॥ तेन क्षत्रियेणाभिप्रतारिणा सह समानायां विद्यायां संकीर्तनं जानश्रुतेरपि क्षत्रि
यत्वं सूचयति॥ समानानामेव हि प्रायेण समभिव्याहारा भवन्ति॥ क्षत्तृप्रेषणाद्यैश्वर्ययोगाच्च जानश्रुतेः क्षत्रियत्वावगतिरतो न शूद्र
स्याधिकारः॥ संस्कारपरामर्शात्तदभावाभिलापाच्च॥३७॥ इतश्च न शूद्रस्याधिकारो यद्विद्याप्रदेशेषूपनयनादयः संस्काराः परामृश्य
न्ते। तं होपनिन्ये। अधीहि भगव इति होपससाद। ब्रह्मपरा ब्रह्मनिष्ठाः परं ब्रह्मान्वेषमाणा एष ह वै तत्सर्वं वक्ष्यतीति ते ह समित्पाणयो भ
गवन्तं पिप्पलादमुपसन्ना इति च॥ तान्हानुपनीयैवेत्यपि प्रदर्शितैवोपनयनप्राप्तिर्भवति॥ शूद्रस्य च संस्काराभावोऽभिलप्यते शू
द्रश्चतुर्थो वर्ण एकजातिरित्येकजातित्वस्मरणात् न शूद्रे पातकं किंचिन्न च संस्कारमर्हतीत्यादिभिश्च॥ तदभावनिर्धारणे च प्रवृत्तेः॥
॥३८॥ इतश्च न शूद्रस्याधिकारो यत्सत्यवचनेन शूद्रत्वाभावे निर्धारिते जाबालं गौतममुपनेतुमनुशासितुं च प्रवर्तते॥ नैतदब्राह्मणो
विवक्तुमर्हति॥ समिधं सोम्याहरोप त्वा नेष्ये न सत्यादगा इति श्रुतिलिंगात्॥ श्रवणाध्ययनार्थप्रतिषेधात्स्मृतेश्च॥३९॥ इतश्च
न शूद्राधिषणाद्यैश्वर्ययोगाच्च जानश्रुतेः क्षत्रियत्वावगतिरतो न शूद्रस्याधिकारः॥ कारो यदस्य स्मृतेः श्रवणाध्ययनार्थप्रतिषे
धो भवति॥ वेदश्रवणप्रतिषेधो वेदाध्ययनप्रतिषेधस्तदर्थज्ञानानुष्ठानयोश्च प्रतिषेधः शूद्रस्य स्मर्यते॥ श्रवणप्रतिषेधस्ता
वत्॥ अथास्य वेदमुपशृण्वतस्त्रपुजतुभ्यां श्रोत्रपूरणमिति॥ पद्यु ह वा एतच्छ्मशानं यच्छूद्रस्तस्माच्छूद्रसमीपे नाध्येतव्यमि
ति च॥ अत एवाध्ययनप्रतिषेधो यस्य हि समीपेऽपि नाध्येतव्यं भवति स कथमश्रुतमधीयीत भवति च वेदोच्चारणे जिह्वाच्छेदो धार
णे शरीरभेद इति॥ अत एव चार्थाज्ज्ञानानुष्ठानयोः प्रतिषेधो भवति॥ न शूद्राय मतिं दद्यादिति द्विजातीनामध्ययनमिज्या दान ॥ ४३॥
मिति च॥ येषां पुनः पूर्वकृतसंस्कारवशाद्विदुरधर्मव्याधप्रभृतीनां ज्ञानोत्पत्तिस्तेषां न शक्यते फलप्राप्तिः प्रतिषेधुं ज्ञान
स्यैकान्तिकफलत्वात्॥ श्रावयेच्चतुरो वर्णानिति चेतिहासपुराणाधिगमे चातुर्वर्ण्यस्याधिकारस्मरणात्॥ वेदपूर्वकस्तु नास्त्यधि
कारः शूद्राणामिति स्थितं॥९॥ कंपनात्॥४०॥ अवसितः प्रासंगिकोऽधिकारविचारः प्रकृतामेवेदानीं वाक्यार्थविचारणां वर्तयि

87/1913

ष्यामः॥ यदिदं किंच जगत्सर्वं प्राण एजति निःसृतं महद्भयं वज्रमुद्यतं य एतद्विदुरमृतास्ते भवन्तीत्येतद्वाक्यमेजृ कंपन इति धात्वर्थानुगमा
ल्लक्षितं॥ अस्मिन्वाक्ये सर्वमिदं जगत्प्राणाश्रयं स्पन्दते महच्च किंचिद्भयकारणं वज्रशब्दितमुद्यतमिति श्रूयते तद्विज्ञानाच्चामृतत्वप्राप्तिरिति श्रूय
ते॥ तत्र कोऽसौ प्राणः किं च तद्भयानकं वज्रमित्यप्रतिपत्तेर्विचारे क्रियमाणे प्राप्तं तावत्प्रसिद्धेः पंचवृत्तिर्वायुः प्राण इति प्रसिद्धेरेव चाशनिर्वज्रं
स्यात्॥ वायोश्चेदं माहात्म्यं संकीर्त्यते कथं सर्वमिदं जगत्पंचवृत्तौ वायौ प्राणशब्दिते प्रतिष्ठायेजति॥ वायुनिमित्तमेव च महद्भयानकं
वज्रमुद्यम्यते॥ वायौ हि पर्जन्यभावेन विवर्तमाने विद्युत्स्तनयित्नुवृष्ट्यशनयो विवर्तन्त इत्याचक्षते॥ वायुविज्ञानादेव चेदममृतत्वं त
थाहि श्रुत्यंतरं॥ वायुरेव व्यष्टिर्वायुः समष्टिरप पुनर्मृत्युं जयति य एवं वेदेति॥ तस्माद्वायुरयमिह प्रतिपत्तव्य इत्येवं प्राप्ते ब्रूमः॥ ब्रह्मै
वेदमिह प्रतिपत्तव्यं॥ कुतः॥ पूर्वोत्तरालोचनात्॥ पूर्वोत्तरयोर्हि ग्रंथभागयोर्ब्रह्मैव निर्दिश्यमानमुपलभामहे इहैव कथमकस्मा
दंतराले वायुं निर्दिश्यमानं प्रतिपद्येमहि पूर्वत्र तावत्तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते॥ तस्मिंल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चने
ति ब्रह्म निर्दिष्टं तदेवेहापि संनिधानाज्जगत्सर्वं प्राण एजतीति च लोकाश्रयत्वप्रत्यभिज्ञानान्निर्दिष्टमिति गम्यते॥ प्राणशब्दोऽयं प
रमात्मन्येव प्रयुक्तः प्राणस्य प्राणमिति दर्शनात्॥ एजयितृत्वमपीदं परमात्मन एवोपपद्यते। न वायुमात्रस्य। तथा चोक्तं न प्राणे
न नापानेन मर्त्यो जीवति कश्चन॥ इतरेण तु जीवन्ति यस्मिन्नेतावुपाश्रिताविति॥ उत्तरत्रापि भयादस्याग्निस्तपति भयात्तपति सू
र्यः॥ भयादिंद्रश्च वायुश्च मृत्युर्धावति पंचम इति ब्रह्मैव निर्देक्ष्यते न वायुः सवायुकस्य जगतो भयहेतुत्वाभिधानात्॥ तदेवेहापि
संनिधानान्महद्भयं वज्रमुद्यतमिति च भयहेतुत्वप्रत्यभिज्ञानान्निर्दिष्टमिति गम्यते॥ वज्रशब्दोऽप्ययं भयहेतुत्वसामान्यात्प्रयुक्तो
यथा हि वज्रमुद्यतं ममैव शिरसि निपतेद्यद्यहमस्य शासनं न कुर्यामित्यनेन भयेन जनो नियमेन राजादिशासने प्रवर्तते॥ एवमि
दमग्निवायुसूर्यादिकं जगदस्मादेव ब्रह्मणो बिभ्यन्नियमेन स्वव्यापारे प्रवर्तत इति भयानकं वज्रोपमितं ब्रह्म॥ तथा च ब्रह्मवि
षयं श्रुत्यंतरं भीषास्माद्वातः पवते भीषोदेति सूर्यः॥ भीषास्मादग्निश्चेन्द्रश्च मृत्युर्धावति पंचम इति॥ अमृतत्वफलश्रवणादपि ब्रह्मैवेद
मिति गम्यते॥ ब्रह्मज्ञानाद्ध्यमृतत्वप्राप्तिस्तमेव विदित्वाति मृत्युमेति नान्यः पंथा विद्यतेऽयनायेति मंत्रवर्णात्॥ यत्तु वायुविज्ञाना
त्क्वचिदमृतत्वमभिहितं तदापेक्षिकं तत्रैव च प्रकरणान्तरकरणेन परमात्मानमभिधायातोऽन्यदार्तमिति वाय्वादेरार्तत्वाभिधानात्॥

प्रकरणाद्न्यत्रपरमात्मनिश्चयोन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात्॥अन्यत्रभूताच्चभव्याच्चयत्तत्पश्यसितद्वदेतिपरमात्मनः प्र
ष्टत्वात्॥ज्योतिर्दर्शनात्॥४०॥एषसंप्रसादोस्माच्छरीरात्समुत्थायपरंज्योतिरुपसंपद्यस्वेनरूपेणाभिनिष्पद्यतइतिश्रूयते॥त
त्रसंशय्यतेकिंज्योतिःशब्दंचक्षुर्विषयतमोपहंतेजःकिंवापरंब्रह्मेतिकिंतावत्प्राप्तंप्रसिद्धमेवतेजोज्योतिःशब्दमितिकुतःज्योतिःशब्द
स्यतत्ररूढत्वात्॥ज्योतिश्चरणाभिधानादित्यत्रहिकारणज्योतिःशब्दःस्वार्थंपरित्यज्यब्रह्मणिवर्ततेनचेहतद्वत्किंचित्स्वार्थपरि
त्यागेकारणंदृश्यते॥तथाचनाडीखंडेअथयत्रैतदस्माच्छरीरादुत्क्रामत्यथैतैरेवरश्मिभिरूर्ध्वआक्रमतइतिमुमुक्षोरादित्यप्रा
प्तिरभिहितातस्मात्प्रसिद्धमेवतेजोज्योतिःशब्दमित्येवंप्राप्तेऽभिधीयतेपरमेवब्रह्मज्योतिःशब्दंकस्मात्दर्शनात्तस्यहीहप्रकरणेवक्त
व्यत्वेनानुवृत्तिर्दृश्यते॥यआत्मापहतपाप्मेत्यपहतपाप्मत्वादिगुणकस्यात्मनःप्रकरणादावन्वेष्टव्यत्वेनविजिज्ञासितव्यत्वेन
चप्रतिज्ञानात्एतंत्वेवतेभूयोनुव्याख्यास्यामीतिचानुसंधानात्॥अशरीरंवाववसंतंनप्रियाप्रियेस्पृशतइतिचाशरीरतायैज्यो
तिःसंपत्तेरस्याभिधानाद्ब्रह्मभावाच्चान्यत्राशरीरतानुपपत्तेःपरंज्योतिःसउत्तमपुरुषइतिचविशेषणात्॥यत्तूक्तंमुमुक्षोरादि
त्यप्राप्तिरभिहितेतिनासावात्यंतिकोमोक्षोगत्युत्क्रांतिसंबंधात्नह्यात्यंतिकेमोक्षेगत्युत्क्रांतीस्तइतिवक्ष्यामः॥आकाशोऽर्थांत
रत्वादिव्यपदेशात्॥४१॥आकाशोवैनामनामरूपयोर्निर्वहितातेयदंतरातद्ब्रह्मतदमृतंसआत्मेतिश्रूयते॥तत्किमाकाशशब्दंपरंब्र
ह्मकिंवाप्रसिद्धमेवभूतमितिविचारेभूतपरिग्रहोयुक्तःआकाशशब्दस्यतस्मिन्रूढत्वात्॥नामरूपनिर्वहणस्यचावकाशदान
द्वारेणतस्मिन्योजयितुंशक्यत्वात्॥स्रष्टृत्वादेश्चस्पष्टस्यब्रह्मलिंगस्याश्रवणात्॥इत्येवंप्राप्तइदमुच्यते॥परमेवब्रह्मेहाकाश
शब्दंभवितुमर्हति॥कस्मादर्थांतरत्वादिव्यपदेशात्॥तेयदंतरातद्ब्रह्मेतिहिनामरूपाभ्यामर्थांतरभूतमाकाशंव्यपदिशति॥न
चब्रह्मणोन्यन्नामरूपाभ्यांअर्थांतरंसंभवति॥सर्वस्यविकारजातस्यनामरूपाभ्यामेवव्याकृतत्वात्॥नामरूपयोरपिनिर्वहणं ॥४४॥
निरंकुशंनब्रह्मणोन्यत्रसंभवत्यनेनजीवेनात्मनानुप्रविश्यनामरूपेव्याकरवाणीतिब्रह्मकर्तृकत्वश्रवणात्॥ननुजीवस्यापिप्रत्य
क्षंनामरूपविषयंनिर्वोढृत्वमस्ति॥बाढमस्त्यभेदस्त्विहविवक्षितोनामरूपनिर्वहणाभिधानादेवस्रष्टृत्वादिब्रह्मलिंगमभिहितं
भवति॥तद्ब्रह्मतदमृतंसआत्मेतिचब्रह्मवादस्यलिंगानि॥आकाशस्तल्लिंगादित्यस्यैवायंप्रपंचः॥सुषुप्त्युत्क्रांत्योर्भेदेन॥४२॥व्य

पदेशादित्यनुवर्तते॥बृहदारण्यकेषष्ठप्रपाठकेकतमआत्मेतियोयंविज्ञानमयःप्राणेषुहृद्यंतर्ज्योतिःपुरुषइत्युपक्रम्यभूयानात्म
विषयःप्रपंचःकृतःतत्किंसंसारिस्वरूपमात्रान्वाख्यानपरंवाक्यमुतासंसारिस्वरूपप्रतिपादनपरमितिविशयः॥किंतावत्प्राप्तंसंसारि
स्वरूपमात्रविषयमेवेतिकुतःउपक्रमोपसंहाराभ्यांउपक्रमेयोयंविज्ञानमयःप्राणेष्वितिशारीरलिंगात्॥उपसंहारेचसएषएवम
हानजआत्मायोयंविज्ञानमयःप्राणेष्वितितदपरित्यागात्॥मध्येपिबुद्धांताद्यवस्थोपन्यासेनतस्यैवप्रपंचनादित्येवंप्राप्तेऽभिधीयतेपरमेश्वरो
पदेशपरमेवेदंवाक्यंनशारीरमात्रान्वाख्यानपरं।कस्मात्।सुषुप्तावुत्क्रांतौचशारीराद्भेदेनपरमेश्वरस्यव्यपदेशात्॥सुषुप्तौतावदयं
पुरुषःप्राज्ञेनात्मनासंपरिष्वक्तोनबाह्यंकिंचनवेदनांतरमितिशारीराद्भेदेनपरमेश्वरंव्यपदिशतितत्रपुरुषःशारीरःस्या
त्तस्यवेदितृत्वाद्बाह्याभ्यंतरवेदनप्रसंगेसतितत्प्रतिषेधसंभवात्॥प्राज्ञःपरमेश्वरएवसर्वज्ञत्वलक्षणयाप्रज्ञयानित्यमवियोगात्॥त
थोत्क्रांतावप्ययंशारीरआत्माप्राज्ञेनात्मनान्वारूढउत्सर्जन्यातीतिजीवाद्भेदेनपरमेश्वरंव्यपदिशति॥तत्रापिशारीरोजीवःस्यात्
शरीरस्वामित्वात्॥प्राज्ञस्तुसएवपरमेश्वरस्तस्मात्सुषुप्त्युत्क्रांत्योर्भेदेनव्यपदेशात्परमेश्वरएवात्रविवक्षितइतिगम्यते॥यदुक्तमाद्यं
तमध्येषुशारीरलिंगात्तत्परत्वमस्यवाक्यस्येतिअत्रब्रूमःउपक्रमेतावद्योयंविज्ञानमयःप्राणेष्वितिनसंसारिस्वरूपंविवक्षतिकिं
तर्हिअनूद्यसंसारिस्वरूपंपरेणब्रह्मणास्यैकतांविवक्षति॥ततोध्यायतीवलेलायतीवेत्येवमाद्युत्तरग्रंथप्रवृत्तिःसंसा
रधर्मनिराकरणपरालक्ष्यते॥तथोपसंहारोपियथोपक्रममेवोपसंहरति॥सवाएषमहानजआत्मायोयंविज्ञानमयःप्राणे
ष्वितियोयंसंसारीलक्ष्यतेसवाएषमहानजआत्मापरमेश्वरएवास्माभिःप्रतिपादितइत्यर्थः॥यस्तुमध्येबुद्धांताद्यवस्थोप
न्यासात्संसारिस्वरूपविवक्षांमन्यतेसप्राचीमपिदिशंप्रस्थापितःप्रतीचींप्रतिष्ठेत।यतोनबुद्धांताद्यवस्थोपन्यासेनावस्थावत्त्वं
संसारित्वंवाविवक्षितिकिंतर्ह्यवस्थारहितत्वमसंसारित्वंचकथमेतदवगम्यते॥यदतऊर्ध्वंविमोक्षायैवब्रूहीतिपदेपदेपृच्छ
ति।यत्किंचित्तत्रपश्यत्यनन्वागतस्तेनभवत्यसंगोह्ययंपुरुषइतिपदेपदेप्रतिवक्तिअनन्वागतंपुण्येनानन्वागतंपापेनतीर्णोहित
दासर्वान्शोकान्हृदयस्यभवतीतिच॥तस्मादसंसारिस्वरूपप्रतिपादनपरमेवैतद्वाक्यमित्यवगंतव्यं॥पत्यादिशब्देभ्यः॥
॥४३॥इतश्चासंसारिस्वरूपप्रतिपादनपरमेवैतद्वाक्यमित्यवगंतव्यं॥यदस्मिन्वाक्येपत्यादयःशब्दाअसंसारिस्वभावप्रतिपा

89/1913

श्रीशं०भा० दनाः संसारिस्वभावप्रतिषेधनाश्च भवंति सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिरित्येवंजातीयका असंसारिस्वभावप्रतिपाद-
॥ ५५॥ नाः॥ स न साधुना कर्मणा भूयान्नो एवासाधुना कनीयानित्येवंजातीयकाः संसारिभावप्रतिषेधनाः॥ तस्मादसंसारी परमेश्वर
इहोक्त इत्यवगम्यते॥ ॥इति श्रीशंकराचार्यविरचिते शारीरकमीमांसाभाष्ये प्रथमाध्यायस्य तृतीयः पादः॥३॥ ॥आनुमानि
कमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च॥१॥ ब्रह्मजिज्ञासां प्रतिज्ञाय ब्रह्मणो लक्षणमुक्तं जन्माद्यस्य
यत इति। तल्लक्षणं प्रधानस्यापि समानमित्याशंक्य तदशब्दत्वेन निराकृतमीक्षतेर्नाशब्दमिति। गतिसामान्यं च वेदांतवाक्या
नां कारणवादं प्रतीति प्रपंचितं गतेन ग्रंथेन। इदमिदानीमवशिष्टमाशंक्यते यदुक्तं प्रधानस्याशब्दत्वं तदसिद्धं कासुचिच्छाखा-
सु प्रधानकारणसमर्पणाभासानां शब्दानां श्रूयमाणत्वात्॥ अतः प्रधानस्य कारणत्वं वेदसिद्धमेव महद्भिः परमर्षिभिः कपि
लप्रभृतिभिः परिगृहीतमिति प्रसज्यते यावत्तेषां शब्दानामन्यपरत्वं न प्रतिपाद्यते तावत्सर्वज्ञं ब्रह्म जगतः कारणमिति प्रतिपादि
तमप्याकुलीभवेत् अतस्तेषामन्यपरत्वं दर्शयितुं परः संदर्भः वरणा० प्रवर्तते॥ आनुमानिकमप्यनुमाननिरूपितं प्रधानम-
प्येकेषां शाखिनां शब्दवदुपलभ्यते॥ काठके हि पठ्यते महतः परमव्यक्तमव्यक्तात्पुरुषः पर इति॥ तत्र य एव यन्नामानो यत्क्रमा
श्च महदव्यक्तपुरुषाः स्मृतिप्रसिद्धास्त एवेह प्रत्यभिज्ञायंते॥ तत्राव्यक्तमिति स्मृतिप्रसिद्धेः शब्दादिहीनत्वाच्च न व्यक्तमव्यक्त
मिति व्युत्पत्तिसंभवात् स्मृतिप्रसिद्धं प्रधानमभिधीयते॥ तस्य शब्दवत्त्वादशब्दत्वमनुपपन्नं॥ तदेव तु जगतः कारणं श्रुति
स्मृतिन्यायप्रसिद्धिभ्य इति चेत्॥ नैतदेवं न ह्येतत्काठकं वाक्यं स्मृतिप्रसिद्धयोर्महदव्यक्तयोरस्तित्वपरं नह्यत्र यादृशं स्मृतिप्र
सिद्धं स्मृतिकारणं त्रिगुणं प्रधानं तादृशं प्रत्यभिज्ञायते॥ शब्दमात्रं ह्यत्राव्यक्तमिति प्रत्यभिज्ञायते॥ स च शब्दो न व्यक्तमव्यक्तमि ॥५५॥
ति यौगिकत्वादन्यस्मिन्नपि सूक्ष्मे सुदुर्लक्ष्ये च प्रयुज्यते न चायं कस्मिंश्चिद्रूढो या तु प्रधानवादिनां रूढिः सा तेषामेव पारिभाषि
की सती न वेदार्थनिरूपणे कारणभावं प्रतिपद्यते॥ न च क्रममात्रसामान्यात्समानार्थप्रतिपत्तिर्भवत्यसति तद्रूपप्रत्यभिज्ञा
ने नह्यश्वस्थाने गां पश्यन्नश्वोऽयमित्यमूढोऽध्यवस्यति प्रकरणनिरूपणायां चात्र न परपरिकल्पितं प्रधानं प्रतीयते॥ श
रीररूपकविन्यस्तगृहीतेः शरीरं ह्यत्र रथरूपकविन्यस्तमव्यक्तशब्देन परिगृह्यते॥ कुतः प्रकरणात्परिशेषाच्च॥ तथा ह्य

91/1913

नंतरातीतो ग्रंथ आत्मशरीरादीनां रथिरथादिरूपककॢप्तिं दर्शयति॥ आत्मानं रथिनं विद्धि शरीरं रथमेव तु॥ सारथिं विद्धि मनः
प्रग्रहमेव च॥ इंद्रियाणि हयानाहुर्विषयांस्तेषु गोचरान्॥ आत्मेंद्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिण इति॥ तैश्चेंद्रियादिभिर
संयतैः संसारमधिगच्छति॥ संयतैस्तु अध्वनः पारं विष्णोः परमं पदमित्यस्यामाकांक्षायां तेभ्य एव प्रकृतेभ्य इंद्रियादिभ्यः परत्वेन
परमात्मानमध्वनः पारं विष्णोः परमं पदं दर्शयति॥ इंद्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः॥ मनसस्तु परा बुद्धिर्बुद्धेरात्मा महा
न्परः॥ महतः परमव्यक्तमव्यक्तात्पुरुषः परः॥ पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिरिति॥ तत्र य एवेंद्रियादयः पूर्वस्यां रथरू
पककल्पनायां अश्वादिभावेन प्रकृतास्त एवं प्रकृतास्त एवेह परिगृह्यंते॥ प्रकृतहानाप्रकृतप्रक्रियापरिहाराय तत्रेंद्रियमनोबुद्
धयस्तावत्पूर्वत्रेह च समानशब्दा एव अर्था ये शब्दादयो विषया इंद्रियहयगोचरत्वेन निर्दिष्टास्तेषां चेंद्रियेभ्यः परत्वमिंद्रियाणां ग्रह
त्वं विषयाणामतिग्रहत्वमिति श्रुतिप्रसिद्धेः॥ विषयेभ्यश्च मनसः परत्वं मनोमूलत्वाद्विषयेंद्रियव्यवहारस्य॥ मनसस्तु परा बुद्धि
र्बुद्धिं ह्यारुह्य भोग्यजातं भोक्तारमुपसर्पति॥ बुद्धेरात्मा महान्परो यः स आत्मानं रथिनं बुद्धिति रथित्वेनोपक्षिप्तः॥ आत्मशब्दात् भो
गोपकरणत्वात्परत्वोपपत्तेर्महत्त्वं चास्य स्वामित्वादुपपन्नं॥ अथवा मनो महान्मतिर्ब्रह्मा पूर्बुद्धिः ख्यातिरीश्वरः॥ प्रज्ञा विच्चि
तिश्चैव पर्याः स्मृतिश्च परिपठ्यत इति स्मृतेर्यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै इति च श्रुतेर्या प्रथमजस्य हिरण्य
गर्भस्य बुद्धिः सा सर्वासां बुद्धीनां परा प्रतिष्ठा सेह महानात्मेत्युच्यते॥ सा च पूर्वत्र बुद्धिग्रहणेनैव गृहीता सती स्पष्टाहिरुगिहो
पदिश्यते॥ तस्मादस्मदीयाभ्यो बुद्धिभ्यः परत्वोपपत्तेः॥ एतस्मिंस्तु पक्षे परमात्मविषयेणैव परेण पुरुषग्रहणेन रथिन आ
त्मनो ग्रहणं द्रष्टव्यं॥ परमार्थतः परमात्मविज्ञानात्मनोर्भेदाभावात्॥ तदेवं शरीरमेवैकं परिशिष्यते तत्रेतराणींद्रियादीनि प्रकृ
तान्येव परमपदं दिदर्शयिषया समनुक्रामन्परिशिष्यमाणेनेह तेनाव्यक्तशब्देन परिशिष्यमाणं प्रकृतं शरीरं दर्शयतीति गम्य
ते शरीरेंद्रियमनोबुद्धिविषयवेदनासंयुक्तस्य ह्यविद्यावतो भोक्तुः शरीरादीनां रथादिरूपककल्पनया संसारमोक्षगति
निरूपणेन प्रत्यगात्मब्रह्मावगतिरिह विवक्षिता॥ तथा च एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते॥ दृश्यते त्वग्र्यया बुद्ध्या
सूक्ष्मया सूक्ष्मदर्शिभिरिति वैष्णवस्य परमस्य पदस्य दुरवगमत्वमुक्त्वा तदवगमार्थं योगं दर्शयति॥ यच्छेद्वाङ्मनसि प्रा

ज्ञस्तद्यच्छेज्ज्ञान आत्मनि। ज्ञानमात्मनि महति नियच्छेत्तद्यच्छेच्छान्त आत्मनीति॥ एतदुक्तं भवति॥ वाचं मनसि संयच्छेत् वागादि
बाह्येंद्रियव्यापारमुत्सृज्य मनोमात्रेणावतिष्ठेत मनोपि विषयविकल्पाभिमुखं विकल्पदोषदर्शनेन ज्ञानशब्दोदितायां बु
द्धावध्यवसायस्वभावायां धारयेत्॥ तामपि बुद्धिं महत्यात्मनि भोक्तर्यग्र्यायां वा बुद्धौ सूक्ष्मतापादनेन नियच्छेत्॥ महांतं त्वा
त्मानं शांते आत्मनि प्रकरणवति परस्मिन्पुरुषे परस्यां काष्ठायां प्रतिष्ठापयेदिति॥ तदेवं पूर्वापरालोचनायां नास्त्यत्र परपरि
कल्पितस्य प्रधानस्यावकाशः॥ सूक्ष्मं तु तदर्हत्वात्॥ २॥ उक्तमेतत्प्रकरणपरिशेषाभ्यां शरीरमव्यक्तशब्दं न प्रधानमिति इद
मिदानीमाशंक्यते कथमव्यक्तशब्दार्हत्वं शरीरस्य यावता स्थूलत्वात्स्पष्टतरमिदं शरीरं व्यक्तशब्दार्हमस्पष्टवचनस्त्वव्य
क्तशब्द इति॥ अत उत्तरमुच्यते॥ सूक्ष्मं त्विह कारणात्मना शरीरं विवक्ष्यते॥ सूक्ष्मस्याव्यक्तशब्दार्हत्वात्॥ यद्यपि स्थूलमिदं शरीरं
न स्वयमव्यक्तशब्दमर्हति तथापि तस्य त्वारंभकं भूतसूक्ष्ममव्यक्तशब्दमर्हति॥ प्रकृतिशब्दश्च विकारे दृष्टो यथा गोभिः श्री सोमवल्ली
णीत मत्सरमिति॥ श्रुतिश्च तद्धेदं तर्ह्यव्याकृतमासीदितीदमेव व्याकृतं नामरूपविभिन्नं जगत् प्रागवस्थायां परित्यक्तव्या
४ मिश्रीभावं कुर्वीत कृतनामरूपं बीजशक्त्यवस्थमव्यक्तशब्दयोग्यं दर्शयति॥ तदधीनत्वादर्थवत्॥ ३॥ अत्राह॥ यदि जगदिदमनभिव्यक्तनामरूपं
बीजात्मकं प्रागवस्थमव्यक्तशब्दार्हमभ्युपगम्येत — तदात्मना च शरीरस्याप्यव्यक्तशब्दार्हत्वं प्रतिज्ञायेत स एव तर्हि प्रधानकारण
वाद एवं सत्यापद्येतास्यैव जगतः प्रागवस्थायाः प्रधानत्वेनाभ्युपगमादिति॥ अत्रोच्यते॥ यदि वयं स्वतंत्रां कांचित्प्रागवस्थां जगतः
कारणत्वेनाभ्युपगच्छेम प्रसंजयेम तदा प्रधानकारणवादं परमेश्वराधीना त्वियमस्माभिः प्रागवस्था जगतोभ्युपगम्यते। न स्वतंत्रा
सा चावश्याभ्युपगंतव्या॥ अर्थवती हि सा॥ न हि तया विना परमेश्वरस्य स्रष्टृत्वं सिध्यति शक्तिरहितस्य प्रवृत्त्यनुपपत्तेः॥ मुक्तानां च
पुनरनुत्पत्तिर्विद्यया तस्या बीजशक्तेर्दाहात् अविद्यात्मिका हि सा बीजशक्तिरव्यक्तशब्दनिर्देश्या परमेश्वराश्रया मायामयी महा ४६
सुषुप्तिर्यस्यां स्वरूपप्रतिबोधरहिताः शेरते संसारिणो जीवास्तदेतदव्यक्तं क्वचिदाकाशशब्दनिर्दिष्टमेतस्मिन्नु खल्वक्षरे गार्ग्या
काश ओतश्च प्रोतश्चेति श्रुतेः॥ क्वचिदक्षरशब्दोदितमक्षरात्परतः परइति श्रुतेः॥ क्वचिन्मायेति सूचितं मायां तु प्रकृतिं विद्यान्मायि
नं तु महेश्वरमिति मंत्रवर्णात्॥ अव्यक्ता हि सा माया तत्त्वान्यत्वनिरूपणस्याशक्यत्वात्॥ तदिदं महतः परमव्यक्तमित्युक्तं॥ अव्यक्त

प्रभवत्वान्महतो यदा हैरण्यगर्भी बुद्धिर्महान्॥ यदा तु जीवो महान्॥ यदा तु जीवो महांस्तदाप्यव्यक्ताधीनत्वाज्जीवभावस्य महतः पर
मव्यक्तमित्युक्तं अविद्या ह्यव्यक्तमविद्यावत्त्वेनैव जीवस्य सर्वः संव्यवहारः संततो वर्तते॥ तच्चाव्यक्तगतं महतः परत्वमभेदोपचारात्तद्विका
रे शरीरे परिकल्प्यते॥ सत्यपि शरीरवदिंद्रियादीनां तद्विकारत्वाविशेषे शरीरस्यैवाभेदोपचारादव्यक्तशब्देन ग्रहणमिंद्रियादीनां स्वश
ब्दैरेव गृहीतत्वात्। परिशिष्टत्वाच्च शरीरस्य। अन्ये तु वर्णयंति द्विविधं हि शरीरं स्थूलं सूक्ष्मं च स्थूलं यदिदमुपलभ्यते सूक्ष्मं यदुत्तरत्र वक्ष्यते तदंतरप्रतिपत्तौ रंहति संपरिष्वक्त इति तच्चोभयमपि शरीरमविशेषात्पूर्वत्र रथत्वेन संकीर्तितमिह तु सूक्ष्ममव्यक्तशब्दे
न परिगृह्यते॥ सूक्ष्मस्याव्यक्तशब्दार्हत्वात्। तदधीनत्वाच्च बंधमोक्षव्यवहारस्य जीवात्तस्य परत्वं। यथार्थाधीनत्वादिंद्रियव्यापार
स्य इन्द्रियेभ्यः परत्वमर्थानामिति॥ तैस्त्वेतद्वक्तव्यमविशेषेण शरीरद्वयस्य पूर्वत्र रथत्वेन संकीर्तितत्वात्समानयोः प्रकृतत्वपरिशि
ष्टत्वयोः कथं सूक्ष्ममेव शरीरमिह गृह्यते न पुनः स्थूलमपीति। आम्नातस्यार्थं प्रतिपत्तुं प्रभवामो नाम्नातं पर्यनुयोक्तुं आम्नातं चा
व्यक्तपदं सूक्ष्ममेव प्रतिपादयितुं शक्नोति नेतरद्व्यक्तत्वात्तस्येति चेत्॥ नैकवाक्यताधीनत्वादर्थप्रतिपत्तेः॥ नहीमे पूर्वोत्तरे आम्नाते ए
कवाक्यतामनापद्य कंचिदर्थं प्रतिपादयतः॥ प्रकृतहानाप्रकृतप्रक्रियाप्रसंगात्॥ न चाकांक्षामंतरेणैकवाक्यतापत्तिरस्ति तत्रावि
शिष्टायां शरीरद्वयस्य ग्राह्यत्वाकांक्षायां यथाकांक्षं संबंधेनभ्युपगम्यमाने एकवाक्यतैव बाधिता भवति कुतः आम्नातस्यार्थप्र
तिपत्तिः॥ न चैवं मंतव्यं दुःशोधत्वात्सूक्ष्मस्यैव शरीरस्येह ग्रहणं स्थूलस्य तु दृष्टबीभत्सतया सुशोधत्वादग्रहणमिति॥ यतो नैवेह
शोधनं कस्यचिद्विवक्ष्यते न ह्यत्र शोधनविधायि किंचिदाख्यातमस्ति अनंतरनिर्दिष्टत्वात्तु किं तद्विष्णोः परमं पदमिह विवक्ष्यते।
तथा हीदमस्मात्परमित्युक्त्वा पुरुषान्न परं किंचिदित्याह। सर्वथापि त्वानुमानिकनिराकरणोपपत्तेस्तथा नाम भवतु न नः किंचि
च्छिद्यते॥ ज्ञेयत्वावचनाच्च॥ ४॥ ज्ञेयत्वेन च सांख्यैः प्रधानं स्मर्यते॥ गुणपुरुषांतरज्ञानात्कैवल्यमिति वदद्भिः न हि गुणस्वरूपम
ज्ञात्वा गुणेभ्यः पुरुषस्यांतरं शक्यं ज्ञातुमिति॥ क्वचिच्च विभूतिविशेषप्राप्तये प्रधानं ज्ञेयमिति स्मरंति न चेदमिहाव्यक्तं ज्ञेय
त्वेनोच्यते॥ पदमात्रं ह्यव्यक्तशब्दो नेहाव्यक्तं ज्ञातव्यमुपासितव्यमिति वाक्यमस्ति॥ न चानुपदिष्टपदार्थज्ञानं पुरुषार्थमिति श
क्यं प्रतिपत्तुं तस्मादपि नाव्यक्तशब्देन प्रधानमभिधीयते॥ अस्माकं तु रथरूपककॢप्तशरीराद्यनुसरणेन विष्णोरेव परमं प

93/1913

शां०भा० ॥४७॥

दर्शयतनुमयमुपन्यासउपन्यनवद्यो॥वदतीतिचेन्नप्राज्ञोहिप्रकरणात्॥अत्राहसांख्योज्ञेयत्वावचनादित्यसिद्धं॥कथंश्रूयतेह्युत्तरत्राव्य
क्तशब्दोदितस्यप्रधानस्यज्ञेयत्ववचनमशब्दमस्पर्शमरूपमव्ययंतथाऽरसंनित्यमगंधवच्चयत्॥अनाद्यनंतंमहतःपरंध्रुवंनि
चाय्यतंमृत्युमुखात्प्रमुच्यतइति॥अत्रहियादृशंशब्दादिहीनंप्रधानंमहतःपरंस्मृतौनिरूपितंतादृशमेवनिचाय्यत्वेननिर्दि
ष्टंतस्मात्प्रधानमेवेदंतदेवचाव्यक्तशब्दनिर्दिष्टमित्यत्रब्रूमः॥नेहप्रधानंनिचाय्यत्वेननिर्दिष्टंप्राज्ञोहीहपरमात्मानिचाय्यत्वेन
निर्दिष्टइतिगम्यते॥कुतः॥प्रकरणात्प्राज्ञस्यहिप्रकरणंविततंवर्ततेपुरुषान्नपरंकिंचित्साकाष्ठासापरागतिरित्यादिनिर्दे
शात्एषसर्वेषुभूतेषुगूढोत्मानप्रकाशतइतिचदुर्ज्ञानत्ववचनेनतस्यैवज्ञेयत्वाकांक्षणात्यच्छेद्वाङ्मनसिप्राज्ञइतिचतज्ज्ञाना
यैववागादिसंयमस्यविहितत्वान्मृत्युमुखप्रमोक्षणफलत्वाच्चनहिप्रधानमात्रंनिचाय्यमृत्युमुखात्प्रमुच्यतइतिसांख्यैरिष्य
तेचेतनात्मविज्ञानाद्धिमृत्युमुखात्प्रमुच्यतइतितेषामभ्युपगमः॥सर्वेषुवेदांतेषुप्राज्ञस्यैवात्मनोशब्दादिधर्मत्वमभ्युपगम्यते।
तस्मान्नप्रधानस्यात्रज्ञेयत्वमव्यक्तशब्दनिर्दिष्टत्वंवा॥त्रयाणामेवचैवमुपन्यासः॥प्रश्नश्च॥६॥इतश्चनप्रधानस्याव्यक्तशब्द
वाच्यत्वंज्ञेयत्वंवा॥यस्मात्त्रयाणामेवपदार्थानामग्निजीवपरमात्मनामस्मिन्ग्रंथेकठवल्लीषुवरप्रदानसामर्थ्याद्वक्तव्यतयोपन्या
सोदृश्यते॥नद्विषयएवप्रश्नोनातोन्यस्यप्रश्नउपन्यासोवास्ति॥तत्रतावत्सत्वमग्निंस्वर्ग्यमध्येषिमृत्योप्रब्रूहितंश्रद्दधानायमह्य-
मित्यग्निविषयःप्रश्नः॥येयंप्रेतेविचिकित्सामनुष्येऽस्तीत्येकेनायमस्तीतिचैकेएतद्विद्यामनुशिष्टस्त्वयाहंवराणामेषवरस्तृती
यइतिजीवविषयः॥अन्यत्रधर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात्॥अन्यत्रभूताच्चभव्याच्चयत्तत्पश्यसितद्वदेतिपरमात्मविष
यः॥प्रतिवचनमपिलोकादिमग्निंतमुवाचतस्मैयाइष्टकायावतीर्वायथावेत्यग्नीविषयंहंततइदंप्रवक्ष्यामिगुह्यंब्रह्मसनातनं॥
यथाचमरणंप्राप्यात्माभवतिगौतम।योनिमन्येप्रपद्यंतेशरीरत्वायदेहिनः॥स्थाणुमन्येनुसंयंतियथाकर्मयथाश्रुतमितिव्यवहि ॥४७॥
तंजीवविषयं॥नजायतेम्रियतेवाविपश्चिदित्यादिबहुप्रपंचंपरमात्मविषयं॥नैवंप्रधानविषयःप्रश्नोस्तिअपृष्टत्वाच्चानुपन्यसनी
यत्वंतस्येति॥अत्राहयोयमात्मविषयःप्रश्नोयेयंप्रेतेविचिकित्सामनुष्येस्तीतिकिंसएवायमन्यत्रधर्मादन्यत्राधर्मादितिपुनरनु
कृष्यते॥किंवानतोन्योयमपूर्वःप्रश्नउत्थाप्यतइति॥किंचातःसएवायंप्रश्नःपुनरनुकृष्यतइतियद्युच्येतद्वयोरात्मविषययोःप्रश्नयो
रेकतापत्तेरग्निविषयआत्मविषयश्चद्वावेवप्रश्नावित्यतोनवक्तव्यंत्रयाणांप्रश्नोपन्यासाविति॥अथान्योयमपूर्वःप्रश्नउत्थाप्यतइत्यु

95/1913

च्येततोयथैववरप्रदानव्यतिरेकेणप्रश्नकल्पनायामदोषएवंप्रश्नव्यतिरेकेणापिप्रधानोपन्यासकल्पनायामदोषःस्यादि
त्यत्रोच्यते॥नैववयमिहवरप्रदानव्यतिरेकेणप्रश्नंकिंचित्कल्पयामोवाक्योपक्रमसामर्थ्यात्वरप्रदानोपक्रमाहिमृत्युन
चिकेतःसंवादरूपावाक्यप्रवृत्तिरासमाप्तेःकठवल्लीनांलक्ष्यते॥मृत्युःकिलनचिकेतसेपित्राप्रहितायत्रीन्वरान्ददौनचिकेता
किलतेषांप्रथमेनवरेणपितुःसौमनस्यंवव्रेद्वितीयेनाग्निविद्यांतृतीयेनात्मविद्यांयेयंप्रेतइतिवराणामेषवरस्तृतीयइतिलिं
गात्॥तत्रयद्यन्यत्रधर्मादित्यपूर्वोयमन्यःप्रश्नउत्थाप्येततततोवरप्रदानव्यतिरेकेणापिप्रश्नकल्पनाद्वाक्यंबाध्येत।ननुप्रष्टव्य
भेदादपूर्वोयंप्रश्नोभवितुमर्हतिपूर्वोहिप्रश्नोजीवविषयः।येयंप्रेतेमनुष्येस्तिनास्तीतिविचिकित्साभिधानाज्जीवस्यधर्मादिगो
चरत्वात्नान्यत्रधर्मादितिप्रश्नमर्हतिप्राज्ञस्तुधर्माद्यतीतत्वादन्यत्रधर्मादितिप्रश्नमर्हति।प्रश्नछायाचनसमानालक्ष्यतेपूर्व-
स्यास्तित्वनास्तित्वविषयत्वात्उत्तरस्यचधर्माद्यतीतवस्तुविषयत्वात्॥तस्मात्प्रत्यभिज्ञाभावात्प्रश्नभेदोनचपूर्वस्यैवोत्तरत्रा
नुकर्षणमितिचेत्नजीवप्राज्ञयोरेकत्वाभ्युपगमात्॥भवेत्प्रष्टव्यभेदात्प्रश्नभेदोयद्यन्योजीवःप्राज्ञात्स्यात्नत्वन्यत्वमस्तित
त्त्वमसीत्यादिश्रुतिभ्यः॥इहचान्यत्रधर्मादित्यस्यप्रश्नस्यप्रतिवचनंनजायतेम्रियतेवाविपश्चिदितिजन्ममरणप्रतिषेधेनप्रति
पाद्यमानंपारमेश्वरयोरयोरभेदंदर्शयति।सतिहिप्रसंगेप्रतिषेधोभागीभवतिप्रसंगश्चजन्ममरणयोःशरीरसंस्पर्शात्शारीरस्य
भवतिनपरमेश्वरस्यतथास्वप्नांतंजागरितांतंचोभौयेनानुपश्यतिमहांतंविभुमात्मानंमत्वाधीरोनशोचतीतिस्वप्नजागरितदृशो
जीवस्यैवमहत्वविभुत्वविशेषणाभ्याममनेनशोकविच्छेदंदर्शयन्प्राज्ञादन्योजीवइतिदर्शयति॥प्राज्ञविज्ञानाद्धिशोकविच्छेद
इतिवेदांतसिद्धांतः॥तथाग्रेयदेवेहतदमुत्रयदमुत्रतदन्विह।मृत्योःसमृत्युमाप्नोतियइहनानेवपश्यतीतिजीवप्राज्ञदृष्टिभेदम
स्या पवदति॥तथाजीवविषयास्तित्वनास्तित्वप्रश्नस्यानंतरमन्यवरंनचिकेतोवृणीष्वेत्यारभ्यमृत्युनातैस्तैःकामैःप्रलोभ्यमानोपि
नचिकेतायदानचचालतदैनंमृत्युरभ्युदयनिःश्रेयसविभागप्रदर्शनेनविद्याविद्याविभागसंदर्शनेनचविद्याभीप्सितंनचिकेतसंमन्ये
नत्वाकामाबहवोलोलुपंतइतिप्रशस्यप्रश्नमपितदीयंप्रशंसन्यदुवाचतंदुर्दर्शंगूढमनुप्रविष्टंगुहाहितंगह्वरेष्ठंपुराणं।अध्या
त्मयोगाधिगमेनदेवंमत्वाधीरोहर्षशोकौजहातीतितेनापिजीवप्राज्ञयोरभेदएवेहविवक्षितइतिगम्यते॥यत्प्रश्ननिमित्तांचप्रशं

शां०भा०
४८

सामहतीमृत्योः प्रत्यपद्यत नचिकेता यदि तं विहाय प्रशंसानंतरमन्यमेव प्रश्नमुपक्षिपेदस्थान एव सा सर्वा प्रशंसा प्रसारिता स्या
त्॥ तस्माद्येयं प्रेत इत्यस्यैव प्रश्नस्यैतदनुकर्षणमन्यत्र धर्मादित्यनु प्रश्नछायावैलक्षण्यमुक्तं तददूषणं तदीयस्यैव विशेषस्य
पुनः पृच्छ्यमानत्वात्॥ पूर्वत्र हि देहादिव्यतिरिक्तस्यात्मनोऽस्तित्वं पृष्टमुत्तरत्र तु तस्यैवासंसारित्वं पृच्छ्यत इति। यावद्ध्यविद्या न निव
र्तते तावद्धर्मादिगोचरत्वं जीवस्य जीवत्वं च न निवर्तते तन्निवर्तने तु प्राज्ञ एवेति तत्त्वमसीति श्रुत्या प्रत्याय्यते॥ न चाविद्यावत्त्वे तदपग
मे च वस्तुनः कश्चिद्विशेषोऽस्ति यथा कश्चित्संतमसे पतितां कांचिद्रज्जुमहिं मन्यमानो भीतो वेपमानः पलायेत तं चापरो ब्रूयान्मा
भैषीर्नायमहीरज्जुरेवेति॥ स वा तदुपश्रुत्याहिकृतं भयमुत्सृजेद्वेपथुं पलायनं च॥ न चाहिबुद्धिकाले तदपगमकाले च वस्तुनः
कश्चिद्विशेषः स्यात्॥ तथैवैतदपि द्रष्टव्यं॥ ततश्च न जायते म्रियते वेत्येवमाद्यपि भवत्यस्तित्वप्रश्नस्य प्रतिवचनं॥ सूत्रं त्वविद्याकल्पि
तजीवप्राज्ञभेदापेक्षया योजयितव्यमेकत्वेऽपि ह्यात्मविषयस्य प्रश्नस्य प्रायणावस्थायां व्यतिरिक्ताव्यतिरिक्तास्तित्वमात्रविचिकि
त्सनात्कर्तृत्वादिसंसारस्वभावानपोहनाच्च पूर्वस्य पर्यायस्य जीवविषयत्वमुत्प्रेक्ष्यते उत्तरस्य तु धर्माद्यत्ययसंकीर्तनात्प्राज्ञविषय
त्वमिति॥ ततश्च युक्ताग्निजीवपरमात्मकल्पना॥ प्रधानकल्पनायां तु न वरप्रदानं न प्रश्नो न प्रतिवचनमस्तीति वैषम्यं॥ महद्वच्च॥७॥
यथा च महच्छब्दः सांख्यैः सत्तामात्रेऽपि प्रथमजे प्रयुक्तो न तमेव वैदिकेऽपि प्रयोगेऽभिधत्ते बुद्धेरात्मा महान्परः महांतं विभुमात्मानं वे
दाहमेतं पुरुषं महांतमित्येवमादावात्मशब्दप्रयोगादिभ्यो हेतुभ्यस्तथाऽव्यक्तशब्दोऽपि न वैदिकेऽपि प्रयोगे प्रधानमभिधातुमर्हति॥ अ
तश्च नास्त्यानुमानिकस्याशब्दवत्त्वं॥ चमसवदविशेषात्॥८॥ पुनरपि प्रधानवाद्यशब्दत्वं प्रधानस्यासिद्धमित्याह॥ कस्मात् मंत्रवर्णा
त्॥ अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानांसरूपाः अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्य इति।
अत्र हि मंत्रे लोहितशुक्लकृष्णशब्दै रजःसत्त्वतमांस्यभिधीयंते॥ लोहितं रजो रंजनात्मकत्वात्॥ शुक्लं सत्त्वं प्रकाशात्मकत्वात्॥
कृष्णं तम आवरणात्मकत्वात्॥ तेषां साम्यावस्थावयवधर्मैर्व्यपदिश्यते लोहितशुक्लकृष्णेति॥ न जायत इत्यजा स्यात् मूलप्रकृति ॥४८॥
रविकृतिरित्यभ्युपगमात्॥ ननु अजाशब्दश्छागायां रूढो बाढं सा तु रूढिरिह नाश्रयितुं शक्या विद्याप्रकरणात् सा च बह्वीः प्रजास्त्रै
गुण्यान्विता जनयति॥ तां प्रकृतिमज एकः पुरुषो जुषमाणः शयानः सेवमानोऽनुशेते तामेवाविद्ययात्मत्वेनोपगम्य सुखी दुःखी मूढोऽह

97/1913

मित्यविवेकितया संसरति॥ अन्यः पुनरजः पुरुष उत्पन्नविवेकज्ञानो विरक्तो जहात्येनां प्रकृतिं भुक्तभोगां कृतभोगापवर्गां परित्यज
ति मुच्यत इत्यर्थः॥ तस्माच्छ्रुतिमूलैव प्रधानादिकल्पना कापिलानामित्येवं प्राप्ते ब्रूमः॥ नानेन मंत्रेण श्रुतिमत्त्वं सांख्यवादस्य शक्य
माश्रयितुं॥ न ह्ययं मंत्रः स्वातंत्र्येण कंचिदपि वादं समर्थयितुमुत्सहते॥ सर्वत्रापि यया कयाचित्कल्पनयाऽजात्वादिसंपादनोपपत्तेः॥
सांख्यवाद एवेहाभिप्रेत इति विशेषावधारणकारणाभावाच्चमसवत्॥ यथा ह्यर्वाग्बिलश्चमस ऊर्ध्वबुध्न इत्यस्मिन्मंत्रे स्वातंत्र्येणायं
नामासौ चमसोऽभिप्रेत इति न शक्यते निरूपयितुं॥ सर्वत्रापि यथाकथंचिदर्वाग्बिलत्वादिकल्पनोपपत्तेः॥ एवमिहाप्यविशेषोऽजामे
कामित्यस्य मंत्रस्य॥ नास्मिन्मंत्रे प्रधानमेवाजाभिप्रेतेति शक्यते नियंतुं॥ तत्र त्विदं तच्छिर एष ह्यर्वाग्बिलश्चमस ऊर्ध्वबुध्न इति वाक्य
शेषाच्चमसविशेषप्रतिपत्तिर्भवति॥ इह पुनः केयमजा प्रतिपत्तव्येत्यत्र ब्रूमः॥ ज्योतिरुपक्रमा तु तथा ह्यधीयत एके॥९॥ परमेश्वरा
दुत्पन्ना ज्योतिःप्रमुखा तेजोबन्नलक्षणा चतुर्विधस्य भूतग्रामस्य प्रकृतिभूतेयमजा प्रतिपत्तव्या तुशब्दोऽवधारणार्थो भूतत्रय
लक्षणैवेयमजा विज्ञेया न गुणत्रयलक्षणा॥ कस्मात्तथा ह्येके शाखिनस्तेजोबन्नानां परमेश्वरादुत्पत्तिमाम्नाय तेषामेव रोहितादिरू
पतामामनंति यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्येति॥ तान्येवेह तेजोबन्नानि प्रत्यभिज्ञायंते रोहितादि
शब्दसामान्यात् रोहितादीनां च शब्दानां रूपविशेषेषु मुख्यत्वाद्भाक्तत्वाच्च गुणविषयत्वस्य। असंदिग्धेन च संदिग्धस्य नि
गमनं न्याय्यं मन्यंते॥ तथेहापि ब्रह्मवादिनो वदंति किंकारणं ब्रह्मेत्युपक्रम्य ते ध्यानयोगानुगता अपश्यन्देवात्मशक्तिं
स्वगुणैर्निगूढामिति पारमेश्वर्याः शक्तेः समस्तजगद्विधायिन्या वाक्योपक्रमेऽवगमात् वाक्यशेषेऽपि मायां तु प्रकृतिं विद्यान्मायि
नं तु महेश्वरमिति॥ यो योनिं योनिमधितिष्ठत्येक इति च तस्या एवावगमान्न स्वतंत्रा काचित्प्रकृतिः प्रधानं नामाजामंत्रेणाम्ना
यत इति शक्यते वक्तुं॥ प्रकरणात्तु सैव दैवी शक्तिरव्याकृतनामरूपा नामरूपयोः प्रागवस्थानेनापि मंत्रेणाम्नायत इत्युच्यते।
तस्याश्च विषयेण त्रैरूप्येण त्रैरूप्यमुक्तं॥ कथं पुनस्तेजोबन्नात्मना त्रैरूप्येण त्रिरूपाजा प्रतिपत्तुं शक्यते। यावता न तावत्ते
जोबन्नेष्वजाकृतिरस्ति॥ न च तेजोबन्नानां जातिश्रवणादजातिनिमित्तोऽप्यजाशब्दः संभवतीत्यत उत्तरं पठति॥ कल्पनोपदेशा
च्च मध्वादिवदविरोधः॥१०॥ नायमजाकृतिनिमित्तोऽजाशब्दो नापि यौगिकः किं तर्हि कल्पनोपदेशोऽयमजारूपकक्लृप्तिस्तेजो

शां०भा० वन्नलक्षणायाश्चराचरयोनेरुपदिश्यते यथा हि लोके यदृच्छया कृतिवदजा रोहितशुक्लकृष्णवर्णा स्याद्बहुबर्करा सरूपब
॥४९॥ कराच॥ तां कश्चिदजो जुषमाणोऽनुशयीत कश्चिच्चैनां भुक्तभोगां जह्यादेवमियमपि तेजोवन्नलक्षणा भूतप्रकृतिस्त्रिवर्णा बहुस
रूपं चराचरलक्षणं विकारजातं जनयत्यविदुषा च क्षेत्रज्ञेनोपभुज्यते॥ विदुषा च परित्यज्यत इति॥ न चेदमाशंकितव्यमेकः क्षेत्रज्ञो
नुशेतेऽन्यो जहातीत्यतः क्षेत्रज्ञभेदः परेषामिष्टः प्राप्नोतीति॥ न हीयं क्षेत्रज्ञभेदप्रतिपिपादयिषया बंधमोक्षव्यवस्थाप्रतिपिपादयि
षया त्वेषा प्रसिद्धं तु भेदमनूद्य बंधमोक्षव्यवस्था प्रतिपाद्यते भेदस्तूपाधिनिमित्तो मिथ्याज्ञानकल्पितो न पारमार्थिकः एको देवः सर्वभू
तेषु गूढः सर्वव्यापी सर्वभूतांतरात्मेत्यादिश्रुतिभ्यः॥ मध्वादिवद्यथादित्यस्यामधुनो मधुत्वं वाचश्चाधेनोर्धेनुत्वं द्युलोकादीनां चा
नग्नीनामग्नित्वमित्येवंजातीयकं कल्प्यते एवमिदमनजाया अजात्वं कल्प्यत इत्यर्थः तस्मादविरोधस्तेजोवन्नेष्वजाशब्दप्रयोग
स्य॥ न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च॥११॥ एवं परिहृतेऽप्यजामंत्रे पुनरन्यस्मान्मंत्रात्सांख्यः प्रत्यवतिष्ठते॥ यस्मिन्पंच
पंचजना आकाशश्च प्रतिष्ठितः॥ तमेव मन्य आत्मानं विद्वान्ब्रह्मामृतोऽमृतमित्यस्मिन्मंत्रे पंच पंचजना इति पंचसंख्याविषयापरा पं
चसंख्या श्रूयते पंचशब्दद्वयदर्शनात्॥ त एते पंच पंचकाः पंचविंशतिः संपद्यंते॥ तया पंचविंशतिसंख्यया यावंतः संख्येया आकां
क्ष्यंते तावंत्येव च तत्त्वानि सांख्यैः संख्यायंते॥ मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त। षोडशकस्तु विकारो न प्रकृतिर्न
विकृतिः पुरुष इति॥ यया श्रुतिप्रसिद्धया पंचविंशतिसंख्यया तेषां स्मृतिप्रसिद्धानां पंचविंशतेस्तत्त्वानामुपसंग्रहात्प्राप्तं पुनः श्रुति
मत्त्वमेव प्रधानादीनां ततो ब्रूमो न संख्योपसंग्रहादपि प्रधानादीनां श्रुतिमत्त्वं प्रत्याशा कर्तव्या कस्मान्नानाभावात्॥ नाना ह्येतानि पंचविं
शतितत्त्वानि नैषां पंचशः पंचशः साधारणो धर्मोऽस्ति येन पंचविंशतेरंतराले परे पंच पंच संख्या निविशेरन्॥ न ह्येकनिबंधनमं
तरेण नानाभूतेषु द्वित्वादिकाः संख्या निविशंते॥ अथोच्येत पंचविंशतिसंख्यैवेयमवयवद्वारेण लक्ष्यते॥ यथा पंच सप्त च वर्षा ॥४९॥
णि न ववर्ष शतक्रतुरिति द्वादशवार्षिकीमनावृष्टिं कथयंति तद्वदिति॥ एतदपि नोपपद्यते॥ अयमेवास्मिन्पक्षे दोषो यल्लक्षणा
श्रयणीया स्यात्परश्चात्र पंचशब्दो जनशब्देन समस्तः पंचजना इति पारिभाषिकेण स्वरेणैकपदत्वनिश्चयात्॥ प्रयोगांतरे
च पंचानां त्वा पंचजनानामित्येकपद्यैकस्वर्यैकविभक्तित्वावगमात्॥ समस्तत्वाच्च न वीप्सा पंच पंचेति न च पंचकद्वयग्रहणं

99/1913

पंच पंचेति॥ न चैषा पंचसंख्याया एकस्याः पंचसंख्यया परया विशेषणं पंच पंचका इत्युपसर्जनस्य विशेषणेनासंयोगात्॥ नत्वापंच
संख्याका जना एव पुनः पंचसंख्यया विशेष्यमाणाः पंचविंशतिः प्रत्येष्यंते यथा पंच पंचपूल्य इति पंचविंशतिः पूलाः प्रतीयंते तद्वदिति॥ ने
ति ब्रूमः युक्तं यत्पंचपूलीशब्दस्य समाहाराभिप्रायत्वात्कतीति सत्यां भेदाकांक्षायां पंच पंचपूल्य इति विशेषणमिह तु पंचजना इत्यादि
त एव भेदोपादानात्कतीत्यसत्यां भेदाकांक्षायां तेन पंच पंचजना इति विशेषणं भवेत्॥ भवदपीदं विशेषणं पंचसंख्याया एव भवेत्॥ त
त्रोक्तो दोषः॥ तस्मात्पंच पंचजना इति पंचविंशतित्वाभिप्रायं॥ अतिरेकाच्च न पंचविंशतित्वाभिप्रायं अतिरेको हि भवत्यात्माकाशा
भ्यां पंचविंशतिसंख्यायाः आत्मा तावदिह प्रतिष्ठां प्रत्याधारत्वेन निर्दिष्टो यस्मिन्निति सप्तमीसूचितस्य तमेव मन्य आत्मानमित्यात्म
त्वेनानुकर्षणात्॥ आत्मा च चेतनः पुरुषः स च पंचविंशतावंतर्गत एवेति न तस्यैवाधारत्वमाधेयत्वं च युज्यतेऽर्थांतरपरिग्रहे चात
त्त्वसंख्यातिरेकः सिद्धांतविरुद्धः प्रसज्येत। तथाकाशस्य प्रतिष्ठित इत्याकाशस्यापि च विंशतावंतर्गतस्य न पृथगुपादानं न्याय्यं॥ अ
र्थांतरपरिग्रहे चोक्तो दोषः कथं च संख्यामात्रश्रवणे मात्रश्रवणे सत्यश्रुतानां पंचविंशतितत्त्वानामुपसंग्रहः प्रतीयेत॥ जनशब्द
स्य तत्त्वेष्वरूढत्वादर्थांतरोपसंग्रहेऽपि संख्योपपत्तेः॥ कथं तर्हि पंच पंचजना इत्युच्यते॥ दिक्संख्ये संज्ञायामिति विशेषस्मरणा
त्संज्ञायामेव पंचशब्दस्य जनशब्देन समासस्ततश्च रूढत्वाभिप्रायेणैव केचित्पंचजना नाम विवक्ष्यंते न सांख्यतत्त्वाभिप्रा
येण॥ ते कतीत्यस्यामाकांक्षायां पुनः पंचेति प्रयुज्यते पंचजना नाम ये केचित्ते च पंचैवेत्यर्थः सप्तर्षयः सप्तेति यथा॥ के पुनस्ते पंचज
ना नामेति॥ तदुच्यते॥ प्राणादयो वाक्यशेषात्॥१२॥ यस्मिन्पंच पंचजना इत्यत उत्तरस्मिन्मंत्रे ब्रह्मस्वरूपनिरूपणाय प्राणा
दयः पंच निर्दिष्टाः प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रमन्नस्यान्नं मनसो ये मनो विदुरिति॥ तत्र वाक्यशेषगताः संनिधा
पुनः नात्पंचजना इति विवक्ष्यंते॥ कथं प्राणादिषु जनशब्दप्रयोगः॥ तत्त्वेषु वा कथं जनशब्दप्रयोगः॥ समाने तु प्रसिद्ध्यतिक्रमे वाक्य
शेषवशात्प्राणा एव ग्रहीतव्या भवंति॥ जनसंबंधाच्च प्राणादयो जनशब्दभाजो भवंति॥ जनवचनश्च पुरुषशब्दः प्राणेषु प्र
युक्तः ते वा एते पंच ब्रह्मपुरुषा इत्यत्र प्राणो ह पिता प्राणो मातेत्यादि च ब्राह्मणं॥ समासबलाच्च समुदायस्य रूढत्वमविरुद्धं
कथं पुनरसति प्रथमप्रयोगे रूढिः शक्याश्रयितुं॥ शक्योद्भिदादिवदित्याह॥ प्रसिद्धार्थसंनिधाने ह्यप्रसिद्धार्थशब्दः प्र

युज्यमानः समभिव्याहारात्तद्विषयो नियंस्यते॥ यथोद्भिदा यजेत यूपं छिनत्ति वेदिं करोतीति॥ तथायमपि पंचजनशब्दः समासान्वाख्यानादवगतसंज्ञाभावः संज्ञाकांक्षी वाक्यशेषसमभिव्याहृतेषु प्राणादिषु वर्तिष्यते। कैश्चित्तु देवाः पितरो गंधर्वा असुरा रक्षांसि च पंच जना व्याख्याताः। अन्यैश्च चत्वारो वर्णा निषादपंचमाः परिगृहीताः। क्वचिच्च यत्पांचजन्यया विश इति प्रजापरः प्रयोगः पंचजनशब्दस्य दृश्यते॥ तत्परिग्रहेऽपीह न कश्चिद्विरोधः॥ आचार्यस्तु न पंचविंशतिस्तत्त्वानामिह प्रतीतिरस्तीत्येवंपरतया प्राणादयो वाक्यशेषादिति जगाद॥ भवंतु नाम प्राणादयः पंचजना माध्यंदिनानां येऽन्नं प्राणादिभिरनंति काण्वानां तु कथं प्राणादयः पंचजना भवेयुः अन्नं प्राणादिषु नाम्नातीयत उत्तरं पठति॥ ज्योतिषैकेषामसत्यन्ने॥१३॥ असत्यपि काण्वानामन्ने ज्योतिषा तेषां पंचसंख्या पूर्यते। तेऽपि हि यस्मिन्पंच पंचजना इत्यतः पूर्वस्मिन्मंत्रे ब्रह्मस्वरूपनिरूपणायैव ज्योतिरधीयते तं देवा ज्योतिषां ज्योतिरिति॥ कथं पुनरुभयेषामपि तुल्यवदिदं ज्योतिः पठ्यमानं समानमंत्रगतया पंचसंख्यया केषांचिद्गृह्यते केषांचिन्नेति॥ अपेक्षाभेदादित्याह। माध्यंदिनानां हि समानमंत्रपठितप्राणादिपंचजनलाभान्नास्मिन्मंत्रांतरपठिते ज्योतिष्यपेक्षा भवति॥ तदलाभात्तु काण्वानां भवत्यपेक्षा। अपेक्षाभेदाच्च समानेऽपि मंत्रे ज्योतिषो ग्रहणाग्रहणे यथा समानेऽप्यतिरात्रे वचनभेदात् षोडशिनो ग्रहणाग्रहणे तद्वत्। तदेवं न तावच्छ्रुतिप्रसिद्धिः काचित्प्रधानविषयास्ति॥ स्मृतिन्यायप्रसिद्धी तु परिहरिष्येते॥ आ कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः॥१४॥ प्रतिपादितं ब्रह्मणो लक्षणं प्रतिपादितं च ब्रह्मविषयं गतिसामान्यं वेदांतवाक्यानां प्रतिपादितं च प्रधानस्याशब्दत्वं॥ तत्रेदमपरमाशंक्यते न जन्मादिकारणत्वं ब्रह्मणो ब्रह्मविषयं वा गतिसामान्यं वेदांतवाक्यानां प्रतिपत्तुं शक्यं॥ कस्मात् विगानदर्शनात्। प्रतिवेदांतं ह्यन्यान्या सृष्टिरुपलभ्यते क्रमादिवैचित्र्यात्। क्वचिद्धि आत्मन आकाशः संभूत इत्याकाशादिका सृष्टिराम्नायते॥ क्वचित्तेज आदिका तत्तेजोऽसृजतेति क्वचित्प्राणादिका स प्राणमसृजत प्राणाच्छ्रद्धामिति क्वचिदक्रमेण लोकानामुत्पत्तिराम्नायते स इमांल्लोकानसृजतांभो मरीचीर्मरमाप इति तथा क्वचिदसत्पूर्विका सृष्टिः पठ्यते असद्वा इदमग्र आसीत्ततो वै सदजायतेति॥ असदेवेदमग्र आसीत्तत्सदभवदिति॥ क्वचिदसद्वादनिराकरणेन सत्पूर्विका प्रक्रिया प्रतिज्ञायते॥ तद्धैक आहुरसदेवेदमग्र आसीदित्युपक्रम्य कुतस्तु खलु सोम्यैवं स्यादिति होवाच कथमसतः सज्जायेतेति सत्त्वेव सोम्येदमग्र आसीदिति

५०

101/1913

ति क्वचित्स्वयंकर्तृकैव व्याक्रिया जगतो निगद्यते तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यामेव व्याक्रियतेति॥ एवमनेकधा विप्रतिपत्तेर्वस्तुनि च विकल्पस्यानुपपत्तेर्न वेदांतवाक्यानां जगत्कारणतावधारणपरता न्याय्या॥ स्मृतिन्यायप्रसिद्धिभ्यां तु कारणांतरपरिग्रहो न्याय्य इत्येवं प्राप्ते ब्रूमः॥ सत्यपि प्रतिवेदांतं सृज्यमानेष्वाकाशादिषु क्रमाद्यारेण विगाने न स्रष्टरि किंचिद्विगानमस्ति॥ कुतो यथाव्यपदिष्टोक्तेः। यथाभूतो ह्येकस्मिन्वेदांते सर्वज्ञः सर्वेश्वरः सर्वात्मैकोऽद्वितीयः कारणत्वेन व्यपदिष्टस्तथाभूत एव वेदांतांतरेष्वपि व्यपदिश्यते॥ तद्यथा सत्यं ज्ञानमनंतं ब्रह्मेति अत्र तावज्ज्ञानशब्देन परेण च तद्विषयेण कामयितृत्ववचनेन चेतनं ब्रह्म न्यरूरूपत् अपरप्रयोज्यत्वेनेश्वरमब्रवीत् तद्विषयेणैव परेणात्मशब्देन शरीरादिकोशपरंपरया चांतरनुप्रवेशनेन सर्वेषामंतः प्रत्यगात्मानं निरधारयत् बहु स्यां प्रजायेयेति चात्मविषयेण बहुभवनानुशंसनेन सृज्यमानानां विकाराणां स्रष्टुरभेदमभाषत॥ तथेदं सर्वमसृजत यदिदं किंचेति समस्तजगत्सृष्टिनिर्देशेन प्राक्सृष्टेरद्वितीयं स्रष्टारमाचष्टे तदत्र यल्लक्षणं ब्रह्म कारणत्वेन विज्ञातं तल्लक्षणमेवान्यत्रापि विज्ञायते॥ सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजतेति तथात्मा वा इदमेक एवाग्र आसीन्नान्यत्किंचन मिषत् स ईक्षत लोकान्नु सृजा इति चैवंजातीयकस्य कारणस्वरूपनिरूपणपरस्य वाक्यजातस्य प्रतिवेदांतमविगीतार्थत्वात् कार्यविषयं तु विगानं दृश्यते क्वचिदाकाशादिका सृष्टिः क्वचित्तेज आदिकेत्येवंजातीयकं न च कार्यविषयेण विगानेन कारणमपि ब्रह्म सर्ववेदांतेष्वविगीतमधिगम्यमानमविवक्षितं भवितुमर्हतीति शक्यते वक्तुमतिप्रसंगात्॥ समाधास्यति चाचार्यः कार्यविषयमपि विगानं न वियदश्रुतेरित्यारभ्य भवेदपि कार्यस्य विगीतत्वमप्रतिपाद्यत्वात्॥ न ह्ययं सृष्ट्यादिप्रपंचः प्रतिपिपादयिषितः न हि तत्प्रतिबद्धः कश्चित्पुरुषार्थो दृश्यते श्रूयते वा॥ न च कल्पयितुं शक्यते॥ उपक्रमोपसंहाराभ्यां तत्र तत्र ब्रह्मविषयैर्वाक्यैः साकमेकवाक्यताया गम्यमानत्वात्॥ दर्शयति च सृष्ट्यादिप्रपंचस्य ब्रह्मप्रतिपत्त्यर्थतामन्नेन सोम्य शुंगेनापो मूलमन्विच्छाद्भिः सोम्य शुंगेन तेजो मूलमन्विच्छ तेजसा सोम्य शुंगेन सन्मूलमन्विच्छेति॥ मृदादिदृष्टांतैश्च कार्यस्य कारणेनाभेदं वदितुं सृष्ट्यादिप्रपंचः श्राव्यत इति गम्यते॥ तथा च संप्रदायविदो वदंति॥ मृल्लोहविस्फुलिंगैस्सृष्टिर्या चोदितान्यथा॥ उपायः सोऽवताराय नास्ति भेदः कथंचनेति॥ ब्रह्मप्रतिपत्तिप्रतिबद्धं तु फलं श्रूयते ब्रह्मविदाप्नोति परं

नरंतिपूर्णोकमात्मनो विनमेव विदित्वातिमृत्युमेतीति च । प्रत्यक्षावगम्यं वेदंफलं तत्वमसीत्यसंसार्यात्मप्रतिपत्तौ सत्यां संसार्यात्मत्व
व्यावृत्तेः । यत्पुनः कारणविषयं विगानं दर्शितं असद्वा इदमग्र आसीदित्यादि तत्परिहर्तव्यमत्रोच्यते ॥ समाकर्षात् ॥ १५ ॥ असद्वा इदम
ग्र आसीदिति नात्रासन्निरात्मकं कारणत्वेन श्राव्यते । यतो यन्त्रेव स भवति असद्ब्रह्मेति वेद चेत् । अस्ति ब्रह्मेति चेद्वेद संतमेनं ततो विदुरि
त्यसद्वादापवादेनास्तित्वलक्षणं ब्रह्मान्नमयादिकोशपरंपरया प्रत्यगात्मानं निर्धार्य सोऽकामयतेति तमेव प्रकृतं समाकृष्य सप्रपंचां
सृष्टिं तस्मात्सावयित्वा तत्सत्यमित्याचक्षत इति चोपसंहृत्य तदप्येष श्लोको भवतीति तस्मिन्नेव प्रकृतेऽर्थे श्लोकमिममुदाहरति ।
असद्वा इदमग्र आसीदिति । यदि त्वसन्निरात्मकं त्वस्मिन्श्लोकेऽभिप्रेयेत ततोऽन्यसमाकर्षणेऽन्यस्योदाहरणादसंबद्धं वाक्यमा
पद्येत । तस्मान्नामरूपव्याकृतवस्तुविषयः प्रायेण सच्छब्दः प्रसिद्ध इति तद्व्याकरणाभावापेक्षया प्रागुत्पत्तेः सदेव ब्रह्मासदिवासीदित्यु
पचर्यते ॥ एवं वा सदेवेदमग्र आसीदित्यत्रापि योजनान्तसदासीदिति समाकर्षणाद् त्वंताभावाभ्युपगमे हि न तत्सदासीदिति किं समा
कृष्येत । नेद्धुक आहुरसदेवेदमग्र आसीदित्यत्रापि न श्रुत्यन्तराभिप्रायेणायमेकीयमतोऽभ्यासः क्रियायामिव वस्तुनि विकल्पस्यासंभ
वात् । तस्माच्छ्रुतिपरिगृहीतसत्पक्षदार्ढ्यायैवायं मंदमतिपरिकल्पितस्यासत्वस्योपन्यस्य निरास इति द्रष्टव्यं ॥ तद्धेदं तर्ह्यव्याकृत
मासीदित्यत्रापि न निरध्यक्षस्य जगतो व्याकरणं कथ्यते स एष इह प्रविष्ट आनखाग्रेभ्य इत्यध्यक्षस्य व्याकृतकार्यानुप्रविष्टत्वेन समाकर्षात् ॥ नि
रध्यक्षव्याकरणाभ्युपगमे हि अनंतरेण प्रकृतावलंबिना स इत्यनेन सर्वनाम्ना कः कार्यानुप्रवेशित्वेन समाकृष्येत । चेतनस्य चापरमा
त्मनः शरीरेऽनुप्रवेशः श्रूयतेऽनुप्रविष्टस्य चेतनत्वश्रवणात् पश्यंश्चक्षुः शृण्वन्श्रोत्रं मन्वानो मन इति अपि च यादृशमिदमद्यत्वे ना
मरूपाभ्यां व्याक्रियमाणं जगत्साध्यक्षं व्याक्रियते एवमादिसर्गेऽपीति गम्यते । दृष्टविपरीतकल्पनानुपपत्तेः ॥ श्रुत्यंतरमप्यनेन जी
वेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति साध्यक्षामेव व्याक्रियां दर्शयति ॥ व्याक्रियत इत्यपि कर्मकर्तरि लकारः सत्येव प ॥ ५१ ॥
रमेश्वरे व्याकर्तरि सौकर्यमपेक्ष्य द्रष्टव्यं यथा लूयते केदारः स्वयमेवेति सत्येव पूर्णके लवितरि । यद्वा कर्मण्येवैष लकारोऽर्थाक्षिप्तं
कर्तारमपेक्ष्य द्रष्टव्यो यथा गम्यते ग्राम इति ॥ जगद्वाचित्वात् ॥ १६ ॥ कौषीतकिब्राह्मणे बालाक्यजातशत्रुसंवादे श्रूयते । यो वै बाला
क एतेषां पुरुषाणां कर्ता यस्य वैतत्कर्म स वै वेदितव्य इति । तत्र किं जीवो वेदितव्यत्वेनोपदिश्यते उत मुख्यः प्राण उत परमात्मेति विश
यः ॥ किं तावत्प्राप्तं प्राण इति ॥ कुतः यस्य वैतत्कर्मेति श्रवणात् परिस्पंदलक्षणस्य च कर्मणः प्राणाश्रयत्वात् ॥ वाक्यशेषे वायस्मिन्प्रा

103/1913

णएवैकधा भवतीति प्राणशब्ददर्शनात् प्राणशब्दस्य च मुख्ये प्राणे प्रसिद्धत्वात् ॥ ये चैते पुरस्ताद्बालाकिनादित्ये पुरुषश्चंद्रमसि पु
रुष इत्येवमादयः पुरुषा निर्दिष्टास्तेषामपि भवति प्राणः कर्ता प्राणावस्थाविशेषत्वादादित्यादिदेवतात्मनां ॥ कृतं संकल्प्योदेव इति प्राण
इति ब्रह्म सदित्याचक्षत इति श्रुत्यंतरप्रसिद्धेः । जीवो वायमिह वेदितव्यतयोपदिश्यते तस्यापि धर्माधर्मलक्षणं कर्म शक्यते श्रावयितुं
यस्य वैतत्कर्मेति । सोऽपि भोक्तृत्वाद्भोगोपकरणभूतानामेतेषां पुरुषाणां कर्तोपपद्यते ॥ वाक्यशेषे जीवलिंगमवगम्यते ॥ यत्कारणं वे
दितव्यतयोपन्यस्तस्य पुरुषाणां कर्तुर्वेदनायोपेतं बालाकिं प्रतिबोधयिषुरजातशत्रुः सुप्तं पुरुषमामंत्र्यामंत्रणशब्दाश्रवणात्प्राणा
दीनामभोक्तृत्वं प्रतिबोध्य यष्टिघातोत्थानात्प्राणादिव्यतिरिक्तं जीवं भोक्तारं प्रतिबोधयति ॥ यथा परस्तादपि जीवलिंगमवबोधयति ।
यथा परस्तादपि जीवलिंगमवबोधयति ॥ तद्यथा श्रेष्ठी स्वैर्भुंक्ते यथा वा स्वाः श्रेष्ठिनं भुंजत्येवमेवैष प्रज्ञात्मैतैरात्मभिर्भुंक्ते एवमेवैत आ
त्मान एतमात्मानं भुंजंतीति प्राणभृत्वाच्च जीवस्योपपन्नं प्राणशब्दत्वं ॥ तस्माज्जीवमुख्यप्राणयोरन्यतर इह ग्रहणीयो परमेश्वरस्य
लिंगं न वगमादिति च प्राप्ते क्रमः परमेश्वर एवायमेतेषां पुरुषाणां कर्ता स्यात् तस्मादुपक्रमसामर्थ्यात् ॥ इह हि बालाकिरजातशत्रुणा
ब्रह्म ते ब्रवाणीति संवदितुमुपचक्रमे स च कतिचिदादित्याद्यधिकरणान् पुरुषानमुख्यब्रह्मदृष्टिभाज उक्त्वा तूष्णीं बभूव ॥ तमजात
शत्रुर्मृषा वै खलु मा संवदिष्ठा ब्रह्म ते ब्रवाणीति अमुख्यब्रह्मवादितयापोद्य कर्तारमन्यं वेदितव्यतयोपचिक्षेप ॥ यदि सोऽप्यमुख्य
ब्रह्मदृष्टिभाक्स्यात्तदुपक्रमो बाध्येत । तस्मात्परमेश्वर एवायं भवितुमर्हति कर्तृत्वं चैषां पुरुषाणां न परमेश्वरादन्यस्य स्वातंत्र्येणा
वकल्पते ॥ यस्य चैतत्कर्मेत्यपि नायं परिस्पंदलक्षणस्य धर्माधर्मलक्षणस्य वा कर्मणो निर्देशस्तयोरन्यतरस्याप्यप्रकृतत्वादसंश
ब्दितत्वाच्च नापि पुरुषविषयस्य करोत्यर्थस्य क्रियाफलवायं निर्देशः कर्तृशब्देनैव तयोरुपात्तत्वात् ॥ परिशेषात्प्रत्यक्षसंनिहितं ज
गत्सर्वनाम्नैतच्छब्देन निर्दिश्यते क्रियत इति च तदेव जगत्कर्म ॥ ननु जगदप्यप्रकृतमसंशब्दितं च ॥ सत्यमेवं तथाप्यसति विशे
षोपादाने साधारणेनार्थेन संनिधानेन संनिहितस्य वस्तुमात्रस्यायं निर्देश इति गम्यते न विशिष्टस्य कस्यचिद्विशेषसंनि
धानाभावात् ॥ पूर्वत्र च जगदेकदेशभूतानां पुरुषाणां विशेषोपादानादविशेषितं जगदेवेहोपादीयत इति गम्यते ॥ एतदुक्तं
भवति य ॥ एतेषां पुरुषाणां जगदेकदेशभूतानां कर्ता किमनेन विशेषेण यस्य वा कृत्स्नमेव जगदविशेषितं कर्मेति वा शब्द एकं व

शां॰भा॰ ॥ ५२ ॥

च्छिन्नकर्तृत्वाद्यस्यार्थो ये बालाकिना ब्रह्मत्वाभिमताः पुरुषाः कीर्तितास्तेषामब्रह्मत्वख्यापनाय विशेषोपादानमेवं ब्राह्मणपरि
व्राजकन्यायेन सामान्यविशेषाभ्यां जगतः कर्ता वेदितव्यतयोपदिश्यते परमेश्वर एव जगतः कर्ता सर्ववेदांतेष्ववधारितः ॥ जी
वमुख्यप्राणलिंगान्नेति चेत्तद्व्याख्यातं ॥१७॥ अथ यदुक्तं वाक्यशेषगताज्जीवलिंगान्मुख्यप्राणलिंगाच्च तयोरेवान्यतरस्येह ग्रह
णं न्याय्यं न परमेश्वरस्येति तत्परिहर्तव्यमत्रोच्यते ॥ परिहृतं तत् ॥ नोपासात्रैविध्यादाश्रितत्वादिह तद्योगादित्यत्र त्रिविधं ह्यत्रोपासन
मेवं सति प्रसज्येत जीवोपासनं मुख्यप्राणोपासनं ब्रह्मोपासनं चेति ॥ न चैतन्न्याय्यं ॥ उपक्रमोपसंहाराभ्यां हि ब्रह्मविषयत्वमस्य
वाक्यस्यावगम्यते तत्रोपक्रमस्य तावद्ब्रह्मविषयत्वं दर्शितं ॥ उपसंहारस्यापि निरतिशयफलश्रवणाद्ब्रह्मविषयत्वं दृश्यते ॥ स
सर्वान्पाप्मनोपहत्य सर्वेषां भूतानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं पर्येति य एवं वेदेति ॥ नन्वेवं सति प्रतर्दनवाक्यनिर्णयेनैवेदमपि वा
क्यं निर्णीयेत । निर्णीयते ॥ यस्य वैतत्कर्मेत्यस्य ब्रह्मविषयत्वेन तत्रानवधारितत्वात् ॥ तस्मादत्र जीवमुख्यप्राणाशंका पुनरुपपद्य
माना निवर्त्यते प्राणशब्दोपि ब्रह्मविषयो दृष्टः प्राणबंधनं हि सोम्य मन इत्यत्र जीवलिंगमप्युपक्रमोपसंहाराभ्यां ब्रह्मविषय
त्वादभेदाभिप्रायेण योजितव्यं ॥ अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके ॥१८॥ अपि च नैवात्र विवदितव्यं जीव
प्रधानं वेदं वाक्यं स्याद्ब्रह्मप्रधानं वेति यतोन्यार्थं जीवपरामर्शं ब्रह्मप्रतिपत्त्यर्थमस्मिन्वाक्ये जैमिनिराचार्यो मन्यते ॥ कस्मा
त्प्रश्नव्याख्यानाभ्यां ॥ प्रश्नस्तावत्सुप्तपुरुषप्रतिबोधनेन प्राणादिव्यतिरिक्ते जीवे प्रतिबोधिते पुनर्जीवव्यतिरिक्तविषयो दृश्य
ते ॥ क्वैष एतद्बालाके पुरुषोशयिष्ट क्व वा एतदभूत्कुत एतदागादिति ॥ प्रतिवचनमपि यदा सुप्तः स्वप्नं न कंचन पश्यत्यथास्मिन्प्रा
ण एवैकधा भवतीत्यादि ॥ एतस्मादात्मनः प्राणा यथायतनं विप्रतिष्ठंते प्राणेभ्यो देवा देवेभ्यो लोका इति च ॥ सुषुप्तकाले च प
रेण ब्रह्मणा जीव एकतां गच्छति परमाच्च ब्रह्मणः प्राणादिकं जगज्जायत इति वेदांतमर्यादा तस्माद्यत्रास्य जीवस्य निःसं
बोधः स्वच्छतारूपः स्वापः उपाधिजनितविशेषविज्ञानरहितं स्वरूपं यतश्च तद्भ्रंशरूपमागमनं सोत्र परमात्मा वेदितव्यतया श्रा
वित इति गम्यते ॥ अपि चैवमेके शाखिनो वाजसनेयिनोस्मिन्नेव बालाक्यजातशत्रुसंवादे विस्पष्टं विज्ञानमयशब्देन जी
वमाम्नाय तद्व्यतिरिक्तं परमात्मानमामनंति य एष विज्ञानमयः पुरुषः क्वैष तदाभूत्कुत एतदागादिति प्रश्ने प्रतिवचनेपि य एषो ॥ ५२ ॥

105/1915

न्तर्हृदय आकाशस्तस्मिञ्छेत इति । आकाशशब्दश्च परमात्मनि प्रयुक्तो दहरोस्मिन्नंतराकाश इत्यत्र सर्व एत आत्मानो व्युच्चरंतीति
चोपाधिमतामात्मनामन्यतो व्युच्चरणमामनंतः परमात्मानमेव कारणत्वेनामनंतीति गम्यते । प्राणादिनिराकरणस्यापि सुप्तपुरुषो
त्थापनेन प्राणादिव्यतिरिक्तोपदेशोभ्युच्चयः ॥ वाक्यान्वयात् ॥१९॥ बृहदारण्यके मैत्रेयीब्राह्मणेऽधीयते न वा अरे पत्युः कामाये
त्युपक्रम्य न वा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवत्यात्मा वा अरे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्या
सितव्यो मैत्रेय्यात्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितमिति तत्रैतद्विचिकित्स्यते ॥ किं विज्ञानात्मैवायं द्रष्टव्य
त्वादिरूपेणोपदिश्यते अहोस्वित्परमात्मेति । कुतः पुनरेषा विचिकित्सा ॥ प्रियसंसूचितेनात्मना भोक्त्रोपक्रमाद्विज्ञानात्मोपदेश इ
ति प्रतिभाति ॥ तथात्मविज्ञानेन सर्वविज्ञानोपदेशात्परमात्मोपदेश इति ॥ किं तावत्प्राप्तं विज्ञानात्मोपदेश इति ॥ कस्मादुपक्रमसा
मर्थ्यात् ॥ पतिजायापुत्रवित्तादिकं हि भोग्यभूतं सर्वं जगदात्मार्थतया प्रियं भवतीति प्रियसंसूचितं भोक्तारमात्मानमुपक्रम्यानं
तरमिदमात्मनो दर्शनाद्युपदिश्यमानं कस्यान्यस्यात्मनः स्यात् ॥ मध्येपीदं महद्भूतमनंतमपारं विज्ञानघन एवैतेभ्यो भूतेभ्यः स
मुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्तीति प्रकृतस्यैव महतो भूतस्य द्रष्टव्यस्य भूतेभ्यः समुत्थानं विज्ञानात्मभावेन ब्रुवन्विज्ञा
नात्मन एवेदं द्रष्टव्यत्वं दर्शयति ॥ तथा विज्ञातारमरे केन विजानीयादिति कर्तृवचनेन शब्देनोपसंहरन्विज्ञानात्मानमेवेहोपदिष्टं
दर्शयति ॥ तस्मादात्मविज्ञानेन सर्वविज्ञानवचनं भोक्त्रर्थत्वाद्भोग्यजातस्यौपचारिकं द्रष्टव्यमित्येवं प्राप्ते ब्रूमः ॥ परमात्मोपदे
श एवायं । कस्माद्वाक्यान्वयात् । वाक्यं हीदं पौर्वापर्येणावेक्ष्यमाणं परमात्मानं प्रत्यन्वितावयवं लक्ष्यते ॥ कथमिति । तदुपपाद्यते ॥
अमृतत्वस्य तु नाशास्ति वित्तेनेति याज्ञवल्क्यादुपश्रुत्य येनाहं नामृता स्यां किमहं तेन कुर्यां यदेव भगवान्वेद तदेव मे ब्रूहीत्य
मृतत्वमाशासानायै मैत्रेय्यै याज्ञवल्क्य आत्मविज्ञानमिदमुपदिशति ॥ न चान्यत्र परमात्मविज्ञानादमृतत्वमस्तीति श्रुतिस्मृतिवादा
वदंति ॥ तथात्मविज्ञानेन सर्वविज्ञानमुच्यमानं नान्यत्र परमकारणविज्ञानान्मुख्यमवकल्प्यते ॥ न चैतदौपचारिकमाश्र
यितुं शक्यं यत्कारणमात्मविज्ञानेन सर्वविज्ञानं प्रतिज्ञायानंतरेण ग्रंथेन तदेवोपपादयति ॥ ब्रह्म तं परादाद्योन्यत्रात्मनो ब्रह्म
वेदेत्यादिना यो हि ब्रह्मक्षत्रादिकं जगदात्मनोन्यत्र स्वातंत्र्येण लब्धसत्ताकं पश्यति तं मिथ्यादर्शिनं तदेव मिथ्यादृष्टं ब्रह्मक्षत्रा

ब्रं०भा०
॥ ५३ ॥

दिकं जगत्पूरा करोतीति भेदस्थितिमपोह्येदं सर्वं यदयमात्मेति सर्वस्य वस्तुजातस्यात्माव्यतिरेकमवतारयति॥ दुंदुभ्यादिदृष्टांतैश्च तमे
वाव्यतिरेकं द्रढयति॥ अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेद इत्यादिना च प्रकृतस्यात्मनो नामरूपकर्मप्रपंचकारणतां व्याचक्षा
णः परमात्मानमेनं गमयति॥ तथैवैकायनप्रक्रियायामपि च सविषयस्य सेन्द्रियस्य सांतःकरणस्य प्रपंचस्यैकायनमनंतरमबाह्यं कृत्स्नं प्र
ज्ञानघनं व्याचक्षाणः परमात्मानमेवैनं गमयति॥ तस्मात्परमात्मन एवायं दर्शनाद्युपदेश इति गम्यते॥ यत्पुनरुक्तं प्रियसंसूचनोपक्रमा
त् विज्ञानात्मन एवायं दर्शनाद्युपदेश इत्यत्र ब्रूमः॥ प्रतिज्ञासिद्धेर्लिंगमाश्मरथ्यः॥२०॥ अस्त्यत्र प्रतिज्ञा आत्मनि विज्ञाते सर्वमिदं विज्ञा
तं भवतीदं सर्वं यदयमात्मेति च॥ तस्याः प्रतिज्ञायाः सिद्धिं सूचयत्येतल्लिंगं यत्प्रियसंसूचितस्यात्मनो द्रष्टव्यत्वादिसंकीर्तनं॥ यदि हि
विज्ञानात्मा परमात्मनोऽन्यः स्यात्ततः परमात्मविज्ञानेऽपि विज्ञानात्मा न विज्ञात इत्येकविज्ञानेन सर्वविज्ञानं यत्प्रतिज्ञातं तद्धीयेत॥ त
स्मात्प्रतिज्ञासिद्ध्यर्थं विज्ञानात्मपरमात्मनोरभेदांशेनोपक्रमणमित्याश्मरथ्य आचार्यो मन्यते॥ उत्क्रमिष्यत एवं भावादित्यौडुलो
मिः॥२१॥ विज्ञानात्मन एवं देहेन्द्रियमनोबुद्धिसंघातोपाधिसंपर्कात्कलुषीभूतस्य ज्ञानध्यानादिसाधनानुष्ठानात्संप्रसन्नस्य देहा
दिसंघातादुत्क्रमिष्यतः परमात्मनैक्योपपत्तेरिदमभेदेनोपक्रमणमित्यौडुलोमिराचार्यो मन्यते॥ श्रुतिश्चैवं भवति॥ एष संप्रसादो
ऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत इति॥ क्वचिच्च जीवाश्रयमपि नामरूपं नदीनिदर्शनेन ज्ञापयति
यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय॥ तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यमिति यथा लोके नद्यः
स्वाश्रयं नामरूपं विहाय समुद्रमुपयंति॥ एवं जीवोऽपि स्वाश्रयमेव नामरूपं विहाय परं पुरुषमुपैतीति हि तत्रार्थः प्रतीयते दृष्टा
न्तदार्ष्टान्तिकयोस्तुल्यतायै॥ अवस्थितेरिति काशकृत्स्नः॥२२॥ अस्यैव परमात्मनोऽनेनापि विज्ञानात्मभावेनावस्थानादुपप
न्नमिदमभेदेनोपक्रमणमिति काशकृत्स्न आचार्यो मन्यते॥ तथा च ब्राह्मणम् अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवा ५२
णीत्येवंजातीयकं परस्यैवात्मनो जीवभावेनावस्थानं दर्शयति॥ मंत्रवर्णश्च सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाभिव
दन्यदास्ते इत्येवंजातीयको न च तेजःप्रभृतीनां सृष्टेर्जीवस्य पृथक्सृष्टिः श्रुता येन परस्मादात्मनोऽन्यस्तद्विकारो जीवः स्यात्काशकृ
त्स्नस्याचार्यस्याविकृतः परमेश्वरो जीवो नान्य इति मतं॥ आश्मरथ्यस्य तु यद्यपि जीवस्य परस्मादनन्यत्वमभिप्रेतं तथापि प्रतिज्ञा

107/1913

सिद्धेरिति सापेक्षत्वाभिधानात्कार्यकारणभावः कियानप्यभिप्रेत इति गम्यते॥ औडुलोमिपक्षे पुनः स्पष्टमेवावस्थान्तरापेक्षौ भेदाभेदौ ग
म्येते॥ तत्र काशकृत्स्नीयं मतं श्रुत्यनुसारीति गम्यते प्रतिपिपादयिषितार्थानुसारात्तत्त्वमसीत्यादिश्रुतिभ्यः॥ एवं च सति तज्ज्ञानादमृत
त्वमवकल्पते॥ विकारात्मकत्वे हि जीवस्याभ्युपगम्यमाने विकारस्य प्रकृतिसंबंधे प्रलयप्रसंगात् न तज्ज्ञानादमृतत्वमवकल्पेत॥ अ
तश्च स्वाश्रयस्य नामरूपस्यासंभवादुपाध्याश्रयं नामरूपं जीव उपचर्यते॥ अत एवोत्पत्तिरपि जीवस्य क्वचिदग्निविस्फुलिंगोदाहरणेन
श्राव्यमाणा उपाध्याश्रयैव वेदितव्या॥ यदप्युक्तं प्रकृतस्यैव महतो भूतस्य द्रष्टव्यस्य भूतेभ्यः समुत्थानं विज्ञानात्मभावेन दर्शयन्वि
ज्ञानात्मन एवेदं द्रष्टव्यत्वं दर्शयतीति तत्रापीयं त्रिसूत्री योजयितव्या॥ प्रतिज्ञासिद्धेर्लिंगमाश्मरथ्यः॥ इदमत्र प्रतिज्ञातमात्मनि वि
दिते सर्वं विदितं भवतीदं सर्वं यदयमात्मेति च उपपादितं च सर्वस्य नामरूपकर्मप्रपंचस्यैकप्रसवत्वादेकप्रलयत्वाच्च दुंदुभ्यादिदृष्टा
न्तैश्च कार्यकारणयोरव्यतिरेकप्रतिपादनात्॥ तस्या एव प्रतिज्ञायाः सिद्धिं सूचयत्येतल्लिंगं यन्महतो भूतस्य भूतेभ्यः समुत्थानं वि
ज्ञानात्मभावेन कथितमित्याश्मरथ्य आचार्यो मन्यते॥ अभेदे हि सत्येकविज्ञानेन सर्वविज्ञानं प्रतिज्ञातमवकल्प्यत इति॥ उत्क्रमि
ष्यत एवं भावादित्यौडुलोमिः॥ उत्क्रमिष्यतो विज्ञानात्मनो ज्ञानध्यानादिसामर्थ्यात्संप्रसन्नस्य परेणात्मनैक्यसंभवादिदमभेदाभि
धानमित्यौडुलोमिराचार्यो मन्यते॥ अवस्थितेरिति काशकृत्स्नः॥ अस्यैव परमात्मनोऽनेन विज्ञानात्मभावेनावस्थानादुपपन्नमि
दमभेदाभिधानमिति काशकृत्स्न आचार्यो मन्यते॥ ननूच्छेदाभिधानमेतदेतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य
संज्ञास्तीति कथमेतदभेदाभिधानं॥ नैष दोषः॥ विशेषविज्ञानविनाशाभिप्रायमेतद्विनाशाभिधानं नात्मोच्छेदाभिप्रायं॥ अ
त्रैव मा भगवानमूमुहन्न प्रेत्य संज्ञास्तीति पर्यनुयुज्य स्वयमेव श्रुत्यार्थान्तरस्य दर्शितत्वात्॥ न वा अरेऽहं मोहं ब्रवीम्यविनाशी
वा अरेऽयमात्मानुच्छित्तिधर्मा मात्रासंसर्गस्त्वस्य भवतीति॥ एतदुक्तं भवति कूटस्थनित्य एवायं विज्ञानघन आत्मा नास्योच्छेदप्रसंगो
ऽस्ति मात्राभिस्त्वस्य भूतेन्द्रियलक्षणाभिरविद्याकृताभिरसंसर्गो विद्यया भवति संसर्गाभावे च तत्कृतस्य विशेषविज्ञानस्याभावा
न्न प्रेत्य संज्ञास्तीत्युक्तमिति॥ यदप्युक्तं विज्ञातारमरे केन विजानीयादिति कर्तृवचनेन शब्देनोपसंहाराद्विज्ञानात्मन एवेदं द्रष्ट
व्यत्वमिति तदपि काशकृत्स्नीयेनैव दर्शनेन परिहरणीयं॥ अपि च यत्र हि द्वैतमिव भवति तदितर इतरं पश्यतीत्यारभ्याविद्याविषये

ग्रं०भा० ॥५४॥ नस्य दर्शनादिलक्षणां विशेषविज्ञानं प्रपंचयंत्रत्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदित्यादिना विद्याविषये तस्यैव दर्शनादिलक्षणस्य
विशेषविज्ञानस्याभावमभिदधाति॥पुनश्च विषयाभावेप्यात्मानं विजानीयादित्याशंक्या विज्ञातारमरे केन विजानीयादित्याहतत
श्च विशेषविज्ञानाभावप्रतिपादनपरत्वाद्वाक्यस्य विज्ञानधातुरेव केवलः सन्भूतपूर्वगत्या कर्तृवचनेन तृचा निर्दिष्ट इति गम्यते
दर्शितं च पुरस्तात्काशकृत्स्नीयस्य मतस्य श्रुतिमत्त्वं अतश्च विज्ञानात्मपरमात्मनोरविद्याप्रत्युपस्थापितनामरूपरचितदेहाद्युपा
धिनिमित्तो भेदो न पारमार्थिक इत्येषोर्थः सर्वैर्वेदांतवादिभिरभ्युपगंतव्यः सदेव सोम्येदमग्र आसीत् एकमेवाद्वितीयमात्मैवेदं स
र्वं ब्रह्मैवेदं सर्वमिदं सर्वं यदयमात्मा नान्योतोस्ति द्रष्टा नान्यदतोस्ति द्रष्टृ इत्येवंरूपाभ्यः श्रुतिभ्यः स्मृतिभ्यः स्मृतिभ्यश्च वासुदेवः सर्वमिति
क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत॥समं सर्वेषु भूतेषु तिष्ठंतं परमेश्वरमित्येवंरूपाभ्यः॥भेददर्शनापवादाच्च अन्योसावन्योहम
स्मीति न स वेद मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यतीत्येवंजातीयकात्॥स वा एष महानज आत्माजरोमरोमृतोभयो ब्रह्मेति
चात्मनि सर्वविक्रियाप्रतिषेधात्॥अन्यथा च मुमुक्षूणां निरपवादविज्ञानानुपपत्तेः सुनिश्चितार्थत्वानुपपत्तेश्च॥निरपवादं हि वि
ज्ञानं सर्वाकांक्षानिवर्तकमात्मविषयमिष्यते॥वेदांतविज्ञानसुनिश्चितार्था इति च श्रुतेः॥तत्र को मोहः कः शोक एकत्वमनुपश्यत इ
ति च॥स्थितप्रज्ञस्य लक्षणस्मृतेश्च स्थिते च क्षेत्रज्ञपरमात्मैकत्वविषये सम्यग्दर्शने क्षेत्रज्ञः परमात्मेति नाममात्रभेदात्क्षेत्रज्ञोयंप
रमात्मनो भिन्नः परमात्मायं क्षेत्रज्ञाद्भिन्न इत्येवंजातीयक आत्मभेदविषयो निर्बंधो निरर्थकः एको ह्ययमात्मा नाममात्रभेदेन बहु
धाभिधीयत इति॥नहि सत्यं ज्ञानमनंतं ब्रह्म यो वेद निहितं गुहायामिति कांचिदेवैकां गुहामधिकृत्यैतदुक्तं॥न च ब्रह्मणोन्यो गु
हायां निहितोस्ति तत्सृष्ट्वा तदेवानुप्राविशदिति स्रष्टुरेव प्रवेशश्रवणात् ये तु निर्बंधं कुर्वंति ते वेदांतार्थं बाधमानाः श्रेयोद्वारं
सम्यग्दर्शनमेव बाधंते॥कृतकमनित्यं च मोक्षं कल्पयंति॥न्यायेन च न संगच्छंत इति॥प्रकृतिश्च प्रतिज्ञादृष्टांतानुपरोधात्॥य ॥५४॥
थाभ्युदयहेतुत्वाद्धर्मो जिज्ञास्य एवं निःश्रेयसहेतुत्वाद्ब्रह्म जिज्ञास्यमित्युक्तं॥ब्रह्म च जन्माद्यस्य यत इति लक्षितं तच्च लक्ष
णं घटरुचकादीनां मृत्सुवर्णादिवत्प्रकृतित्वे कुलालसुवर्णकारादिवन्निमित्तत्वे च समानमित्यतो भवति विमर्शः किमात्मकं
पुनर्ब्रह्मणः कारणत्वं स्यादिति॥तत्र निमित्तकारणमेव तावत्केवलं स्यादिति प्रतिभाति॥कस्मादीक्षापूर्वककर्तृत्वश्रवणात्॥

109/1913

ईक्षापूर्वकं हि ब्रह्मणः कर्तृत्वमवगम्यते स ईक्षांचक्रे स प्राणमसृजतेत्यादिश्रुतिभ्यः॥ईक्षापूर्वकं च कर्तृत्वं निमित्तकारणेष्वेव
कुलालादिषु दृष्टं॥अनेककारणपूर्विका च क्रियाफलसिद्धिर्लोके दृष्टा स च न्याय आदिकर्तर्यपि युक्तः संक्रामयितुं॥ईश्वर
प्रसिद्धेश्च॥ईश्वराणां हि राजवैवस्वतादीनां निमित्तकारणत्वमेव केवलं प्रतीयते तद्वत्परमेश्वरस्यापि निमित्तकारणत्वमेव युक्तं प्रति
पत्तुं कार्यं चेदं जगत्सावयवं अचेतनमशुद्धं च दृश्यते कारणेनापि तस्य तादृशेनैव भवितव्यं कार्यकारणयोः सारूप्यदर्शनात्॥ब्रह्म चा
नेवंलक्षणमवगम्यते॥निष्कलं निष्क्रियं शांतं निरवद्यं निरंजनमित्यादिश्रुतिभ्यः॥पारिशेष्याद्ब्रह्मणोन्यदुपादानकारणम
शुद्ध्यादिगुणकं स्मृतिप्रसिद्धमभ्युपगंतव्यं॥ब्रह्मकारणत्वश्रुतेर्निमित्तत्वमात्रे पर्यवसानादित्येवं प्राप्ते ब्रूमः॥प्रकृतिश्चोपादान
कारणं च ब्रह्माभ्युपगंतव्यं॥निमित्तकारणं च न केवलं निमित्तकारणमेव कस्मात्प्रतिज्ञादृष्टांतानुपरोधात्॥एवं प्रतिज्ञादृष्टांतौ
श्रौतौ नोपरुध्येते॥प्रतिज्ञा तावदुत तमादेशमप्राक्ष्यः येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति॥तत्र चैकेन विज्ञातेन सर्व
मिदं विज्ञातं भवतीति प्रतीयते तच्चोपादानकारणविज्ञाने सर्वविज्ञानं संभवत्युपादानकारणाव्यतिरिक्तत्वात्कार्यस्य निमित्तकार
णाव्यतिरेकस्तु कार्यस्य नास्ति लोके तक्ष्णः प्रासादव्यतिरेकदर्शनात्॥दृष्टांतोपि यथा सोम्यैकेन मृत्पिंडेन सर्वं मृन्मयं विज्ञातं स्याद्वा
चारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमित्युपादानकारणगोचर एवाम्नायते॥तथैकेन लोहमणिना विज्ञातेन स्यादेकेन नखनिकृं
तनेन सर्वं कार्ष्णायसं विज्ञातं स्यादिति च॥तथा च अन्यत्रापि कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति प्रतिज्ञा यथा पृथि
व्यामोषधयः संभवंतीति दृष्टांतः॥आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदितमिति प्रतिज्ञा स यथा दुंदुभेर्हन्यमानस्य न
बाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणाय दुंदुभेस्तु ग्रहणेन दुंदुभ्याघातस्य वा शब्दो गृहीत इति दृष्टांतः॥एवं यथासंभवं प्रतिवेदांतं प्रति
ज्ञादृष्टांतौ प्रकृतित्वप्रसाधनौ प्रत्येतव्यौ॥यत इतीयमपि पंचमी यतो वा इमानि भूतानि जायंत इत्यत्र जनिकर्तुः प्रकृतिरिति विशे
षस्मरणात्प्रकृतिलक्षण एवापादाने द्रष्टव्या निमित्तत्वं त्वधिष्ठात्रंतराभावादधिगंतव्यं॥यथा हि लोके मृत्सुवर्णादिकमुपादान
कारणस्य सतोन्योधिष्ठातापेक्ष्योस्ति॥प्रागुत्पत्तेरेकमेवाद्वितीयमित्यवधारणात्॥अधिष्ठात्रंतराभावोपि प्रतिज्ञादृष्टांतानु
परोधादेवोदितो वेदितव्यः॥अधिष्ठातरि ह्युपादानादन्यस्मिन्नभ्युपगम्यमाने पुनरप्येकविज्ञानेन सर्वविज्ञानस्यासंभवात्प्रति

न्तोऽपरोद्ध एव स्यात्॥ तस्मादधिष्ठात्रंतराभावादात्मनः कर्तृत्वमुपादानांतराभावाच्च प्रकृतित्वं। कुतश्चात्मनः कर्तृत्वप्र
कृतित्वे। अभिध्योपदेशाच्च॥२४॥ अभिध्योपदेशश्चात्मनः कर्तृत्वप्रकृतित्वे गमयति॥ सोऽकामयत बहु स्यां प्रजायेयेति तदैक्षत बहु
स्यां प्रजायेयेति च॥ तत्राभिध्यानपूर्विकायाः स्वातंत्र्यप्रवृत्तेः कर्तेति गम्यते॥ बहु स्यामिति प्रत्यगात्मविषयत्वाद्बहुभवनाभिध्या
नस्य प्रकृतिरप्यपि गम्यते। साक्षाच्चोभयाम्नानात्॥२५॥ प्रकृतित्वस्यायमभ्युच्चयः इतश्च प्रकृतिर्ब्रह्म यत्कारणं साक्षाद्ब्रह्मैव का
रणमुपादायोभौ प्रभवप्रलयावाम्नायेते॥ सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यंत आकाशं प्रत्यस्तं यंतीति यद्धि यस्मा
त्प्रभवति यस्मिंश्च प्रलीयते तत्तस्योपादानं प्रसिद्धं॥ यथा व्रीहियवादीनां पृथिवी। साक्षादिति चोपादानांतरानुपादानं दर्शयत्याका
शादेवेति प्रत्यस्तमयश्च नोपादानादन्यत्र कार्यस्य दृष्टः॥ आत्मकृतेः परिणामात्॥२६॥ इतश्च प्रकृतिर्ब्रह्म यत्कारणं ब्रह्मप्रक्रियायां
तदात्मानं स्वयमकुरुतेत्यात्मनः कर्मत्वं कर्तृत्वं च दर्शयति॥ आत्मानमिति कर्मत्वं स्वयमकुरुतेति कर्तृत्वं॥ कथं पुनः पूर्वसिद्धस्य स
तः कर्तृत्वेन व्यवस्थितस्य क्रियमाणत्वं शक्यं संपादयितुं॥ परिणामादिति ब्रूमः॥ पूर्वसिद्धोऽपि हि सन्नात्मा विशेषेण विकारात्मना प
रिणामयामासात्मानमिति विकारात्मना च परिणामो मृदाद्यासु प्रकृतिषूपलब्धः॥ स्वयमिति च विशेषणान्निमित्तांतरानपेक्ष
त्वमपि प्रतीयते॥ परिणामादिति वा पृथक्सूत्रं॥ तस्यैषोऽर्थः॥ इतश्च प्रकृतिर्ब्रह्म यत्कारणं ब्रह्मण एव विकारात्मना परिणामः सामा
नाधिकरण्येनाम्नायते सच्च त्यच्चाभवन्निरुक्तं चानिरुक्तं चेत्यादिनेति॥ योनिश्च हि गीयते॥२७॥ इतश्च प्रकृतिर्ब्रह्म यत्कारणं ब्रह्म
योनिरित्यपि पठ्यते वेदांतेषु कर्तारमीशं पुरुषं ब्रह्मयोनिमिति यद्भूतयोनिं परिपश्यंति धीरा इति च॥ योनिशब्दश्च प्रकृतिवचनः सम
धिगतो लोके पृथिवी योनिरोषधिवनस्पतीनामिति॥ स्त्रीयोनेरप्यस्त्येवावयवद्वारेण गर्भं प्रत्युपादानकारणत्वं। क्वचित्स्थानव
चनोऽपि योनिशब्दो दृष्टो योनिष्ट इंद्र निषदे अकारीति॥ वाक्यशेषात्त्वत्र प्रकृतिवचनता परिगृह्यते यथोर्णनाभिः सृजते गृह्णते चेत्येवं
जातीयकादेवं प्रकृतित्वं ब्रह्मणः प्रसिद्धं यत्पुनरिदमुक्तमीक्षापूर्वकं कर्तृत्वं निमित्तकारणेष्वेव कुलालादिषु लोके दृष्टं नोपा ॥५५॥
दानेष्वित्यादि तत्प्रत्युच्यते॥ न लोकवदिह भवितव्यं। न ह्ययमनुमानगम्योऽर्थः॥ शब्दगम्यत्वात्त्वस्यार्थस्य यथाशब्दमिह भवितव्यं। शब्द
श्चेशितुरीश्वरस्य प्रकृतित्वं प्रतिपादयतीत्यवोचाम पुनश्चैतत्सर्वं विस्तरेण प्रतिवक्ष्यामः॥ एतेन सर्वे व्याख्याता व्याख्याताः॥२८॥ ई

111/1913

क्षतेर्नाशब्दमित्यारभ्य प्रधानकारणवादः सूत्रैरेव पुनः पुनराशंक्य निराकृतः॥ तस्य हि पक्षस्योपोद्बलकानि कानिचिल्लिंगाभा
सानि वेदांतेष्वापातेन प्रतिभांतीति॥ स च कार्यकारणानन्यत्वाभ्युपगमात्प्रत्यासन्नो वेदांतवादस्य देवलप्रभृतिभिश्च कै
श्चिद्धर्मसूत्रकारैः स्वग्रंथेष्वाश्रितस्तेन तत्प्रतिषेधे एव यत्नोऽतीव कृतो नाण्वादिकारणवादप्रतिषेधे ते पि तु ब्रह्मकारणवादपक्ष
स्य प्रतिपक्षत्वात्प्रतिषेद्धव्यास्तेषामुपोद्बलकं वैदिकं किंचिल्लिंगमापातेन मंदमतीन्प्रति भायादित्यतः प्रधानमल्लनिबर्हण
न्यायेनातिदिशति॥ एतेन प्रधानकारणवादप्रतिषेधन्यायकलापेन सर्वेऽण्वादिकारणवादा अपि प्रतिषिद्धतया व्याख्याता
वेदितव्यास्तेषामपि प्रधानवदशब्दत्वाच्छब्दविरोधित्वाच्च व्याख्याता व्याख्याता इति पदाभ्यासोऽध्यायपरिसमाप्तिं द्योतय
ति॥२८॥ ॥ इति श्री मच्छारीरकमीमांसाभाष्ये शंकरभगवत्पादकृतौ प्रथमाध्यायस्य चतुर्थः पादः समाप्तः॥ प्रथमो
ध्यायश्च॥१॥ ७ ७ ७ श्री ७ ७ श्री ७ ७ श्री ७ ७ श्री ७ ७ श्री

113/1913

॥इतिमीमांसाशारीरकभाष्येप्रथमाध्यायःसमाप्तः॥

1151/913

॥अथशारीरकमीमांसाभाष्येद्वितीयाध्यायप्रारंभः॥

श्रीगणेशाय नमः ॥ स्मृत्यनवकाशदोषप्रसंगइतिचेन्नान्यस्मृत्यनवकाशदोषप्रसंगात् ॥१॥ प्रथमेध्यायेसर्वज्ञःसर्वेश्वरोजगत
उत्पत्तिकारणंमृत्सुवर्णादयइवघटरुचकादीनांउत्पन्नस्यचजगतोनियंतृत्वेनस्थितिकारणंमायावीवमायायाःप्रसारितस्यचजगतः
पुनःस्वात्मन्येवोपसंहारकारणमवनिरिवचतुर्विधस्यभूतग्रामस्यसएवचसर्वेषांनआत्मेत्येतद्वेदांतवाक्यसमन्वयप्रतिपादनेनप्र
तिपादितंप्रधानादिवादाश्चअशब्दत्वेननिराकृताःइदानींस्वपक्षेस्मृतिन्यायविरोधपरिहारःप्रधानादिवादानांचन्यायाभासोपबृंहि
प तत्वंप्रतिवेदांतंचसृष्ट्यादिप्रक्रियायाअविगीतत्वंइत्यस्यार्थजातस्यप्रतिपादनायद्वितीयोध्यायआरभ्यते॥तत्रप्रथमंतावत्स्मृतिविरोधमु
पन्यस्यपरिहरतियदुक्तंब्रह्मैवसर्वज्ञंजगतःकारणमितितदयुक्तंकुतःस्मृत्यनवकाशदोषप्रसंगात्स्मृतिश्चतंत्राख्यापरमर्षिप्रणीताशि
ष्टपरिगृहीताअन्याश्चतदनुसारिण्यःस्मृतयःएवंसत्यनवकाशाःप्रसज्येरन्तासुह्यचेतनंप्रधानंस्वतंत्रंजगतःकारणमुपनिबध्यते।
मन्वादिस्मृतयस्तावच्चोदनालक्षणेनाग्निहोत्रादिनाधर्मजातेनापेक्षितमर्थंसमर्पयंत्यःसावकाशाभवंतिअस्यवर्णस्यास्मिन्काले
ऽनेनविधानेनोपनयनमीदृशश्चाचारइत्थंवेदाध्ययनमित्थंसमावर्तनमित्थंसहधर्मचारिणीसंयोगइतितथापुरुषार्थांश्चवर्णाश्र
मधर्मान्नानाविधान्विदधति॥नैवंकपिलादिस्मृतीनामनुष्ठेयेविषयेऽवकाशोस्तिमोक्षसाधनमेवहिसम्यग्दर्शनमधिकृत्यताः
प्रणीताःयदितत्राप्यनवकाशास्युरानर्थक्यमेवासांप्रसज्येततस्मात्तदविरोधेनवेदांताव्याख्यातव्याःकथंपुनरीक्षत्यादिभ्योहेतुभ्योब्रह्मै
वसर्वज्ञंजगतःकारणमित्यवधारितःश्रुत्यर्थःस्मृत्यनवकाशदोषप्रसंगेनपुनराक्षिप्यतेभवेदयमनाक्षेपःस्वतंत्रप्रज्ञानांपरतंत्रप्रज्ञा
स्तुप्रायेणजनाःस्वातंत्र्येणश्रुत्यर्थमवधारयितुमशक्नुवंतःप्रख्यातप्रणेतृकासुस्मृतिष्ववलंबेरन्तद्बलेनचश्रुत्यर्थंप्रतिपि
त्सेरन्अस्मत्कृतेचव्याख्यानेनविश्वस्युर्बहुमानात्स्मृतीनांप्रणेतृषु॥कपिलप्रभृतीनांचार्षंज्ञानमप्रतिहतंस्मर्यतेश्रुतिश्चभव
तिऋषिंप्रसूतंकपिलंयस्तमग्रेज्ञानैर्बिभर्तिजायमानंचपश्येदितितस्मान्नैषांमतमयथार्थंशक्यंसंभावयितुं॥तर्कावष्टंभे
नचैतेर्थंव्यवस्थापयंतितस्मादपिस्मृतिबलेनवेदांताव्याख्येयाइतिपुनराक्षेपः॥तस्यसमाधिर्नान्यस्मृत्यनवकाशदोषप्रसं ॥१॥
गादितियदिस्मृत्यनवकाशदोषप्रसंगेनेश्वरकारणवादआक्षिप्येतैवमप्यन्याईश्वरकारणवादिन्यःस्मृतयोनवकाशाःप्रसज्ये
रन्ताउदाहरिष्यामःयत्तत्सूक्ष्ममविज्ञेयंइतिपरंब्रह्मप्रकृत्यसह्यंतरात्माभूतानांक्षेत्रज्ञश्चेतिकथ्यतेइतिचोक्त्वातस्मादव्यक्तमु

117/1913

त्पन्नंत्रिगुणंद्विजसत्तमेत्याहतथाऽन्यत्राप्यव्यक्तंपुरुषेब्रह्मन्निष्कलेसंप्रलीयतेइत्याह।अतश्चसंक्षेपमिमंशृणुध्वंनाराय
णःसर्वमिदंपुराणः॥ससर्गकालेचकरोतिसर्गंसंहारकालेचतदत्तिभूयइतिचपुराणे॥भगवद्गीतासुचअहंसर्वस्यजगतःप्रभ
वःप्रलयस्तथेति॥परमात्मानमेवचप्रकृत्यापस्तंबःपठतितस्मात्कायाःप्रभवंतिसर्वेसमूलंशाश्वतिकःसनित्यइत्येवमनेकशः
ले स्मृतिष्वपीश्वरःकारणत्वेनोपादानत्वेनचप्रकाश्यते॥स्मृतिबलेनप्रत्यवतिष्ठमानस्यस्मृतिबलेनैवोत्तरंवक्ष्यामीत्यतोयमन्यस्मृत्य
नवकाशोपन्यासः॥दर्शितंतुश्रुतीनामीश्वरकारणवादंप्रतितात्पर्यं॥विप्रतिपत्तौचस्मृतीनामवश्यकर्तव्येऽन्यतरपरिग्रहेऽन्यत
रस्याःपरित्यागेचश्रुत्यनुसारिण्यःस्मृतयःप्रमाणमनपेक्ष्याइतरास्तदुक्तंप्रमाणलक्षप्रमाणलक्षणेमीमांसायांप्रथमेऽध्या
येणाविश्रुतिविरोधेसतिस्मृतेरनपेक्षंस्यात्विरोधेत्वनपेक्षंस्यादश्रुतिविरोधेसतिस्मृतिवाक्यंप्रमाणंस्यात्असतिह्यनुमानमि
तिनचातींद्रियानर्थान्श्रुतिमंतरेणकश्चिदुपलभ्यतइतिशक्यंसंभावयितुंनिमित्ताभावात्।शक्यंकपिलादीनांसिद्धानामप्रतिह
तज्ञानत्वादितिचेत्न॥सिद्धेरपिसापेक्षत्वात्धर्मानुष्ठानापेक्षाहिसिद्धिःसचधर्मश्चोदनालक्षणस्ततश्चपूर्वसिद्धायाश्चोदनाया
अर्थोनपश्चिमसिद्धपुरुषवचनवशेनातिशंकितुंशक्यतेसिद्धव्यपाश्रयकल्पनायामपिबहुत्वात्सिद्धानांप्रदर्शितेनप्रकारेणस्मृतिवि
प्रतिपत्तौसत्यांनश्रुतिव्यपाश्रयादन्यन्निर्णयकारणमस्तिपरतंत्रप्रज्ञस्यापिनाकस्मात्स्मृतिविशेषविषयःपक्षपातोयुक्तःकस्यचित्क्वचि
त्पक्षपातेसतिपुरुषमतिवैश्वरूप्येणतत्वाव्यवस्थानप्रसंगात्।तस्मात्तस्यापिस्मृतिविप्रतिपत्त्युपन्यासेनश्रुत्यनुसारान
नुसारविवेचनेनचसन्मार्गेप्रज्ञासंग्रहणीयायातुश्रुतिःकपिलस्यज्ञानातिशयंप्रदर्शयंतीप्रदर्शितानतयाश्रुतिविरुद्धमपिका
पिलंमतंश्रद्धातुंशक्यंकपिलमितिश्रुतिसामान्यमात्रत्वात्।अन्यस्यचकपिलस्यसगरपुत्राणांप्रतप्तुःवासुदेवनाम्नःस्मर
णात्अन्यार्थदर्शनस्यचप्राप्तिरहितस्यासाधकत्वात्भवतिचान्यामनोर्माहात्म्यंप्रकाशयंतीश्रुतिःयद्वैकिंचनमनुरवद
त्तद्भेषजमितिमनुनाचसर्वभूतेषुचात्मानंसर्वभूतानिचात्मनिसंपश्यन्नात्मयाजीस्वाराज्यमधिगच्छतीतिसर्वात्मत्वदर्श
नंप्रशंसताकापिलंमतंनिंदितमितिगम्यतेकपिलोलोहिनसर्वभूतात्मदर्शनमनुमन्यतेआत्मभेदाभ्युपगमात्महारतेविव
बहवःपुरुषाराजन्सांख्ययोगविचारिणामितिपरपक्षमुपन्यस्यतद्व्युदासेनबहूनांपुरुषाणांहियथैकायोनिरुच्यते॥तथातंपुरु

ब्रं०भा०२ पंविश्वमाख्यास्यामिगुणाधिकमित्युपक्रम्यममांतरात्मातवचयेचान्येदेहिसंज्ञिताःसर्वेषांसाक्षिभूतोसौनग्राह्यःकेनचित्क्वचित्
।।२।। विश्वमूर्धाविश्वभुजोविश्वपादाक्षिनासिकः।एकश्चरतिभूतेषुस्वैरचारीयथासुखमितिसर्वात्मतैवनिर्धारिताश्रुतिश्चसर्वात्मतायांभव
तियस्मिन्सर्वाणिभूतान्यात्मैवाभूद्विजानतः।तत्रकोमोहःकःशोकएकत्वमनुपश्यतइत्येवंविधा।।अतश्चात्मभेदकल्पनयापिक
पिलस्यतंत्रंवेदविरुद्धंवेदानुसारिमनुवचनविरुद्धंचनकेवलंस्वतंत्रप्रकृतिपरिकल्पनयैवेतिवेदस्यहिनिरपेक्षंस्वार्थेप्रामाण्यंरवे
रिवरूपविषयेपुरुषवचसांतुमूलांतरापेक्षंवक्तृस्मृतिव्यवहितंचेतिविप्रकर्षः।तस्माद्वेदविरुद्धविषयेस्मृत्यनवकाशप्रसंगो
नदोषः।कुतश्चस्मृत्यनवकाशप्रसंगोनदोषः।।इतरेषांचानुपलब्धेः।।२।।प्रधानादितराणियानिप्रधानपरिणामत्वेनस्मृतौकल्पिता
निमहदादीनिनतानिलोकेवेदेवोपलभ्यंते।भूतेंद्रियाणितावल्लोकप्रसिद्धत्वाच्छक्यंतेस्मर्तुं।अलोकवेदप्रसिद्धत्वात्तुमहदादीनांषष्ठस्ये
वेंद्रियार्थस्यनस्मृतिरवकल्पते।यदपिक्वचित्तत्परमिवश्रवणमवभासतेतदप्यतत्परंव्याख्यातमानुमानिकमप्येकेषामित्यत्र।कार्य
स्मृतेरप्रामाण्यात्कारणस्मृतेरप्यप्रामाण्यंयुक्तमित्यभिप्रायः।तस्मादपिनस्मृत्यनवकाशप्रसंगोदोषः।तर्कावष्टंभंतुनविलक्षणत्वा
दित्यारभ्योन्मथिष्यति।।एतेनयोगःप्रत्युक्तः।।३।।एतेनसांख्यस्मृतिप्रत्याख्यानेनयोगस्मृतिरपिप्रत्याख्याताद्रष्टव्येत्यतिदिशति।त
त्रापिश्रुतिविरोधेनप्रधानंस्वतंत्रंकारणंमहदादीनिचकार्याण्यलोकवेदप्रसिद्धानिकल्प्यंते।नन्वेवंसतिसमानन्यायत्वात्पूर्वेणैवेत
त्कृतंकिमर्थंपुनरतिदिश्यते।।अस्तिह्यत्राभ्यधिकाशंकासम्यग्दर्शनाभ्युपायोहियोगोवेदेविहितः।श्रोतव्योमंतव्योनिदिध्यासितव्यइति
त्रिरुन्नतंस्थाप्यसमंशरीरमित्यादिनासनादिकल्पनापुरःसरंबहुप्रपंचंयोगविधानंश्वेताश्वतरोपनिषदिदृश्यते।लिंगानिचवैदिका
नियोगविषयाणिसहस्रशउपलभ्यंते।तांयोगमितिमन्यंतेस्थिरामिंद्रियधारणामितिविद्यामेतांयोगविधिंचकृत्स्नमितिचैव
मादीनियोगशास्त्रेपिअथतत्त्वदर्शनोपायोयोगइतिसम्यग्दर्शनाभ्युपायत्वेनैवयोगोंगीक्रियते।अतःसंप्रतिपन्नार्थैकदेशत्वादष्ट
कादिस्मृतिवद्योगस्मृतेरप्यनपवादोभविष्यतीतियमभ्यधिकाशंका।निदेशेननिवर्त्यते।अर्थैकदेशसंप्रतिपत्तावप्यर्थैकदेश ।।२।।
विप्रतिपत्तेः।पूर्वोक्तायाददर्शनात्सतीष्वप्यध्यात्मविषयासुबह्वीषुस्मृतिषुसांख्ययोगस्मृत्योरेवनिराकरणाययत्नःकृतः।सांख्य
योगौहिपरमपुरुषार्थसाधनत्वेनलोकेप्रख्यातौशिष्टैश्चपरिगृहीतौलिंगेनचश्रौतेनोपबृंहितौ।तत्कारणंसांख्ययोगाभिपन्नंज्ञात्वादेवंमुच्यते

119/1913

सर्वपांशेरितिनिराकरणंतुनसांख्यज्ञानेनवेदनिरपेक्षेणयोगमार्गेणवानिःश्रेयसमधिगम्यतइतिश्रुतिर्हिवैदिकादात्मै
कत्वविज्ञानादन्यन्निःश्रेयससाधनंवारयतितमेवविदित्वातिमृत्युमेतिनान्यःपंथाविद्यते।यनायेतिद्वैतिनोहितेसांख्यायोगाश्च
नात्मैकत्वदर्शिनः।यत्तुदर्शनमुक्तंतत्कारणंसांख्ययोगाभिपन्नमितिवैदिकमेवतत्रज्ञानंध्यानंचसांख्ययोगशब्दाभ्यामभिलप्य
तेप्रत्यासत्तेरित्यवगंतव्यंयेनत्वंशेननविरुध्येतेतेनेष्टमेवसांख्ययोगस्मृत्योःसावकाशत्वंतद्यथाअसंगोह्ययंपुरुषइत्येवमादिश्रुति
प्रसिद्धमेवपुरुषस्यविशुद्धत्वंनिर्गुणपुरुषनिरूपणेनसांख्यैरनुगम्यंते।तथाचयोगैरपिअथपरिव्राड्विवर्णवासामुंडोअपरिग्र
हइत्येवमादिश्रुतिप्रसिद्धमेवनिवृत्तिनिष्ठत्वंप्रव्रज्याद्युपदेशेनानुगम्यते।एतेनसर्वाणितर्कस्मरणानिप्रतिवक्तव्यानितान्यपि
तर्कोपपत्तिभ्यांतत्त्वज्ञानायोपकुर्वंतीतिचेदुपकुर्वंतुतत्त्वज्ञानंतुवेदांतवाक्येभ्यएवभवतिनावेदविन्मनुतेतंबृहंतंतंत्वौपनिषदंपु
रुषंपृच्छामीत्येवमादिश्रुतिभ्यः।।नविलक्षणत्वादस्यतथात्वंचशब्दात्।।४।।ब्रह्मास्यजगतःकारणंप्रकृतिश्चेत्यस्यपक्षस्याक्षे
पःस्मृतिनिमित्तःपरिहृतः।तर्कनिमित्तआक्षेपइदानींपरिह्रियते।कुतःपुनरस्मिन्नवधारितआगमार्थेतर्कनिमित्तस्याक्षेपस्याव
काशः।ननुधर्मइवब्रह्मण्यप्यनपेक्षआगमोभवितुमर्हति।।भवेदयमवष्टंभोयदिप्रमाणांतरानवगाह्यआगममात्रप्रमेयो
यमर्थःस्यादनुष्ठेयरूपइवधर्मः।परिनिष्पन्नरूपंतुब्रह्मावगम्यते।परिनिष्पन्नेचवस्तुनिप्रमाणांतराणामस्त्यवकाशोयथापृथि
व्यादिषुयथाचश्रुतीनांपरस्परविरोधेसत्येकवशेनेतरानीयंतेएवंप्रमाणांतरविरोधेपितद्वशेनैवश्रुतिर्नीयेत।दृष्टसाधर्म्येणचा
दृष्टमर्थंसमर्थयंतीयुक्तिरनुभवस्यसन्निकृष्यते।विप्रकृष्यतेतुश्रुतिरितिलोकप्रसिद्धनयमात्रेणस्वार्थाभिधानात्।अनुभवा
वसानंचब्रह्मविज्ञानमविद्यायानिवर्तकंमोक्षसाधनंचदृष्टफलतयेष्यते।श्रुतिरपिश्रोतव्योमंतव्यइतिश्रवणव्यतिरेकेणमन
नंविदधतीतर्कमप्यत्रादर्तव्यंदर्शयति।अतस्तर्कनिमित्तःपुनराक्षेपःक्रियतेनविलक्षणत्वादस्येतियदुक्तंचेतनंब्रह्मजगतःका
रणंप्रकृतिरितितन्नोपपद्यतेकस्मात्विलक्षणत्वादस्यविकारस्यप्रकृत्याइदंहिब्रह्मकार्यत्वेनाभिप्रेयमाणंजगद्ब्रह्मविलक्ष
णमचेतनमशुद्धंचदृश्यतेब्रह्मचजगद्विलक्षणंचेतनंशुद्धंचश्रूयतेनचविलक्षणत्वेप्रकृतिविकारभावोदृष्टःनहिरुचकादयोवि
कारामृत्प्रकृतिकाभवंतिशरावादयोवासुवर्णप्रकृतिकाःमृदेवतुमृदन्विताविकाराःक्रियंतेसुवर्णेनचसुवर्णान्विताःतथेदम

शां०भा०
॥३॥

पिजगदचेतनं सुखदुःखमोहान्वितं सत् अचेतनस्यैव सुखदुःखमोहात्मकस्य कारणस्य कार्यं भवितुमर्हतीति न विलक्षणस्य ब्रह्मणः ब्र
ह्मविलक्षणत्वं चास्य जगतोऽशुद्ध्यचेतनत्वदर्शनादवगंतव्यं अशुद्धं हीदं जगत्सुखदुःखमोहात्मकतया प्रीतिपरितापविषादादिहेतुत्वा
त्स्वर्गनरकाद्युच्चावचप्रपंचत्वाच्च अचेतनं चेदं जगच्चेतनं प्रतिकार्यकरणभावेनोपभावोपगमात् न हि साम्ये सत्युपकार्योपकारकभावो
भवति न हि प्रदीपौ परस्परस्योपकुरुतः ननु चेतनमपि कार्यकरणं स्वामिभृत्यन्यायेन भोक्तुरुपकरिष्यति न स्वामिभृत्ययोरप्यचेत
नांशस्यैव चेतनं प्रत्युपकारकत्वात् यो ह्येकस्य चेतनस्य परिग्रहो बुद्ध्यादिरचेतनभागः स एवान्यस्य चेतनस्योपकरोति न तु स्वयमेव चे
तनश्चेतनान्तरस्योपकरोत्युपकाराति वा निरतिशया ह्यकर्तारश्चेतना इति सांख्या मन्यन्ते तस्मादचेतनं कार्यकरणं न च काष्ठलो
ष्टादीनां चेतनत्वे किंचित्प्रमाणमस्ति प्रसिद्धश्चायं चेतनाचेतनप्रविभागो लोके तस्माद्ब्रह्मविलक्षणत्वान्नेदं जगत्तत्प्रकृतिकं यो
पि कश्चिदाचक्षीत श्रुत्वा जगतश्चेतनप्रकृतिकतां तद्बलेनैव समस्तं जगच्चेतनमवगमयिष्यामि प्रकृतिरूपस्य विकारेऽन्वयदर्शनात्
विभावनं तु चैतन्यस्य परिणामविशेषाद्भविष्यति यथा स्पष्टचैतन्यानामप्यात्मनां स्वापमूर्छाद्यवस्थासु चैतन्यं न विभाव्यते ए
वं काष्ठलोष्टादीनामपि चैतन्यं न विभावयिष्यते एतस्मादेव च विभावितत्वाविभावितत्वकृताद्विशेषाद्रूपादिभावाभावाभ्यां
च कार्यकरणानामात्मनां च चेतनत्वाविशेषेपि गुणप्रधानभावो न विरोत्स्यते तथा च पार्थिवत्वाविशेषेपि मांससूपौदनादीनां प्रत्या
त्मवर्तिनो विशेषात्परस्परोपकारित्वं भवत्येवमिहापि भविष्यति प्रविभागप्रसिद्धिरप्यत एव न विरोत्स्यते इति तेनापि कथंचिच्चे
तनाचेतनत्वाभिमतानां विलक्षणत्वं परिह्रियेत शुद्ध्यशुद्धिलक्षणं तु विलक्षणत्वं नैव परिह्रियते न चेतरदपि विलक्षणत्वं
परिहर्तुं शक्यत इत्याह तथात्वं च शब्दादिति ॥ अनवगम्यमानमेव हीदं लोके समस्तस्य वस्तुनश्चेतनत्वं चेतनप्रकृतिकत्वश्रव
णाच्छरणतया केवलयोत्प्रेक्ष्यते तच्च शब्देनैव विरुध्यते यतः शब्दादपि तथात्वमवगम्यते तथात्वमिति प्रकृतिविलक्षणत्वं क
थयति शब्द एव विज्ञानं चेति कस्यचिद्विभागस्याचेतनतां श्रावयन् चेतनाद्ब्रह्मणो विलक्षणमचेतनं जगच्छ्रावयति ॥ ननु चेतन ॥३॥
त्वमपि कस्यचिदचेतनत्वाभिमतानां भूतेंद्रियाणां श्रूयते यथा मृदब्रवीदापोऽब्रुवन्निति तत्तेज ऐक्षत ता आप ऐक्षंतेति चेत्येवमाद्या भू
तविषया चेतनत्वश्रुतिरिंद्रियविषयापि ते हेमे प्राणा अहंश्रेयसे विवदमाना ब्रह्म जग्मुरिति ते ह वाचमूचुस्त्वं न उद्गा

121/1913

येतीत्येवमाद्येंद्रियविषयेति अत उत्तरं पठति ॥ अभिमानिव्यपदेशस्तु विशेषानुगति ॥ ५ ॥ तुशब्द आशंकामपनुदति न खलु मृ
दब्रवीदित्येवंजातीयकया श्रुत्या भूतेंद्रियाणां चेतनत्वमाशंकनीयं यतोऽभिमानिन्यश्चेतना देवता वदनसंवदनादिषु चेतनोचि
तेषु व्यवहारेषु व्यपदिश्यंते न भूतेंद्रियमात्रं कस्मात् विशेषानुगतिभ्यां विशेषो हि भोक्तॄणां भूतेंद्रियाणां च चेतनाचेतनप्रविभाग
लक्षणः प्रागभिहितः सर्वचेतनतायां चासौ नोपपद्येतापि च कौषीतकिनः प्राणसंवादे करणमात्राशंकाविनिवृत्तयेऽधिष्ठातृ
चेतनपरिग्रहाय देवताशब्देन विशिंषंति ॥ एता ह वै देवता अहंश्रेयसे विवदमाना इति ता वा एताः सर्वा देवताः प्राणे निःश्रेयसं
विदित्वेति च अनुगताश्च सर्वत्राभिमानिन्यश्चेतना देवता मंत्रार्थवादेतिहासपुराणादिभ्योऽवगम्यंते ॥ अग्निर्वाग्भूत्वा मुखं प्रावि
शदित्येवमादिकाश्च श्रुतिः करणेष्वनुग्राहिकां देवतामनुगतां दर्शयति प्राणसंवादवाक्यशेषे च ते ह प्राणाः प्रजापतिं पितरमे
त्योचुरिति श्रैष्ठ्यनिर्धारणाय प्रजापतिगमनं तद्वचनाच्चैकैकोत्क्रमणेनान्वयव्यतिरेकाभ्यां प्राणश्रैष्ठ्यप्रतिपत्तिस्तस्मै बलिह
रणमिति चैवंजातीयकोऽस्मदादिष्विव व्यवहारोऽनुगम्यमानोऽभिमानिव्यपदेशं द्रढयति तत्तेज ऐक्षतेत्यपि परस्या देवताया अ
धिष्ठात्र्याः स्वविकारेष्वनुगताया इयमीक्षा व्यपदिश्यत इति द्रष्टव्यं तस्माद्विलक्षणमेवेदं ब्रह्मणो जगद्विलक्षणत्वाच्च न ब्रह्मप्रकृ
तिकमित्याक्षिप्ते प्रतिविधत्ते ॥ दृश्यते तु ॥ ६ ॥ तुशब्दः पक्षं व्यावर्तयति यदुक्तं विलक्षणत्वान्नेदं जगद्ब्रह्मप्रकृतिकमिति नायमेकांतो
दृश्यते हि लोके चेतनत्वेन प्रसिद्धेभ्यः पुरुषादिभ्यो विलक्षणानां केशनखादीनामुत्पत्तिरचेतनत्वेन च प्रसिद्धेभ्यो गोमयादिभ्यो वृ
श्चिकादीनां नन्वचेतनान्येव पुरुषादिशरीराण्यचेतनानां केशनखादीनां कारणानि ॥ अचेतनान्येव च वृश्चिकादिशरीराण्यचेत
नानां गोमयादीनां कार्याणीति उच्यते एवमपि किंचिदचेतनं चेतनस्यायतनभावमुपगच्छति किंचिन्नेत्यस्त्येव वैलक्षण्यं महांश्चा
यं पारिणामिकः स्वभावविप्रकर्षः पुरुषादीनां केशनखादीनां च रूपादिभेदात् ॥ तथा गोमयादीनां वृश्चिकादीनां चात्यंतसारूप्ये
च प्रकृतिविकारभाव एव प्रलीयेताथोच्येतास्ति कश्चित्पार्थिवत्वादिः स्वभावः पुरुषादीनां केशनखादिष्वनुवर्तमानो गोमयादीनां
वृश्चिकादिष्विति ॥ ब्रह्मणोऽपि तर्हि सत्तालक्षणः स्वभाव आकाशादिष्वनुवर्तमानो दृश्यते ॥ विलक्षणत्वेन च कारणेन ब्रह्मप्रकृ
तिकत्वं जगतो दूषयता किमशेषस्य ब्रह्मस्वभावस्याननुवर्तनं विलक्षणत्वमभिप्रेयते उत यस्य कस्यचित् ॥ अथ चैतन्यस्येति वक्तव्यं

प्रथमेकल्पेसमस्तप्रकृतिविकारविच्छेदप्रसंगः। नह्यसत्यतिशयेभवतिप्रकृतिविकारइति॥ द्वितीयेचासिद्धत्वं दृश्यतेहिसत्तालक्षणो
ब्रह्मस्वभावआकाशादिष्वनुवर्तमानइति। तृतीयेतुदृष्टान्ताभावः। किंहियच्चैतन्येनानन्वितंतद्ब्रह्मप्रकृतिकंदृष्टमितिब्रह्मवादिनं
प्रत्युदाह्रियेतसमस्तस्यवस्तुजातस्यब्रह्मप्रकृतिकत्वाभ्युपगमात्॥ आगमविरोधस्तुप्रसिद्धएवचेतनंब्रह्मजगतःकारणंप्रकृति
श्चेतिआगमतात्पर्यस्यप्रसाधितत्वात्। यत्तूक्तंपरिनिष्पन्नत्वात्ब्रह्मणिप्रमाणान्तराणिसंभवेयुरितितदपिमनोरथमात्रंरूपाद्यभा
वाद्धिनायमर्थःप्रत्यक्षस्यगोचरोलिंगाद्यभावाच्चनानुमानादीनां। आगममात्रसमधिगम्यएवत्वयमर्थोधर्मवत्। तथाचश्रुतिःनैषात
र्केणमतिरापनेयाप्रोक्तान्येनैवसुज्ञानायप्रेष्ठेतिकोऽद्धावेदकइहप्रवोचत्। इयंविसृष्टिर्यतआबभूवेतिचैतेऋचौसिद्धानामपी
श्वराणांदुर्बोधतांजगत्कारणस्यदर्शयतः॥ स्मृतिरपिभवति अचिन्त्याःखलुयेभावानतांस्तर्केणयोजयेदिति अव्यक्तोयमचिन्त्योय
मविकार्योयमुच्यतेइति नमेविदुःसुरगणाःप्रभवंनमहर्षयः अहमादिर्हिदेवानांमहर्षीणांचसर्वशइतिचैवंजातीयका। यदपिश्रवण
व्यतिरेकेणमननंविदधच्छब्दएवतर्कमप्यादर्तव्यंदर्शयतीत्युक्तंनानेनमिषेणशुष्कतर्कस्यात्रात्मलाभःसंभवति श्रुत्यनुगृहीतएव
ह्यत्रतर्कोनुभवांगत्वेनाश्रीयतेस्वप्नान्तबुद्धान्तयोरुभयोरितरेतरव्यभिचारादात्मनोनन्वागतत्वंसंप्रसादेचप्रपंचपरित्यागेनसदात्मनासंप
त्तेर्निष्प्रपंचसदात्मत्वंप्रपंचस्यचब्रह्मप्रभवत्वात्कार्यकारणानन्यत्वन्यायेनब्रह्माव्यतिरेकइत्येवंजातीयकः। तर्कोऽप्रतिष्ठानादिति
चकेवलस्यतर्कस्यविप्रलंभकत्वंप्रदर्शयिष्यति॥ योपिचेतनकारणश्रवणबलेनैवसमस्तस्यजगतश्चेतनतामुत्प्रेक्षेततस्यापि
विज्ञानंचाविज्ञानंचेतिचेतनाचेतनविभागश्रवणंविभावनाविभावनाभ्यांचैतन्यस्यशक्यतएवयोजयितुंपरस्यैवत्विदमपि
विभागश्रवणंनयुज्यतेकथंपरकारणस्यह्यत्रसमस्तजगदात्मनासमवस्थानंश्राव्यतेविज्ञानंचाविज्ञानंचाभवदितितत्रय
थाचेतनस्यचेतनभावोनोपपद्यतेविलक्षणत्वादेवमचेतनस्यापिचेतनभावोनोपपद्यत। प्रत्युक्तत्वात्तुविलक्षणत्वस्ययथा
श्रुत्यैवचेतनंकारणंग्रहीतव्यंभवति॥ असदितिचेन्नप्रतिषेधमात्रत्वात्॥ ७॥ यदिचेतनंशुद्धंशब्दादिहीनंचब्रह्मतद्विपरीत
तस्याशुद्धस्यशब्दादिमतश्चकार्यस्यकारणमिष्यतेअसत्तर्हिकार्यंप्रागुत्पत्तेरितिप्रसज्येत। अनिष्टंचैतत्सत्कार्यवादिनस्तवेति
चेन्नैषदोषःप्रतिषेधमात्रत्वात्प्रतिषेधमात्रंहीदंनास्यप्रतिषेधस्यप्रतिषेध्यमस्ति नह्ययंप्रतिषेधःप्रागुत्पत्तेःसत्त्वंकार्यस्यप्रति

123 | 1913

षेधःप्रागुत्पत्तेःप्रध्वंसाभावोऽपिकथंयथैवहीदानीमिदंकार्यंकारणात्मनासदेवंप्रागुत्पत्तेरपीतिगम्यते॥ नहीदानीमपीदंकार्यंकार
णात्मानमन्तरेणस्वतन्त्रमेवास्ति सर्वंतंपरादाद्योऽन्यत्रात्मनःसर्वंवेदेत्यादिश्रवणात् कारणात्मनातुसत्त्वंकार्यस्यप्रागुत्पत्तेरवि
शिष्टं ननुशब्दादिहीनंब्रह्मजगतःकारणंबाढंनतुशब्दादिमत्कार्यंकारणात्मनाहीनंप्रागुत्पत्तेरिदानींवास्तितेननशक्यतेवक्तुंप्रा
गुत्पत्तेरसत्कार्यमितिविस्तरेणचैतत्कार्यकारणानन्यत्ववादेवक्ष्यामः॥ अपीतौतद्वत्प्रसंगादसमंजसं॥ ८॥ अत्राहयदिस्थौल्य
सावयवत्वाचेतनत्वपरिच्छिन्नत्वाशुद्ध्यादिधर्मकंकार्यंब्रह्मकारणकमभ्युपगम्येततदपीतौप्रलयेप्रतिसंसृज्यमानंकार्यंकारणेऽ
विभागमापद्यमानंकारणमात्मीयेनधर्मेणदूषयेदित्यपीतौकारणस्यापिब्रह्मणःकार्यस्येवाशुद्ध्यादिरूपप्रसंगात्सर्वज्ञंब्रह्मजगतः
कारणमित्यसमंजसमिदमौपनिषदंदर्शनं॥ अपिचसमस्तस्यविभागस्याविभागप्राप्तेःपुनरुत्पत्तौनियमकारणाभावाद्भोक्तृभो
ग्यादिविभागेनोत्पत्तिर्नप्राप्नोतीत्यसमंजसं॥ अपिचभोक्तॄणांपरेणब्रह्मणाऽविभागंगतानांकर्मादिनिमित्तप्रलयेपिपुनरुत्पत्ताव
भ्युपगम्यमानायांमुक्तानामपिपुनरुत्पत्तिप्रसंगादसमंजसं अथेदंजगदपीतावपिविभक्तमेवपरेणब्रह्मणावतिष्ठेतएवमप्यपीतिश्च
नसंभवतिकारणाव्यतिरिक्तंचकार्यंनसंभवतीत्यसमंजसमेवेति॥ अत्रोच्यते॥ नतुदृष्टान्तभावात्॥ नैवास्मदीयेदर्शनेकिंचिदसामं
जस्यमस्तियत्तावदभिहितंकारणमपिगच्छत्कार्यंकारणमात्मीयेनधर्मेणदूषयेदितितदूषणंकस्मात्दृष्टान्तभावात्सन्तिहिदृष्टा
न्तायथाकारणमपिगच्छत्कार्यंकारणमात्मीयेनधर्मेणनदूषयतितद्यथाशरावादयोमृत्प्रकृतिकाविकाराविभागावस्थायामुच्चा
वचमध्यमप्रभेदाःसंतःपुनःप्रकृतिमपिगच्छंतोनतामात्मीयेनधर्मेणसंसृजंतिपृथ्वीविकारश्चचतुर्विधोभूतग्रामोनपृथिवीमपी
तावात्मीयेनधर्मेणसंसृजंतिरुचकादयःसुवर्णविकाराअपीतानसुवर्णमात्मीयेनधर्मेणसंसृजंतिपृथिवीविकारश्चचतु
र्विधोभूतग्रामोनपृथिवीमपीतावात्मीयेनधर्मेणसंसृजतित्वत्पक्षस्यतुनकश्चिद्दृष्टान्तोस्तिअपीतिरेवहिनसंभवेद्यदिकारणे
कार्यंस्वधर्मेणैवावतिष्ठेतअनन्यत्वेपिकार्यकारणयोःकार्यस्यकारणात्मत्वंनतुकारणस्यकार्यात्मत्वमारंभणशब्दादिभ्यइति
वक्ष्यामः॥ अत्यल्पंचेदमुच्यतेकार्यमपीतावात्मीयेनधर्मेणकारणंसंसृजेदितिस्थितावपिसमानोयंप्रसंगःकार्यकारणयोरनन्यत्वा
भ्युपगमादिदंसर्वंयदयमात्माआत्मैवेदंसर्वंब्रह्मैवेदममृतंपुरस्तात्सर्वंखल्विदंब्रह्मेत्येवमादिभिर्हिश्रुतिभिरविशेषेणत्रिष्व

ब्रं०भा० पिकालेषु कार्यस्य कारणानन्यत्वं श्राव्यते तत्रायं परिहारः कार्यस्य तद्धर्माणां चाविद्याध्यारोपितत्वान्न तैः कारणं संसृज्यत इत्यपीता
॥५॥ वपि समानो ऽस्ति चायमपरो दृष्टांतो यथा स्वयं प्रसारितया मायया मायावी त्रिष्वपि कालेषु न संस्पृश्यते ऽवस्तुत्वात् एवं परमात्मापि संसा
रमायया न संस्पृश्यत इति यथा च स्वप्नदृगेकः स्वप्नदर्शनमायया न संस्पृश्यते प्रबोधसंप्रसादयोरनन्वागतत्वात् एवमवस्थात्रयसाक्ष्ये
को ऽव्यभिचार्यवस्थात्रयेण व्यभिचारिणा न संस्पृश्यते मायामात्रं ह्येतत् यत्परमात्मनो ऽवस्थात्रयात्मनावभासनं रज्ज्वा इव सर्पादिभावेनेति
अत्रोक्तं वेदांतार्थसंप्रदायविद्भिराचार्यैः अनादिमायया सुप्तो यदा जीवः प्रबुध्यते॥ अजमनिद्रमस्वप्नमद्वैतं बुध्यते तदेति॥ तत्र यदुक्तम
पीतौ कारणस्यापि कार्यस्येव स्थौल्यादिदोषप्रसंग इति एतदयुक्तं॥ यत्पुनरुक्तं समस्तस्य विभागस्याविभागप्राप्तेः पुनर्विभागे नि
यमकारणं नोपपद्यत इति अयमप्यदोषो दृष्टांतभावादेव यथा हि सुषुप्तसमाध्यादावपि सत्यां स्वाभाविक्यामविभागप्राप्तौ मि-
थ्याज्ञानस्यानपोदितत्वात् पूर्ववत्पुनः प्रबोधे विभागो भवति एवमिहापि भविष्यति श्रुतिश्चात्र भवति इमाः सर्वाः प्रजाः सति संपद्य
न विदुः सति संपद्यामह इति त इह व्याघ्रो वा सिंहो वा वृको वा वराहो वा कीटो वा पतंगो वा दंशो वा मशको वा यद्यद्भवंति तदा भवंतीति य
था ह्यविभागे ऽपि परमात्मनि मिथ्याज्ञानप्रतिबद्धो विभागव्यवहारः स्वप्नवदव्याहतः स्थितो दृश्यत एवमपीतावपि मिथ्याज्ञानप्र
तिबद्धैव विभागशक्तिरनुमास्यते एतेन मुक्तानां पुनरुत्पत्तिप्रसंगः प्रत्युक्तः सम्यग्ज्ञानेन मिथ्याज्ञानस्यापोदितत्वात् यः पुनरयमंते वि
कल्प उत्प्रेक्षितो ऽथेदं जगदपीतावपि विभक्तमेव परेण ब्रह्मणावतिष्ठेतेति सो ऽप्यनभ्युपगमादेव प्रतिषिद्धः तस्मात्समंजसमिद
मौपनिषदं दर्शनं॥ स्वपक्षदोषाच्च॥१०॥ स्वपक्षे चैते प्रतिवादिनः साधारणा दोषाः प्रादुःष्युः प्रादुर्भवेयुः कथमित्युच्यते यत्तावद
भिहितं विलक्षणत्वान्नेदं जगद्ब्रह्मप्रकृतिकमिति प्रधानप्रकृतिकतायामपि समानमेतत् शब्दादिहीनात्प्रधानाच्छब्दादिमतो
जगत उत्पत्त्यभ्युपगमात् अत एव च विलक्षणकार्योत्पत्त्यभ्युपगमात्समानः प्रागुत्पत्तेरसत्कार्यवादप्रसंगः॥ तथापीतौ कार्यस्य
कारणाविभागाभ्युपगमात्समानस्तद्वत्प्रसंगो ऽपि॥ तथा मृदितसर्वविशेषेषु विकारेष्वपीतावविभागात्मतां गतेष्विदमस्य पु
रुषस्योपादानमिदमस्येति प्राक्प्रलयात्प्रतिपुरुषं ये नियता भेदा न ते तथैव पुनरुत्पत्तौ नियंतुं शक्यंते कारणाभावाद्विनैव का
रणेन नियमे ऽभ्युपगम्यमाने कारणाभावसाम्यान्मुक्तानामपि पुनर्बंधप्रसंगः। अथ केचिद्भेदा अपीतावविभागमा

125/1913

पद्यंते केचिन्नेति चेत् ये नापद्यंते तेषां प्रधानकार्यत्वं न प्राप्नोतीत्येवमेते दोषाः साधारणत्वान्नान्यतरस्मिन्पक्षे वाच्या भ
वंतीत्यदोषतामेवैषां द्रढयति अवश्याश्रयितव्यत्वात्॥ तर्काप्रतिष्ठानादप्यन्यथानुमेयमिति चेदेवमप्यविमोक्षप्रसंगः॥११॥ इ
तश्च नागमगम्ये ऽर्थे केवलेन तर्केण प्रत्यवस्थातव्यं यस्मान्निरागमाः पुरुषोत्प्रेक्षामात्रनिबंधनास्तर्का अप्रतिष्ठिता भवंति उत्प्रे
क्षाया निरंकुशत्वात् तथा हि कैश्चिदभियुक्तैर्यत्नेनोत्प्रेक्षितकल्पनास्तर्का अभियुक्ततरैरन्यैराभास्यमाना दृश्यंते तैरप्युत्प्रेक्षिता
स्संतस्तदन्यैराभास्यंत इति न प्रतिष्ठितत्वं तर्काणां शक्यमाश्रयितुं पुरुषमतिवैरूप्यात् अथ कस्यचित्प्रसिद्धमाहात्म्यस्य कपिल-
स्य वान्यस्य वा संमतस्तर्कः प्रतिष्ठित इत्याश्रीयेत एवमप्यप्रतिष्ठितत्वमेव प्रसिद्धमाहात्म्याभिमतानामपि तीर्थकाराणां कपिल
कणभुक्प्रभृतीनां परस्परविप्रतिपत्तिदर्शनात्॥ अथोच्येत अन्यथा वयमनुमास्यामहे यथा नाप्रतिष्ठादोषो भविष्यतीति न हि
प्रतिष्ठितस्तर्क एव नास्तीति शक्यते वक्तुम् एतदपि हि तर्काणामप्रतिष्ठितत्वं तर्केणैव व्यवस्थाप्यते केषांचित्तर्काणामप्रतिष्ठितत्वदर्श
नेनान्येषामपि तज्जातीयकानामप्रतिष्ठितत्वप्रकल्पनात् सर्वतर्काप्रतिष्ठायां च लोकव्यवहारोच्छेदप्रसंगो ऽतीतवर्तमानाध्वसाम्येन
ह्यनागते ऽप्यध्वनि सुखदुःखप्राप्तिपरिहाराय प्रवर्तमानो लोको दृश्यते श्रुत्यर्थविप्रतिपत्तौ चार्थाभासनिराकरणेन सम्यगर्थनिर्धा
रणं तर्केणैव वाक्यवृत्तिनिरूपणरूपेण क्रियते मनुरपि चैवं मन्यते प्रत्यक्षमनुमानं च शास्त्रं च विविधागमं त्रयं सुविदितं कार्यं धर्मशु
द्धिमभीप्सता इति आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना यस्तर्केणानुसंधत्ते स धर्मं वेद नेतर इति च ब्रुवन् अयमेव च तर्कस्यालंका
रो यदप्रतिष्ठितत्वं नामैवं हि सावद्यतर्कपरित्यागेन निरवद्यस्तर्कः प्रतिपत्तव्यो भवति न हि पूर्वजो मूढ आसीदित्यात्मनापि मूढेन भ
वितव्यमिति किंचिदस्ति प्रमाणं तस्मान्न तर्काप्रतिष्ठानं दोष इति चेत् एवमप्यविमोक्षप्रसंगः॥ यद्यपि क्वचित्॥ विषये तर्कस्य
प्रतिष्ठितत्वमुपलक्ष्यते तथापि प्रकृते तावद्विषये प्रसज्यत एवाप्रतिष्ठितत्वदोषादनिर्मोक्षस्तर्कस्य न हीदमतिगंभीरं भावयाथात्म्यं
मुक्तिनिबंधनमागममंतरेणोत्प्रेक्षितुमपि शक्यं रूपाद्यभावाद्धि नायमर्थः प्रत्यक्षगोचरो लिंगाद्यभावाच्च नानुमानादीनामि
ति चावोचाम अपि च सम्यग्ज्ञानान्मोक्ष इति सर्वेषां मोक्षवादिनामभ्युपगमः तच्च सम्यग्ज्ञानमित्युच्यते यथाग्निरुष्ण इति
तत्रैवं सति सम्यग्ज्ञाने पुरुषाणां विप्रतिपत्तिरनुपपन्ना तर्कज्ञानानां त्वन्योन्यविरोधात्प्रसिद्धा विप्रतिपत्तिः यद्धि केनचित्तार्किके

शां०भा०
॥ ६॥

णेदं भवेत्सम्यग्ज्ञानमिति प्रतिष्ठापितं तदपरेण व्युत्थाप्यत इति प्रसिद्धं लोके कथमेकरूपानवस्थितविषयं तर्कप्रभवं सम्यग्ज्ञानं
भवेत् न च प्रधानवादी तर्कविदामुत्तम इति सर्वैस्तार्किकैः परिगृहीतो येन तदीयं मतं सम्यग्ज्ञानमिति प्रतिपद्येमहि न च शक्यं
ते। अतीतानागतवर्तमानास्तार्किका एकस्मिन्देशे काले च समाहर्तुं येन तन्मतिरेकरूपैकार्थविषया सम्यङ्मतिरिति स्यात् वेदस्य
तु नित्यत्वे विज्ञानोत्पत्तिहेतुत्वे च सति व्यवस्थितार्थविषयत्वोपपत्तेस्तज्जनितस्य ज्ञानस्य सम्यक्त्वमतीतानागतवर्तमानैः सर्वैरपि ता
र्किकैरपह्नोतुमशक्यं अतः सिद्धमस्यैवौपनिषदस्य ज्ञानस्य सम्यग्ज्ञानत्वमतोऽन्यत्र सम्यग्ज्ञानत्वानुपपत्तेः संसाराविमोक्ष ए
व प्रसज्येतातश्चागमवशेनागमानुसारितर्कवशेन च चेतनं ब्रह्म जगतः कारणं प्रकृतिश्चेति स्थितं ॥ एतेन शिष्टापरिग्रहा अपि व्या
ख्याताः॥११॥ वैदिकस्य दर्शनस्य प्रत्यासन्नत्वाद्गुरुतरतर्कबलोपेतत्वाद्वेदानुसारिभिश्च कैश्चित् शिष्टैः केनचिदंशेन परिगृ
हीतत्वात्प्रधानकारणवादं तावद्व्यपाश्रित्य यस्तर्कनिमित्त आक्षेपो वेदान्तवाक्येषूद्भावितः स परिहृतः इदानीमण्वादिवादव्यपा
श्रयेण कैश्चित्तु मन्दमतिभिर्वेदान्तवाक्येषु पुनस्तर्कनिमित्त आक्षेपकल्पनातर्कः आशंक्यत इत्यतः प्रधानमल्लनिबर्हण
न्यायेनातिदिशति परिगृह्यन्त इति परिग्रहाः न परिग्रहाः अपरिग्रहाः शिष्टानामपरिग्रहाः शिष्टापरिग्रहाः एतेन प्रकृतेन प्र
धानकारणवादनिराकरणेन शिष्टैर्मनुव्यासप्रभृतिभिः केनचिदप्यंशेनापरिगृहीता येऽण्वादिकारणवादास्तेऽपि प्रतिषिद्धतया
व्याख्याता निराकृता द्रष्टव्याः तुल्यत्वान्निराकरणकारणस्य नात्राशंकितव्यं पुनः किंचिदस्ति। तुल्यमत्रापि परमगंभीरस्य जगत्कारण
स्य तर्कानवगाह्यत्वं तर्कस्य चाप्रतिष्ठितत्वं अन्यथानुमानेऽप्यविमोक्षः आगमविरोधश्चेत्येवंजातीयकं निराकरणकारणं॥ भोक्त्रा
पत्तेरविभागश्चेत्स्याल्लोकवत्॥१२॥ अन्यथा पुनर्ब्रह्मकारणवादस्तर्कबलेनैवाक्षिप्यते यद्यपि श्रुतिः प्रमाणं स्वविषये भवति ॥ ६॥
तथापि प्रमाणांतरेण विषयापहारेऽन्यपरा भवितुमर्हति यथा मंत्रार्थवादौ तर्कोऽपि स्वविषयादन्यत्राप्रतिष्ठितः स्याद्यथा धर्मा
शंखवत्कपालवत्तत्कपालं शुचि प्राण्यंगत्वात् यत्तत्प्राण्यंगं तत्तत् शुचि यथा शंखः धर्मयोः किमतो यद्येवं अत इदमयु
क्तं यत्प्रमाणांतरप्रसिद्धार्थबाधनं श्रुतेः कथं पुनः प्रमाणांतरप्रसिद्धोऽर्थः श्रुत्या बाध्यत इति उच्यते प्रसिद्धो ह्ययं भोक्तृभोग्यविभा
गो लोके भोक्ता शारीरः चेतनः भोग्याः शब्दादयो विषया इति यथा भोक्ता देवदत्तो भोज्य ओदन इति तस्य च विभागस्याभावः॥

127/1913

प्रसज्येत यदि भोक्ता भोग्यभावमापद्येत भोग्यं वा भोक्तृभावमापद्येत तयोश्चेतरेतरभावापत्तिः परमकारणाद्ब्रह्मणोऽन
न्यत्वात्प्रसज्येत न चास्य प्रसिद्धस्य विभागस्य बाधनं युक्तं यथा त्वद्यत्वे भोक्तृभोग्ययोर्विभागो दृष्टस्तथातीतानागतयोरपि क
ल्पयितव्यस्तस्मात्प्रसिद्धस्यास्य भोक्तृभोग्यविभागस्याभावप्रसंगादयुक्तमिदं ब्रह्मकारणतावधारणमिति चेत् कश्चिच्चो
दयेत्तं प्रति ब्रूयात् स्याल्लोकवदिति उपपद्यत एवायमस्मत्पक्षेऽपि विभागः एवं लोके दृष्टत्वात् तथाहि समुद्रादुदकात्मनोऽनन्यत्वेऽपि त
द्विकाराणां फेनवीचीतरंगबुद्बुदादीनामितरेतरविभाग इतरेतरसंश्लेषादिलक्षणश्च व्यवहार उपलभ्यते न च समुद्रात्मनोऽन
न्यत्वेऽपि फेनतरंगादीनामितरेतरभावापत्तिर्भवति। न च तेषामितरेतरभावानापत्तावपि समुद्रात्मनोऽन्यत्वं भवति। एवमिहापि
न च भोक्तृभोग्ययोरितरेतरभावापत्तिर्न च परस्माद्ब्रह्मणोऽन्यत्वमिति भविष्यति यद्यपि भोक्ता न ब्रह्मणो विकारस्तत्सृष्ट्वा तदेवा
नुप्राविशदिति स्रष्टुरेवाविकृतस्य कार्यानुप्रवेशेन भोक्तृत्वश्रवणात्तथापि कार्यमनुप्रविष्टस्यास्त्युपाधिनिमित्तो विभागः आ
काशस्येव घटाद्युपाधिनिमित्त इत्यतः परमकारणाद्ब्रह्मणोऽनन्यत्वेऽप्युपपद्यते भोक्तृभोग्यलक्षणो विभागः समुद्रतरंगन्याये
नेत्युक्तं॥ तदनन्यत्वमारंभणशब्दादिभ्यः॥१३॥ अभ्युपगम्य चेमं व्यावहारिकं भोक्तृभोग्यलक्षणं विभागं स्याल्लोकवदिति
परिहारोऽभिहितो न त्वयं विभागः परमार्थतोऽस्ति यस्मात्तयोः कार्यकारणयोरनन्यत्वमवगम्यते कार्यमाकाशादिकं बहुप्रपंचं जगत्का
रणं परं ब्रह्म तस्मात्कारणात्परमार्थतोऽनन्यत्वं व्यतिरेकेणाभावः कार्यस्यावगम्यते कुतः आरंभणशब्दादिभ्यः आरंभणशब्द
स्तावदेकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय दृष्टान्तापेक्षायामुच्यते यथा सोम्यैकेन मृत्पिंडेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारंभणं
विकारो नामधेयं मृत्तिकेत्येव सत्यमिति एतदुक्तं भवति एकेन मृत्पिंडेन परमार्थतो मृदात्मना विज्ञातेन सर्वं मृन्मयं घटशरावोदंच
नादिकं मृदात्मत्वाविशेषाद्विज्ञातं भवेत् यतो वाचारंभणं विकारो नामधेयं वाचैव केवलमस्तीत्यारभ्यते विकारो घटः शराव उ
दंचनमिति न तु वस्तुवृत्तेन विकारो नाम कश्चिदस्ति नामधेयमात्रं ह्येतदनृतं मृत्तिकेत्येव सत्यमित्येष ब्रह्मणो दृष्टांत आम्ना
तः तत्र श्रुताद्वाचारंभणशब्दाद्दार्ष्टान्तिकेऽपि ब्रह्मव्यतिरेकेण कार्यजातस्याभाव इति गम्यते पुनश्च तेजोबन्नानां ब्रह्मकार्यता
मुक्त्वा तेजोबन्नकार्याणां तेजोबन्नव्यतिरेकेणाभावं ब्रवीति अपागादग्नेरग्नित्वं वाचारंभणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यमिति भा

शां॰भा॰
॥७॥

तिप्रियनामरूपेणीत्येव सधर्मित्यादिना आरंभणशब्दादिभ्य इत्यादिशब्दोदितदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि॥ इदं सर्वं य
दयमात्मा ब्रह्मैवेदं सर्वं। आत्मैवेदं सर्वं नेह नानास्ति किंचन नेत्येवमाद्यात्मैकत्वप्रतिपादनपरं वचनजालमुदाहर्तव्यं न चान्यथैकविज्ञाने
न सर्वविज्ञानं संपद्यते तस्माद्यथा घटकरकाद्याकाशानां महाकाशादनन्यत्वं यथा च मृगतृष्णिकोदकादीनामूषरादिभ्योऽनन्यत्वं
दृष्टनष्टस्वरूपत्वात्स्वरूपेणानुपाख्यत्वादेवमस्य भोग्यभोक्त्रादिप्रपंचस्य ब्रह्मव्यतिरेकेणाभाव इति द्रष्टव्यं ननु अनेकात्मकं ब्रह्म यथा
वृक्षोऽनेकशाख एवमनेकशक्तिप्रवृत्तियुक्तं ब्रह्म अत एकत्वं नानात्वं चोभयमपि सत्यमेव यथा वृक्ष इत्येकत्वं शाखा इति च
नानात्वं यथा च समुद्रात्मनैकत्वं फेनतरंगाद्यात्मना नानात्वं यथा च मृदात्मनैकत्वं घटशरावाद्यात्मना नानात्वं तत्रैकत्वांशेन ज्ञाना
न्मोक्षव्यवहारः सेत्स्यति नानात्वांशेन तु कर्मकांडाश्रयौ लौकिकवैदिकव्यवहारौ सेत्स्यत इति एवं च मृदादिदृष्टांता अनुरूपा
भविष्यंतीति नैवं स्यात् मृत्तिकेत्येव सत्यमिति प्रकृतिमात्रस्य दृष्टांते सत्यत्वावधारणाद्वाचारंभणशब्देन च विकारजातस्यानृतत्वाभिधाना
द्दार्ष्टांतिकेऽप्यैतदात्म्यमिदं सर्वं तत्सत्यमिति च परमकारणस्यैवैकस्य सत्यत्वावधारणात्स आत्मा तत्त्वमसि श्वेतकेतो इति च शारीर
स्य ब्रह्मभावोपदेशात्स्वयंप्रसिद्धं ह्येतच्छारीरस्य ब्रह्मात्मत्वमुपदिश्यते न यत्नांतरप्रसाध्यमतश्चेदं शास्त्रीयं ब्रह्मात्मत्वमवगम्यमा
नं स्वाभाविकस्य शारीरात्मत्वस्य बाधकं संपद्यते रज्ज्वादिबुद्धय इव सर्पादिबुद्धीनां बाधिते च शारीरात्मत्वे तदाश्रयः समस्तः स्वाभा
विको व्यवहारो बाधितो भवति यत्प्रसिद्धये नानात्वांशोऽपरो ब्रह्मणः कल्प्येत दर्शयति च यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्ये
दित्यादिना ब्रह्मात्मत्वदर्शिनं प्रति समस्तक्रियाकारकफललक्षणव्यवहारस्याभावं न चायं व्यवहाराभावोऽवस्थाविशेष
निबद्धोऽभिधीयत इति युक्तं वक्तुं तत्त्वमसीति ब्रह्मात्मभावस्यानवस्थाविशेषनिबंधनत्वात् तस्करदृष्टांतेन चानृताभिसंध
स्य बंधनं सत्याभिसंधस्य च मोक्षं दर्शयन्नेकत्वमेवैकं पारमार्थिकं दर्शयति मिथ्याज्ञानविजृंभितं च नानात्वमुभयसत्य ॥७॥
तायां हि कथं व्यवहारगोचरोऽपि जंतुरनृताभिसंध इत्युच्येत मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यतीति भेददृष्टिमप
वदन्नेवैतद्दर्शयति न चास्मिन्दर्शने ज्ञानान्मोक्ष इत्युपपद्यते सम्यग्ज्ञानापनोद्यस्य कस्यचिन्मिथ्याज्ञानस्य संसारकारण
त्वेनानभ्युपगमादुभयसत्यतायां हि कथमेकत्वज्ञानेन नानात्वज्ञानमपनुद्यत इत्युच्यते ननु एकत्वैकांताभ्युपगमे नानात्वाभावा

129/1913

त्प्रत्यक्षादीनि लौकिकानि प्रमाणानि व्याहन्येरन् निर्विषयत्वात्स्थाण्वादिष्विव पुरुषादिज्ञानानि तथा विधिप्रतिषेधशास्त्रमपि
भेदापेक्षत्वात्तदभावे व्याहन्येत। मोक्षशास्त्रस्यापि शिष्यशासित्रादिभेदापेक्षत्वात्तदभावे व्याघातः स्यात्॥ कथं चानृतेन मोक्षशा
ण स्त्रेण प्रतिपादितस्यात्मैकत्वस्य सत्यत्वमुपपद्येतेति अत्रोच्यते नैष दोषः सर्वव्यवहाराणामेव प्राग्ब्रह्मात्मताविज्ञानात्सत्यत्वो
पपत्तेः स्वप्नव्यवहारस्येव प्राक्प्रबोधात् यावद्धि न सत्यात्मैकत्वप्रतिपत्तिस्तावत्प्रमाणप्रमेयफललक्षणेषु विकारेष्वनृतबुद्धि
र्न कस्यचिदुत्पद्यते विकारानेव त्वहं ममेत्यविद्ययात्मात्मीयभावेन सर्वो जंतुः प्रतिपद्यते स्वाभाविकीं ब्रह्मात्मतां हित्वा तस्मात्प्राक्ब्र
ह्मात्मताप्रतिबोधादुपपन्नः सर्वो लौकिको वैदिकश्च व्यवहारो यथा सुप्तस्य प्राकृतस्य जनस्य स्वप्ने उच्चावचान् भावान्पश्य
तो निश्चितमेव प्रत्यक्षाभिमतं ज्ञानं भवति प्राक्प्रबोधान्न च प्रत्यक्षाभासाभिप्रायस्तत्काले भवति तद्वत्कथं त्वसत्येन वेदांतवाक्ये
न सत्यस्य ब्रह्मात्मत्वस्य प्रतिपत्तिरुपपद्येत न हि रज्जुसर्पेण दष्टो म्रियते नापि मृगतृष्णिकांभसा पानावगाहनादिप्रयोजनं क्रियते
इति नैष दोषः शंकाविषादिनिमित्तमरणादिकार्योपलब्धेः स्वप्नदर्शनावस्थस्य च सर्पदंशनोदकस्नानादिकार्यदर्शनात्तत्कार्यम
प्यनृतमेवेति चेत् ब्रूयात् अत्र ब्रूमः। यद्यपि स्वप्नदर्शनावस्थस्य सर्पदंशनोदकस्नानादिकार्यमप्यनृतं तथापि तदवगतिः सत्यमेव
फलं प्रतिबुद्धस्याप्यबाध्यमानत्वात्॥ न हि स्वप्नादुत्थितः स्वप्नदृष्टं सर्पदंशनोदकस्नानादिकार्यं मिथ्येति मन्यमानस्तदवगति
मपि मिथ्येति मन्यते कश्चित् एतेन स्वप्नदृशोऽवगत्यबाधनेन देहमात्रात्मवादो दूषितो वेदितव्यः तथा च श्रुतिः यदा कर्मसु का
म्येषु स्त्रियं स्वप्नेषु पश्यति। समृद्धिं तत्र जानीयात्तस्मिन्स्वप्ननिदर्शने इत्यसत्येन स्वप्नदर्शनेन सत्यायाः समृद्धेः प्रतिपत्तिं दर्शयति तथा
प्रत्यक्षदर्शनेषु केषुचिदरिष्टेषु जातेषु न चिरमिव जीविष्यतीति विद्यादित्युक्त्वा अथ यः स्वप्ने पुरुषं कृष्णं कृष्णदंतं पश्यति स ए
नं हंतीत्यादिना तेनैतेनासत्येन स्वप्नदर्शनेन सत्यं मरणं सूच्यत इति दर्शयति प्रसिद्धं चेदं लोके अन्वयव्यतिरेककुशलानामी
दृशेन स्वप्नदर्शनेन साध्वागमः सूच्यते ईदृशेनासाध्वागम इति तथाकारादिसत्याक्षरप्रतिपत्तिर्दृष्टा रेखानृताक्षरप्रतिपत्तेः अ
पि चांत्यमिदं प्रमाणमात्मैकत्वस्य प्रतिपादकं नातः परं किंचिदाकांक्ष्यमस्ति यथा हि यजेतेत्युक्ते किं केन कथमित्याकांक्ष्यते नैवं त
त्त्वमसीत्युक्ते किंचिदन्यदाकांक्ष्यमस्ति सर्वात्मैकत्वविषयत्वादवगतेः सति ह्यन्यस्मिन्नवशिष्यमाणेऽर्थ आकांक्षा स्यान्न त्वा

त्मैकत्वव्यतिरेकेणावशिष्यमाणोन्योर्थोस्ति य आकांक्ष्येत न चेयमवगतिर्नोत्पद्यत इति शक्यं वक्तुं तद्धास्य विजज्ञाविति इत्यादिश्रुतिभ्योवग
तिसाधनानां च श्रवणादीनां वेदानुवचनादीनां च विधानात् न चेयमवगतिरनर्थिका भ्रांतिर्वेति शक्यं वक्तुं अविद्यानिवृत्तिफलदर्शनात्
बाधकज्ञानांतराभावाच्च प्राक् चात्मैकत्वावगतेरव्याहतः सर्वः सत्यानृतव्यवहारो लौकिको वैदिकश्चेत्यवोचाम तस्मादनेन प्रमा
णेन प्रतिपादितआत्मैकत्वे समस्तस्य प्राचीनस्य भेदव्यवहारस्य बाधितत्वान्नानेकात्मकब्रह्मकल्पनावकाशोस्ति ननु मृदादिदृष्टांत
प्रणयनात् परिणामवत् ब्रह्म शास्त्रस्याभिमतमिति गम्यते परिणामिनो हि मृदादयोर्था लोके समधिगता इति नेत्युच्यते स वा एषः
महानज आत्माजरोमरोमृतोभयो ब्रह्म स एष नेति नेत्यात्मास्थूलमनण्वित्यादिभ्यः सर्वविक्रियाप्रतिषेधश्रुतिभ्यो ब्रह्मणः कूटस्थ
त्वावगमात् न ह्येकस्य ब्रह्मणः परिणामधर्मत्वं तद्रहितत्वं च शक्यं प्रतिपत्तुं स्थितिगतिवत्स्यादिति चेन्न कूटस्थस्येति विशेषणात् न हि
कूटस्थस्य ब्रह्मणः स्थितिगतिवदनेकधर्माश्रयत्वं संभवति कूटस्थं नित्यं च ब्रह्म सर्वविक्रियाप्रतिषेधादित्यवोचाम न च यथा ब्रह्मण
आत्मैकत्वदर्शनं मोक्षसाधनं एवं जगदाकारपरिणामित्वदर्शनमपि स्वतंत्रमेव कस्मैचित्फलायाभिप्रेयते प्रमाणाभावात् कूटस्थब्रह्मात्म
विज्ञानादेव हि फलं दर्शयति शास्त्रं स एष नेति नेत्यात्मेत्युपक्रम्याभयं वै जनक प्राप्तोसीत्येवंजातीयकं । तत्रैतत्सिद्धं भवति ब्रह्मप्रकरणे
सर्वधर्मविशेषरहितब्रह्मदर्शनादेव फलसिद्धौ सत्यां यत्तत्राफलं श्रूयते ब्रह्मणो जगदाकारपरिणामित्वादि तद्ब्रह्मदर्शनोपायत्वेनैव
विनियुज्यते । फलवत्संनिधावफलं वायव्यं श्वेतमालभेत भूतिकामः ॥ वायुर्वै क्षेपिष्ठा देवतेति तदंगमिति च न तु स्वतंत्रं फलाय कल्प्यत
इति न हि परिणामवत्त्वविज्ञानात्परिणामवत्त्वमात्मनः फलं स्यादिति युक्तं वक्तुं कूटस्थनित्यत्वान्मोक्षस्य । ननु कूटस्थब्रह्मात्मवादिन ए
कत्वैकांतादीशित्रीशितव्याभावे ईश्वरकारणत्वप्रतिज्ञाविरोध इति चेन्न अविद्यात्मकनामरूपबीजव्याकरणापेक्षत्वात्सर्वज्ञत्वस्य तस्मा
द्वा एतस्मादात्मन आकाशः संभूत इत्यादिवाक्येभ्यो नित्यशुद्धबुद्धमुक्तस्वरूपात्सर्वज्ञात्सर्वशक्तेरीश्वराज्जगज्जनिस्थितिलयाः नाचेतना
त्प्रधानादन्यस्माद्वेत्येषोर्थः प्रतिज्ञातो जन्माद्यस्य यत इति सा प्रतिज्ञा तदवस्थैव न तद्विरुद्धोर्थः पुनरिहोच्यते कथं नोच्यते । अत्यंतमात्मन एकत्व ॥ ८॥
मद्वितीयत्वं च ब्रुवता शृणु यथा नोच्यते सर्वज्ञस्येश्वरस्यात्मभूते इवाविद्याकल्पिते नामरूपे तत्त्वान्यत्वाभ्यामनिर्वचनीये संसारप्र
पंचबीजभूते सर्वज्ञस्येश्वरस्य माया शक्तिः प्रकृतिरिति श्रुतिस्मृत्योरभिलप्येते ताभ्यामन्यः सर्वज्ञ ईश्वरः आकाशो वै नाम नामरूपयो

1311/1913

र्निर्वहिता ते यदंतरा तद्ब्रह्मेति श्रुतेः नामरूपे व्याकरवाणि सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाभिवदन्यदास्ते
एकं बीजं बहुधा यः करोतीत्यादिश्रुतिभ्यश्च एवमविद्याकृतनामरूपोपाध्यनुरोधीश्वरो भवति व्योमेव घटकरकाद्युपाध्यनुरोधि
स च स्वात्मभूतानेव घटाकाशस्थानीयानविद्याप्रत्युपस्थापितनामरूपकृतकार्यकारणसंघातानुरोधिनो जीवाख्यान्विज्ञानात्मनः प्रती
ष्टे व्यवहारविषये तदेवमविद्यात्मकोपाधिपरिच्छेदापेक्षमेवेश्वरस्येश्वरत्वं सर्वज्ञत्वं सर्वशक्तित्वं च न परमार्थतो विद्ययापास्तसर्वो
पाधिस्वरूपे आत्मनीशित्रीशितव्यसर्वज्ञत्वादिव्यवहार उपपद्यते तथा चोक्तं यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भू
मेति यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदित्यादि च एवं परमार्थावस्थायां सर्वव्यवहाराभावं वदंति वेदांताः तथेश्वरगीतास्वपि न कर्तृ
त्वं न कर्माणि लोकस्य सृजति प्रभुः न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः अज्ञानेनावृतं
ज्ञानं तेन मुह्यंति जंतव इति परमार्थावस्थायामीशित्रीशितव्यादिव्यवहाराभावः प्रदर्श्यते ॥ व्यवहारावस्थायां तूक्तः श्रुतावपीश्व
रादिव्यवहारः एष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसंभेदायेति तथेश्वरगीतास्वपि ईश्वरः
सर्वभूतानां हृद्देशेर्जुन तिष्ठति भ्रामयन्सर्वभूतानि यंत्रारूढानि माययेति सूत्रकारोपि परमार्थाभिप्रायेण तदनन्यत्वमित्याह व्यव
हाराभिप्रायेण तु स्याल्लोकवदिति महासमुद्रादिस्थानीयतां ब्रह्मणः कथयति अप्रत्याख्यायैव कार्यप्रपंचं परिणामविव
र्तप्रक्रियां चाश्रयति सगुणेषूपासनेषूपयोक्ष्यत इति । भावे चोपलब्धेः ॥ १४ ॥ इतश्च कारणादनन्यत्वं कार्यस्य यत्कारणं भाव एव
कारणस्य कार्यमुपलभ्यते नाभावे तद्यथा सत्यां मृदि घट उपलभ्यते सत्सु च तंतुषु पटो न च नियमेनान्यभावेन्यस्योपलब्धिः
र्नियता दृष्टा न ह्यश्वो गोरन्यः सन् गोर्भाव एवोपलभ्यते न च कुलालभाव एव घट उपलभ्यते सत्यपि निमित्तनैमित्तिकभा
वेन्यत्वान्नन्वन्यस्य भावेप्यन्यस्योपलब्धिर्नियता दृश्यते यथाग्निभावे धूमस्येति नेत्युच्यते उद्वापितेप्यग्नौ गोपालदहिकी
सोधीदाहनीघटिकादिधारितस्य धूमस्य दृश्यमानत्वादथ धूमं कयाचिदवस्थया विशिंष्यादीदृशो धूमो नासत्यग्नौ भवतीति
नैवमपि कश्चिद्दोषः तद्भावानुरोधिनी हि बुद्धिः कार्यकारणयोरनन्यत्वहेतुं वयं वदामः न चासावग्निधूमयोर्विद्यते । भावाच्चोप
लब्धेरिति वा सूत्रं केवलशब्दादेव कार्यकारणयोरनन्यत्वं प्रत्यक्षोपलब्धिभावाच्च तयोरनन्यत्वमित्यर्थः भवति हि प्रत्यक्षोपल

ब्रं॰भा॰ व्यैः कार्यकारणयोरनन्यत्वं तद्यथा तंतुसंस्थाने पटे तंतुव्यतिरेकेण पटो नाम कार्यं नैवोपलभ्यते केवलास्तु तंतव आतानवितानवंतः
॥२१॥ प्रत्यक्षमुपलभ्यंते ॥ तथा तंतुष्वंशवोंऽशुषु तदवयवाः अनेन प्रत्यक्षोपलब्ध्या लोहितशुक्लकृष्णानि त्रीणि रूपाणि ततो वायुमात्रमाकाश
मात्रं चेत्युत्रेयं ततः परं ब्रह्मैकमेवाद्वितीयं । तत्र सर्वप्रमाणानां निष्ठामवोचाम ॥ सत्वाच्चावरस्य ॥१५॥ इतश्च कारणात् कार्यस्यानन्यत्वं
यत्कारणं प्रागुत्पत्तेः कारणात्मनैव कारणे सत्वमवरकालीनस्य कार्यस्य श्रूयते सदेव सोम्येदमग्र आसीदात्मा वा इदमेक एवाग्र आ
सीदित्यादाविदंशब्दगृहीतस्य कार्यस्य कारणेन सामानाधिकरण्यात् यच्च यदात्मना यत्र न प्रवर्तते न तत्तत उत्पद्यते यथा सिकताभ्यस्तैलं
तस्मात्प्रागुत्पत्तेरनन्यत्वादुत्पन्नमप्यनन्यदेव कारणात्कार्यमित्यवगम्यते ॥ यथा च कारणं ब्रह्म त्रिषु कालेषु सत्वं न व्यभिचरति एवं च
पुनः सत्वं अतोऽप्यनन्यत्वं कारणात्कार्यस्य ॥ असद्व्यपदेशान्नेति चेन्न धर्मांतरेण वाक्यशेषात् ॥१६॥ ननु क्वचिदसत्वमपि प्रागुत्पत्तेः कार्य
प स्य व्यपदिशति श्रुतिः असदेवेदमग्र आसीदिति असद्वा इदमग्र आसीदिति च तस्मादसद्व्यपदेशान्न प्रागुत्पत्तेः कार्यस्य सत्वमिति चेन्नेति ब्रू
मः नह्ययमत्यंतासत्वाभिप्रायेण प्रागुत्पत्तेः कार्यस्यासद्व्यपदेशः किं तर्हि व्याकृतनामरूपत्वाद्धर्मादव्याकृतनामरूपत्वं धर्मांतरं तेन
धर्मांतरेणायमसद्व्यपदेशः प्रागुत्पत्तेः सत एव कार्यस्य कथमेवमवगम्यते वाक्यशेषात् यदुपक्रमे संदिग्धार्थं वाक्यं तच्छेषान्निश्ची
यते इह च तावदसदेवेदमग्र आसीदित्यसच्छब्देनोपक्रमे निर्दिष्टं यत्तदेव पुनस्तच्छब्देन परामृश्य सदिति विशिनष्टि तत्सदासीदि
ति असतश्च पूर्वापरकालासंबंधादासीच्छब्दानुपपत्तेश्च असद्वा इदमग्र आसीदित्यत्रापि तदात्मानं स्वयमकुरुतेति वाक्यशेषे विशे
षणान्नात्यंतासत्वं तस्माद्धर्मांतरेणैवायमसद्व्यपदेशः प्रागुत्पत्तेः कार्यस्य नामरूपव्याकृतं वस्तु सच्छब्दार्हं लोके प्रसिद्धं अतः प्राक्
वा नामरूपव्याकरणादसदिवासीदित्युपचर्यते ॥ युक्तेः शब्दांतराच्च ॥१७॥ युक्तेश्च प्रागुत्पत्तेः कार्यस्य सत्वमनन्यत्वं च कारणा
दवगम्यते शब्दांतराच्च युक्तिस्तावद्वर्ण्यते दधिघटरुचकाद्यर्थिभिः प्रतिनियतानि कारणानि क्षीरमृत्तिकासुवर्णादीनि उपा ॥२१॥
दीयमानानि लोके दृश्यंते न दध्यर्थिभिर्मृत्तिकोपादीयते न घटार्थिभिः क्षीरं तदसत्कार्यवादे नोपपद्येत अविशिष्टे हि प्रागुत्पत्तेः
सर्वत्र सर्वस्यासत्वे कस्मात्क्षीरादेव दध्युत्पद्यते न मृत्तिकायाः मृत्तिकाया एव च घट उत्पद्यते न क्षीरात् अथाविशिष्टेऽपि प्रागुत्पत्तेः क्षी
र एव दध्नः कश्चिदतिशयो न मृत्तिकायां मृत्तिकायामेव घटस्य कश्चिदतिशयो न क्षीरे इत्युच्येत ततोऽतिशयवत्वात्प्रागवस्थाया असत्का

133/1913

र्यवादहानिः सत्कार्यवादसिद्धिश्च शक्तिश्च कारणस्य नियमार्था कल्प्यमाना नान्याऽसती वा कार्यं नियच्छेत् असत्वाविशेषादन्यत्वा
विशेषाच्च तस्मात्कारणस्यात्मभूता शक्तिः शक्तेश्चात्मभूतं कार्यं अपि च कार्यकारणयोर्द्रव्यगुणादीनां चाश्वमहिष
वद्भेदबुद्ध्यभावात्तादात्म्यमभ्युपगंतव्यं समवायकल्पनायामपि समवायस्य समवायिभिः संबंधेऽभ्युपगम्यमाने तस्य तस्या
न्योन्यः संबंधः कल्पयितव्य इत्यनवस्थाप्रसंगोऽनभ्युपगम्यमाने वा विच्छेदप्रसंगोऽथ समवायः स्वयं संबंधरूपत्वादनपेक्ष्यैवाप
रं संबंधं संबध्यते संयोगोऽपि तर्हि स्वयं संबंधरूपत्वादनपेक्ष्यैव समवायं संबध्येत तादात्म्यप्रतीतेश्च द्रव्यगुणादीनां समवायक
ल्पनानर्थक्यं कथं च कार्यमवयविद्रव्यं कारणेष्ववयवद्रव्येषु वर्तमानं वर्तेत किं समस्तेष्ववयवेषु वर्तेत उत प्रत्यवयवं यदि तावत्समस्तेषु
वर्तेत ततोऽवयव्यनुपलब्धिः प्रसज्येत समस्तावयवसंनिकर्षस्याशक्यत्वात् न हि बहुत्वं समस्तेष्वाश्रयेषु वर्तमानं व्यस्ताश्रयग्रह
णेन गृह्यते ॥ अथावयवशः समस्तेषु वर्तेत तदाप्यारंभकावयवव्यतिरेकेणावयविनोऽवयवाः कल्प्येरन् यैरारंभकेष्ववयवेष्व
वयवशोऽवयवी वर्तेत कोशावयवव्यतिरिक्तैर्ह्यवयवैरसिः कोशं व्याप्नोति अनवस्था चैवं प्रसज्येत तेषु तेष्ववयवेषु वर्तयितुम
न्येषामवयवानां कल्पनीयत्वात् अथ च प्रत्यवयवं वर्तेत तदैकत्र व्यापारेऽन्यत्राव्यापारः स्यात् न हि देवदत्तः स्रुघ्नेस्वरगर्जधामे
संनिधीयमानस्तदहरेव पाटलिपुत्रेऽपि संनिधीयते युगपदनेकत्र वृत्तावनेकत्वप्रसंगः स्यात् देवदत्तयज्ञदत्तयोरिव स्रुघ्नपा
टलिपुत्रनिवासिनोः गोत्वादिवत्प्रत्येकपरिसमाप्तेरदोष इति चेन्न तथाप्रतीत्यभावात् यदि गोत्वादिवत्प्रत्येकं परिसमाप्तो
ऽवयवी स्याद्यथा गोत्वं प्रतिव्यक्ति प्रत्यक्षं गृह्यते एवमवयव्यपि प्रत्यवयवं प्रत्यक्षं गृह्येत न चैवं नियतं गृह्यते प्रत्येकं परिसमा
प्तौ चावयविनः कार्येणाधिकारात्तस्य चैकत्वात् शृंगेणापि स्तनकार्यं कुर्यात् उरसा च पृष्ठकार्यं न चैवं दृश्यते प्रागुत्पत्तेश्च
कार्यस्यासत्वे उत्पत्तिरकर्तृका निरात्मिका स्यात् उत्पत्तिश्च नाम क्रिया सा सकर्तृकैव भवितुमर्हति गत्यादिवत् क्रिया च नाम
स्यादकर्तृका चेति विप्रतिषिध्येत घटस्य चोत्पत्तिरुच्यमाना न घटकर्तृका किं तर्ह्यन्यकर्तृकेति कल्प्या स्यात् तथा कपाला
दीनामप्युत्पत्तिरुच्यमानाऽन्यकर्तृकैव कल्प्येत तथा च सति घट उत्पद्यते इत्युक्ते कुलालादीनि कारणान्युत्पद्यंत इत्युक्तं स्या
त् न च लोके घटोत्पत्तिरित्युक्ते कुलालादीनामुत्पद्यमानता प्रतीयते उत्पन्नताप्रतीतेश्च अथ स्वकारणसत्तासंबंध एवोत्पत्तिरात्म

शां०भा०
॥ १०॥

लाभश्चेत्कार्यस्येति चेत् कथमलब्धात्मकं संबध्येतेति वक्तव्यं सतोर्हि द्वयोः संबंधः संभवति न सदसतोरसतोर्वा अभावस्य च
निरुपाख्यत्वात्प्रागुत्पत्तेरिति मर्यादाकरणमनुपपन्नं सतां हि लोके क्षेत्रगृहादीनां मर्यादा दृष्टा नाभावस्य न हि वंध्यापुत्रो रा
जा बभूव प्राक् पूर्णवर्मणोऽभिषेकादित्येवंजातीयकेन मर्यादाकरणेन निरूपाख्यो वंध्यापुत्रो राजा बभूव भवति भविष्यतीति वा वि
शेष्यते यदि च वंध्यापुत्रः कारकव्यापारादूर्ध्वं भविष्यत्तत इदमप्युपपद्यत कार्याभावोऽपि कारकव्यापारादूर्ध्वं भविष्यतीति व
यं तु पश्यामो वंध्यापुत्रस्य कार्याभावस्य चाभावत्वाविशेषाद्यथा वंध्यापुत्रः कारकव्यापारादूर्ध्वं न भविष्यतीति एवं कार्याभावो
ऽपि कारकव्यापारादूर्ध्वं न भविष्यतीति ननु एवं सति कारकव्यापारोऽनर्थकः प्रसज्येत यथैव हि प्राक् सिद्धत्वात्कारणस्वरूपसिद्धये न
कश्चिद्व्याप्रियते एवं प्राक् सिद्धत्वात्तदनन्यत्वाच्च कार्यस्वरूपसिद्धयेऽपि न कश्चिद्व्याप्रियेत व्याप्रियते च अतः कारकव्यापारार्थ
वत्त्वाय मन्यामहे प्रागुत्पत्तेरभावः कार्यस्येति नैष दोषो यतः कार्याकारेण कारणं व्यवस्थापयतः कारकव्यापारस्यार्थवत्त्वमुपप
द्यते कार्याकारोऽपि कारणस्यात्मभूत एवानात्मभूतस्यानारभ्यत्वादित्यभाणि न च विशेषदर्शनमात्रेण वस्त्वन्यत्वं भवति न हि दे
वदत्तः संकोचितहस्तपादः प्रसारितहस्तपादश्च विशेषेण दृश्यमानोऽपि वस्त्वन्यत्वं गच्छति स एवेति प्रत्यभिज्ञानात् तथा प्रतिदिन
मनेकसंस्थानानामपि पित्रादीनां न वस्त्वन्यत्वं भवति मम पिता मम भ्राता मम पुत्र इति प्रत्यभिज्ञानात् जन्मोच्छेदानंतरितत्वात्तत्र
युक्तं नान्यत्रेति चेन्न क्षीरादीनामपि दध्याकारसंस्थानस्य प्रत्यक्षत्वात् अदृश्यमानानामपि वटधानादीनां समानजातीयावय
वांतरोपचितानामंकुरादिभावेन दर्शनगोचरतापत्तौ जन्मसंज्ञा तेषामेवावयवानामपचयवशाद्दर्शनापत्तावुच्छेदसंज्ञा तत्रे
दृग्जन्मोच्छेदांतरितत्वेन चेदसतः सत्त्वापत्तिः सतश्चासत्त्वापत्तिस्तथा सति गर्भवासिन उत्तानशायिनश्च भेदप्रसंगः तथा बाल्य
यौवनस्थाविरेष्वपि भेदप्रसंगः पित्रादिव्यवहारलोपश्च प्रसंगः एतेन क्षणभंगवादः प्रतिवदितव्यः यस्य पुनः प्रागुत्पत्तेर ॥१०॥
सत्कार्यं तस्य निर्विषयः कारकव्यापारः स्यादभावस्य विषयत्वानुपपत्तेराकाशहननप्रयोजनखड्गाद्यनेकायुधप्रयुक्तिव
त्समवायिकारणविषयः कारकव्यापारः स्यादिति चेन्नान्यविषयेण कारकव्यापारेणान्यनिष्पत्तेरतिप्रसंगात्समवायिका
रणस्यैवात्मातिशयः कार्यमिति चेत्तर्हि सत्कार्यतापत्तिः तस्मात्क्षीरादीन्येव द्रव्याणि दध्यादिभावेनावतिष्ठमानानि कार्याख्यां

135/1913

लभंत इति न कारणादन्यत्कार्यं वर्षशतेनापि शक्यं कल्पयितुं तथा मूलकारणमेवांत्यात्कार्यात्तेन तेन कार्याकारेण नटवत्सर्वव्यव
हारास्पदत्वं प्रतिपद्यते एवं युक्तेः कार्यस्य प्रागुत्पत्तेः सत्त्वमनन्यत्वं च कारणादवगम्यते ॥ शब्दांतराच्चैतदवगम्यते पूर्वसूत्रे ऽसद्व्यपदेशि
नः शब्दस्योदाहृतत्वात्ततोऽन्यः सद्व्यपदेशी शब्दः शब्दांतरं सदेव सोम्येदमग्र आसीदित्येकमेवाद्वितीयमित्यादि तदेके आहुर
सदेवेदमग्र आसीदिति चासत्पक्षमुपन्यस्य कथमसतः सज्जायेतेत्याक्षिप्य सदेव सोम्येदमग्र आसीदित्यवधारयति तत्रेदंश
ब्दवाच्यस्य कार्यस्य प्रागुत्पत्तेः सच्छब्दवाच्येन कारणेन सामानाधिकरण्यस्य श्रूयमाणत्वात्सत्त्वानन्यत्वे प्रसिध्यतः यदि तु प्रा
गुत्पत्तेरसत्कार्यं स्यात्पश्चाच्चोत्पद्यमानं कारणे समवेयात्तदन्यत्कारणात्स्यात्तत्र येनाश्रुतं श्रुतं भवतीतीयं प्रतिज्ञा पीड्येत अतः स
त्त्वानन्यत्वावगतेस्त्वियं प्रतिज्ञा समर्थ्यते ॥ पटवच्च ॥ १८ ॥ यथा च संवेष्टितः पटो न व्यक्तं गृह्यते किमयं पटः किं वान्यद्द्रव्यमि
ति स एव प्रसारितो यत्संवेष्टितं द्रव्यं स पट एवेति प्रसारणेनाभिव्यक्तो गृह्यते यथा च संवेष्टनसमये पट इति गृह्यमाणोऽपि न वि
शिष्टायामविस्तारो गृह्यते स एव प्रसारणसमये विशिष्टायामविस्तारो गृह्यते न संवेष्टितरूपादन्योऽयं भिन्नः पट इति एवं तंत्वा
दिकारणावस्थं पटादिकार्यमस्पष्टं सत्तुरीवेमकुविंदादिकारकव्यापारादभिव्यक्तं स्पष्टं गृह्यते अतः संवेष्टितप्रसारितपटन्याये
नैवानन्यत्कारणात्कार्यमित्यर्थः ॥ यथा च प्राणादि ॥ १९ ॥ यथा च लोके प्राणापानादिषु प्राणभेदेषु प्राणायामेन निरुद्धेषु
कारणमात्ररूपेण वर्तमानेषु जीवनमात्रं कार्यं निर्वर्त्यते नाकुंचनप्रसारणादिकं कार्यांतरं तेष्वेव प्राणभेदेषु पुनः प्रवृत्तेषु जी
वनादधिकमाकुंचनप्रसारणादिकमपि कार्यांतरं निर्वर्त्यते न च प्राणभेदानां प्रभेदवतः प्राणादन्यत्वं समीरणस्वभावाविशे
षादेवं कार्यस्य कारणादनन्यत्वमतश्च कृत्स्नस्य जगतो ब्रह्मकार्यत्वात्तदनन्यत्वाच्च सिद्धैषा श्रौती प्रतिज्ञा येनाश्रुतं श्रुतं भवत्यमतं म
तमविज्ञातं विज्ञातमिति ॥ इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः ॥ २१ ॥ अन्यथा पुनश्चेतनकारणवाद आक्षिप्यते चेतनाद्धि प्र
क्रियायामाश्रीयमाणायां हिताकरणादयो दोषाः प्रसज्यंते कुतः इतरव्यपदेशात् इतरस्य शारीरस्य ब्रह्मात्मत्वं व्यपदिशति स आत्मा
तत्त्वमसि श्वेतकेतो इति प्रतिबोधनादितरस्य वा ब्रह्मणः शारीरात्मत्वं व्यपदिशति तत्सृष्ट्वा तदेवानुप्राविशदिति स्रष्टुरेवाविकृ
तस्य ब्रह्मणः कार्यानुप्रवेशेन शारीरात्मत्वप्रदर्शनात् अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति च परा देवता जी

ब्रं०भा० वमात्मशब्देन व्यपदिशतीति न ब्रह्मणो भिन्नः शारीर इति दर्शयति तस्माद्यद्ब्रह्मणः स्रष्टृत्वं तच्छारीरस्यैवेत्यतः स स्वतंत्रः कर्ता सन्हि
॥११॥ तमेवात्मनः सौमनस्यकरं कुर्यान्नाहितं जन्ममरणजरारोगाद्यनर्थजालं नहि कश्चिदपरतंत्रो बंधनागारमात्मनः कृत्वानुप्रवि
शति न च स्वयमत्यंतनिर्मलः सन्नत्यंतमलिनं देहमात्मत्वेनोपेयात् कृतमपि कथंचिद्यद्दुःखकरं तदिच्छया जह्यात्सुखकरं चो
पाददीत स्मरेच्च मयेदं जगद्बिंबं विचित्रं विरचितमिति सर्वो हि लोकः स्पष्टं कार्यं कृत्वा स्मरति मयेदं कृतमिति यथा च मायावी स्वयं
प्रसारितां मायामिच्छयानायासेनैवोपसंहरति एवं शारीरोपीमां सृष्टिमुपसंहरेत् स्वमपि तावच्छरीरं शारीरो न शक्नोत्यना
यासेनोपसंहर्तुं एवं हितक्रियाद्यदर्शनादन्याय्या चेतनात् प्रक्रियेति मन्यते॥ अधिकं तु भेदनिर्देशात्॥२२॥ तुशब्दः पक्षं व्या
वर्तयति यत्सर्वज्ञं सर्वशक्ति ब्रह्म नित्यशुद्धबुद्धमुक्तस्वभावं शारीरादधिकमन्यत्तद्वयं जगतः स्रष्टृ ब्रूमो न तस्मिन्हिताकरणा
दयो दोषाः प्रसज्यंते नहि तस्य हितं किंचित्कर्तव्यमस्ति अहितं वा परिहर्तव्यमस्ति नित्यमुक्तत्वान्न च तस्य ज्ञानप्रतिबंधः शक्ति
प्रतिबंधः शक्तिप्रतिबंधो वा क्वचिदप्यस्ति सर्वज्ञत्वात्सर्वशक्तिमत्वाच्च शारीरस्त्वनेवंविधः तस्मिन्प्रसज्यंते हिताकरणादयो
दोषाः प्रसज्यंते न हितस्य हितं किंचित्कर्तव्यमस्ति अहितं वा परिहर्तव्यमस्ति नित्यमुक्तत्वान्न च तस्य ज्ञानप्रतिबंधः शक्तिप्र
तिबंधो वा क्वचिदप्यस्ति सर्वज्ञत्वात्सर्वशक्तिमत्वाच्च शारीरस्त्वनेवंविधः तस्मिन्प्रसज्यंते हिताकरणादयो दोषाः न तु तं वयं ज
गतः स्रष्टारं ब्रूमः कुत एतत् भेदनिर्देशात् आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्यः सोन्वेष्टव्यः स विजिज्ञासितव्यः
सता सौम्य तदा संपन्नो भवति शारीर आत्मा प्राज्ञेनात्मनान्वारूढ इत्येवंजातीयकः कर्तृकर्मादिभेदनिर्देशो जीवादधिकं ब्र
ह्म दर्शयति ननु चाभेदनिर्देशोपि दर्शितः तत्त्वमसीत्येवंजातीयकः कथं भेदाभेदौ विरुद्धौ संभवेतां नैष दोषः आकाशघटाकाश
न्यायेनोभयसंभवस्य तत्र तत्र प्रतिष्ठापितत्वात् अपि च यदा तत्त्वमसीत्येवंजातीयकेनाभेदनिर्देशेनाभेदः प्रतिबोधितो भवति ॥११॥
अपगतं भवति तदा जीवस्य संसारित्वं ब्रह्मणश्च स्रष्टृत्वं समस्तस्य मिथ्याज्ञानविजृंभितस्य भेदव्यवहारस्य सम्यग्ज्ञाने
न बाधितत्वात् तत्र कुत एव सृष्टिः कुतो वा हिताकरणादयो दोषाः अविद्याप्रत्युपस्थापितनामरूपकृतकार्यकरणसंघातोपाध्यवि
वेककृता हि भ्रांतिर्हिताकरणादिलक्षणः संसारो न तु परमार्थतोस्तीत्यसकृदवोचाम जन्ममरणछेदनभेदनाद्यभिमानवद्बाधि

137/1913

तेतु भेदव्यवहारे सोन्वेष्टव्य इत्येवंजातीयकेन भेदनिर्देशेनावगम्यमानं ब्रह्मणोधिकत्वं हिताकरणादिदोषप्रसक्तिं निरुणद्धि॥
अश्मादिवच्च तदनुपपत्तिः॥२३॥ यथा च लोके पृथिवीत्वसामान्यान्वितानामप्यश्मनां केचिन्महार्हा मणयो वज्रवैडूर्यादयोन्ये
मध्यमवीर्याः सूर्यकांतादयोन्ये प्रहीणाः श्ववायसप्रक्षेपणार्हाः पाषाणा इत्यनेकविधं वैचित्र्यं दृश्यते यथा चैकपृथिवीव्यपाश्रया
णामपि बीजानां बहुविधं पत्रपुष्पफलगंधरसादिवैचित्र्यं चंदनचंपकादिषूपलक्ष्यते यथा चैकस्याप्यन्नरसस्य लोहितादीनि के
शलोमादीनि च विचित्राणि कार्याणि भवंति एवमेकस्यापि ब्रह्मणो जीवप्राज्ञपृथक्त्वं कार्यवैचित्र्यं चोपपद्यते अतस्तदनुपप
त्तिः परपरिकल्पितदोषानुपपत्तिरित्यर्थः श्रुतेः प्रामाण्याद्विकारस्य च वाचारंभणमात्रत्वात् स्वप्नदृश्यभाववैचित्र्यवच्चेत्यभ्युच्चयः॥
उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि॥२४॥ चेतनं ब्रह्मैकमद्वितीयं जगतः कारणमिति यदुक्तं तन्नोपपद्यते कस्मादुपसंहारदर्शनात्
इह हि लोके कुलालादयो घटादीनां कर्तारो मृद्दंडचक्रसूत्राद्यनेककारकोपसंहारेण संगृहीतसाधनाः संतस्तत्तत्कार्यं कुर्वाणा दृश्यंते
ब्रह्म चासहायं तवाभिप्रेतं तस्य साधनांतरानुपसंग्रहे सति कथं स्रष्टृत्वमुपपद्येत तस्मान्न ब्रह्म जगत्कारणमिति चेन्नैष दोषः यतः
क्षीरवद्द्रव्यस्वभावविशेषादुपपद्यते तथा हि लोके क्षीरं जलं वा स्वयमेव दधिहिमभावेन परिणमते अनपेक्ष्य बाह्यं साधनं तथेहापि भ
विष्यति ननु क्षीराद्यपि दध्यादिभावेन परिणममानमपेक्षत एव बाह्यं साधनमौष्ण्यादिकं कथमुच्यते क्षीरवद्धीति नैष दोषः स्वयमेव हि
क्षीरं यां च यावतीं च परिणाममात्रामनुभवति तावत्येव त्वार्यते औष्ण्यादिना दधिभावाय यदि च स्वयं दधिभावशीलता न स्यान्नैवौ
ष्ण्यादिनापि बलाद्दधिभावमापद्येत नहि वायुराकाशो वौष्ण्यादिना बलाद्दधिभावमापद्यते साधनसामग्र्या च तस्य पूर्णता संपा
द्यते परिपूर्णशक्तिकं तु ब्रह्म न तस्यान्येन केनचित्पूर्णता संपादयितव्या श्रुतिश्च तत्र दृश्यते॥ न तस्य कार्यं करणं च विद्य
ते न तत्समश्चाभ्यधिकश्च दृश्यते पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेति तस्मादेकस्यापि ब्रह्मणो विचि
त्रशक्तियोगात् क्षीरादिवद्विचित्रपरिणाम उपपद्यते॥ देवादिवदपि लोके॥२५॥ स्यादेतदुपपद्यते क्षीरादीनामचेतनानामनपे
क्ष्यापि बाह्यसाधनं दध्यादिभावो दृष्टत्वात् चेतनाः पुनः कुलालादयः साधनसामग्रीमपेक्ष्यैव तस्मै तस्मै कार्याय प्रवर्तमाना
दृश्यंते कथं ब्रह्म चेतनं सदसहायं प्रवर्ततेति देवादिवदिति ब्रूमः यथा लोके देवाः पितर ऋषय इत्येवमादयो महाप्रभावाश्चेतना

अपि संतोऽनपेक्ष्यैव किंचिद्बाह्यं साधनमैश्वर्यविशेषयोगादभिध्यानमात्रेण स्वत एव बहूनि नानासंस्थानानि शरीराणि प्रासादादी
नि रथादीनि च निर्मिमाणा उपलभ्यंते मंत्रार्थवादेतिहासपुराणप्रामाण्यात् तंतुनाभश्च स्वत एव तंतून् सृजति बलाका चांतरेण
शुक्रं गर्भं धत्ते पद्मिनी चानपेक्ष्य किंचित्प्रस्थानसाधनं सरोंतरात्सरोंतरं प्रतिष्ठत एवं चेतनमपि ब्रह्मानपेक्ष्य बाह्यं साधनं स्वत
एव जगत्स्रक्ष्यति स यदि ब्रूयाद्य एते देवादयो ब्रह्मणो दृष्टांता उपात्तास्ते दार्ष्टांतिकेन ब्रह्मणा समाना न भवंति शरीरमेव ह्यचेतनं देवादीनां
शरीरांतरादिविभूत्युत्पादने उपादानं न तु चेतन आत्मा तंतुनाभस्य तु क्षुद्रतरजंतुभक्षणाल्लाला कठिनतामापद्यमाना तंतुर्भवति बलाका
च स्तनयित्नुरवश्रवणाद्गर्भं धत्ते पद्मिनी च चेतनप्रयुक्ता सती अचेतनेनैव शरीरेण सरोंतरात्सरोंतरमुपसर्पति वल्लीव वृक्षं न तु स्वय
मेवाचेतना सरोपसर्पणे व्याप्रियते तस्मान्नैते ब्रह्मणो दृष्टांता इति तं प्रति ब्रूयान्नायं दोषः कुलालादिदृष्टांतवैलक्षण्यमात्रस्य
विवक्षितत्वादिति । यथा हि कुलालादीनां च समाने चेतनत्वे कुलालादयः कार्यारंभे बाह्यं साधनमपेक्षंते न देवादयस्तथा ब्रह्म चेतनमपि
न बाह्यं साधनमपेक्षत इत्येतावद्वयं देवादिदृष्टांतेन विवक्षामः तस्माद्यथैकस्य सामर्थ्यं दृष्टं तथा सर्वेषामेव भवितुमर्हतीति नास्त्येकां
तइत्यभिप्रायः ॥ कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा ॥ २५ ॥ चेतनमेकमद्वितीयं ब्रह्म क्षीरादिवद्देवादिवच्चानपेक्षितबाह्यसाधनं स्व
यं परिणममानं जगतः कारणमिति स्थितं शास्त्रार्थपरिशुद्धये तु पुनराक्षिपति कृत्स्नप्रसक्तिः कृत्स्नस्य ब्रह्मणः कार्यरूपेण परिणामः
प्राप्नोति निरवयवत्वात् यदि ब्रह्म पृथिव्यादिवत्सावयवमभविष्यत्ततोऽस्यैकदेशः पर्यणंस्यदेकदेशश्चावास्थास्यत निरवयवं तु ब्रह्म
श्रुतिभ्यो गम्यते निष्कलं निष्क्रियं शांतं निरवद्यं निरंजनं दिव्यो ह्यमूर्तः पुरुषः सबाह्याभ्यंतरो ह्यजः इदं महद्भूतमनंतमपारं विज्ञानघन एव
स एष नेति नेत्यात्मा अस्थूलमनणु इत्याद्याभ्यः सर्वविशेषप्रतिषेधिनीभ्यः ततश्चैकदेशपरिणामासंभवात्कृत्स्नपरिणामप्रसक्तौ स
त्यां मूलोच्छेदः प्रसज्येत द्रष्टव्यतोपदेशानर्थक्यं चायत्नदृष्टत्वात्कार्यस्य तद्व्यतिरिक्तस्य च ब्रह्मणोऽभावादजत्वादिशब्दकोप
श्चाथैतद्दोषपरिजिहीर्षया सावयवमेव ब्रह्माभ्युपगम्येत तथापि ये निरवयवत्वप्रतिपादकाः शब्दा उदाहृतास्ते प्रकुप्येयुः ॥१२॥
सावयवत्वे चानित्यत्वप्रसंग इति सर्वथायं पक्षो न घटयितुं शक्यत इत्याक्षिपति ॥ श्रुतेस्तु शब्दमूलत्वात् ॥ २६ ॥ तुशब्देनाक्षेपं
परिहरति न खल्वस्मत्पक्षे कश्चिदपि दोषोऽस्ति न तावत्कृत्स्नप्रसक्तिः कुतः श्रुतेः यथैव हि ब्रह्मणो जगदुत्पत्तिः श्रूयत एवं विकारव्य

139/1913

तिरेकेणापि ब्रह्मणोऽवस्थानं श्रूयते प्रकृतिविकारयोर्भेदेन व्यपदेशात् सेयं देवतैक्षत हंताहमिमास्तिस्रो देवता अनेन जीवेनात्मना
नुप्रविश्य नामरूपे व्याकरवाणीति तावानस्य महिमा ततो ज्यायांश्च पूरुषः पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवीत्येवंजाती
यकात्तथा हृदयायतनत्ववचनात्सत्संपन्नत्ववचनाच्च यदि च कृत्स्नं ब्रह्म कार्यभावेन उपयुक्तं स्यात्सता सोम्य तदा संपन्नो भव
तीति सुषुप्तिगतं विशेषणमनुपपन्नं स्यात् विकृतेन ब्रह्मणा नित्यसंपन्नत्वादविकृतस्य च ब्रह्मणोऽभावात् तथेंद्रियगोचरत्वप्रति
षेधात् ब्रह्मणो विकारस्य चेंद्रियगोचरत्वोपपत्तेः तस्मादविकृतं ब्रह्मास्ति न च निरवयवत्वशब्दकोपोऽस्ति श्रूयमाणत्वादेव निरवयवत्वस्या
प्यभ्युपगम्यमानत्वात् शब्दमूलं च ब्रह्म शब्दप्रमाणकं नेंद्रियादिप्रमाणकं तद्यथाशब्दमभ्युपगंतव्यं शब्दश्चोभयमपि ब्रह्मणः
प्रतिपादयति । अकृत्स्नप्रसक्तिं निरवयवत्वं च लौकिकानामपि मणिमंत्रौषधिप्रभृतीनां देशकालनिमित्तवैचित्र्यवशाच्छक्तयो
विरुद्धानेककार्यविषया दृश्यंते ता अपि तावन्नोपदेशमंतरेण केवलेन तर्केणावगंतुं शक्यंते अस्य वस्तुन एतावत्य एतत्सहाया एत
द्विषया एतत्प्रयोजनाश्च शक्तय इति किमुताचिंत्यप्रभावस्य ब्रह्मणो रूपं विना शब्देन न निरूप्येत तथा चाहुः पौराणिकाः अचिं
त्याः खलु ये भावा न तांस्तर्केण योजयेत् ॥ प्रकृतिभ्यः परं यच्च तदचिंत्यस्य लक्षणमिति तस्माच्छब्दमूल एवातींद्रियार्थयाथात्म्या
धिगमः ननु शब्देनापि न शक्यते विरुद्धोऽर्थः प्रत्याययितुं निरवयवं च ब्रह्म परिणमते न च कृत्स्नमिति यदि निरवयवं ब्रह्म स्यान्नैव प
रिणमेत कृत्स्नमेव वा परिणमेत अथ केनचिद्रूपेण परिणमेत केनचिच्चावतिष्ठेतेति रूपभेदकल्पनात्सावयवमेव प्रसज्ये
त क्रियाविषये हि अतिरात्रे षोडशिनं गृह्णाति नातिरात्रे षोडशिनं गृह्णातीत्येवंजातीयकायां विरोधप्रतीतावपि विकल्पाश्रयणं
विरोधपरिहारकारणं भवति पुरुषतंत्रत्वादनुष्ठानस्य इह तु विकल्पाश्रयणेनापि न विरोधपरिहारः संभवति अपुरुषतंत्रत्वाद्व
स्तुनः तस्माद्दुर्घटमेतदिति नैष दोषः अविद्याकल्पितरूपभेदाभ्युपगमात् न ह्यविद्याकल्पितेन रूपभेदेन सावयवं वस्तु सं
पद्यते न हि तिमिरोपहतनयनेनानेक इव चंद्रमा दृश्यमानोऽनेक एव भवति अविद्याकल्पितेन च नामरूपलक्षणेन रूपभेदेन व्याकृता
त्मकेन तत्त्वान्यत्वाभ्यामनिर्वचनीयेन ब्रह्म परिणामादिसर्वव्यवहारास्पदत्वं प्रतिपद्यते पारमार्थिकेन च रूपेण सर्वव्यवहा
रातीतमपरिणतमवतिष्ठते वाचारंभणमात्रत्वाच्चाविद्याकल्पितस्य रूपभेदस्य न निरवयवत्वं ब्रह्मणः कुप्यति न चेयं परिणामश्रुतिः परि

शां॰भा॰
॥ १३ ॥

णामप्रतिपादनार्था तत्प्रतिपत्तौ फलानवगमात् सर्वव्यवहारहीनब्रह्मात्मभावप्रतिपादनार्था त्वेषा तत्प्रतिपत्तौ फलावगमात् स एष
नेति नेत्यात्मेत्युपक्रम्याहाभयं वै जनक प्राप्तोसीति तस्मादस्मत्पक्षे न कश्चिदपि दोषप्रसंगोस्ति। आत्मनि चैवं विचित्राश्च हि॥२७॥
अपि च नैवात्र विवदितव्यं कथमेकस्मिन्ब्रह्मणि स्वरूपानुपमर्देनानेकाकारा सृष्टिः स्यादिति। यत आत्मन्यप्येकस्मिन्स्वप्नदृशि स्व
रूपानुपमर्देनैवानेकाकारा सृष्टिः पठ्यते न तत्र रथा न रथयोगा न पंथानो भवंत्यथ रथान्रथयोगान्पथः सृजत इत्यादिना। लोकेपि
देवादिषु मायाव्यादिषु च स्वरूपानुपमर्देनैव विचित्रा हस्त्यश्वादिसृष्टयो दृश्यंते तथैकस्मिन्नपि ब्रह्मणि स्वरूपानुपमर्देनैवा
नेकाकारा सृष्टिर्भविष्यतीति। स्वपक्षदोषाच्च॥२८॥ परेषामप्येष समानः स्वपक्षे दोषः प्रधानवादिनोपि हि निरवयवमपरिच्छि
न्नं शब्दादिहीनं प्रधानं सावयवस्य परिच्छिन्नस्य शब्दादिमतः कार्यस्य कारणमिति स्वपक्षस्तत्रापि कृत्स्नप्रसक्तिर्निरवयव
त्वात्प्रधानस्य प्राप्नोति निरवयवत्वाभ्युपगमव्याकोपो वा ननु नैव तैर्निरवयवं प्रधानमभ्युपगम्यते सत्त्वरजस्तमांसि त्रयो गुणा
नित्यास्तेषां साम्यावस्था प्रधानं तैरेवावयवैस्तत्सावयवमिति नैवंजातीयकेन सावयवत्वेन प्रकृतो दोषः परिहर्तुं पार्यते
यतः सत्त्वरजस्तमसामप्येकैकस्य समानं निरवयवत्वं एकैकमेव चेतरद्वयानुगृहीतं सजातीयस्य प्रपंचस्योपादानमिति समा
नत्वात्स्वपक्षदोषप्रसंगस्य तर्काप्रतिष्ठानात्सावयवत्वमेवेति चेत् एवमप्यनित्यत्वादिदोषप्रसंगः अथ शक्तय एव कार्यवैचित्र्यसूचि
ता अवयवा इत्यभिप्रायः। तास्तु ब्रह्मवादिनोप्यविशिष्टाः तथाणुवादिनोप्यणुरण्वंतरेण संयुज्यमानो निरवयवत्वाद्यदि कार्त्स्न्ये
न संयुज्येत ततः प्रथिमानुपपत्तेरणुमात्रत्वप्रसंगः अथैकदेशेन संयुज्येत तथापि निरवयवत्वाभ्युपगमकोप इति स्वपक्षेपि स
मान एष दोषः समानत्वाच्च नान्यतरस्मिन्नेव पक्षे उपक्षेप्तव्यो भवति परिहृतस्तु ब्रह्मवादिना स्वपक्षे दोषः। सर्वोपेता च तद्दर्श
नात्॥२९॥ एकस्यापि ब्रह्मणो विचित्रशक्तियोगादुपपद्यते विचित्रो विकारप्रपंच इत्युक्तं तत्पुनः कथमवगम्यते विचित्रशक्तियु १३
क्तं परं ब्रह्मेति तदुच्यते सर्वोपेता च तद्दर्शनात् सर्वशक्तियुक्ता च परा देवतेत्यभ्युपगंतव्यं कुतः तद्दर्शनात् तथाहि दर्शयति श्रुतिः सर्वशक्तियो
गं परस्या देवतायाः सर्वकर्मा सर्वकामाः सर्वगंधः सर्वरसः सर्वमिदमभ्यात्तोवाक्यनादरः सत्यकामः सत्यसंकल्पो यः सर्वज्ञः स
र्ववित् एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचंद्रमसौ विधृतौ तिष्ठत इत्येवंजातीयका॥ विकरणत्वान्नेति चेत्तदुक्तं॥३०॥ स्यादेतद्विका

141/1913

शां॰भा॰
१४

रणां परां देवतां शास्ति शास्त्रं अचक्षुष्कमश्रोत्रमवागमना इत्येवंजातीयकं कथं सा सर्वशक्तियुक्तापि सती कार्याय प्रभवेत् देवादयो
हि चेतनाः सर्वशक्तियुक्ता अपि संतः आध्यात्मिककार्यकरणसंपन्ना एव तस्मै तस्मै कार्याय प्रभवंतो विज्ञायंते कथं च नेति नेति प्रतिषिद्धस
र्वविशेषाया देवतायाः सर्वशक्तियोगः संभवेदिति चेद्यदत्र वक्तव्यं तत्पुरस्तादेवोक्तं श्रुत्यवगाह्यमेवेदमतिगंभीरं परं ब्रह्म न तर्काव
गाह्यं न च यथैकस्य सामर्थ्यं दृष्टं तथान्यस्यापि सामर्थ्येन भवितव्यमिति नियमोस्तीति प्रतिषिद्धसर्व।१।विशेषस्यापि ब्रह्मणः
सर्वशक्तियोगः संभवतीत्येतदपि अविद्याकल्पितरूपभेदोपन्यासेनोक्तमेव तथा च शास्त्रं अपाणिपादो जवनो ग्रहीता पश्यत्य
चक्षुः स शृणोत्यकर्ण इत्यकरणस्यापि ब्रह्मणः सर्वसामर्थ्ययोगं दर्शयति। न प्रयोजनवत्त्वात्॥३१॥ अन्यथा पुनश्चेतनकर्तृत्वं
जगत आक्षिपति न खलु चेतनः परमात्मेदं जगद्बिंबं विरचयितुमर्हति कुतः प्रयोजनवत्त्वात्प्रवृत्तीनां चेतनो हि लोके बुद्धिपू
न र्वकारी पुरुषः प्रवर्तमानो मंदोपक्रमामपि तावत्प्रवृत्तिमात्मप्रयोजनानुपयोगिनीमारभमाणो दृष्टः किमुत गुरुतरसंरंभां भ
भवति च लोकप्रसिद्ध्यनुवादिनी श्रुतिः न वा अरे सर्वस्य कामाय सर्वं प्रियं भवतीति गुरुतरसंभावयं प्रवृत्तिः यदुच्चावचप्रपंचं
जगद्बिंबं विरचयितव्यं यदीयमपि प्रवृत्तिश्चेतनस्य परमात्मन आत्मप्रयोजनोपयोगिनी परिकल्प्येत परितृप्तत्वं परमात्मनः श्रू
श्रूयमाणं बाध्येत प्रयोजनाभावे वा प्रवृत्त्यभावोपि स्यात् अथ चेतनोपि सन्नुन्मत्तो बुद्ध्यपराधादंतरेणैवात्मप्रयोजनं प्रव
प्रवर्तमानो दृष्टस्तथा परमात्मापि प्रवर्तिष्यत इत्युच्येत तथा सर्वज्ञत्वं परमात्मनः श्रूयमाणं बाध्येत तस्मादश्लिष्टा चेतनात्सृ
ष्टिरिति। लोकवत्तु लीलाकैवल्यं॥३२॥ तुशब्देनाक्षेपं परिहरति यथा लोके कस्यचिदाप्तैषणस्य राज्ञो राजामात्यस्य वा व्य
तिरिक्तं किंचित्प्रयोजनमनभिसंधाय केवलं लीलारूपाः प्रवृत्तयः क्रीडाविहारेषु भवंति यथा चोच्छ्वासप्रश्वासादयोनभिसं
धाय बाह्यं किंचित्प्रयोजनांतरं स्वभावादेव भवंत्येवमीश्वरस्याप्यनपेक्ष्य किंचित्प्रयोजनांतरं स्वभावादेव केवलं लीलारूपा प्रवृ १४
त्तिर्भविष्यति न हीश्वरस्य प्रयोजनांतरं निरूप्यमाणं न्यायतः श्रुतितो वा संभवति न च स्वभावः पर्यनुयोक्तुं शक्यते यद्यप्यस्माक
मियं जगद्बिंबविरचना गुरुतरसंरंभेवाभाति तथापि परमेश्वरस्य लीलैव केवलेयं अपरिमितशक्तित्वात् यदि नाम लोके लीलास्वपि किंचि
त्सूक्ष्मं प्रयोजनमुत्प्रेक्ष्येत तथापि नैवात्र किंचित्प्रयोजनमुत्प्रेक्षितुं शक्यते आप्तकामश्रुतेः नाप्यप्रवृत्तिः उन्मत्तप्रवृत्तिर्वा सृष्टिश्रु

शां०भा०
३४

तेः सर्वज्ञश्रुतेश्च न चेयं परमार्थविषया सृष्टिश्रुतिरविद्याकल्पितनामरूपव्यवहारगोचरत्वात् ब्रह्मात्मभावप्रतिपादनपरत्वाच्चे
त्येतदपि नैव प्रस्मर्तव्यं॥ वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथाहि दर्शयति॥३४॥ पुनश्च जगज्जन्मादिहेतुत्वमीश्वरस्याक्षिप्यते स्थूणानि
खननन्यायेन प्रतिज्ञातस्यार्थस्य दृढीकरणाय नेश्वरो जगतः कारणमुपपद्यते कुतो वैषम्यनैर्घृण्यप्रसंगात् कांश्चिदत्यंतसुखभाजः क
रोति देवादीन् कांश्चिदत्यंतदुःखभाजः पश्वादीन् कांश्चिन्मध्यमभोगभाजो मनुष्यादीनित्येवं विषमां सृष्टिं निर्मिमाणस्येश्वरस्य
पृथक्जनस्येव रागद्वेषोपपत्तेः श्रुतिस्मृत्यवधारितस्वच्छत्वादीश्वरस्वभावविलोपः प्रसज्येत तथा खलजनैरपि जुगुप्सितं निर्घृणत्वम
तिक्रूरत्वं दुःखयोगविधानात् सर्वप्रजोपसंहाराच्च प्रसज्येत तस्माद्वैषम्यनैर्घृण्यप्रसंगान्नेश्वरः कारणमित्येवं प्राप्ते ब्रूमः वैषम्यनैर्घृ
ण्ये नेश्वरस्य प्रसज्येते कस्मात् सापेक्षत्वात् यदि हि निरपेक्षः केवल ईश्वरो विषमां सृष्टिं निर्मिमीते स्यातामेतौ दोषौ वैषम्यं नैर्घृण्यं च न
तु निरपेक्षस्य निर्मातृत्वमस्ति सापेक्षो हीश्वरो विषमां सृष्टिं निर्मिमीते किमपेक्ष इति चेद्धर्माधर्मावपेक्षत इति वदामोऽतः सृज्यमान
प्राणिधर्माधर्मापेक्षा विषमा सृष्टिरिति नायमीश्वरस्यापराधः ईश्वरस्तु पर्जन्यवद्द्रष्टव्यः यथा हि पर्जन्यो व्रीहियवादिसृष्टौ साधार
णं कारणं भवति व्रीहियवादिवैषम्ये तु तत्तद्बीजगतान्येवासाधारणानि सामर्थ्यानि कारणानि भवंति॥ एवमीश्वरो देवमनुष्यादिसृष्टौ
साधारणं कारणं भवति देवमनुष्यादिवैषम्ये तु तत्तज्जीवगतान्येवासाधारणानि कर्माणि कारणानि भवंत्येवमीश्वरः सापेक्षत्वा
न्न वैषम्यनैर्घृण्याभ्यां दुष्यति कथं पुनरवगम्यते सापेक्ष ईश्वरो नीचमध्यमोत्तमं संसारं निर्मिमीत इति। तथाहि दर्शयति श्रुतिः
एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषत एष उ एवासाधु कर्म कारयति तं यमधो निनीषत इति पुण्यो वै पुण्येन
कर्मणा भवति पापः पापेनेति च स्मृतिरपि प्राणिकर्मविशेषापेक्षमेवेश्वरस्यानुगृहीतृत्वं निगृहीतृत्वं च दर्शयति ये यथा मां
प्रपद्यंते तांस्तथैव भजाम्यहमित्येवंजातीयिका॥ न कर्माविभागादिति चेन्नानादित्वात्॥३५॥ सदेव सोम्येदमग्र आसीदेक ३४
मेवाद्वितीयमिति प्राक् सृष्टेरविभागावधारणान्नास्ति कर्म यदपेक्षा विषमा सृष्टिः स्यात् सृष्ट्युत्तरकालं हि शरीरादिविभागापे
क्षं कर्म कर्मापेक्षश्च शरीरादिविभाग इतीतरेतराश्रयः प्रसज्येत अतो विभागादूर्ध्वं कर्मापेक्ष ईश्वरः प्रवर्ततां नाम प्राक् विभागा
द्वैचित्र्यनिमित्तस्य कर्मणोऽभावात्तुल्यैवाद्या सृष्टिः प्राप्नोतीति चेन्नैष दोषोऽनादित्वात् संसारस्य भवेदेष दोषो यद्यादिमान् संसारः

143/1913

स्यात् अनादौ तु संसारे बीजांकुरवद्धेतुहेतुमद्भावेन कर्मणः सर्गवैषम्यस्य च प्रवृत्तिर्न विरुध्यते कथं पुनरवगम्यते अनादिरेष संसार इति
अत उत्तरं पठति॥ उपपद्यते चाप्युपलभ्यते च॥३६॥ उपपद्यते च संसारस्यानादित्वं आदिमत्त्वे हि संसारस्याकस्मादुद्भूतेर्मुक्तानामपि पु
नः संसारोद्भूतिप्रसंगः अकृताकृतहानिरकृतप्रसंगःभ्यागमप्रसंगश्च सुखदुःखादिवैषम्यस्य निर्निमित्तत्वात्। न वेश्वरो वैषम्यहेतु
रित्युक्तं॥ न चाविद्या केवला वैषम्यस्य कारणमेकरूपत्वात् रागादिक्लेशवासनाक्षिप्तकर्मापेक्षा त्वविद्या वैषम्यकरी स्यात् न च कर्मांतरेण श
रीरं संभवति न च शरीरमंतरेण कर्म संभवतीतीतरेतराश्रयत्वप्रसंगः अनादित्वे तु बीजांकुरन्यायेनोपपत्तेर्न कश्चिद्दोषो भवति उपलभ्य
ते च संसारस्यानादित्वं श्रुतिस्मृत्योः श्रुतौ तावदनेन जीवेनात्मनेति सर्गप्रमुखे शारीरमात्मानं जीवशब्देन प्राणधारणनिमित्तेनाभिल
पन् अनादिः संसार इति दर्शयति आदिमत्त्वे तु प्रागनवधारितप्राणः सन् कथं प्राणधारणनिमित्तेन जीवशब्देन सर्गप्रमुखेऽभि
लप्येत न च धारयिष्यतीत्यतोऽभिलप्येत अनागताद्धि संबंधादतीतः संबंधो बलवान् भवति अभिनिष्पन्नत्वात् सूर्याचंद्रमसौ धाता यथा
पूर्वमकल्पयदिति च मंत्रवर्णः पूर्वकल्पसद्भावं दर्शयति स्मृतावप्यनादित्वं संसारस्योपलभ्यते न रूपमस्येह तथोपलभ्यते नांतो न चा
दिर्न च संप्रतिष्ठेति पुराणे चातीतानामनागतानां च कल्पानां न परिमाणमस्तीति स्थापितं॥ सर्वधर्मोपपत्तेश्च॥३७॥ चेतनं ब्रह्म जगतः कार
णं प्रकृतिश्चेत्यस्मिन्नवधारिते वेदार्थे परैरुपक्षिप्तान् विलक्षणत्वादीन् दोषान् पर्यहार्षीदाचार्य इदानीं परपक्षप्रतिषेधप्रधानं
प्रकरणमारिप्समानः स्वपक्षपरिग्रहप्रधानं प्रकरणमुपसंहरति यस्मादस्मिन् ब्रह्मणि कारणे परिगृह्यमाणे प्रदर्शितेन प्रकारे
ण सर्वे कारणधर्मा उपपद्यंते सर्वज्ञं सर्वशक्तिमहामायं च ब्रह्मेति तस्मादनतिशंकनीयमिदमौपनिषदं दर्शनमिति॥ ॥इति श्री
शारीरकमीमांसाभाष्ये शंकरभगवत्पादकृतौ द्वितीयस्याध्यायस्य प्रथमः पादः समाप्तः॥ ॥रचनानुपपत्तेश्च नानुमानं॥१॥
यद्यपीदं वेदांतवाक्यानामैदंपर्यं निरूपयितुं शास्त्रं प्रवृत्तं न तर्कशास्त्रवत् केवलाभिर्युक्तिभिः कंचित्सिद्धांतं साधयितुं दूषयितुं
वा प्रवृत्तं तथापि वेदांतवाक्यानि व्याचक्षाणैः सम्यग्दर्शनप्रतिपक्षभूतानि सांख्यादिदर्शनानि निराकरणीयानीति तदर्थः॥
परः पादः प्रवर्तते वेदांतार्थनिर्णयस्य च सम्यग्दर्शनार्थत्वात्तन्निर्णयेन स्वपक्षस्थापनं प्रथमं कृतं तद्ध्यभ्यर्हितं परपक्षप्रत्याख्याना
दिति न तु मुमुक्षूणां मोक्षसाधनत्वेन सम्यग्दर्शननिरूपणाय स्वपक्षस्थापनमेव केवलं कर्तुं युक्तं किं परपक्षनिराकरणेन परविद्वेष

शां०भा०
१५

करणवाढमेवंतथापिमहाजनपरिगृहीतानिमहांतिसांख्यादितंत्राणिसम्यग्दर्शनोपदेशेनप्रवृत्तान्युपलभ्यभवेत्केषांचिन्मंदमती
नामेतान्यपिसम्यग्दर्शनायोपादेयानीत्यपेक्षातथायुक्तिगाढत्वसंभावनासर्वज्ञभाषितत्वाच्चश्रद्धाचतेष्वित्यतस्तदसारतोपपादनायप्र
यत्नंक्रियतेसत्येनन्वीक्षतेर्नाशब्दंकामाच्चनानुमानापेक्षाएतेनसर्वेव्याख्याताइतिचपूर्वत्रापिसांख्यादिपक्षप्रतिषेधःकृतःकिंपुनः
कृतकरणमिवेदमुच्यतेसांख्यादयःस्वपक्षस्थापनायवेदांतवाक्यान्युदाहृत्यस्वपक्षानुगुण्येनैवयोजयंतोव्याचक्षतेतेषांयद्व्याख्या
नंतद्व्याख्यानाभासंनसम्यग्व्याख्यानमित्येतावत्पूर्वंकृतंइहतुवाक्यनिरपेक्षःस्वतंत्रस्तद्युक्तिप्रतिषेधःक्रियतइत्येषविशे
षःतत्रसांख्यामन्यंतेयथाघटशरावादयोभेदामृदात्मनान्वीयमानामृदात्मकसामान्यपूर्वकालोकेदृष्टास्तथासर्वएवबाह्याध्यात्मिका
भेदाःसुखदुःखमोहात्मकतयान्वीयमानाःसुखदुःखमोहात्मकसामान्यपूर्वकाःभवितुमर्हंतियत्तत्सुखदुःखमोहात्मकंसामान्यं
तत्त्रिगुणंप्रधानंमृद्वदचेतनंचेतनस्यपुरुषस्यार्थंसाधयितुंभोगापवर्गौस्वभावेनैवविचित्रेणविकारात्मनाविवर्ततइतितथापरिणा
मादिभिरपिलिंगैस्तदेवप्रधानमनुमिमते।।तत्रवदामोयदिदृष्टांतबलेनैवैतन्निरूप्यतेनाचेतनंलोकेचेतनानधिष्ठितंस्वतंत्रंकिंचि
द्विशिष्टपुरुषार्थनिर्वर्तनसमर्थान्विकारान्विरचयद्दृष्टंगेहप्रासादशयनासनविहारभूम्यादयोहिलोकेप्रज्ञावद्भिःशिल्पि
भिर्यथाकालंसुखदुःखप्राप्तिपरिहारयोग्यारचितादृश्यंतेतथेदंजगदखिलंपृथिव्यादिनानाकर्मफलोपयोग्यंबाह्यमा
ध्यात्मिकंचशरीरादिनानाजात्यन्वितंप्रतिनियतावयवविन्यासंनानाकर्मफलानुभवाधिष्ठानंदृश्यमानंप्रज्ञावद्भिःसंभा
वितनमैःशिल्पिभिर्मनसाप्यालोचयितुमशक्यंसत्कथमचेतनंप्रधानंरचयेत्लोष्टपाषाणादिष्वदृष्टत्वात्मृदादिष्वपिकुं
भकाराद्यधिष्ठितेषुविशिष्टाकाररचनादृश्यतेतद्वत्प्रधानस्यापिचेतनाधिष्ठितत्वप्रसंगोनचमृदाद्युपादानस्वरूपव्यपाश्रयेणै १५
वधर्मेणमूलकारणमवधारणीयंनबाह्यकुंभकारादिव्यपाश्रयेणेतिनकिंचिन्नियामकमस्तिनचैवंसतिकिंचिद्विरुध्यते
प्रत्युतश्रुतिरनुगृह्यतेचेतनकारणसमर्पणादतोरचनानुपपत्तेश्चहेतोर्नाचेतनंजगत्कारणमनुमातव्यंभवति।।अन्वयाद्यनुप
पत्तेश्चेतिचशब्देनसमुच्चीयतेनहिबाह्याध्यात्मिकानांभेदानांसुखदुःखमोहात्मकतयान्वयउपपद्यतेसुखादीनामांतरत्व
प्रतीतेःशब्दादीनांचातद्रूपप्रतीतेस्तन्निमित्तप्रतीतेश्चशब्दाद्यविशेषेपिचभावनाविशेषात्सुखदुःखादिविशेषोपलब्धेःत

145/1913

थापरिमितानांभेदानांमूलांकुरादीनांसंसर्गपूर्वकत्वंदृष्ट्वाबाह्याध्यात्मिकानांभेदानांपरिमितत्वात्संसर्गपूर्वकत्वमनुमिमा
नस्यसत्वरजस्तमसामपिसंसर्गपूर्वकत्वप्रसंगःपरिमितत्वाविशेषात्कार्यकारणभावस्तुप्रेक्षापूर्वकनिर्मितानांशयनासनादी
नांदृष्टइति।नकार्यकारणभावाद्बाह्याध्यात्मिकानांभेदानामचेतनपूर्वकत्वंशक्यंकल्पयितुं।प्रवृत्तेश्च।।२।।आस्तांतावदियंरच
नातत्सिद्ध्यर्थायाप्रवृत्तिःसाम्यावस्थानात्प्रच्युतिःसत्वरजस्तमसामंगांगिरूपापत्तिर्विशिष्टकार्याभिमुखप्रवृत्तितासापिना
चेतनस्यप्रधानस्यस्वतंत्रस्योपपद्यतेमृदादिष्वदर्शनाद्रथादिषुचनहिमृदादयोरथादयोवास्वयमचेतनाःसंतश्चेतनैःकुलालादि
भिरश्वादिभिर्वानधिष्ठिताविशिष्टकार्याभिमुखप्रवृत्तयोदृश्यंतेदृष्टाच्चादृष्टसिद्धिरतःप्रवृत्त्यनुपपत्तेरपिहेतोर्नाचेतनंजगत्कार
णमनुमातव्यंभवतिननुचेतनस्यापिप्रवृत्तिःकेवलस्यनदृष्टासत्यमेतत्तथापिचेतनसंयुक्तस्यरथादेरचेतनस्यप्रवृत्तिर्दृष्टानत्वचे
तनसंयुक्तस्यचेतनस्यप्रवृत्तिर्दृष्टाकिंपुनरत्रयुक्तंयस्मिन्प्रवृत्तिर्दृष्टातस्यसेत्युतयत्संयुक्तस्यदृष्टातस्यसेतिननुयस्मिन्दृश्यतेप्रवृ
त्तिस्तस्यैवसेतियुक्तमुभयोःप्रत्यक्षत्वान्नतुप्रवृत्त्याश्रयत्वेनकेवलश्चेतनोरथादिवत्प्रत्यक्षःप्रवृत्त्याश्रयदेहादिसंयुक्तस्यैवतुचेत
नस्यसद्भावसिद्धिःकेवलाचेतनरथादिवैलक्षण्यंजीवद्देहस्यदृष्टमितिअतएवचप्रत्यक्षेदेहेसतिदर्शनादसतिचादर्शनाद्दे
स्यचैतन्यमपीतिलोकायतिकाःप्रतिपन्नाःतस्मादचेतनस्यैवप्रवृत्तिरितितदभिधीयतेनब्रूमोयस्मिन्नचेतनेप्रवृत्तिर्दृश्यतेनत
स्यसेतिभवतुतस्यैवसासापिचेतनाद्भवतीतिब्रूमःतद्भावेभावात्तदभावेचाभावात्यथाकाष्ठादिव्यपाश्रयापिदाहप्रकाश
लक्षणाविक्रियानुपलभ्यमानापिचकेवलेज्वलनेज्वलनादेवभवतितत्संयोगेदर्शनात्तद्वियोगेचादर्शनात्तद्वल्लोकायतिका
नामपिचेतनएवदेहोऽचेतनानांरथादीनांप्रवर्तकोदृष्टइत्यविप्रतिषिद्धंचेतनस्यप्रवर्तकत्वंननुतवदेहादिसंयुक्तस्याप्यात्मनोवि
ज्ञानस्वरूपमात्रव्यतिरेकेणप्रवृत्त्यनुपपत्तेरनुपपन्नंप्रवर्तकत्वमितिचेन्नाय।।स्कांतवद्रूपादिवच्चप्रवृत्तिरहितस्यापिप्रव
र्तकत्वोपपत्तेर्यथायस्कांतोमणिःस्वयंप्रवृत्तिरहितोप्ययसःप्रवर्तकोयथावारूपादयोविषयाःस्वयंप्रवृत्तिरहिताअपिचक्षुरादी
नांप्रवर्तकाभवंतिएवंप्रवृत्तिरहितोपीश्वरःसर्वज्ञःसर्वात्मासर्वगतःसर्वशक्तिश्चसन्सर्वंजगत्प्रवर्तयेदित्युपपन्नंएकत्वात्प्रवृ
त्त्यभावेप्रवर्तकत्वानुपपत्तिरितिचेन्नाविद्याप्रत्युपस्थापितनामरूपमायावेशवशेनासकृत्प्रत्युक्तत्वात्तस्मात्संभवतिप्रवृत्तिःस

त्वं ब्रह्मकारणत्वेन तु चेतनकारणत्वे। पयोम्बुवच्चेत्तत्रापि॥३॥ स्यादेतत् यथा क्षीरमचेतनं स्वभावेनैव वत्सविवृद्ध्यर्थं प्रवर्तते यथा च जलमचेत
नं स्वाभावेनैव लोकोपकाराय स्यन्दते एवं प्रधानमप्यचेतनं स्वभावेनैव पुरुषार्थसिध्यर्थं प्रवर्तिष्यत इति नैतत्साधूच्यते यतस्तत्रापि पयो
ऽम्बुनोश्चेतनाधिष्ठितयोरेव प्रवृत्तिरित्यनुमिमीमहे उभयवादिप्रसिद्धे रथादावचेतने केवले प्रवृत्त्यदर्शनात् शास्त्रं च योऽप्सु तिष्ठन्न्यो
ऽपोऽन्तरो यमयति एतस्य वा अक्षरस्य प्रशासने गार्गि प्राच्यो न्यान्यः स्यन्दन्त इत्येवंजातीयकं समस्तस्य लोकपरिस्पन्दितस्येश्वराधिष्ठित
तां श्रावयति तस्मात्साध्यपक्षनिक्षिप्तत्वात्पयोम्बुवदित्यनुपन्यासः चेतनायाश्च धेन्वाः स्नेहेच्छया पयसः प्रवर्तकत्वोपपत्तेर्वत्सचोषणे
न च पयस आकृष्यमाणत्वात् न चाम्बुनोऽप्यत्यन्तमनपेक्षा निम्नभूम्याद्यपेक्षत्वात् स्यन्दनस्य चेतनापेक्षत्वं तु सर्वत्रोपदर्शितम् उपसंहारद
र्शनान्नेति चेन्न क्षीरवद्धि इत्यत्र तु बाह्यनिमित्तनिरपेक्षमपि स्वाश्रयं कार्यं भवतीत्येतल्लोकदृष्ट्या निदर्शितं शास्त्रदृष्ट्या तु पुनः सर्वत्रैवेश्व
रापेक्षत्वमापाद्यमानं न पराणुद्यते॥ व्यतिरेकानवस्थितेश्चानपेक्षत्वात्॥४॥ सांख्यानां त्रयो गुणाः साम्येनावतिष्ठमानाः प्रधानं तद्व्य
तिरेकेण न प्रधानस्य प्रवर्तकं निवर्तकं वा किंचिद्बाह्यमपेक्ष्यमवस्थितमस्ति पुरुषस्तूदासीनो न प्रवर्तको न निवर्तक इत्यतोऽनपेक्षं प्र
धानमनपेक्षत्वाच्च कदाचित्प्रधानं महदाद्याकारेण परिणमते कदाचिन्न परिणमत इत्येतदयुक्तम् ईश्वरस्य तु सर्वज्ञत्वात्सर्वशक्तित्वान्म
हामायत्वाच्च प्रवृत्त्यप्रवृत्ती न विरुध्येते॥ अन्यत्राभावाच्च न तृणादिवत्॥५॥ स्यादेतत् यथा तृणपल्लवोदकादि निमित्तान्तरनिरपेक्षं स्व
भावादेव क्षीराद्याकारेण परिणमते एवं प्रधानमपि महदाद्याकारेण परिणंस्यत इति कथं च निमित्तान्तरनिरपेक्षं तृणादीति गम्यते निमि
त्तान्तरानुपलम्भात् यदि हि किंचिन्निमित्तमुपलभेमहि ततो यथाकामं तेन तेन निमित्तेन तृणाद्युपादाय क्षीरं संपादयेमहि न तु संपा
दयामहे तस्मात्स्वाभाविकस्तृणादेः परिणामस्तथा प्रधानस्यापि स्यादिति अत्रोच्यते। भवेत्तृणादिवत्स्वाभाविकः प्रधानस्य परिणा १६
मो यदि तृणादेरपि स्वाभाविकः परिणामोऽभ्युपगम्येत न त्वभ्युपगम्यते निमित्तान्तरोपलब्धेः कथं निमित्तान्तरोपलब्धिरन्यत्राभावात्
धेन्वैव ह्युपयुक्तं तृणादि क्षीरीभवति न प्रहीणमनडुहाद्युपयुक्तं वा यदि हि निर्निमित्तमेतत्स्याद्धेनुशरीरसंबन्धादन्यत्रापि तृणादि
क्षीरीभवेत् न च यथाकामं मानुषैर्न शक्यं संपादयितुमित्येतावता निर्निमित्तं भवति भवति हि किंचित्कार्यं मानुषसंपाद्यं किंचिद्दैवसं
पाद्यं मनुष्या अपि शक्नुवन्त्येवोचितेनोपायेन तृणाद्युपादाय क्षीरं संपादयितुं प्रभूतं हि क्षीरं कामयमानाः प्रभूतं घासं धेनुं चारयन्ति तत

श्च प्रभूतं क्षीरं लभन्ते तस्मान्न तृणादिवत्स्वाभाविकः प्रधानस्य परिणामः॥ अभ्युपगमेऽप्यर्थाभावात्॥६॥ स्वाभाविकी प्रधानस्य
प्रवृत्तिर्न भवतीति स्थापितम् अथापि नाम भवतः श्रद्धामनुरुध्यमानाः स्वाभाविकीमेव प्रधानस्य प्रवृत्तिमभ्युपगच्छेम तथापि
दोषोऽनुषज्येतैव कुतः अर्थाभावात् यदि तावत्स्वाभाविकी प्रधानस्य प्रवृत्तिर्न किंचिदन्यदपेक्षत इत्युच्यते ततो यथैव सहकारि किंचि
न्नापेक्षते एवं प्रयोजनमपि किंचिन्नापेक्षते इत्यतः प्रधानं पुरुषार्थं साधयितुं प्रवर्तत इतीयं प्रतिज्ञा हीयेत स यदि ब्रूयात् सहकार्ये
व केवलं नापेक्षते न प्रयोजनमपीति तथापि प्रधानप्रवृत्तेः प्रयोजनं विवेक्तव्यं भोगो वा स्यादपवर्गो वोभयं वेति भोगश्चेत्कीदृशो
ऽनाधेयातिशयस्य पुरुषस्य भोगो भवेत् अनिर्मोक्षप्रसंगश्च अपवर्गश्चेत्प्रागपि प्रवृत्तेरपवर्गस्य सिद्धत्वात्प्रवृत्तिरनर्थिका स्याच्छ
ब्दाद्यनुपलब्धिप्रसंगश्च उभयार्थताभ्युपगमेऽपि भोक्तव्यानां प्रधानमात्राणामानन्त्यादनिर्मोक्षप्रसंग एव न चौत्सुक्यनिवृत्त्यर्था
प्रवृत्तिः न हि प्रधानस्याचेतनस्यौत्सुक्यं संभवति न च पुरुषस्य निर्मलस्य दृक्शक्तिसर्गशक्तिवैयर्थ्यभयाच्च प्रवृत्तिस्तर्हि दृक्
शक्त्यनुच्छेदवत्सर्गशक्त्यनुच्छेदादनिर्मोक्षप्रसंग एव तस्मात्प्रधानस्य पुरुषार्था प्रवृत्तिरित्येतदयुक्तम्॥ पुरुषाश्मवदिति चेत्तथापि॥
॥७॥ स्यादेतत् यथा कश्चित्पुरुषो दृक्शक्तिसंपन्नः प्रवृत्तिशक्तिहीनः पंगुरपरं पुरुषं प्रवृत्तिशक्तिसंपन्नं दृक्शक्तिविहीनमं
धमधिष्ठाय प्रवर्तयति यथा वायस्कान्तोऽश्मा स्वयमप्रवर्तमानोऽप्ययः प्रवर्तयति एवं पुरुषः प्रधानं प्रवर्तयिष्यतीति दृष्टान्तप्रत्ययेन
पुनः प्रत्यवस्थानम् अत्रोच्यते तथापि नैव दोषान्निर्मोक्षोऽस्ति अभ्युपेतहानं तावद्दोष आपतति प्रधानस्य स्वतन्त्रप्रवृत्त्यभ्युपगमात्पु
रुषस्य च प्रवर्तकत्वानभ्युपगमात् कथं चोदासीनः पुरुषः प्रधानं प्रवर्तयेत् पंगुरपि ह्यन्धं वागादिभिः पुरुषं प्रवर्तयति नैवं पुरु
षस्य कश्चिदपि प्रवर्तनव्यापारोऽस्ति निष्क्रियत्वान्निर्गुणत्वाच्च नाप्ययस्कान्तवत्सन्निधिमात्रेण प्रवर्तयेत् सन्निधिनित्यत्वेन प्रवृत्ति
नित्यत्वप्रसंगात्॥ अयस्कान्तस्य त्वनित्यः सन्निधिरस्ति स्वव्यापारः सन्निधिपरिमार्जनाद्यपेक्षत्वाच्चास्यास्तीत्यनुपन्यासः पुरु
षाश्मवदिति प्रधानस्याचैतन्यात्पुरुषस्य चौदासीन्यात्तृतीयस्य च तयोः संबन्धयितुरभावात्संबन्धानुपपत्तिः योग्यतानिमित्ते च सं
बन्धे योग्यताऽनुच्छेदादनिर्मोक्षप्रसंगः पूर्ववच्चेहाप्यर्थाभावो विकल्पयितव्यः परमात्मनस्तु स्वरूपव्यपाश्रयमौदासीन्यं
मायाव्यपाश्रयं च प्रवर्तकत्वमित्यस्त्यतिशयः॥ अंगित्वानुपपत्तेश्च॥८॥ इतश्च प्रधानस्य प्रवृत्तिरवकल्प्यते यद्धि सत्त्वरज

14/1913

ब्रं०भा०
९७

स्तमसामान्योन्यगुणप्रधानभावमुत्सृज्यसाम्येनस्वरूपमात्रेणावस्थानंसाप्रधानावस्थातस्यामवस्थायामनपेक्षस्वरूपाणांस्व
रूपप्रणाशभयात्परस्परंप्रत्यंगांगिभावानुपपत्तेर्बाह्यस्यचकस्यचित्क्षोभयितुरभावाद्गुणवैषम्यनिमित्तोमहदाद्युत्पादोनस्या
त्॥अन्यथानुमितौचज्ञशक्तिवियोगात्॥९॥अथापिस्यादन्यथावयमनुमिमीमहेयथानायमनंतरोदोषःप्रसज्येतनह्यनपेक्षस्व
भावाःकूटस्थाश्चास्माभिर्गुणाअभ्युपगम्यंतेप्रमाणाभावात्॥कार्यवशेनतुगुणानांस्वभावोभ्युपगम्यतेयथायथाकार्योत्पादउप
पद्यतेतथातथैषांस्वभावोभ्युपगंतव्यः॥चलंगुणवृत्तमितिचास्त्यभ्युपगमः॥तस्मात्साम्यावस्थायामपिवैषम्योपगमयोग्याएवगुणा
अवतिष्ठंतइत्येवमपिप्रधानस्यज्ञशक्तिवियोगाद्रचनानुपपत्त्यादयःपूर्वोक्तादोषास्तदवस्थाएव॥ज्ञशक्तिमपित्वनुमिमानःप्रतिवादित्वा
न्निवर्तेतचेतनमेकमनेकप्रपंचस्यजगतउपादानमितिब्रह्मवादप्रसंगात्॥वैषम्योपगमयोग्याअपिगुणाःसाम्यावस्थायांनिमित्ता
भावान्नैववैषम्यंभजेरन्भजमानावानिमित्ताभावाविशेषात्सर्वदैववैषम्यंभजेरन्नितिप्रसज्यतएवायमनंतरोदोषः॥विप्रतिषेधा
च्चासमंजसं॥१०॥परस्परविरुद्धश्चायंसांख्यानामभ्युपगमःक्वचित्सप्तेंद्रियाण्यनुक्रामंतिक्वचिदेकादशतथाक्वचिन्महतस्तन्मा
त्रसर्गमुपदिशंतिक्वचिदहंकारात्तथाक्वचित्त्रीण्यंतःकरणानिवर्णयंतिक्वचिदेकमितिप्रसिद्धएवतुश्रुत्येश्वरकारणवादिन्यावि
रोधःतदनुवर्तिन्याचस्मृत्यातस्मादप्यसमंजसंसांख्यानांदर्शनमिति॥अत्राहनन्वौपनिषदानामप्यसमंजसमेवदर्शनंतप्यताप
कयोर्जात्यंतरभावानभ्युपगमात्एकंहिब्रह्मसर्वात्मकंसर्वस्यप्रपंचस्यकारणमभ्युपगच्छतामेकस्यैवात्मनोविशेषौतप्यतापकौनजा
त्यंतरभूतावित्यभ्युपगंतव्यंस्यात्॥यदिचैतौतप्यतापकावेकस्यात्मनोविशेषौस्यातांसताभ्यांतप्यतापकाभ्यांननिर्मुच्यतइति
तापोपशांतयेसम्यग्दर्शनमुपदिशत्शास्त्रमनर्थकंस्यात्नह्यौष्ण्यप्रकाशधर्मकस्यप्रदीपस्यतदवस्थस्यैवताभ्यांनिर्मोक्षउप
पद्यतेयोपिजलतरंगवीचीफेनाद्युपन्यासस्तत्रापिजलात्मनएकस्यवीच्यादयोविशेषाआविर्भावतिरोभावरूपेणनित्याएवेति
समानोजलात्मनोवीच्यादिभिरनिर्मोक्षःप्रसिद्धश्चायंतप्यतापकयोर्जात्यंतरभावोलोकेतथार्थीचार्थश्चान्योन्यभिन्नौलक्ष्ये ९७
तेयद्यर्थिनःस्वतोन्योर्थोनस्याद्यस्यार्थिनोयद्विषयमर्थित्वंसतस्यार्थोनित्यसिद्धएवेतिनतस्यतद्विषयमर्थित्वंस्यात्यथाप्रका
शात्मनःप्रदीपस्यप्रकाशाख्योर्थोनित्यसिद्धएवेतिनतस्यतद्विषयमर्थित्वंभवत्यप्राप्तेह्यर्थेर्थिनोर्थित्वंस्यादितितथार्थस्याप्यर्थि

149/1913

नोप्यर्थत्वंनस्यात्स्वार्थत्वमेवस्यात्नचैतदस्तिसंबंधिशब्दौह्येतावर्थीचार्थश्चेतिद्वयोश्चसंबंधिनोःसंबंधःस्यान्नैकस्यैवतस्माद्भिन्नावेता
वर्थार्थिनौतथानर्थानर्थिनावपिअर्थिनोनुकूलोर्थःप्रतिकूलोनर्थस्ताभ्यामेकःपर्यायेणाभाभ्यांसंबध्यतेतत्रार्थस्याल्पीयस्त्वाद्भ
यस्त्वाच्चानर्थस्योभावप्यर्थानर्थावनर्थएवेतितापकःसउच्यतेतप्यस्तुपुरुषोयएकःपर्यायेणाभाभ्यांसंबध्यतइतितयोस्तप्यतापक
योरेकात्मकतायांमोक्षानुपपत्तिर्जात्यंतरभावेतुतत्संयोगहेतुपरिहारात्स्यादपिकदाचिन्मोक्षोपपत्तिरिति॥अत्रोच्यतेनएकत्वादेवत
प्यतापकभावानुपपत्तेर्भवेदयंदोषोयद्येकात्मतायांतप्यतापकावन्योन्यस्यविषयविषयिभावंप्रतिपद्येयातांनत्वेतदस्तिएकत्वादेव
नह्यग्निरेकःसन्स्वमात्मानंदहतिप्रकाशयतिवासत्यप्यौष्ण्यप्रकाशादिधर्मभेदेपरिणामित्वेचकिमुकूटस्थेब्रह्मण्येकस्मिंस्तप्यता
पभावःसंभवेत्क्वपुनरयंतप्यतापकभावःस्यादितिउच्यतेकिंनपश्यसिकर्मभूतोजीवद्देहस्तप्यःतापकःसवितेतिननुतप्तिर्नामदुःखं
साचेतयितुर्नाचेतनस्यदेहस्ययदिहिदेहस्यैवतप्तिःस्यात्सादेहनाशेस्वयमेवनश्यतीतितन्नाशायसाधनंनैषितव्यंस्यादितिउच्यते
देहाभावेपिकेवलस्यचेतनस्यतप्तिर्नदृष्टान्नचत्वयापितप्तिर्नामविक्रियाचेतयितुःकेवलस्येष्यतेनापिदेहचेतनयोःसंहतत्वमशुध्यादि
दोषप्रसंगात्॥नचतप्तेरेवतप्तिमभ्युपगच्छसिकथंतवापितप्यतापकभावःसत्त्वंतप्यंतापकंरजइतिचेन्नताभ्यांचेतनस्यसंहतत्वा
नुपपत्तेःसत्त्वानुरोधित्वाच्चेतनोपितप्यतइवेतिचेत्परमार्थतस्तर्हिनैवतप्यतइत्यापततीवशब्दप्रयोगात्नचेत्तप्यतेनेवशब्दोदोषायन
हिडुंडुभःसर्पइवेत्येतावतासविषोभवतिसर्पोवाडुंडुभइवेत्येतावतानिर्विषःतस्माच्चाविद्याकृतोयंतप्यतापकभावोनपारमार्थिक
इत्यभ्युपगंतव्यमितिनैवंसतिममापिकिंचिद्दुष्यति॥अथपारमार्थिकमेवचेतनस्यतप्यत्वमभ्युपगच्छसितवैवसुतरामनिर्मोक्षःप्र
सज्येतनित्यत्वाभ्युपगमाच्चतापकस्य॥तप्यतापकशक्त्योर्नित्यत्वेपिसतिनिमित्तसंयोगापेक्षत्वात्तप्तेःसंयोगनिमित्तादर्शननिवृ
त्तावात्यंतिकःसंयोगोपरमस्ततश्चात्यंतिकोमोक्षउपपन्नइतिचेन्नादर्शनस्यतमसोनित्यत्वाभ्युपगमात्गुणानांचोद्भवाभि
भवयोरनियतत्वादनियतःसंयोगनिमित्तोपरमइतिवियोगस्याप्यनियतत्वात्सांख्यस्यैवानिर्मोक्षोपरिहार्यःस्यात्औपनिषद
स्यत्वात्मैकत्वाभ्युपगमादेकस्यचविषयविषयिभावानुपपत्तेर्विकारभेदस्यचवाचारंभणमात्रत्वश्रवणात्अनिर्मोक्षाशंकास्वप्ने
पिनोपजायतेव्यवहारेतुयत्रयथादृष्टस्तप्यतापकभावस्तत्रतथैवसइतिनचोदयितव्यःपरिहर्तव्योवाभवति॥प्रधानकारणवादो

ब्रं०भा०
९८

निराकृतः परमाणुकारणवाद इदानीं निराकर्तव्यस्तत्रादौ तावद्योणुकारणवादिना ब्रह्मवादिनि दोष उत्प्रेक्ष्यते स प्रतिसमाधीयते तत्रा
यं वैशेषिकाणामभ्युपगमः कारणद्रव्यसमवायिनो गुणाः कार्यद्रव्ये समानजातीयं गुणांतरमारभंते शुक्लेभ्यस्तंतुभ्यः शुक्लस्य पट
स्य प्रसवदर्शनात् तद्विपर्ययादर्शनाच्च तस्माच्चेतनस्य ब्रह्मणो जगत्कारणत्वेभ्युपगम्यमाने कार्येपि जगति चैतन्यं समवेयात् तददर्श
नात्तु न चेतनं ब्रह्म जगत्कारणं भवितुमर्हतीति इममभ्युपगमं तदीययैव प्रक्रियया व्यभिचारयति ॥ महद्दीर्घवद्वा ह्रस्वपरिमंडलाभ्यां
॥११॥ एषा तेषां प्रक्रिया परमाणवः किल कंचित्कालमनारब्धकार्या यथायोगं रूपादिमंतः पारिमांडल्यसूक्ष्मपरिमाणाश्च
तिष्ठंति ते पश्चाददृष्टादिपुरःसराः संयोगसचिवाश्च संतो द्व्यणुकादिक्रमेण कृत्स्नं कार्यजातमारभंते कारणगुणाश्च कार्ये गुणांतरं
यदा द्वौ परमाणू द्व्यणुकमारभेते तदा परमाणुगता रूपादिगुणविशेषाः शुक्लादयो द्व्यणुके शुक्लादीनपरानारभंते परमाणुपरिमाण
गुणविशेषस्तु पारिमांडल्यं न द्व्यणुके पारिमांडल्यमपरमारभंते द्व्यणुकस्य परिमाणांतरयोगाभ्युपगमात् ॥ अणुत्वह्रस्वत्वे हि द्व्य
णुकवर्तिनी परिमाणे वर्णयंति यदापि द्वे द्व्यणुके चतुरणुकमारभेते तदापि समानं द्व्यणुकसमवायिनां शुक्लादीनामारंभकत्वं अणुत्व
ह्रस्वत्वे तु द्व्यणुकसमवायिनी अपि नारभेते चतुरणुकस्य महत्त्वदीर्घत्वयोगाभ्युपगमात् । यदापि बहवः परमाणवो बहूनि वा
द्व्यणुकानि द्व्यणुकसहितो वा परमाणुः कार्यमारभते तदापि समानैषा योजना तदेवं यथा परमाणोः परिमंडलात्सतोऽणु ह्रस्वं च द्व्यणु
कं जायते महद्दीर्घं च त्र्यणुकादि न परिमंडलं यथा वा द्व्यणुकादणोर्ह्रस्वाच्च सतो महद्दीर्घं च त्र्यणुकादि जायते नाणु नो ह्रस्वं एवं
चेतनाद्ब्रह्मणोऽचेतनं जगज्जनिष्यत इत्यभ्युपगमे किं तव च्छिन्नं अथ मन्यसे विरोधिना परिमाणांतरेणाक्रांतं कार्यद्रव्यं द्व्यणुकादि
इत्यतो नारंभकाणि कारणगतानि पारिमांडल्यादीनीत्यभ्युपगच्छामि न तु चेतनाविरोधिना गुणांतरेण जगत आक्रांतत्वमस्ति येन कार
णगता चेतना कार्ये चेतनांतरं नारभेत न ह्यचेतना नाम चेतनाविरोधी कश्चिद्गुणोस्ति चेतनाप्रतिषेधमात्रत्वात्तस्मात्पारिमांडल्या २८
दिवैषम्यात्प्राप्नोति चेतनाया आरंभकत्वमिति । मैवं मंस्थाः यथा कारणे विद्यमानानामपि पारिमांडल्यादीनामनारंभकत्व
मेवं चैतन्यस्यापीत्यस्यांशस्य समानत्वात् न च परिमाणांतराक्रांतत्वं पारिमांडल्यादीनामनारंभकत्वे कारणं प्राक्परिमाणांत
रारंभात्क्षणमात्रमगुणं तिष्ठतीत्यभ्युपगमात् न च परिमाणांतरारंभव्यग्राणि पारिमांडल्यादीन्यतः स्वसमानजातीयं परिमा

15/1/1913

णांतरं नारभंते परिमाणांतरस्यान्यहेतुत्वाभ्युपगमात् कारणबहुत्वात्कारणमहत्त्वात्प्रचयविशेषाच्च महत् तद्विपरीतमणु एते तु
दीर्घत्वह्रस्वत्वे व्याख्याते इति हि काणभुजानि सूत्राणि न च संनिधानविशेषात्कुतश्चित्कारणबहुत्वादीन्येवारभंते न पारिमांडल्
यादीनीत्युच्येत द्रव्यांतरे गुणांतरे वारभ्यमाणे सर्वेषामेव कारणगुणानां स्वाश्रयसमवायाविशेषात्तस्मात्स्वभावादेव पारिमांडल्यादीना
मनारंभकत्वं तथा चेतनाया अपीति द्रष्टव्यं संयोगाच्च द्रव्यादीनां विलक्षणानामुत्पत्तिदर्शनात्समानजातीयोत्पत्तिव्यभिचारः द्र
व्ये प्रकृते गुणोदाहरणमयुक्तमिति चेन्न दृष्टांतेन विलक्षणारंभमात्रस्य विवक्षितत्वात् न च द्रव्यस्य द्रव्यमेवोदाहर्तव्यं गुणस्य वा
गुण एवेति कश्चिन्नियमहेतुरस्ति सूत्रकारोपि भवतां द्रव्यस्य गुणमुदाजहार प्रत्यक्षाप्रत्यक्षाणामप्रत्यक्षत्वात्संयोगस्य पंचा
त्मकं न विद्यत इति यथा प्रत्यक्षाप्रत्यक्षयोर्भूम्याकाशयोः समवयन्संयोगोऽप्रत्यक्ष एवं प्रत्यक्षाप्रत्यक्षेषु पंचसु भूतेषु समवय
च्छरीरमप्रत्यक्षं स्यात् प्रत्यक्षं तु शरीरं तस्मान्न पांचभौतिकमित्येतदुक्तं भवति गुणश्च संयोगो द्रव्यं शरीरं दृश्यते त्विति चात्रापि
विलक्षणोत्पत्तिः प्रपंचिता नन्वेवं सति तेनैवैतत्कृतं नेति ब्रूमः तत्सांख्यं प्रत्युक्तमेतत्तु वैशेषिकं प्रति ननु अतिदेशोपि समानन्याय
तया कृतः एतेन शिष्टापरिग्रहा अपि व्याख्याता इति सत्यमेतत्तस्यैव त्वयं वैशेषिकप्रक्रियारंभे तत्प्रक्रियानुगतेन निदर्शनेन
प्रपंचः कृतः ॥ उभयथापि न कर्मातस्तदभावः ॥१२॥ इदानीं परमाणुकारणवादं निराकरोति स च वाद इत्थं समुत्तिष्ठति पटा
दीनि हि लोके सावयवानि द्रव्याणि स्वानुगतैः संयोगसचिवैस्तंत्वादिभिर्द्रव्यैरारभ्यमाणानि दृष्टानि तत्सामान्येन यावत्
किंचित्सावयवं तत्सर्वं स्वानुगतैरेव संयोगसचिवैस्तैस्तैर्द्रव्यैरारब्धमिति गम्यते स चायमवयवावयविविभागो यतो निवर्त
ते सोपकर्षः अणुपर्यंतः पर्यंतगतः परमाणुः सर्वं चेदं गिरिसमुद्रादिकं जगत्सावयवं सावयवत्वादाद्यंतवत् न चाकारणेन कार्येण
भवितव्यमित्यतः परमाणवो जगतः कारणमिति कणभुगभिप्रायः तानीमानि चत्वारि भूतानि भूम्युदकतेजःपवनाख्या
नि सावयवान्युपलभ्य चतुर्विधाः परमाणवः परिकल्प्यंते तेषां चापकर्षपर्यंतगतत्वेन परतो विभागासंभवाद्विनश्यतां च पृ
थिव्यादीनां परमाणुपर्यंतो विभागो भवति स प्रलयकालः ततः सर्गकाले च वायवीयेष्वणुष्वदृष्टापेक्षं कर्मोत्पद्यते तत्क
र्म स्वाश्रयमणुमण्वंतरेण संयुनक्ति ततो द्व्यणुकादिक्रमेण वायुरुत्पद्यते एवमग्निरेवमापः एवं पृथिवी एवमेव शरीरं सेंद्रि

शां०भा०
११
यस्मिन्वै सर्वमिदं जगदणुभ्यः संभवति अणुगतेभ्यश्च रूपादिभ्यो द्व्यणुकादिगतानि रूपादीनि संभवंति तंतुपटन्यायेनेति काणादा
मन्यंते तत्रेदमभिधीयते विभागावस्थानां तावदणूनां संयोगः कर्मापेक्षोऽभ्युपगंतव्यः कर्मवतां तंत्वादीनां संयोगदर्शनात् कर्मणश्च
कार्यत्वान्निमित्तं किमप्यभ्युपगंतव्यं अनभ्युपगमे निमित्ताभावान्नाणुष्वाद्यं कर्म स्यादभ्युपगमेऽपि यदि प्रयत्नोऽभिघातादिर्वा य
थादृष्टं किमपि कर्मणो निमित्तमुपमभ्युपगम्येत तस्यासंभवान्नैवाणुष्वाद्यं कर्म स्यान्न हि तस्यामवस्थायामात्मगुणः प्रयत्नः संभ
वति शरीराभावाच्छरीरप्रतिष्ठे हि मनस्यात्ममनःसंयोगे सत्यात्मगुणः प्रयत्नो जायते एतेनाभिघाताद्यपि दृष्टं निमित्तं प्रत्याख्या
तव्यं सर्गोत्तरकालं हि तत्सर्वं नाद्यस्य कर्मणो निमित्तं संभवत्यदृष्टमाद्यस्य कर्मणो निमित्तमित्युच्येत तत्पुनरात्मसमवायि वा स्यादण
समवायि वोभयथापि नादृष्टनिमित्तमणुषु कर्मावकल्पेतादृष्टस्याचेतनत्वान्न ह्यचेतनं चेतनानधिष्ठितं स्वतंत्रं प्रवर्तते प्रवर्तयति वे
ति सांख्यप्रक्रियायामभिहितं आत्मनश्चानुत्पन्नचैतन्यस्य तस्यामवस्थायामचेतनत्वात् आत्मसमवायित्वाभ्युपगमाच्च नाद
ष्टमणुषु कर्मणो निमित्तं स्यादसंबंधात् अदृष्टवता पुरुषेणास्त्यणूनां संबंध इति चेत्संबंधसातत्यात्प्रवृत्तिसातत्यप्रसंगो नि
यामकांतराभावात् तदेवं नियतस्य कस्यचित्कर्मनिमित्तस्याभावान्नाणुष्वाद्यं कर्म स्यात् कर्माभावात् तन्निबंधनः संयोगो न स्या
त्संयोगाभावाच्च तन्निबंधनं द्व्यणुकादि कार्यजातं न स्यात् संयोगश्चाणोरण्वंतरेण सर्वात्मना वा स्यादेकदेशेन वा सर्वात्मना चेदुपच
यानुपपत्तेरणुमात्रत्वप्रसंगो दृष्टविपर्ययप्रसंगश्च प्रदेशवतो द्रव्यस्य प्रदेशवता द्रव्यांतरेण संयोगस्य दृष्टत्वादेकदेशेन चेत्साव
यवत्वप्रसंगः ॥ परमाणूनां कल्पिताः प्रदेशाः स्युरिति चेत् कल्पितानामवस्तुत्वादवस्त्वेव संयोग इति वस्तुनः कार्यस्यासमवायिका
रणं न स्यादसति चासमवायिकारणे द्व्यणुकादि कार्यद्रव्यं नोत्पद्येत यथा चादिसर्गे निमित्ताभावात्संयोगोत्पत्त्यर्थं कर्म नाणूनां सं
भवति एवं महाप्रलयेऽपि विभागोत्पत्त्यर्थं कर्म नैवाणूनां संभवेन्न हि तत्रापि किंचिन्नियतं निमित्तं दृष्टमस्त्यदृष्टमपि भोगप्रसिध्य
र्थं न प्रलयप्रसिध्यर्थमित्यतो निमित्ताभावान्न स्यादणूनां संयोगोत्पत्त्यर्थं विभागोत्पत्त्यर्थं च कर्मातश्च संयोगविभागायत्तयोः स १९
र्गप्रलययोरभावः प्रसज्येत तस्मादनुपपन्नोऽयं परमाणुकारणवादः ॥ समवायाभ्युपगमाच्च साम्यादनवस्थितेः ॥१३॥ समवा
याभ्युपगमाच्च तदभाव इति प्रकृतेनाणुवादनिराकरणेन संबध्यते द्वाभ्यां चाणुभ्यां द्व्यणुकमुत्पद्यमानमत्यंतभिन्नमणुभ्या

मण्वोः समवैतीत्यभ्युपगम्यते भवता न चैवमभ्युपगच्छता शक्यतेऽणुकारणता समर्थयितुं कुतः साम्यादनवस्थितेः यथैव ह्यणु
भ्यामत्यंतभिन्नं सत् द्व्यणुकं समवायलक्षणेन संबंधेन ताभ्यां संबध्यत एवं समवायोऽपि समवायिभ्योऽत्यंतभिन्नः सन् समवाय
लक्षणेनान्येनैव संबंधेन समवायिभिः संबध्येतात्यंतभेदसाम्यात्ततश्च तस्य तस्यान्योन्यः संबंधः कल्पयितव्य इत्यनवस्थैव
प्रसज्येत नन्विह प्रत्ययग्राह्यः समवायो नित्यसंबद्ध एव समवायिभिर्गृह्यते नासंबद्धः संबंधांतरापेक्षो वा ॥ ततश्च न तस्यान्यः संबंधः
कल्पयितव्यो येनानवस्था प्रसज्येत नेत्युच्यते संयोगोऽप्येवं सति संयोगिभिर्नित्यसंबद्ध एवेति समवायवन्नान्यं संबंधमपेक्षेत समवा
योऽपि तर्ह्यर्थांतरत्वात्संयोगः संबंधांतरमपेक्षेत समवायोऽपि तर्ह्यर्थांतरत्वात्संबंधांतरमपेक्षेत न च गुणत्वात्संयोगः संबंधांतरमपेक्ष
ते न समवायोऽगुणत्वादिति युज्यते वक्तुमपेक्षाकारणस्य तुल्यत्वात् गुणपरिभाषायाश्चातंत्रत्वात् तस्मादर्थांतरं समवायमुपग
च्छतः प्रसज्येतैवानवस्था प्रसज्यमानायां चानवस्थायामेकासिद्धौ सर्वासिद्धेर्द्वाभ्यामणुभ्यां द्व्यणुकं नोत्पद्येत तस्मादप्यनुपपन्नः
परमाणुकारणवादः ॥ नित्यमेव च भावात् ॥१४॥ अपि चाणवः प्रवृत्तिस्वभावा वा निवृत्तिस्वभावा वा ॥ उभयस्वभावा वा ॥ अनुभय
भ्युपगम्येरन् गत्यंतराभावात् चतुर्धापि नोपपद्यते प्रवृत्तिस्वभावत्वे नित्यमेव प्रवृत्तेर्भावात्प्रलयाभावप्रसंगः निवृत्तिस्वभावत्वेऽपि नि
त्यमेव निवृत्तेर्भावात्सर्गाभावप्रसंगः उभयस्वभावत्वं च विरोधादसंभाव्यं अनुभयस्वभावत्वे तु निमित्तवशात्प्रवृत्तिनिवृत्त्योरभ्यु
पगम्यमानयोरदृष्टादेर्निमित्तस्य नित्यसंनिधानान्नित्यप्रवृत्तिप्रसंगः तंत्रत्वेऽप्यदृष्टादेर्नित्याप्रवृत्तिप्रसंगस्तस्मादनुपपन्नः प
रमाणुकारणवादः ॥१५॥ रूपादिमत्वाच्च विपर्ययो दर्शनात् ॥ सावयवानां द्रव्याणामवयवशो विभज्यमानानां यतः परो विभागो न
संभवति ते चतुर्विधा रूपादिमंतः परमाणवश्चतुर्विधस्य रूपादिमतो भूतभौतिकस्यारंभका नित्याश्चेति वैशेषिका अभ्युप
गच्छंति स तेषामभ्युपगमो निरालंबन एव यतो रूपादिमत्वात्परमाणूनामणुत्वनित्यत्वविपर्ययः प्रसज्येत परमकारणापेक्षया
स्थूलत्वमनित्यत्वं च तेषामभिप्रेतविपरीतमापद्येतेत्यर्थः कुत एवं लोके दृष्टत्वात् यद्धि लोके रूपादिमद्वस्तु तत्स्वकारणापेक्ष
या स्थूलमनित्यं च दृष्टं तद्यथा पटस्तंतूनपेक्ष्य स्थूलोऽनित्यश्च भवति तंतवश्चांशूनपेक्ष्य स्थूला अनित्याश्च भवंति तथा चामी परमाण
वो रूपादिमंतस्तैरभ्युपगम्यंते तस्मात्तेऽपि कारणवंतस्तदपेक्षया स्थूला अनित्याश्च प्राप्नुवंति यच्च नित्यत्वे कारणं तैरुक्तं सद

153/1913

शां०भा० कारणवन्नित्यमितितदेवंसत्यणुपुनसंभवतिउक्तेनप्रकारेणकारणवत्त्वापत्तेःयदपिनित्यत्वेद्वितीयंकारणमुक्तंअनित्यमि
२० तिचविशेषतःप्रतिषेधाभावइतितदपिनावश्यंपरमाणूनांनित्यत्वंसाधयतिअसतिहियस्मिन्कस्मिंश्चिन्नित्येवस्तुनिनित्यशब्दे
ननञःसमासोनोपपद्येतनपुनःपरमाणुनित्यत्वमपेक्ष्यतेतच्चास्त्येवनित्यंपरमकारणंब्रह्मनचशब्दार्थव्यवहारमात्रेणकस्यचि
दर्थस्यप्रसिद्धिर्भवतिप्रमाणान्तरसिद्धयोःशब्दार्थयोर्व्यवहारावतारात्यदपिनित्यत्वेतृतीयंकारणमुक्तंअविद्याचेतितद्यद्येवंविव्रि
येतसतांपरिदृश्यमानकार्याणांकारणानांप्रत्यक्षेणाग्रहणमविद्येतितर्हिद्व्यणुकनित्यतापद्येताथाद्रव्यत्वेसतीतिविशेष्ये
ततथाप्यकारणवत्त्वमेवनित्यतानिमित्तमापद्येततस्यचप्रागेवोक्तत्वादविद्याचेतिपुनरुक्तंस्यादथापिकारणविभागात्कारणवि
नाशाच्चान्यस्यतृतीयस्यविनाशहेतोरसंभवोऽविद्यासापरमाणूनांनित्यत्वंख्यापयतीतिव्याख्यायेतनावश्यंविनश्यद्वस्तुद्वाभ्यामे
वहेतुभ्यांविनष्टुमर्हतीतिनियमोऽस्तिसंयोगसचिवेह्यनेकस्मिंश्चद्रव्येद्रव्यान्तरस्यारंभकेऽभ्युपगम्यमानेएतदेवंस्यात्तुयदात्वया
स्त्वविशेषंसामान्यात्मकंकारणंविशेषवदवस्थान्तरमापद्यमानमारंभकमभ्युपगम्यतेतदाघृतकाठिन्यविलयनवन्मूर्त्यवस्था
विलयनेनापिविनाशउपपद्यतेतस्माद्रूपादिमत्त्वात्स्यादभिप्रेतविपर्ययःपरमाणूनांतस्मादप्यनुपपन्नःपरमाणुकारणवा
दः॥उभयथाचदोषात्॥१६॥गंधरसरूपस्पर्शगुणास्थूलापृथिवीरसरूपस्पर्शगुणाःसूक्ष्माआपःरूपस्पर्शगुणंसूक्ष्मत
रंतेजःस्पर्शगुणःसूक्ष्मतमोवायुरित्येवमेतानिचत्वारिभूतान्युपचितापचितगुणानिस्थूलसूक्ष्मतारतम्योपेतानिचलोके
लक्ष्यन्तेतद्वत्परमाणवोऽप्युपचितापचितगुणाःकल्प्येरन्नवोभयथापिचदोषानुषंगोऽपरिहार्यएवस्यात्कल्प्यमानेतावदु
पचितापचितगुणत्वेनुपचितगुणानांमूर्त्युपचयात्परमाणुत्वप्रसंगोनचान्तरेणापिमूर्त्युपचयंगुणोपचयोभवतीत्यु
च्यतेकार्येषुभूतेषुगुणोपचयेमूर्त्युपचयदर्शनादकल्प्यमानेतूपचितापचितगुणत्वेपरमाणुत्वसाम्यसिद्धयेयदिताव २०
त्सर्वएकैकगुणाएवकल्प्येरंस्ततस्तेजसिस्पर्शस्योपलब्धिर्नस्यादप्सुरूपस्पर्शयोःपृथिव्यांरसरूपस्पर्शानांकारणगुण
पूर्वकत्वात्कार्यगुणानांअथसर्वेचतुर्गुणाएवकल्प्येरंस्ततोऽप्स्वपिगंधस्योपलब्धिःस्यात्तेजसिगंधरसयोर्वायौच
गंधरसरूपाणांनचैवंदृश्यतेतस्मादप्यनुपपन्नःपरमाणुकारणवादः॥अपरिग्रहाच्चात्यन्तमनपेक्षा॥१७॥प्रधानकारण

155/1313

वादोवेदविद्भिरपिकैश्चिन्मन्वादिभिःसत्कार्यत्वाद्यंशोपजीवनाभिप्रायेणोपनिबद्धोऽयंतुपरमाणुकारणवादोनकैश्चिदपि
शिष्टैःकेनचिदप्यंशेनपरिगृहीतइत्यत्यन्तमेवानादरणीयोवेदवादिभिः॥अपिचवैशेषिकास्तन्त्रार्थभूतान्षट्पदार्थान्द्रव्यगुण
कर्मसामान्यविशेषसमवायाख्यानत्यन्तभिन्नान्भिन्नलक्षणानभ्युपगच्छन्तियथामनुष्योऽश्वःशशइतितथात्वमभ्युपगम्य
तद्विरुद्धंद्रव्याधीनत्वंशेषाणामभ्युपगच्छन्तितन्नोपपद्यतेकथंयथाहिलोकेशशकुशपलाशप्रभृतीनामत्यन्तभिन्नानांस
तांनेतरेतराधीनत्वंभवत्येवंद्रव्यादीनामप्यत्यन्तभिन्नत्वान्नैवद्रव्याधीनत्वंगुणादीनांभवितुमर्हतिअथभवतिद्रव्याधीन
त्वंगुणादीनांततोद्रव्यभावेभावाद्द्रव्याभावेऽभावाद्द्रव्यमेवसंस्थानादिभेदादनेकशब्दप्रत्ययभाग्भवतियथादेवदत्तएक
एवसन्नवस्थान्तरयोगादनेकशब्दप्रत्ययभाग्भवतितद्वत्तथासतिसांख्यसिद्धान्तप्रसंगःस्वसिद्धान्तविरोधश्चापद्येयातांनन्व
ग्नेरन्यस्यापिसतोधूमस्याग्न्यधीनत्वंदृश्यतेसत्यंदृश्यतेभेदप्रतीतेस्तुतत्राग्निधूमयोरन्यत्वंनिश्चीयतेइहतुशुक्लःकंबलोरो
हिणीधेनुर्नीलमुत्पलमितिद्रव्यस्यैवतस्यतस्यतेनतेनविशेषणेनप्रतीयमानत्वान्नैवद्रव्यगुणयोरग्निधूमयोरिवभेदप्रतीतिरस्ति
तस्माद्द्रव्यात्मकतागुणस्यएतेनकर्मसामान्यविशेषसमवायानांद्रव्यात्मकताव्याख्यातागुणानांद्रव्याधीनत्वंद्रव्यगुणयोर
युतसिद्धत्वादितियदुच्यतेतत्पुनरयुतसिद्धत्वंअपृथग्देशत्वंवास्यादपृथक्कालत्वंवाअपृथक्स्वभावत्वंवासर्वथापिनोपपद्यतेअपृ
थग्देशत्वेतावत्स्वाभ्युपगमोविरुध्येतकथंतन्त्वारब्धोहिपटस्तन्तुदेशोऽभ्युपगम्यतेनतुतन्तुदेशास्तथाचाहुर्द्रव्याणिद्रव्यान्तरमारभं
तेगुणाश्चगुणान्तरमितितन्तवोहिकारणद्रव्याणिकार्यद्रव्यंपटमारभन्तेतन्तुगताश्चगुणाःशुक्लादयःकार्यद्रव्येपटेशुक्लादि
गुणान्तरमारभन्तइतिहितेऽभ्युपगच्छन्तिसोऽभ्युपगमोद्रव्यगुणयोरपृथग्देशत्वेऽभ्युपगम्यमानेबाध्येतअथापृथक्कालत्वमयु
तसिद्धत्वमुच्येतसव्यदक्षिणयोरपिगोविषाणयोरयुतसिद्धत्वंप्रसज्येततथापृथक्स्वभावत्वेत्वयुतसिद्धत्वेनद्रव्यगुणयोरा
त्मभेदःसंभवतितस्यतादात्म्येनैवप्रतीयमानत्वात्युतसिद्धयोःसंबंधःसंयोगोऽयुतसिद्धयोस्तुसमवायइत्ययमप्यभ्युपगमो
मृषैवतेषांप्राक्सिद्धस्यकार्यात्कारणस्यायुतसिद्धत्वानुपपत्तेः॥अथान्यतरापेक्षएवायमभ्युपगमःस्यादयुतसिद्धस्यकार्य
स्यकारणेनसंबंधःसमवायइतिएवमपिप्रागसिद्धस्यालब्धात्मकस्यकार्यस्यकारणेनसंबंधोनोपपद्येतद्व्यायत्तत्वात्संबंधस्य

सिद्धं भूत्वा संबध्यत इति चेत् प्राक्कारणसंबंधात्कार्यस्य सिद्धावभ्युपगम्यमानायामयुतसिद्ध्यभावात्कार्यकारणयोः संयो
गविभागौ न विद्येते इतीदं दुरुक्तं स्यात् यथा चोत्पन्नमात्रस्याक्रियस्य कार्यद्रव्यस्य विभुभिराकाशादिभिर्द्रव्यांतरैः संबंधः
संयोग एवाभ्युपगम्यते न समवायः नापि संयोगस्य समवायस्य वा संबंधस्य संबंधिव्यतिरेकेणास्तित्वे किंचित् ॥ प्रमाणमस्ति सं
बंधिशब्दप्रत्ययव्यतिरेकेण संयोगसमवायशब्दप्रत्ययदर्शनात्तयोरस्तित्वमिति चेन्न एकत्वेपि स्वरूपबाह्यरूपापेक्षयानेकश
ब्दप्रत्ययदर्शनात् यथैकोपि सन्देवदत्तो लोके स्वरूपं संबंधिरूपं चापेक्ष्यानेकशब्दप्रत्ययभाग्भवति मनुष्यो ब्राह्मणः श्रोत्रियो व
दान्यो बालो युवा स्थविरः पिता पुत्रः पौत्रो भ्राता जामातेति यथा चैकापि सती रेखा स्थानान्यत्वेन निविशमानैकदशशतसहस्रादि
शब्दप्रत्ययभेदमनुभवति तथा संबंधिनोरेव संबंधिशब्दप्रत्ययव्यतिरेकेण संयोगसमवायशब्दप्रत्ययार्हत्वं न व्यतिरिक्तवस्त्व
स्तित्वेनोपलब्धिलक्षणप्राप्तस्यानुपलब्धेरभावो वस्त्वंतरस्य नापि संबंधिविषयत्वे संबंधशब्दप्रत्यययोः संततभावप्रसं
गः स्वरूपबाह्यरूपापेक्षयेत्युक्तोत्तरत्वात् तथाण्वात्ममनसामप्रदेशत्वान्न संयोगः संभवति प्रदेशवतो द्रव्यस्य प्रदेशवता द्रव्यांत
रेण संयोगदर्शनात् कल्पिताः प्रदेशा अण्वात्ममनसां भविष्यंतीति चेन्न अविद्यमानार्थकल्पनायां सर्वार्थसिद्धिप्रसंगा
त् इयानेवाविद्यमानो विरुद्धो वार्थः कल्पनीयो नातोधिक इति नियमहेत्वभावात् कल्पनायाश्च स्वायत्तत्वात्प्रभूतत्वसंभवाच्च न
च वैशेषिकैः कल्पितेभ्यः षड्भ्योर्थेभ्योभ्यधिकाः शतं सहस्रं वार्था न कल्पयितव्या इति निवारको हेतुरस्ति तस्माद्यस्मै यस्मै
यद्यद्रोचते तत्तत्सिध्येत् कश्चिद्दयालुः प्राणिनां दुःखबहुलः संसार एव माभूदिति कल्पयेदन्यो वा व्यसनी मुक्तानामपि पुनरुत्प
त्तिं कल्पयेत्कस्तयोर्निवारकः स्यात् किं चान्यत् द्वाभ्यां परमाणुभ्यां निरवयवाभ्यां सावयवस्य द्व्यणुकस्याकाशेनेव संश्लेषानुपप २३
त्तिः नह्याकाशस्य पृथिव्यादीनां च जतुकाष्ठवत्संश्लेषोस्ति कार्यकारणद्रव्ययोराश्रिताश्रयभावोन्यथा नोपपद्यत
इत्यवश्यं कल्प्यः समवाय इति चेन्न इतरेतराश्रयत्वात् कार्यकारणयोर्हि भेदसिद्धावाश्रिताश्रयभावसिद्धिराश्रिताश्रयभावसि
द्धौ च तयोर्भेदसिद्धिः कुंडबदरवदिति इतरेतराश्रयता स्यात् नहि कार्यकारणयोर्भेद आश्रिताश्रयभावो वा वेदांतिभिरभ्युपगम्य
ते कारणस्यैव संस्थानमात्रं कार्यमित्यभ्युपगमात् किं चान्यत् परमाणूनां परिच्छिन्नत्वात् यावत्यो दिशः षड् अष्टौ दश वा तावद्भि

197/1913

रवयवैः सावयवास्ते स्युः सावयवत्वादनित्याश्चेति नित्यत्वनिरवयवत्वाभ्युपगमो बाध्येत यांस्त्वं दिग्भेदभेदिनोवयवान्कल्पयसि त
एव मम परमाणव इति चेन्न स्थूलसूक्ष्मतारतम्यक्रमेणा परमकारणाद्विनाशोपपत्तेः यथा पृथिवी द्व्यणुकाद्यपेक्षया स्थूल
तमा वस्तुभूतापि विनश्यति ततः सूक्ष्मं सूक्ष्मतरं च पृथिव्येकजातीयकं विनश्यति ततो द्व्यणुकं तथा परमाणवोपि पृथिव्येकजा
तीयत्वाद्विनश्येयुः विनश्यंतोप्यवयवविभागेनैव विनश्यंतीति चेन्नायं दोषः यतो घृतकाठिन्यविलयनवदपि विनाशोपपत्तिमवो
चाम यथा हि घृतसुवर्णादीनामविभज्यमानावयवानामप्यग्निसंयोगाद्द्रवभावापत्त्या काठिन्यविनाशो भवति एवं परमाणू
नामपि परमकारणभावापत्त्या मूर्त्यादिविनाशो भवति ॥ तथा कार्यारंभोपि नावयवसंयोगेनैव केवलेन भवति क्षीरजलादीना
मंतरेणाप्यवयवसंयोगांतरं दधिहिमादिकार्यारंभदर्शनात् तदेवमसारतर्कसंदृब्धत्वादीश्वरकारणश्रुतिविरुद्धत्वाच्छ्रुतिप्रव
णैश्च मन्वादिभिः शिष्टैरपरिगृहीतत्वादत्यंतमेवानपेक्षास्मिन्परमाणुकारणवादे कार्या श्रेयोर्थिभिरिति वाक्यशेषः ॥ स
मुदाय उभयहेतुकेपि तदप्राप्तिः ॥१८॥ वैशेषिकराद्धांतो दुर्युक्तियोगाद्वेदविरोधाच्छिष्टापरिग्रहाच्च नापेक्षितव्य इत्युक्तं सोर्ध
वैनाशिक इति वैनाशिकत्वसामान्यात्सर्ववैनाशिकराद्धांतो नतरामपेक्षितव्य इतीदमिदानीमुपपादयामः स च बहु
प्रकारः प्रतिपत्तिभेदाद्विनेयभेदाद्वा तत्रैते त्रयो वादिनो भवंति केचित्सर्वास्तित्ववादिनः केचिद्विज्ञानमात्रास्तित्ववादिनोन्ये पुनः सर्वशून्य
वादिन इति तत्र ये सर्वास्तित्ववादिनो बाह्यमाभ्यंतरं च वस्त्वभ्युपगच्छंति भूतं भौतिकं चित्तं चैत्तं च तांस्तावत्प्रतिब्रूमः तत्र भूतं पृथि
वीधात्वादयो भौतिकं रूपादयश्चक्षुरादयश्च चतुष्टये च पृथिव्यादिपरमाणवः खरस्नेहोष्णेरणस्वभावास्ते पृथिव्यादि
भावेन संहन्यंत इति मन्यंते तथा रूपविज्ञानवेदनासंज्ञासंस्कारसंज्ञकाः पंचस्कंधास्तेप्यध्यात्मं सर्वव्यवहारास्पदभा
वेन संहन्यंत इति मन्यंते तत्रेदमभिधीयते योयमुभयहेतुक उभयप्रकारः समुदायः परेषामभिप्रेतोणुहेतुकश्च भूतभौतिकसं
हतिरूपः स्कंधहेतुकश्च पंचस्कंधीरूपः तस्मिन्नुभयहेतुकेपि समुदायेभिप्रेयमाणे तदप्राप्तिः स्यात्समुदायाप्राप्तिः समुदाय
भावानुपपत्तिरित्यर्थः ॥ कुतः समुदायिनामचेतनत्वात् चित्ताप्रादुर्भावभिज्वलनस्य च समुदायसिद्ध्यधीनत्वादन्यस्य च कस्य
चिच्चेतनस्य भोक्तुः प्रशासितुर्वा स्थिरस्य संहंतुरनभ्युपगमात् निरपेक्षप्रवृत्त्यभ्युपगमे च प्रवृत्त्यनुपरमप्रसंगात् आशयस्याप्यन्य

ब्रं०भा०
२२

त्वानन्यत्वाभ्यामनिरूप्यत्वात्क्षणिकत्वाभ्युपगमाच्च निर्व्यापारत्वात्प्रवृत्त्यनुपपत्तेस्तस्मात्समुदायानुपपत्तिः समुदायानु
पपत्तौ च तदाश्रया लोकयात्रा लुप्येत ॥ ॥इतरेतरप्रत्ययत्वादिति चेन्नोत्पत्तिमात्रनिमित्तत्वात् ॥१९॥ यद्यपि भोक्ता प्रशासिता
वा कश्चिच्चेतनः संहन्ता स्थिरो नाभ्युपगम्यते तथाप्यविद्यादीनामितरेतरकारणत्वादुपपद्यते लोकयात्रा तस्यां चोपपद्यमानायां
न किंचिदपरमपेक्षितव्यमस्ति ते चाविद्यादयः अविद्या संस्कारो विज्ञानं नामरूपं षडायतनं स्पर्शो वेदना तृष्णोपादानं भवो जा
तिर्जरामरणं शोकः परिदेवना दुःखं दुर्मनस्तेत्येवंजातीयका इतरेतरहेतुकाः सौगते समये क्वचित्संक्षिप्ता निर्दिष्टाः क्वचित्प्रपं
चिताः सर्वेषामप्ययमविद्यादिकलापोऽप्रत्याख्येयः तदेवमविद्यादिकलापे परस्परनिमित्तनैमित्तिकभावेन घटीयन्त्रवदनिशमा
वर्तमानेऽर्थाक्षिप्त उपपन्नः संघात इति चेत्तन्न कस्मादुत्पत्तिमात्रनिमित्तत्वात् भवेदुपपन्नः संघातो यदि संघातस्य किंचिन्नि
मित्तमवगम्येत न त्ववगम्यते यत इतरेतरप्रत्ययत्वेऽप्यविद्यादीनां पूर्वं पूर्वमुत्तरस्योत्पत्तिमात्रनिमित्तं भवद्भवेन्न तु संघातोत्पत्तेः किंचि
न्निमित्तं संभवति ननु चाविद्यादिभिरर्थादाक्षिप्यते संघात इत्युक्तमत्रोच्यते यदि तावदयमभिप्रायः अविद्यादयः संघातमन्तरेणा
त्मानमलभमाना अपेक्षन्ते संघातमिति ततस्तस्य संघातस्य निमित्तं वक्तव्यं ॥ तच्च नित्येष्वप्यणुष्वभ्युपगम्यमानेष्वाश्रयाश्रयि
भूतेषु च भोक्तृषु सत्सु न संभवतीत्युक्तं वैशेषिकपरीक्षायां किमंग पुनः क्षणिकेष्वणुषु भोक्तृरहितेष्वाश्रयाश्रयिशून्येषु वाभ्यु
पगम्यमानेषु संभवेदथायमभिप्रायः अविद्यादय एव संघातस्य निमित्तमिति कथं तमेवाश्रित्यात्मानं लभमानास्तस्यैव निमित्तं स्युः
अथ मन्यसे ॥ संघाता एवानादौ संसारे संतत्यानुवर्तन्ते तदाश्रयाश्चाविद्यादय इति तदापि संघातात्संघातान्तरमुत्पद्यमानं नियमे
न वा सदृशमेवोत्पद्येत अनियमेन वा सदृशं विसदृशं वोपपद्येत नियमाभ्युपगमे मनुष्यपुद्गलस्य देवतिर्यग्योनिनरकप्राप्त्य
भावः प्राप्नुयात् अनियमाभ्युपगमेऽपि मनुष्यपुद्गलः कदाचित्क्षणेन हस्ती भूत्वा देवो वा पुनर्मनुष्यो भवेदिति प्राप्नुयादुभयमभ्यु
पगमविरुद्धमपि च यद्भोगार्थः संघातः स्यात्स नास्ति स्थिरो भोक्तेति तवाभ्युपगमः ततश्च भोगो भोगार्थ एव स नान्येन प्रार्थनीयस्त
था मोक्षो मोक्षार्थ एवेति मुमुक्षुणा नान्येन भवितव्यमन्येन चेत्प्रार्थ्येत उभयं भोगमोक्षकालावस्थायिना तेन भवितव्यमवस्थायि २२
त्वे क्षणिकत्वाभ्युपगमविरोधस्तस्मादितरेतरोत्पत्तिमात्रनिमित्तत्वमविद्यादीनां यदि भवेद्भवेन्नाम न तु संघातः सिध्येत् भोक्त्रभा

15/9/1913

वादित्यभिप्रायः ॥ उत्तरोत्पादे च पूर्वनिरोधात् ॥२०॥ उक्तमेतदविद्यादीनामुत्पत्तिमात्रनिमित्तत्वान्न संघातसिद्धिरस्तीति तदपि तूत्प
त्तिमात्रनिमित्तत्वं न संभवतीतीदमिदानीमुपपाद्यते क्षणभंगवादिनोऽयमभ्युपगम उत्तरस्मिन्क्षण उत्पद्यमाने पूर्वः क्षणो निरुध्यत इति न
चैवमभ्युपगच्छता पूर्वोत्तरयोः क्षणयोर्हेतुफलभावः शक्यते संपादयितुं निरुध्यमानस्य निरुद्धस्य वा पूर्वक्षणस्याभावग्रस्तत्वादुत्त
रक्षणहेतुत्वानुपपत्तेः अथ भावभूतः परिनिष्पन्नावस्थः पूर्वक्षण उत्तरक्षणस्य हेतुरित्यभिप्रायः तथापि नोपपद्यते भावभूतस्य पु
नर्व्यापारकल्पनायां क्षणान्तरसंबंधप्रसंगात् अथ भाव एवास्य व्यापार इत्यभिप्रायस्तथापि नैवोपपद्यते हेतुस्वभावानुपरक्तस्य फल
स्योत्पत्त्यसंभवात् ॥ स्वभावोपरागाभ्युपगमे च हेतुस्वभावस्य फलकालावस्थायित्वे सति क्षणभंगाभ्युपगमत्यागप्रसंगः ॥ विनैव वा
स्वभावोपरागेण हेतुफलभावमभ्युपगच्छतः सर्वत्र तत्प्राप्तेरतिप्रसंगः ॥ अपि चोत्पादनिरोधौ नाम वस्तुनः स्वरूपमेव वा स्यातामवस्था
न्तरं वा वस्त्वन्तरमेव वा सर्वथापि नोपपद्यते यदि तावद्वस्तुनः स्वरूपमेवोत्पादनिरोधौ स्यातां ततो वस्तुशब्द उत्पादनिरोधशब्दौ च पर्या
याः प्राप्नुयुरथास्ति कश्चिद्विशेष इति मन्येत उत्पादनिरोधशब्दाभ्यां मध्यवर्तिनो वस्तुन आद्यन्ताख्ये अवस्थे अभिलप्येते इत्येवमप्या
द्यन्तमध्यक्षणत्रयसंबंधित्वाद्वस्तुनः क्षणिकत्वाभ्युपगमहानिरथात्यन्तव्यतिरिक्तावेवोत्पादनिरोधौ वस्तुनः स्यातामश्वमहिषवत्
ततो वस्तूत्पादनिरोधाभ्यामसंसृष्टमिति वस्तुनः शाश्वतत्वप्रसंगः यदि च दर्शनादर्शने वस्तुन उत्पादनिरोधौ स्यातामेवमपि द्रष्टृधर्मौ तौ न वस्तुधर्मा
विति वस्तुनः शाश्वतत्वप्रसंग एव तस्मादप्यसंगतं सौगतमतं कार्योत्पत्तिं असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा ॥२१॥ क्षणभंगवा
दिना पूर्वक्षणो निरोधग्रस्तत्वान्नोत्तरस्य क्षणस्य हेतुर्भवतीत्युक्तं अथासत्येव हेतौ फलोत्पत्तिं कार्योत्पत्तिं ब्रूयात्ततः प्रतिज्ञोपरोधः प्र
स्यात् चतुर्विधान्हेतून्प्रतीत्याभासालंबनतदाकारबोधेंद्रियस्य छता चित्तचैत्ता उत्पद्यन्त इतीयं प्रतिज्ञा हीयेत ॥ निर्हेतुकायां
चोत्पत्तौ चाप्रतिबंधत्वात्सर्वं सर्वत्रोत्पद्येत अथोत्तरक्षणोत्पत्तिं यावदवतिष्ठते पूर्वक्षण इति ब्रूयात्ततो यौगपद्यं हेतुफलयोः स्यात्
तथापि प्रतिज्ञोपरोधः स्यात् क्षणिकाः सर्वे संस्कारा इतीयं प्रतिज्ञोपरुध्येत ॥ प्रतिसंख्याप्रतिसंख्यनिरोधाप्राप्तिरविच्छेदात् ॥२२॥
अपि च वैनाशिकाः कल्पयन्ति बुद्धिबोध्यं त्रयादन्यत्संस्कृतं क्षणिकं चेति तदपि च त्रयं भावप्रतीविपरीतयसंख्या बुद्धि प्रतिसंख्या
ऽप्रतिसंख्यानिरोधावाकाशं चेत्याचक्षते त्रयमपि चैतदवस्तु अभावमात्रं निरुपाख्यमिति मन्यन्ते बुद्धिपूर्वकः किल विनाशो भावानां

प्रतिसंख्यानिरोधोनामभावानां विपरीतोऽप्रतिसंख्यानिरोधः आवरणाभावमात्रमाकाशमिति तेषामाकाशं परस्तात्प्रत्याख्यानी
करिष्यति निरोधद्वयमिदानीं प्रत्याचष्टे प्रतिसंख्याप्रतिसंख्यानिरोधयोरप्राप्तिरसंभव इत्यर्थः ॥ कस्मादविच्छेदात् एतौ हि प्रति
संख्याप्रतिसंख्यानिरोधौ संतानगोचरौ वा स्यातां भावगोचरौ वा न तावत्संतानगोचरौ संभवतः सर्वेष्वपि संतानेषु संतानिनाम
विच्छिन्नेन हेतुफलभावेन संतानविच्छेदस्यासंभवात् नापि भावगोचरौ संभवतः न हि भावानां निरन्वयो निरूपाख्यो विनाशः संभव
ति सर्वास्वप्यवस्थासु प्रत्यभिज्ञानबलेनान्वय्यविच्छेददर्शनात् अस्पष्टप्रत्यभिज्ञानास्वप्यवस्थासु क्वचिद्दृष्टेनान्वय्यविच्छेदेनान्यत्रा
पि तदनुमानात् तस्मात्परपरिकल्पितस्य निरोधद्वयस्यानुपपत्तिः ॥ उभयथा च दोषात् ॥२३॥ योऽयमविद्यादिनिरोधः प्रतिसंख्याप्रति
संख्यानिरोधान्तःपाती परपरिकल्पितः सम्यग्ज्ञानाद्वा सपरिकरात्स्यात्स्वयमेव वा पूर्वस्मिन्कल्पे निर्हेतुकविनाशाभ्युपगमहा
निप्रसंगः उत्तरस्मिंस्तु मार्गोपदेशानर्थक्यप्रसंगः एवमुभयथापि दोषप्रसंगादसमंजसमिदं दर्शनं ॥ आकाशे चाविशेषात् ॥२४॥ यद्
तेषामेवाभिप्रेतं निरोधद्वयमाकाशं च निरूपाख्यमिति तत्र निरोधद्वयस्य निरूपाख्यत्वं पुरस्तान्निराकृतं आकाशस्येदानीं निरा
क्रियते आकाशे चायुक्तो निरूपाख्यत्वाभ्युपगमः प्रतिसंख्याप्रतिसंख्यानिरोधयोरिव वस्तुत्वप्रतिपत्तेरविशेषात् आगमप्रामाण
यात्तावदात्मन आकाशः संभूत इत्यादिश्रुतिभ्य आकाशस्य वस्तुत्वसिद्धिः विप्रतिपन्नान्प्रति प्रतिशब्दगुणानुमेयत्वं वक्तव्यं
गंधादीनां गुणानां पृथिव्यादिवस्त्वाश्रयत्वदर्शनात् अपि चावरणाभावमात्रमाकाशमिच्छतामेकस्मिन्सुपर्णे पतत्याव
रणस्य विद्यमानत्वात्सुपर्णान्तरस्योत्पित्सतोऽनवकाशत्वप्रसंगः यत्रावरणाभावस्तत्र पतिष्यतीति चेद्येनावर
णाभावो विशेष्यते तत्तर्हि वस्तुभूतमेवाकाशं स्यान्नावरणाभावमात्रं अपि चावरणाभावमात्रमाकाशं मन्यमानस्य सौगत
स्य स्वाभ्युपगमविरोधः प्रसज्येत सौगते हि समये पृथिवी भगवन्किंसंनिश्रयेत्यस्मिन्प्रश्नप्रतिवचनप्रवाहे पृथिव्यादीनाम
न्ते वायुः किंसंनिश्रय इत्यस्य प्रश्नस्य प्रतिवचनं भवति वायुराकाशसंनिश्रय इति तदाकाशस्यावस्तुत्वे न समंजसं स्यात्तस्मा
दप्ययुक्तमाकाशस्यावस्तुत्वं अपि च निरोधद्वयमाकाशं च त्रयमप्येतन्निरूपाख्यमवस्तु नित्यं चेति विप्रतिषिद्धं नह्यवस्तुनो नित्य
त्वमनित्यत्वं वा संभवति वस्त्वाश्रयत्वाद्धर्मिधर्मभावस्य धर्मिधर्मभावे हि घटादिवद्वस्तुत्वमेव स्यान्न निरूपाख्यत्वं ॥ अनुस्मृ

161/1913

तेश्च ॥२५॥ अपि च वैनाशिकः सर्वस्य वस्तुनः क्षणिकतामभ्युपयन्नुपलब्धुरपि क्षणिकतामभ्युपेयात् न च सा संभवति अनु
स्मृतेः अनुभवमुपलब्धिमनूत्पद्यमानं स्मरणमेवानुस्मृतिः सा चोपलब्ध्येककर्तृका सती संभवति पुरुषान्तरोपलब्धिविषये पु
रुषान्तरस्य स्मृत्यदर्शनात् कथं ह्यहमदोऽद्राक्षमिदमिदानीं पश्यामीति च पूर्वोत्तरदर्शिन्येकस्मिन्नसति प्रत्ययः स्यात् ॥ अपि
च दर्शनस्मरणयोः कर्तर्येकस्मिन्प्रत्ययः प्रत्यभिज्ञाप्रत्ययः सर्वस्य लोकस्य प्रसिद्धोऽहमदोऽद्राक्षमिदं पश्यामीति यदि हि त
योर्भिन्नः कर्ता स्यात्ततोऽहं स्मराम्यन्योऽद्राक्षीदिति प्रतीयात् न त्वेवं प्रत्येति कश्चित् यत्रैवं प्रत्ययस्तत्र दर्शनस्मरणयोर्भिन्नमेव
कर्तारं सर्वो लोकोऽवगच्छति स्मराम्यहमसावदोऽद्राक्षीदिति इह त्वहमदोऽद्राक्षमिति दर्शनस्मरणयोर्वैनाशिकोऽप्यात्मानमेवै
कं कर्तारमवगच्छति न नाहमित्यात्मनो दर्शनं निर्वृत्तं निह्नुते यथाग्निरनुष्णोऽप्रकाश इति तत्रैवं सत्येकस्य दर्शनस्मरणक्षणद्वयसंबंधे क्षणि
कत्वाभ्युपगमहानिरपरिहार्या वैनाशिकस्य स्यात् तथाऽनन्तरामनन्तरामात्मन एव प्रतिपत्तिं प्रत्यभिजानन्नेककर्तृकामोत्तमा
दुच्छ्वासादतीताश्च प्रतिपत्तीराजन्मन आत्मैककर्तृकाः प्रतिसंदधानः कथं क्षणभंगवादी वैनाशिको नापत्रपेत स यदि ब्रूयात्सा
दृश्यादेतत्संपत्स्यत इति तं प्रति ब्रूयात् तेनेदं सदृशमिति द्वयायत्तत्वात्सादृश्यस्य क्षणभंगवादिनः सदृशयोर्द्वयोर्वस्तुनोर्ग्रहीतुरेकस्या
भावात्सादृश्यनिमित्तं प्रतिसंधानमिति मिथ्याप्रलाप एव स्यात् स्याच्चेत्पूर्वोत्तरयोः क्षणयोः सादृश्यस्य ग्रहीतैकस्तथा सत्येकस्य
क्षणद्वयावस्थानात्क्षणिकत्वप्रतिज्ञा पीड्येत तेनेदं सदृशमिति प्रत्ययान्तरमेवेदं न पूर्वोत्तरक्षणद्वयग्रहणनिमित्तमिति चे
न्न तेनेदं सदृशमिति भिन्नपदार्थोपादानात् प्रत्ययान्तरमेव चेत्सादृश्यविषयं स्यात् तेनेदं सदृशमिति वाक्यप्रयोगोऽनर्थकः स्यात्सादृश्य
मित्येव प्रयोगः प्राप्नुयात् यदा हि लोकप्रसिद्धः पदार्थः परीक्षकैर्न परिगृह्यते तदा स्वपक्षसिद्धिः परपक्षदोषो वोभयमप्युच्यमानं प
रीक्षकाणामात्मनश्च यथार्थत्वेन न बुद्धिसंतानमारोहति एवमेवैषोऽर्थ इति निश्चितं यत्तदेव वक्तव्यं ततोऽन्यदुच्यमानं बहुप्रलापि
त्वमात्मनः केवलं प्रख्यापयेत् न चायं सादृश्यात्संव्यवहारो युक्तः तद्भावावगमात् तत्सदृशभावानवगमाच्च भवेदपि कदाचिद्बाह्य
वस्तुनि विप्रलंभसंभवात् तदेवेदं स्यात्तत्सदृशं वेति संदेहः उपलब्धरि तु संदेहोऽपि न कदाचिद्भवति स एवाहं स्यां तत्सदृशो वेति य
एवाहं पूर्वेद्युरद्राक्षं स एवाहमद्य स्मरामीति निश्चिततद्भावोपलंभात् तस्मादप्यनुपपन्नो वैनाशिकसमयः ॥ नासतोऽदृष्टत्वात् ॥२६॥

इतश्चानुपपन्नो वैनाशिकसमयो यतः स्थिरमनुयायि अनुगत कारणमनभ्युपगच्छतामभावाद्भावोत्पत्तिरित्येतदापद्येत दर्शयं
ति चाभावाद्भावोत्पत्तिं नानुपमृद्य प्रादुर्भावादिति विनष्टाद्धि किल बीजादंकुर उत्पद्यते तथा विनष्टात्क्षीराद्दधि मृत्पिंडाच्च घटः
कूटस्थाच्चेत्कारणात्कार्यमुत्पद्येताविशेषात्सर्वं सर्वत उत्पद्येत तस्मादभावग्रस्तेभ्यो बीजादिभ्योंऽकुरादीनामुत्पद्यमानत्वादभावाद्भावो
त्पत्तिरिति मन्यन्ते तत्रेदमुच्यते नासतोऽदृष्टत्वादिति नाभावाद्भाव उत्पद्यते यद्यभावाद्भाव उत्पद्येताभावत्वाविशेषात्कारणविशेषा-
भ्युपगमोऽनर्थकः स्यान्न हि बीजादीनामुपमृदितानां यो भावस्तस्य शशविषाणादीनां च निःस्वभावत्वाविशेषादभावत्वे कश्चि
द्विशेषोऽस्ति येन बीजादेवांकुरो जायते क्षीरादेव दधीत्येवंजातीयकः कारणविशेषाभ्युपगमोऽर्थवान्स्यान्निर्विशेषस्य त्वभावस्यका
रणत्वाभ्युपगमे शशविषाणादिभ्योऽप्यंकुरादयो जायेरन् न चैवं दृश्यते ॥ यदि पुनरभावस्यापि विशेषोऽभ्युपगम्येतोत्पलादीनामि
व नीलत्वादिस्ततो विशेषवत्त्वादेवाभावस्य भावत्वमुत्पलादिवत्प्रसज्येत नाप्यभावः कस्यचिदुत्पत्तिहेतुः स्यादभावत्वादेव
शशविषाणादिवदभावाच्च भावोत्पत्तावभावान्वितमेव सर्वं कार्यं स्यान्न चैवं दृश्यते सर्वस्य च वस्तुनः स्वेन स्वेन रूपेण भावात्मनैवो
पलभ्यमानत्वान्न च मृदन्विताः शरावादयो भावास्तंत्वादिविकाराः केनचिदभ्युपगम्यन्ते मृद्विकारानेव तु मृदन्वितान्भ
वान्लोकः प्रत्येतीति यदुक्तं स्वरूपोपमर्दनमंतरेण कस्यचित्कूटस्थस्य वस्तुनः कारणत्वानुपपत्तेरभावाद्भावोत्पत्तिर्भवि
तुमर्हतीति तदुरुक्तं ॥ स्थिरस्वभावानामेव सुवर्णादीनां प्रत्यभिज्ञायमानानां रुचकादिकारणभावदर्शनात् येष्वपि बीजादि
षु स्वरूपोपमर्दो लक्ष्यते तेष्वपि नासावुपमृद्यमाना पूर्वावस्थोत्तरावस्थायाः कारणमभ्युपगम्यते अनुपमृद्यमानानामेवानुया
यिनां बीजाद्यवयवानामंकुरादिकारणभावाभ्युपगमात् तस्मादसद्भ्यः शशविषाणादिभ्यः सदुत्पत्त्यदर्शनात् सद्भ्यश्च सुव २५
र्णादिभ्यः सदुत्पत्तिदर्शनादनुपपन्नोऽयमभावाद्भावोत्पत्त्यभ्युपगमः ॥ अपि च चतुर्भिश्चित्तचैत्ता उत्पद्यंते परमाणुभ्यश्च भूत
भौतिकलक्षणः समुदाय उत्पद्यत इत्यभ्युपगम्य पुनरभावाद्भावोत्पत्तिं कल्पयद्भिरभ्युपगतमपह्नुवानैर्वैनाशिकैः सर्वो
लोक आकुलीक्रियते ॥ २६ ॥ उदासीनानामपि चैवं सिद्धिः ॥ २७ ॥ यदि चाभावाद्भावोत्पत्तिरभ्युपगम्येतैवं सत्युदासीनानामनी
हमानानामपि जनानामभिमतसिद्धिः स्यादभावस्य सुलभत्वात् कृषीवलस्य क्षेत्रकर्मण्यप्रयतमानस्यापि सस्यनिष्पत्तिः स्या

163/1913

त्कुलालस्य च मृत्संस्क्रियायामप्रयतमानस्याप्यमत्रोत्पत्तिस्तंतुवायस्यापि तंतूनतन्वानस्यापि तन्वानस्येव वस्त्रलाभः स्वर्गाप
वर्गयोश्च न कश्चित्कथंचित्समीहेत न चैतद्युज्यतेऽभ्युपगम्यते वा केनचित्तस्मादनुपपन्नोऽयमभावाद्भावोत्पत्त्यभ्युपगमः
नाभाव उपलब्धेः ॥ २८ ॥ एवं बाह्यार्थवादमाश्रित्य समुदायाप्राप्त्यादिषु दूषणेषूद्भावितेषु विज्ञानवादी बौद्ध इदानीं प्रत्य
वतिष्ठते केचित्किल विनेयानां बाह्ये वस्तुन्यभिनिवेशमालक्ष्य तदनुरोधेन बाह्यार्थवादप्रक्रियेयं विरचिता नासौ सुगता
भिप्रायः तस्य तु विज्ञानैकस्कंधवाद एवाभिप्रेतः तस्मिंश्च विज्ञानवादे बुद्ध्यारूढेन रूपेणांतस्थ एव प्रमाणप्रमेयफलव्यव
हारः सर्व उपपद्यते सत्यपि बाह्येऽर्थे बुद्ध्यारोहमंतरेण प्रमाणादिव्यवहारानवतारात् कथं पुनरवगम्यतेंतस्थ एवायं सर्वो
व्यवहारो न विज्ञानव्यतिरिक्तो बाह्योऽर्थोऽस्तीति ॥ तदसंभवादित्याह स हि बाह्योऽर्थोऽभ्युपगम्यमानः परमाणवो वा स्युस्तत्समूहा
वा स्तंभादयः तत्र न तावत्परमाणवः स्तंभादिप्रत्ययपरिच्छेद्या भवितुमर्हंति परमाण्वाभासज्ञानानुत्पत्तेः ॥ नापि तत्समूहाः
स्तंभादयः तेषां परमाणुभ्योऽन्यत्वानन्यत्वाभ्यां निरूपयितुमशक्यत्वात् एवं जात्यादीनपि प्रत्याचक्षीत अपि चानुभवमात्रेण
साधारणात्मनो ज्ञानस्य जायमानस्य योऽयं प्रतिविषयं पक्षपातः स्तंभज्ञानं कुड्यज्ञानं पटज्ञानमिति नासौ ज्ञानगतविशेष
मंतरेणोपपद्यत इत्यवश्यं विषयसारूप्यं ज्ञानस्यांगीकर्तव्यं अंगीकृते च तस्मिन्विषयाकारस्य ज्ञानेनैवावरुद्धत्वादपार्थिका
र्थसद्भावकल्पना अपि च सहोपलंभनियमादभेदो विषयविज्ञानयोरापतति न ह्यनयोरेकस्यानुपलंभेऽन्यस्योपलंभोऽस्ति
न चैतत्स्वभावविवेके युक्तं प्रतिबंधकारणाभावात् ॥ तस्मादप्यर्थाभावः ॥ स्वप्नादिवच्चेदं द्रष्टव्यं यथा हि स्वप्नमायामरीच्यु
दकगंधर्वनगरादिप्रत्यया विनैव बाह्येनार्थेन ग्राह्यग्राहकाकारा भवंति एवं जागरितगोचरा अपि स्तंभादिप्रत्यया भवितुमर्ह भ
तीत्यवगम्यते प्रत्ययत्वाविशेषात् कथं पुनरसति बाह्येऽर्थे प्रत्ययवैचित्र्यमुपपद्यते वासनावैचित्र्यादित्याह अनादौ च संसारे
बीजांकुरवत् ज्ञानानां वासनानां चान्योन्यनिमित्तनैमित्तिकभावेन वैचित्र्यं न विप्रतिषिध्यते अपि चान्वयव्यतिरेकाभ्यां वा
सनानिमित्तमेव ज्ञानवैचित्र्यमित्यवगम्यते स्वप्नादिष्वंतरेणाप्यर्थं वासनानिमित्तस्य ज्ञानवैचित्र्यस्योभाभ्यामप्यावाभ्या
मभ्युपगम्यमानत्वादंतरेण तु वासनामर्थनिमित्तस्य ज्ञानवैचित्र्यस्य मयानभ्युपगम्यमानत्वात्तस्मादप्यभावो बाह्यस्यार्थ

शां०भा०
॥ २९ ॥

स्यैवं प्राप्ते ब्रूमो नाभाव उपलब्धेरिति न खल्वभावो बाह्यस्यार्थस्याध्यवसातुं शक्यते कस्मादुपलब्धेः॥ उपलभ्यते हि प्रतिप
त्ययं बाह्योऽर्थः स्तंभः कुड्यं घटः पट इति न चोपलभ्यमानस्यैवाभावो भवितुमर्हति यथा हि कश्चिद्भुंजानो भुंजिसाध्यायां तृप्तौ
स्वयमनुभूयमानायामेवं ब्रूयान्नाहं भुंजे न वा तृप्यामीति तद्वदिंद्रियसन्निकर्षेण स्वयमुपलभमान एव बाह्यमर्थं नाहमुपलभे न
च सोऽस्तीति ब्रुवन्कथमुपादेयवचनः स्यात्॥ ननु नाहमेवं ब्रवीमि न कंचिदर्थमुपलभ इति किं तूपलब्धिव्यतिरिक्तं नोपलभ इ
ति ब्रवीमि बाढमेवं ब्रवीषि निरंकुशत्वात्ते तुंडस्य न तु युक्त्युपेतं ब्रवीषि यत उपलब्धिव्यतिरेकोऽपि बलादर्थस्याभ्युपगंतव्य
उपलब्धेरेव न हि कश्चिदुपलब्धिमेव स्तंभः कुड्यं चेत्युपलभते उपलब्धिविषयत्वेनैव तु स्तंभकुड्यादीन्सर्वे लौकिका उपलभं
ते अतश्चैवमेव सर्वे लौकिका उपलभंते अतश्चैवमेव सर्वे लौकिका उपलभंते यत्प्रत्याचक्षाणा अपि बाह्यमर्थमेवमाचक्षते य
दंतर्ज्ञेयरूपं तद्बहिर्वदवभासत इति तेऽपि हि सर्वलोकप्रसिद्धां बहिरवभासमानां संविदं प्रतिलभमानाः प्रत्याख्यातुकामाश्च बाह्य
मर्थं बहिर्वदिति वत्कारं कुर्वंति इतरथा हि कस्माद्बहिर्वदिति ब्रूयुः न हि विष्णुमित्रो वंध्यापुत्रवदवभासत इति कश्चिदाचक्षीत त
स्माद्यथानुभवं तत्त्वमभ्युपगच्छद्भिर्बहिरेवावभासत इति युक्तमभ्युपगंतुं न तु बहिर्वदवभासत इति ननु बाह्यस्यार्थस्यासंभवाद्ब
हिर्वदवभासत इत्यध्यवसितं नायं साधुरध्यवसायः यतः प्रमाणप्रवृत्त्यप्रवृत्तिपूर्वकौ संभवासंभवावधार्येते न पुनः संभवासंभवपूर्विके प्रमाणप्रवृत्त्यप्रवृत्ती यद्धि प्रत्यक्षादीनामन्यतमेनापि प्रमाणेनोपलभ्यते तत्संभव
ति यत्तु न केनचिदपि प्रमाणेनोपलभ्यते तन्न संभवति इह तु यथास्वं सर्वैरेव प्रमाणैर्बाह्योऽर्थ उपलभ्यमानः कथं व्यतिकाव्यतिरेकादि
विकल्पैर्न संभवतीत्युच्यतोपलब्धेरेव न च ज्ञानस्य विषयसारूप्याद्विषयनाशो भवति असति विषये विषयसारूप्यानुपपत्तेः बहि
रुपलब्धेश्च विषयस्यात एव सहोपलंभनियमोऽपि प्रत्ययविषययोरुपायोपेयभावहेतुको नाभेदहेतुक इत्यवगंतव्यं॥ अपि च
घटज्ञानं पटज्ञानमिति विशेषणयोरेव घटपटयोर्भेदो न विशेष्यस्य ज्ञानस्य यथा शुक्लो गौः कृष्णो गौरिति शौक्ल्यकार्ष्ण्ययो
रेव भेदो न गोत्वस्य द्वाभ्यां च भेद एकस्य सिद्धो भवति एकस्माच्च द्वयोस्तस्मादर्थज्ञानयोर्भेदस्तथा घटदर्शनं घटस्मरणमित्यत्रापि २५
प्रतिपत्तव्यं अत्रापि हि विशेष्ययोरेव दर्शनस्मरणयोर्भेदो न विशेषणस्य घटस्य यथा क्षीरगंधः क्षीररस इति विशेष्ययोरेव गंधर
सयोर्भेदो न विशेषणस्य क्षीरस्य तद्वत्॥ अपि च द्वयोर्विज्ञानयोः पूर्वोत्तरकालयोः स्वसंवेदनेनैवोपक्षीणयोरितरेतरग्राह्यग्राहक

165/1913

त्वानुपपत्तिस्ततश्च विज्ञानभेदप्रतिज्ञा क्षणिकत्वादिधर्मप्रतिज्ञा स्वलक्षणसामान्यलक्षणवास्यवासकत्वाविद्योपप्लवसद
सद्धर्मबंधमोक्षादिप्रतिज्ञाश्च स्वशास्त्रगतास्ता हीयेरन् किं चान्यद्विज्ञानं विज्ञानमित्यभ्युपगच्छता बाह्योऽर्थः स्तंभः कस्मान्ना
भ्युपगम्यत इति वक्तव्यं॥ विज्ञानमनुभूयत इति चेद्बाह्योऽप्यर्थोऽनुभूयत एवेति युक्तमभ्युपगंतुं अथ विज्ञानं प्रकाशात्मकत्वात्प्रदीपव
त्स्वयमेवानुभूयते न तथा बाह्योऽर्थ इति चेदत्यंतविरुद्धां स्वात्मनि क्रियामभ्युपगच्छसि अग्निरात्मानं दहतीतिवत् अविरुद्धं लोकप्र
सिद्धं स्वात्मव्यतिरिक्तेन ज्ञानेन बाह्योऽर्थोऽनुभूयत इति नेच्छसि अहो पांडित्यं महद्दर्शितं न चार्थाव्यतिरिक्तमपि विज्ञानं स्वयमेवानु
भूयते स्वात्मनि क्रियाविरोधादेव ननु विज्ञानस्य स्वरूपव्यतिरिक्तग्राह्यत्वे तदप्यन्येन ग्राह्यं तदप्यन्येनेत्यनवस्था प्राप्नोति अपि च
प्रदीपवदवभासात्मकत्वाज्ज्ञानस्य ज्ञानांतरं कल्पयतः समत्वादवभास्यावभासकभावानुपपत्तेः कल्पनानर्थक्यमिति तदुभयमप्यस
द्विज्ञानग्रहणमात्र एव विज्ञानसाक्षिग्रहणाकांक्षानुत्पादादनवस्थाशंकानुपपत्तेः साक्षिप्रत्यययोश्च स्वभाववैषम्यादुपलब्ध्रुपल
भ्यभावोपपत्तेः स्वयंसिद्धस्य च साक्षिणोऽप्रत्याख्येयत्वात् किं चान्यत्प्रदीपवद्विज्ञानमवभासकांतरनिरपेक्षं स्वयमेव प्रथत इति ब्रु
वताऽप्रमाणगम्यं विज्ञानमनवगंतृकमित्युक्तं स्यात् शिलाघनमध्यस्थप्रदीपसहस्रप्रथनवत् बाढमेवमनुभवरूपत्वात्तु विज्ञान
स्येष्टो नः पक्षस्त्वयानुज्ञायत इति चेन्नान्यस्यावगंतुश्चक्षुःसाधनस्य प्रदीपादिप्रथनदर्शनादतो विज्ञानस्याप्यवभास्यत्वाविशे
षात्सत्येवान्यस्मिन्नवगंतरि प्रथनं प्रदीपवदित्यवगम्यते साक्षिणोऽवगंतुः स्वयंसिद्धतामुपक्षिपता स्वयं प्रथते विज्ञानमित्येष एव मम प
क्षस्त्वया वाचोयुक्त्यंतरेणाश्रित इति चेन्न विज्ञानस्योत्पत्तिप्रध्वंसानेकत्वादिविशेषवत्त्वाभ्युपगमादतः प्रदीपवद्विज्ञानस्य व्यतिरिक्ता
वगम्यत्वमस्माभिः प्रसाधितं॥ वैधर्म्याच्च न स्वप्नादिवत्॥ २९॥ यदुक्तं बाह्यार्थापलापिना स्वप्नादिप्रत्ययवज्जागरितगोचरा
स्तंभादिप्रत्यया विनैव बाह्येनार्थेन भवेयुः प्रत्ययत्वाविशेषादिति तत्प्रतिवक्तव्यं अत्रोच्यते न स्वप्नादिप्रत्ययवज्जाग्रत्प्रत्यया भव
तुमर्हंति कस्माद्वैधर्म्याद्वैधर्म्यं हि भवति स्वप्नजागरितयोः किं पुनर्वैधर्म्यं बाधाबाधाविति ब्रूमो बाध्यते हि स्वप्नोपलब्धं वस्तु प्र
तिबुद्धस्य मिथ्या मयोपलब्धो महाजनसमागम इति॥ न ह्यस्ति मम महाजनसमागमो निद्राग्लानं तु मे मनो बभूव तेनैषा भ्रांतिरुद्बभूवे
ति एवं मायादिष्वपि भवति यथायथं बाधो नैवं जागरितोपलब्धं वस्तु स्तंभादिकं कस्यांचिदप्यवस्थायां बाध्यते अपि च स्मृतिरेषा य

स्या०मं०
२६

स्वप्नदर्शनमुपलब्धिस्तु जागरितमपूर्वानंस्मृत्युपलब्धोऽश्वप्रत्यक्षमंतरं स्वप्नमनुभूयतेऽर्थविप्रयोगसंप्रयोगात्मकमिदं पुत्रं स्त
नाभिनोपलभेउपलब्धुमिच्छामीतितत्रैव सति न शक्यते वक्तुं मिथ्या जागरितोपलब्धिरुपलब्धित्वात्स्वप्नोपलब्धिवदित्युभयोरंत
रं स्वयमनुभवता न च स्वानुभवापलापः प्रज्ञाभिमानिभिर्युक्तः कर्तुं। अपि चानुभवविरोधप्रसंगाज्जागरितप्रत्ययानां स्वतो निरा
लंबनतां वक्तुमशक्नुवता स्वप्नप्रत्ययसाधर्म्याद्वक्तुमिष्यते न हि यो यस्य स्वतो धर्मो न संभवति सोऽन्यस्य साधर्म्यात्तस्य संभविष्य
ति न ह्यग्निरुष्णोऽनुभूयमान उदकसाधर्म्याच्छीतो भविष्यति दर्शितं तु वैधर्म्यं स्वप्नजागरितयोः॥ न भावोऽनुपलब्धेः॥२०॥ यदप्यु
क्तं विनाप्यर्थं ज्ञानवैचित्र्यं वासनावैचित्र्यादेवावकल्प्यत इति तदपि न तिवक्तव्यं अत्रोच्यते न भावो वासनानामुपपद्यते त्वत्पक्षेऽनुपलब्धे
र्बाह्यानामर्थानामर्थोपलब्धिनिमित्ता हि प्रत्यर्थं नानारूपा वासना भवंति अनुपलभ्यमानेषु त्वर्थेषु किंनिमित्ता विचित्रा वास
ना भवेयुरनादित्वेऽप्यंधपरंपरान्यायेनाप्रतिष्ठैवानवस्था व्यवहारलोपिनी स्यान्नाभिप्रायसिद्धिः॥ यावप्यन्वयव्यतिरेकावर्थाप
लापिनोपन्यस्तौ वासनानिमित्तमेवेदं ज्ञानजातं नार्थनिमित्तमिति तावप्येवं सति प्रत्युक्तौ द्रष्टव्यौ विनार्थोपलब्ध्या वासनानु
पपत्तेः॥ अपि च विनापि वासनाभिरर्थोपलब्ध्यभ्युपगमात् विना त्वर्थोपलब्ध्या वासनोत्पत्त्यनभ्युपगमादर्थसद्भावमेवान्वयव्यति
रेकावपि प्रतिष्ठापयतः॥ अपि च वासना नाम संस्कारविशेषाः संस्काराश्च नाश्रयमंतरेणावकल्पंते एवं लोके दृष्टत्वान्न च त
व वासनाश्रयः कश्चिदस्ति प्रमाणतोऽनुपलब्धेः क्षणिकत्वाच्च॥२१॥ यदप्यालयविज्ञानं नाम वासनाश्रयत्वेन परिकल्पितं त
दपि क्षणिकत्वाभ्युपगमादनवस्थितस्वरूपं सत्प्रवृत्तिविज्ञानवन्न वासनानामधिकरणं भवितुमर्हति न हि कालत्रयसंबंधि
न्येकस्मिन्नन्वयिन्यसति कूटस्थे वा सर्वार्थदर्शिनि देशकालनिमित्तापेक्षवासनाधीनस्मृतिप्रतिसंधानादिव्यवहारः संभवति २६
स्थिरस्वरूपत्वे त्वालयविज्ञानस्य सिद्धांतहानिः अपि च विज्ञानवादेऽपि क्षणिकत्वाभ्युपगमस्य समानत्वाद्यानि बाह्यार्थवादिक्ष-
णिकत्वनिबंधनानि दूषणान्युद्भावितान्युत्तरोत्पादे च पूर्वनिरोधादित्येवमादीनि तानीहाप्यनुसंधातव्यान्येवमेतौ द्वावपि वैना
शिकपक्षौ निराकृतौ बाह्यार्थवादिपक्षो विज्ञानवादिपक्षश्च शून्यवादिपक्षस्तु सर्वप्रमाणविप्रतिषिद्ध इति तन्निराकरणाय
नादरः क्रियते न ह्ययं सर्वप्रमाणप्रसिद्धो लौकिकव्यवहारोऽन्यत्तत्त्वमनधिगम्य शक्यतेऽपह्नोतुमपवादाभावादुत्सर्गप्रसिद्धेः॥ स

167/1913

र्वथानुपपत्तेश्च॥२२॥ किं बहुना यथा यथायं वैनाशिकसमय उपपत्तिमत्त्वाय परीक्ष्यते तथा तथा सिकताकूपवद्विदीर्यत एव न कांचि
दप्यत्रोपपत्तिं पश्यामोऽतश्चानुपपन्नो वैनाशिकतंत्रव्यवहारः अपि च बाह्यार्थविज्ञानशून्यवादत्रयमितरेतरविरुद्धमुपदिशता
सुगतेन स्पष्टीकृतमात्मनोऽसंबद्धप्रलापित्वं प्रद्वेषो वा प्रजासु विरुद्धप्रतिपत्त्या विमुह्येयुरिमाः प्रजा इति॥ सर्वथाप्यनादरणी
योऽयं सुगतसमयः श्रेयस्कामैरित्यभिप्रायः॥ नैकस्मिन्नसंभवात्॥ निरस्तः सुगतसमयः विवसनसमय इदानीं निरस्यते सप्त चै
षां पदार्थाः संमताः जीवाजीवास्रवसंवरनिर्जरबंधमोक्षा नाम संक्षेपतस्तु द्वावेव पदार्थौ जीवाजीवाख्यौ यथायोगं तयोरेवेतरांतर्भावादिति मन्यंते तयोरेवमपरं प्रपंचमाचक्षते पंचास्तिका
यानाम जीवास्तिकायः पुद्गलास्तिकायः धर्मास्तिकायः अधर्मास्तिकायः आकाशास्तिकायश्चेति सर्वेषामप्येषामवांतर
प्रभेदान्बहुविधान्स्वसमयपरिकल्पितान्वर्णयंति सर्वत्र चेमं सप्तभंगीनयं नाम न्यायमवतारयंति स्यादस्ति स्यान्ना
स्ति॥ स्यादवक्तव्यः॥ स्यादस्ति च नास्ति च॥ स्यादस्ति चावक्तव्यश्च स्यान्नास्ति चावक्तव्यश्च स्यादस्ति च नास्ति चावक्तव्यश्चेत्येवमेवैकत्वनि
त्यत्वादिष्वपीमं सप्तभंगीनयं योजयंति अत्राचक्ष्महे नायमभ्युपगमो युक्त इति कुतः एकस्मिन्नसंभवात् न ह्येकस्मिन्धर्मिणि यु
गपत्सदसत्त्वादिविरुद्धधर्मसमावेशः संभवति शीतोष्णवत् य एते सप्त पदार्था निर्धारिता एतावंत एवंरूपाश्चेति ते तथैव वा स्युर्नैव वा त
था स्युरितरथा हि तथा वा स्युरतथा वेत्यनिर्धारितरूपं ज्ञानं संशयज्ञानवदप्रमाणमेव स्यात् नन्वनेकात्मकं वस्त्विति निर्धारितरू
पमेव ज्ञानमुत्पद्यमानं संशयज्ञानवन्नाप्रमाणं भवितुमर्हति नेति ब्रूमो निरंकुशं ह्यनेकांतत्वं सर्ववस्तुषु प्रतिजानानस्य निर्धारण
स्यापि वस्तुत्वाविशेषात्स्यादस्ति स्यान्नास्तीत्यादिविकल्पोपनिपातादनिर्धारणात्मकतैव स्यादेवं निर्धारयितुर्निर्धारणफलस्य च स्यात्पक्षे-
ऽस्तिता स्यात्पक्षे नास्तीत्येवं सति कथं प्रमाणभूतः संस्तीर्थंकरः प्रमाणप्रमेयप्रमातृप्रमितिष्वनिर्धारितासूपदेष्टुं शक्नुयात्क
थं वा तदभिप्रायानुसारिणस्तदुपदिष्टेऽर्थेऽनिर्धारितरूपे प्रवर्तेरन् ऐकांतिकफलत्वनिर्धारणे हि सति तत्साधनानुष्ठानाय सर्वो लो
कोऽनाकुलः प्रवर्तते नान्यथा अतश्चानिर्धारितार्थं शास्त्रं प्रणयन्मत्तोन्मत्तवदनुपादेयवचनः स्यात् तथा पंचानामस्तिकायानां
पंचत्वसंख्यास्ति वा नास्ति वेति विकल्प्यमाना स्यात्तावदेकस्मिन्पक्षे पक्षांतरे तु न स्यादित्यतो न्यूनसंख्यात्वमधिकसंख्यात्वं वा प्रा
प्नुयात् न चैषां पदार्थानामवक्तव्यत्वं संभवति अवक्तव्याश्चेन्नोच्येरन् उच्यंते चावक्तव्याश्चेति विप्रतिषिद्धमुच्यमानाश्च तथैवावधा

शां०भा०
२८

र्थं तेनावधार्यंते इति च तथा तदवधारणफलं सम्यग्दर्शनमस्ति वा नास्ति वा एवं तद्विपरीतमसम्यग्दर्शनमप्यस्ति वा नास्ति वेति प्र
णायन्मत्तोन्मत्तवत्पक्षस्यैव स्यान्न प्रत्ययितपक्षस्य स्वर्गापवर्गयोश्च पक्षे भावः पक्षे चाभावः तथा पक्षे नित्यता पक्षे चानित्यतेत्यनवधा
रणायां प्रवृत्त्यनुपपत्तिः अनादिसिद्धजिनप्रभृतीनां च स्वशास्त्रावधृतस्वभावानामयथावधृतस्वभावत्वप्रसंगः एवं जीवादिषु पदार्थेष्वेक
स्मिन्धर्मिणि सत्त्वासत्त्वयोर्विरुद्धयोरसंभवात्सत्त्वे चैकस्मिन्धर्मेऽसत्त्वस्य धर्मांतरस्यासंभवादसत्त्वे चैवं सत्त्वस्यासंभवादसंगतमिदमा
र्हतं मतं एतेनैकानेकनित्यानित्यव्यतिरिक्ताव्यतिरिक्ताद्यनेकांताभ्युपगमा निराकृता मंतव्याः ॥ यत्तु पुद्गलसंज्ञकेभ्योऽणुभ्यः संघाताः
संभवंतीति कल्पयंति तत्पूर्वेणैवाणुवादनिराकरणेन निराकृतं भवतीत्यतो न पृथक्तन्निराकरणाय प्रयत्यते ॥ एवं चात्माकार्त्स्न्यं ॥ ३४ ॥
यथैकस्मिन्धर्मिणि विरुद्धधर्मासंभवो दोषः स्याद्वादे प्रसक्त एवमात्मनोपि जीवस्याकार्त्स्न्यमपरो दोषः प्रसज्येत कथं शरीरपरिमाणो
हि जीव इत्यार्हता मन्यंते शरीरपरिमाणतायां च सत्यामसकृत्स्नोऽसर्वगतः परिच्छिन्न आत्मेत्यतो घटादिवदनित्यत्वमात्मनः प्रसज्येत
शरीराणां चानवस्थितपरिमाणत्वान्मनुष्यजीवो मनुष्यशरीरपरिमाणो भूत्वा पुनः केनचित्कर्मविपाकेन हस्तिजन्म प्राप्नुवन्न कृ
त्स्नं हस्तिशरीरं व्याप्नुयात् पुत्तिकाजन्म च प्राप्नुवन्न कृत्स्नः पुत्तिकाशरीरे संमीयेत समान एष एकस्मिन्नपि जन्मनि कौमारयौवनस्थ
विरेषु दोषः स्यादनंतावयवो जीवस्तस्य त एवावयवा अल्पे शरीरे संकुचेयुर्महति च विकसेयुरिति चेत्तेषां पुनरनंतानां जीवावयवानां
समानदेशत्वं प्रतिहन्येत वा न चेति वक्तव्यं प्रतीघाते तावन्नानंता अवयवाः परिच्छिन्ने देशे संमीयेरन् अप्रतिघातेप्येकावयवदेशत्वोप
पत्तेः सर्वेषामवयवानां प्रथिमानुपपत्तेर्जीवस्याणुमात्रत्वप्रसंगः स्यात् अपि च शरीरमात्रपरिच्छिन्नानां जीवावयवानामानंत्यं
नोत्प्रेक्षितुमपि शक्यं अथ पर्यायेण बृहच्छरीरप्रतिपत्तौ केचिज्जीवावयवा उपगच्छंति तनुशरीरप्रतिपत्तौ च केचिदपगच्छंतीत्युच्य
ते तत्राप्युच्यते ॥ न च पर्यायादप्यविरोधो विकारादिभ्यः ॥ ३५ ॥ न च पर्यायेणाप्यवयवोपगमापगमाभ्यामेतद्देहपरिमाणत्वं जीवस्यावि २८
रोधेनोपपादयितुं शक्यते कुतो विकारादिदोषप्रसंगात् अवयवोपगमापगमाभ्यां ह्यनिशमापूर्यमाणस्यापक्षीयमाण
स्य च जीवस्य विक्रियावत्त्वं तावदपरिहार्यं विक्रियावत्त्वे च चर्मादिवदनित्यत्वं प्रसज्येत ततश्च बंधमोक्षाभ्युपगमो बाध्येत
कर्माष्टकपरिवेष्टितस्य जीवस्यालाबुवत्संसारसागरे निमग्नस्य बंधनोच्छेदादूर्ध्वगामित्वं भवतीति किं चान्यदागच्छताम

169/1912

पगच्छतां चावयवानामागमापायधर्मवत्त्वादेवानात्मत्वं शरीरादिवत् ततश्चावस्थितः कश्चिदवयव आत्मेति स्यात् न च स निरूपयितुं
शक्यते अयमसाविति किं चान्यदागच्छंतश्चैते जीवावयवाः कुतः प्रादुर्भवंत्यपगच्छंतश्च क्व विलीयंते इति वक्तव्यं न हि भूतेभ्यः प्रादुर्भवे
युर्भूतेषु च लीयेरन् भौतिकत्वाज्जीवस्य नापि कश्चिदन्यः साधारणोऽसाधारणो वा जीवानामवयवाधारो निरूप्यते प्रमाणाभावात्
किं चान्यत् अनवधृतस्वरूपश्चैवं सत्यात्मा स्यात् आगच्छतामपगच्छतां चावयवानामनियतपरिमाणत्वात् अत एवमादिदोषप्रसंगान्न
पर्यायेणाप्यवयवोपगमापगमावात्मन आश्रयितुं शक्येते अथवा पूर्वेण सूत्रेण शरीरपरिमाणस्यात्मन उपचितापचितशरीरांतर
प्रतिपत्तावकार्त्स्न्यप्रसक्तिद्वारेणानित्यतायां चोदितायां पुनः पर्यायेण परिमाणानवस्थानेपि स्रोतःसंताननित्यतान्यायेनात्म
नो नित्यता स्याद्यथा रक्तपटानां विज्ञानानवस्थानेपि तत्संताननित्यता तद्विशिचामुंडाकेशरहितामपीत्याशंक्यानेन सूत्रेणोत्तरमु
च्यते संतानस्य तावदवस्तुत्वे नैरात्म्यवादप्रसंगो वस्तुत्वेप्यात्मनो विकारादिदोषप्रसंगादस्य पक्षस्यानुपपत्तिरिति ॥ अंत्याव
स्थितेश्चोभयनित्यत्वादविशेषः ॥ ३६ ॥ अपि चांत्यस्य मोक्षावस्थाभाविनो जीवपरिमाणस्य नित्यत्वमिष्यते जैनैस्तद्वत्पूर्वयोरप्याद्य
मध्यमयोर्जीवपरिमाणयोर्नित्यत्वप्रसंगादविशेषप्रसंगः स्यात् एकशरीरपरिमाणतैव स्यान्नोपचितापचितशरीरांतरप्राप्तिः अथवांत्यस्य
जीवपरिमाणस्यावस्थितत्वात्पूर्वयोरप्यवस्थयोरवस्थितपरिमाण एव जीवः स्यात् ततश्चाविशेषेण सर्वदैवाणुर्महान्वा जीवोऽभ्युपगं
तव्यो न शरीरपरिमाणः अतश्च सौगतवदार्हतमपि मतमसंगतमित्युपेक्षितव्यं ॥ पत्युरसामंजस्यात् ॥ ३७ ॥ इदानीं केवलाधि
ष्ठात्रीश्वरकारणवादः प्रतिषिध्यते तत्कथमवगम्यते प्रकृतिश्च प्रतिज्ञादृष्टांतानुपरोधादभिध्योपदेशाच्चेत्यत्र प्रकृतिभावेना
धिष्ठातृभावेन चोभयस्वभावस्येश्वरस्य स्वयमेवाचार्येण प्रतिष्ठापितत्वात् यदि पुनरविशेषेणेश्वरकारणवादमात्रमिह प्रतिषिध्ये
त पूर्वोत्तरविरोधाद्व्याहताभिव्याहारः सूत्रकार इत्येतदापद्येत तस्मादप्रकृतिरधिष्ठाता केवलं निमित्तकारणमीश्वर इत्येष पक्षो
वेदांतविहितब्रह्मैकत्वप्रतिपक्षत्वाद्यत्नेनात्र प्रतिषिध्यते सा चेयं वेदबाह्येश्वरकल्पनानेकप्रकारा केचित्तावत्सांख्ययोगव्य
पाश्रयाः कल्पयंति प्रधानपुरुषयोरधिष्ठाता केवलं निमित्तकारणमीश्वर इतरेतरविलक्षणाः प्रधानपुरुषेश्वरा इति माहे
श्वरास्तु मन्यंते कार्यकारणयोगविधिदुःखांताः पंच पदार्थाः पशुपतिनेश्वरेण पशुपाशविमोक्षायोपदिष्टाः पशुपतिरीश्वरो नि

शां०भा० मित्तकारणमितितथावैशेषिकादयोपिकेचित्स्वप्रक्रियानुसारेणनिमित्तकारणमीश्वरंवर्णयंति।अतउत्तरमुच्यते।पत्यु
२८ रसामंजस्यादितिपत्युरीश्वरस्यप्रधानपुरुषयोरधिष्ठातृत्वेनजगत्कारणत्वंनोपपद्यते।कस्मादसामंजस्यात्।किंपुनरसामंजस्यं
हीनमध्यमोत्तमभावेन हि प्राणिभेदान्विदधदीश्वरस्यरागद्वेषादिदोषप्रसक्तेरस्मदादिवदनीश्वरत्वंप्रसज्येत।प्राणिकर्मापेक्ष
त्वाददोषइतिचेत्।नकर्मेश्वरयोःप्रवर्त्यप्रवर्तयितृत्वेइतरेतराश्रयदोषप्रसंगात्।नानादित्वादितिचेन्न।वर्तमानकालवदतीतकालेष्वपि
इतरेतराश्रयदोषाविशेषादंधपरंपरान्यायापत्तेः।अपिचप्रवर्तनालक्षणादोषाइतिन्यायवित्समयः।नहिकश्चिददोषप्रयुक्तःस्वा
र्थेपरार्थेवाप्रवर्तमानोदृश्यते।स्वार्थप्रयुक्तएवचसर्वोजनःपरार्थेपिप्रवर्तते।इत्येवमप्यसामंजस्यं।स्वार्थवत्त्वादीश्वरस्यानीश्वरत्व
प्रसंगात्।पुरुषविशेषत्वाभ्युपगमाच्चेश्वरस्यपुरुषस्यचौदासीन्याभ्युपगमादसामंजस्यं॥संबंधानुपपत्तेश्च॥३८॥पुनरप्यसामंज
स्यमेव।नहिप्रधानपुरुषव्यतिरिक्तईश्वरोंतरेणसंबंधंप्रधानपुरुषयोरीशिता।नतावत्संयोगलक्षणःसंबंधःसंभवति।प्रधानपुरुषेश्व
राणांसर्वगतत्वान्निरवयवत्वाच्च।नापिसमवायलक्षणःसंबंधः।आश्रयाश्रितभावानिरूपणात्।नाप्यन्यःकश्चित्कार्यगम्यः
संबंधःशक्यतेकल्पयितुंकार्यकारणभावस्यैवाद्याप्यसिद्धत्वात्॥ब्रह्मवादिनःकथमितिचेन्न।तस्यतादात्म्यलक्षणसंबंधोपप
त्तेः।अपिचागमबलेनब्रह्मवादीकारणादि स्वरूपंनिरूपयतीतिनावश्यंतस्ययथादृष्टमेवसर्वमभ्युपगंतव्यमिति।परस्यतुदृष्टांतबलेन
कारणादिस्वरूपंनिरूपयतोयथादृष्टमेवसर्वमभ्युपगंतव्यमित्ययमस्त्यतिशयः।परस्यापिसर्वज्ञप्रणीतागमसद्भावात्समानमाग
मबलमितिचेत्।नंइतरेतराश्रयत्वप्रसंगात्।आगमप्रत्ययात्सर्वज्ञसिद्धिःसर्वज्ञप्रणीतत्वाच्चागमसिद्धिरितितस्मादनुपपन्नासांख्ययो
गवादीनामीश्वरकल्पना।एवमन्यास्वपिवेदबाह्यास्वीश्वरकल्पनासुयथासंभवमसामंजस्यंयोजयितव्यं॥अधिष्ठानानुपपत्तेश्च
॥३९॥इतश्चानुपपत्तिस्तार्किकपरिकल्पितस्येश्वरस्य।सहिपरिकल्प्यमानःकुंभकारइवमृदादीनिप्रधानादीन्यधिष्ठायप्रवर्तयेत् २८
नचैवमुपपद्यते।नह्यप्रत्यक्षंरूपादिहीनंचप्रधानमीश्वरस्याधिष्ठेयंसंभवतिमृदादिवैलक्षण्यात्॥करणवच्चेन्नभोगादिभ्यः॥४०
स्यादेतत्।यथाकरणग्रामंचक्षुरादिकमप्रत्यक्षंरूपादिहीनंचपुरुषोधितिष्ठति।एवंप्रधानमपीश्वरोधिष्ठास्यतीति।तथापिनोपप
द्यते।भोगादिदर्शनाद्धिकरणग्रामस्याधिष्ठितत्वंगम्यते।नचात्रभोगादयोदृश्यंते।करणग्रामसाम्येवाभ्युपगम्यमानेसंसारिणामि
वेश्वरस्यापिभोगादयःप्रसज्येरन्॥अन्यथावासूत्रद्वयंव्याख्यायते।अधिष्ठानानुपपत्तेश्च।इतश्चानुपपत्तिस्तार्किकपरिकल्पितस्येश्वर

17/1/1913

स्यसाधिष्ठानोहिलोकेसशरीरोराजाराष्ट्रस्येश्वरोदृश्यतेननिरधिष्ठानः।अतश्चतद्दृष्टांतवशेनादृष्टमीश्वरंकल्पयितुमिच्छतईश्वर
स्यापिकिंचिच्छरीरंकरणायतनंवर्णयितव्यंस्यात्।नचतद्वर्णयितुंशक्यते।सृष्ट्युत्तरकालभावित्वाच्छरीरस्यप्राक्सृष्टेस्तदनुपपत्तेः।निरधि
ष्ठानत्वेचेश्वरस्यप्रवर्तकत्वानुपपत्तिरेवंलोकेदृष्टत्वात्।करणवच्चेन्नभोगादिभ्यः।अथलोकदर्शनानुसारेणेश्वरस्यापिकिंचित्करणाना
मायतनंशरीरंकामेनकल्प्येत।एवमपिनोपपद्यते।सशरीरत्वेहिसतिसंसारिवद्भोगादिप्रसंगादीश्वरस्याप्यनीश्वरत्वंप्रसज्येत॥अंतव
त्त्वमसर्वज्ञताच॥४१॥इतश्चानुपपत्तिस्तार्किकपरिकल्पितस्येश्वरस्य।सहिसर्वज्ञस्तैरभ्युपगम्यतेअनंतश्च।अनंतंचप्रधानमनंताश्चपुरुषामिथो
भिन्नाअभ्युपगम्यंते।तत्रसर्वज्ञेनेश्वरेणप्रधानस्यपुरुषाणामात्मनश्चेयत्तापरिच्छिद्येतवानवापरिच्छिद्येत।उभयथापिदोषोनुषक्तएव।क
थं।पूर्वस्मिंस्तावद्विकल्पेइयत्तापरिच्छिन्नत्वात्प्रधानपुरुषेश्वराणामंतवत्त्वमवश्यंभाव्येवंलोकेदृष्टत्वात्।यद्धिलोकेइयत्तापरिच्छिन्नं
वस्तुघटादितदंतवद्दृष्टं।तथाप्रधानपुरुषेश्वरत्रयमपीयत्तापरिच्छिन्नत्वादंतवत्स्यात्।संख्यापरिमाणंतावत्प्रधानपुरुषेश्वरत्रयरूपेण
परिच्छिन्नं।स्वरूपपरिमाणमपितद्गतमीश्वरेणपरिच्छिद्येत।पुरुषगताचमहासंख्या।ततश्चेयत्तापरिच्छिन्नानांमध्येयेसंसारान्मुच्यंतेतेषां
संसारोंतवान्संसारित्वंचतेषामंतवत्।एवमितरेष्वपिक्रमेणमुच्यमानेषुसंसारस्यसंसारिणांचांतवत्त्वंस्यात्।प्रधानंचसविकारंपुरुषा
र्थमीश्वरस्याधिष्ठेयंसंसारित्वेनाभिमतं।तच्छून्यतायामीश्वरःकिमधितिष्ठेत्।किंविषयेवासर्वज्ञतेश्वरतेस्यातां।प्रधानपुरुषेश्वराणांचै
वमंतवत्त्वेसत्यादिमत्त्वप्रसंगः।आद्यंतवत्त्वेचशून्यवादप्रसंगः।अथमाभूदेषदोषइत्युत्तरोविकल्पोभ्युपगम्येत।नप्रधानपुरुषाणामात्मनश्च
इयत्तेश्वरेणपरिच्छिद्यतइति।ततईश्वरस्यसर्वज्ञताभ्युपगमहानिरपरोदोषःप्रसज्येत।तस्मादप्यसमंजसस्तार्किकपरिगृहीतईश्वरका
रणवादः॥उत्पत्त्यसंभवात्॥४२॥येषामप्रकृतिरधिष्ठाताकेवलनिमित्तकारणमीश्वरोभिमतस्तेषांपक्षःप्रत्याख्यातः।येषांपुनः
प्रकृतिश्चाधिष्ठाताचोभयात्मकंकारणमीश्वरोभिमतस्तेषांपक्षःप्रत्याख्यायते।ननुश्रुतिसमाश्रयणेनाप्येवंरूपःपरमेश्वरःप्रा
ङ्निर्धारितः।प्रकृतिश्चाधिष्ठाताचेतिश्रुत्यनुसारिणीचस्मृतिःप्रमाणमितिस्थितिः।तत्कस्यहेतोरेषपक्षःप्रत्याचिख्यासितइति
उच्यते।यद्यप्येवंजातीयकोंशःसमानत्वान्नविसंवादगोचरोभवति।अस्तित्वंशांतरंविसंवादस्थानमित्यतस्तत्प्रत्याख्यानायारंभः
तत्रभागवतामन्यंतेभगवानेवैकोवासुदेवोनिरंजनज्ञानस्वरूपःपरमार्थतत्त्वं।सचतुर्धात्मानंप्रविभज्यप्रतिष्ठितोवासुदेवव्यूहरूपे

शां०भा०
२९

पेणसंकर्षणप्रद्युम्नव्यूहरूपेणानिरुद्धव्यूहरूपेण च वासुदेवो नाम परमात्मोच्यते संकर्षणो नाम जीवः प्रद्युम्नो नाम मनोऽनिरुद्धो
नामाहंकारः तेषां वासुदेवः परा प्रकृतिः इतरे संकर्षणादयः कार्यं तमित्थंभूतं भगवन्तमभिगमनोपादानेज्यास्वाध्याययोगैर्वर्ष
शतमिष्ट्वा क्षीणक्लेशो भगवन्तमेव प्रतिपद्यत इति तत्र यत्तावदुच्यते योऽसौ नारायणः परोऽव्यक्तात्प्रसिद्धः परमात्मा सर्वात्मा स
आत्मनात्मानमनेकधा व्यूह्य व्यवस्थित इति तन्न निराक्रियते स एकधा भवति त्रिधा भवतीत्यादिश्रुतिभ्यः परमात्मनोऽनेकधाभा
वस्याधिगतत्वात् यदपि तस्य भगवतोऽभिगमनादिलक्षणमाराधनमजस्रमनन्यचित्ततयाभिप्रेयते तदपि न प्रतिषिध्यते श्रुतिस्मृ
त्योरीश्वरप्रणिधानस्य प्रसिद्धत्वात्॥ यत्पुनरिदमुच्यते वासुदेवात्संकर्षण उत्पद्यते संकर्षणाच्च प्रद्युम्नः प्रद्युम्नाच्चानिरुद्ध इति
तत्र ब्रूमः न वासुदेवसंज्ञकात्परमात्मनः संकर्षणसंज्ञकस्य जीवस्योत्पत्तिः संभवति अनित्यत्वादिदोषप्रसंगात् उत्पत्तिमत्त्वे हि जी
वस्यानित्यत्वादयो दोषाः प्रसज्येरन् ततश्च नैवास्य भगवत्प्राप्तिर्मोक्षः स्यात्॥ कारणप्राप्तौ कार्यस्य प्रविलयप्रसंगात् प्रतिषेधिष्य
ति चाचार्यो जीवस्योत्पत्तिं नात्माश्रुतेर्नित्यत्वाच्च ताभ्य इति॥ तस्मादसंगतैषा कल्पना॥ न च कर्तुः करणम्॥ ४३॥ इतश्चासंगतै
षा कल्पना यस्मान्न हि लोके कर्तुर्देवदत्तादेः करणं परश्वाद्युत्पद्यमानं दृश्यते वर्णयन्ति च भागवताः कर्तुर्जीवात्संकर्षणसंज्ञकात्क
रणं मनः प्रद्युम्नसंज्ञकमुत्पद्यते कर्तृजाच्च तस्मादनिरुद्धसंज्ञकोऽहंकार उत्पद्यत इति न चैतद्दृष्टान्तमन्तरेणाध्यवसातुं शक्नुमो न चै
वंभूतां श्रुतिमुपलभामहे॥ विज्ञानादिभावे वा तदप्रतिषेधः॥ ४४॥ अथापि स्यान्नैवैते संकर्षणादयो जीवादिभावेनाभिप्रेयन्ते किं
तर्हीश्वरा एवैते ज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिरैश्वरैर्धर्मैरन्विता अगम्यन्ते वासुदेवा एवैते सर्वे निर्दोषा निरधिष्ठाना निरवद्या भ्युप
श्चेति तस्मान्नायं यथावर्णित उत्पत्त्यसंभवो दोषः प्राप्नोतीति॥ अत्रोच्यते एवमपि तदप्रतिषेध उत्पत्त्यसंभवस्याप्रतिषेधः प्राप्नो २९
त्येवायमुत्पत्त्यसंभवो दोषः प्रकारान्तरेणेत्यभिप्रायः कथं यदि तावदयमभिप्रायः परस्परभिन्ना एवैते वासुदेवादयश्चत्वार ईश्वरा
स्तुल्यधर्माणो नैषामेकात्मकत्वमस्तीति ततोऽनेकेश्वरकल्पनानर्थक्यमेकेनैवेश्वरेणेश्वरकार्यसिद्धेः सिद्धान्तहानिश्च भग
वे वानेको वासुदेवः परमार्थतत्त्वमित्यभ्युपगमात्॥ अथायमभिप्रायः एकस्यैव भगवत एते चत्वारो व्यूहास्तुल्यधर्माण इति तथापि
तदवस्थ एवोत्पत्त्यसंभवो दोषः न हि वासुदेवात्संकर्षणस्योत्पत्तिः संभवति संकर्षणाच्च प्रद्युम्नस्य प्रद्युम्नाच्चानिरुद्धस्यातिशयाभा

173|1913

वात् भवितव्यं हि कार्यकारणयोरतिशयेन यथा मृद्घटयोर्नह्यसत्यतिशये कार्यं कारणमित्यवकल्पते न च पञ्चरात्रसिद्धान्तिभिर्वासुदे
वादिष्वेकस्मिन्सर्वेषु वा ज्ञानैश्वर्यादितारतम्यकृतः कश्चिद्भेदोऽभ्युपगम्यते वासुदेवा एव हि सर्वे व्यूहा निर्विशेषा इष्यन्ते न चैते भगवद्व्यू
हाश्चतुःसंख्यायामेवावतिष्ठेरन् ब्रह्मादिस्तम्बपर्यन्तस्य समस्तस्यैव जगतो भगवद्व्यूहत्वावगमात्॥ विप्रतिषेधाच्च॥ ४५॥ विप्रतिषेध
श्चास्मिन्शास्त्रे बहुविध उपलभ्यते गुणगुणित्वकल्पनादिलक्षणः ज्ञानैश्वर्यशक्तिबलवीर्यतेजांसि गुणाः आत्मान एवैते भगवन्तो वा
सुदेवा इत्यादिदर्शनात् वेदविप्रतिषेधश्च भवति चतुर्षु वेदेषु परं श्रेयोऽलब्ध्वा शाण्डिल्य इदं शास्त्रमधीतवानित्यादिवेदनिन्दादर्शनात् तस्माद
संगतैषा कल्पनेति सिद्धम्॥ ॥ इति श्रीशारीरकमीमांसाभाष्ये शंकरभगवत्पादकृतौ द्वितीयाध्यायस्य द्वितीयः पादः॥ ॥ न वियदश्रुतेः॥
वेदान्तेषु तत्र तत्र भिन्नप्रस्थाना उत्पत्तिश्रुतय उपलभ्यन्ते केचिदाकाशस्योत्पत्तिमामनन्ति केचिन्न तथा केचिद्वायोरुत्पत्तिमामनन्ति केचि
न्नैवं जीवस्य प्राणानामेवमेव क्रमादिद्वारकोऽपि विप्रतिषेधः श्रुत्यन्तरेषूपलक्ष्यते विप्रतिषेधाच्च परपक्षाणामनपेक्षत्वं स्थापितं तद्वत्स्व
पक्षस्यापि विप्रतिषेधादेवानपेक्षत्वमाशङ्क्येत इत्यतः सर्ववेदान्तगतसृष्टिश्रुत्यर्थनिर्मलत्वाय परः प्रपञ्च आरभ्यते तदर्थनिर्मलत्वे च
फलं यथोक्ताशङ्कानिवृत्तिरेव तत्र प्रथमं तावदाकाशमाश्रित्य चिन्त्यते किमस्योत्पत्तिरस्त्युत नास्तीत्यत्र तावत्प्रतिपाद्यते न वियदश्रुतेरिति
न खल्वाकाशमुत्पद्यते कस्मादश्रुतेः न ह्यस्योत्पत्तिप्रकरणे श्रवणमस्ति छान्दोग्ये हि सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति सच्छब्द
वाच्यं ब्रह्म प्रकृत्य तदैक्षत तत्तेजोऽसृजतेति च पञ्चानां महाभूतानां मध्यमं तेज आदिं कृत्वा त्रयाणां तेजोबन्नानामुत्पत्तिः श्राव्यते श्रुतिश्च नः
प्रमाणमतीन्द्रियार्थविज्ञानोत्पत्तौ न चात्र श्रुतिरस्त्याकाशोत्पत्तिप्रतिपादिनी॥ तस्मान्नास्त्याकाशोत्पत्तिरिति॥ अस्ति तु॥ तुशब्दः पक्षा
न्तरपरिग्रहे मा नामाकाशस्य छान्दोग्ये भूदुत्पत्तिः श्रुत्यन्तरे त्वस्ति तैत्तिरीया हि समामनन्ति सत्यं ज्ञानमनन्तं ब्रह्मेति प्रकृत्य तस्माद्वा एत
स्मादात्मन आकाशः संभूत इति॥ ततश्च श्रुत्योर्विप्रतिषेधः क्वचित्तेजःप्रमुखा सृष्टिः क्वचिदाकाशप्रमुखेति नन्वेकवाक्यतानयोः श्रु
त्योर्युक्ता सत्यं युक्ता न तु सावगन्तुं शक्यते कुतस्तत्तेजोऽसृजतेति सकृच्छ्रुतस्य स्रष्टुः स्रष्टव्यद्वयेन संबन्धानुपपत्तेस्तत्तेजोऽसृजतेति सकृच्छ्रु
तेन तदाकाशमसृजतेति ननु सकृच्छ्रुतस्यापि कर्तुः कर्तव्यद्वयसंबन्धो दृश्यते यथा सूपं पक्त्वौदनं पचतीत्येवं तदाकाशं सृष्ट्वा तत्ते
जोऽसृजतेति योजयिष्यामि नैवं युज्यते प्रथमजत्वं हि छान्दोग्ये तेजसोऽवगम्यते तैत्तिरीयके चाकाशस्य न चोभयोः प्रथमजत्वं संभवति

ब्रं॰भा॰ एतेनांतरप्रत्यक्षरविरोधोपि व्याख्यातस्तस्माद्वा एतस्मादात्मन आकाशः संभूत इति अत्रापि तस्मादाकाशः संभूतस्तस्मात्तेज संभ
३० तमिति सहश्रुतस्यापादानस्य संभवनं तस्य वियत्तेजोभ्यां युगपत्संबंधानुपपत्तेः वायोरग्निरिति च पृथगाम्नानात् अस्मिन्नु विप्रति
षेधे कश्चिदाह गौण्यसंभवात्॥ नास्ति वियत उत्पत्तिरश्रुतेः एव या त्वितरा वियत उत्पत्तिवादिनी श्रुतिरुदाहृता सा गौणी भवितुमर्हति
कस्मादसंभवात् न ह्याकाशस्योत्पत्तिः संभावयितुं शक्या श्रीमत्कणभुगभिप्रायानुसारिषु जीवत्सु ते हि कारणसामग्र्यसंभवादा
काशस्योत्पत्तिं वारयंति समवायिनिमित्तकारणेभ्यो हि किल सर्वं समुत्पद्यमानमुत्पद्यते द्रव्यस्य चैकजातीयमनेकं च द्रव्यं समवायि
कारणं भवति न चाकाशस्यैकजातीयमनेकं च द्रव्यमारंभकमस्ति यस्मिन्समवायिकारणे समवायिकारणे च तत्संयोगे आकाशमु
त्पद्येत तदभावे तु तदनुग्रहप्रवृत्तं निमित्तकारणं दूरापेतमेवाकाशस्य भवति उत्पत्तिमतां च तेजःप्रभृतीनां पूर्वोत्तरकालयोर्विशेषः सं
भाव्यते प्रागुत्पत्तेः प्रकाशादिकार्यं न बभूव पश्चाद्भवतीति॥ आकाशस्य पुनर्न पूर्वोत्तरकालयोर्विशेषः संभावयितुं शक्यते किं हि प्रा
गुत्पत्तेरनवकाशमसुषिरमच्छिद्रं बभूवेति शक्यतेऽध्यवसातुं पृथिव्यादिवैधर्म्याच्च विभुत्वादिलक्षणादाकाशस्याजत्वसिद्धिः तस्मा
द्यथा लोके आकाशं कुर्वाकाशो जात इत्येवंजातीयको गौणः प्रयोगो भवति यथा च घटाकाशः करकाकाशो गृहाकाश इत्येकस्या
प्याकाशस्यैवंजातीयको भेदव्यपदेशो गौणो भवति वेदेप्यारण्यानाकाशेष्वारभन्नित्येवमुत्पत्तिश्रुतिरपि गौणा द्रष्टव्या॥ शब्दाच्च॥
शब्दः खल्वाकाशस्याजत्वं ख्यापयति यत आह वायुश्चान्तरिक्षं चैतदमृतमिति न ह्यमृतस्योत्पत्तिरुपपद्यते आकाशवत्सर्वगतश्च
नित्य इति चाकाशेन ब्रह्म नित्यत्वसर्वगतत्वाभ्यां धर्माभ्यामुपमिमान आकाशस्यापि तौ धर्मौ सूचयति न च तादृशस्योत्पत्तिरुपपद्यते स
यथानंतोयमाकाश एवमनंत आत्मा वेदितव्य इति चोदाहरणमाकाशशरीरं ब्रह्म आकाश आत्मेति च न ह्याकाशस्योत्पत्तिमत्त्वे ब्र ॥३०॥
ह्मणि तेन विशेषणं संभवति नीलेनेवोत्पलस्य तस्मान्नित्यमेवाकाशेन साधारणं ब्रह्मेति गम्यते॥ स्याच्चैकस्य ब्रह्मशब्दवत्॥ इदं
पदोत्तरं सूत्रं स्यादेतत् कथं पुनरेकस्य संभूतशब्दस्य तस्माद्वा एतस्मादात्मन आकाशः संभूत इत्यस्मिन्नधिकारे परेषु तेजःप्रभृ
तिष्वनुवर्तमानस्य मुख्यत्वं संभवति आकाशे च गौणत्वमिति॥ अत उत्तरमुच्यते स्याच्चैकस्यापि संभूतशब्दस्य विषयविशेषवशाद्गौ
णो मुख्यश्च प्रयोगो ब्रह्मशब्दवत् यथैकस्यापि ब्रह्मशब्दस्य तपसा ब्रह्म विजिज्ञासस्व तपो ब्रह्मेत्यस्मिन्नधिकारे अन्नादिषु गौणः प्रयोगः

175/1913

आनंदे च मुख्यो यथा च तपसि ब्रह्मविज्ञानसाधने ब्रह्मशब्दो भक्त्या प्रयुज्यतेऽञ्जसा तु विज्ञेये ब्रह्मणि तद्वत्॥ कथं पुनरनु
त्पत्तौ नभस एकमेवाद्वितीयमितीयं प्रतिज्ञा समर्थ्यते ननु नभसा द्वितीयेन सद्वितीयं ब्रह्म प्राप्नोति कथं च ब्रह्मणि विदिते सर्वं विदि
तं स्यादिति। तदुच्यते एकमेवेति तावत्स्वकार्यापेक्षयोपपद्यते यथा लोके कश्चित्कुंभकारकुले पूर्वेद्युर्मृद्दण्डचक्रादीनि चोपलभ्या
परेद्युश्च नानाविधान्यमत्राणि प्रसारितान्युपलभ्य ब्रूयान्मृदेवैकाकिनी पूर्वेद्युरासीदिति स च तयावधारणया मृत्कार्यजातमेव पूर्वे
द्युर्नासीदित्यभिप्रेयात् न तु दंडचक्रादि तद्वदद्वितीयश्रुतिरधिष्ठात्रंतरं वारयति यथा मृदोऽमत्रप्रकृतेः कुंभकारोऽधिष्ठाता दृश्यते नैवं ब्र
ह्मणो जगत्प्रकृतेरन्योऽधिष्ठातास्तीति॥ न च नभसापि द्वितीयेन सद्वितीयं ब्रह्म प्रसज्यते लक्षणान्यत्वनिमित्तं हि नानात्वं न च प्रागुत्पत्ते
र्ब्रह्मनभसोर्लक्षणान्यत्वमस्ति क्षीरोदकयोरिव संसृष्टयोर्व्यापित्वामूर्तत्वादिधर्मसामान्यात्सर्गकाले तु ब्रह्माकाशयोर्भेदापवार
सिद्धिरत एव च ब्रह्मविज्ञानेन सर्वविज्ञानसिद्धिः॥ अपि च सर्वं कार्यमुत्पद्यमानमाकाशेनाव्यतिरिक्तदेशकालमेवोत्पद्यते ब्रह्मणा
चाव्यतिरिक्तदेशकालमेवाकाशं भवतीत्यतो ब्रह्मणा तत्कार्येण च विज्ञातेन सह विज्ञातमेवाकाशं भवति यथा क्षीरपूर्णे घटे कति
चिदब्बिंदवः प्रक्षिप्ताः संतः क्षीरग्रहणेनैव गृहीता भवंति॥ न हि क्षीरग्रहणादब्बिंदुग्रहणं परिशिष्यते एवं ब्रह्मणा तत्कार्यैश्चाव्यतिरिक्तदे
शकालत्वाद्गृहीतमेव ब्रह्मग्रहणेन नभो भवति तस्माद्भाक्तं नभसः संभवश्रवणमित्येवं प्राप्ते इदमाह॥ प्रतिज्ञाहानिरव्यतिरेका
च्छब्देभ्यः॥ ५॥ येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमित्यात्मनि खल्वरे दृष्टे श्रुते विज्ञात इदं सर्वं विदितमिति कस्मिन्नु भ
गवो विज्ञाते सर्वमिदं विज्ञातं भवतीति न काचन मद्बहिर्धा विद्यास्तीत्येवंरूपा प्रतिवेदांतं प्रतिज्ञायते तस्याः प्रतिज्ञायाः एवमहानिरनुपरो
धः स्याद्यद्यव्यतिरेकः कृत्स्नस्य वस्तुजातस्य विज्ञेयाद्ब्रह्मणः स्यात् व्यतिरेके हि सत्येकविज्ञानेन सर्वं विज्ञायत इतीयं प्रतिज्ञा हीय
त अव्यतिरेकश्चैवमुपपद्यते यदि कृत्स्नं वस्तुजातमेकस्माद्ब्रह्मण उत्पद्येत शब्देभ्यश्च प्रकृतिविकाराव्यतिरेकन्यायेनैव प्रति
ज्ञासिद्धिरवगम्यते तथा हि येनाश्रुतं श्रुतं भवतीति प्रतिज्ञाय मृदादिदृष्टान्तैः कार्यकारणाभेदप्रतिपादनपरैः प्रतिज्ञेयं समर्थ्य
ते तत्साधनायैव चोत्तरे शब्दाः सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं तदैक्षत तत्तेजोऽसृजतेत्येवं कार्यजातं ब्रह्मणः प्रदर्श्याव्यति
रेकं प्रदर्शयंति ऐतदात्म्यमिदं सर्वमित्यारभ्या प्रपाठकपरिसमाप्तेस्तद्यद्याकाशं न ब्रह्मकार्यं स्यान्न ब्रह्मणि विज्ञाते आकाशं विज्ञा

यतेनतश्च प्रतिज्ञाहानिः स्यान्न च प्रतिज्ञाहान्या वेदस्याप्रामाण्यं कर्तुं युक्तं ॥ तथा हि प्रतिवेदांतं तेन तेन दृष्टांतेन तामेव प्रति
ज्ञां ख्यापयंति इदं सर्वं यदयमात्मा ब्रह्मैवेदममृतं पुरस्तादित्येवमाद्यस्तस्मात् ज्वलनादिवदेव गगनमप्युत्पद्यत इति यदुक्तमश्रुतेर्न वियदु
त्पद्यत इति तदयुक्तं वियदुत्पत्तिविषयस्य श्रुत्यंतरस्य दर्शितत्वात् तस्माद्वा एतस्मादात्मन आकाशः संभूत इति सत्यं दर्शितं विरुद्धं तु तच्छां
दोग्यश्रुत्यंतरेण नैकवाक्यत्वात्सर्वश्रुतीनां भवत्येकवाक्यत्वमविरुद्धानामिह तु विरोध उक्तः सकृच्छ्रुतस्य स्रष्टुः स्रष्टव्यद्वय
संबंधानंभावात् द्वयोश्च प्रथमजत्वासंभवाद्विकल्पासंभवाच्चेति ॥ नैष दोषः तेजःसर्गस्य तैत्तिरीयके तृतीयत्वश्रवणात् तस्माद्वा एत
स्मादात्मन आकाशः संभूत आकाशाद्वायुर्वायोरग्निरिति अशक्या हीयं श्रुतिरन्यथा परिणेतुं शक्या तु परिणेतुं छांदोग्यश्रुतिः तदाकाशं
वायुं च सृष्ट्वा तत्तेजोऽसृजतेति ॥ न हीयं श्रुतिस्तेजोजनिप्रधाना सती श्रुत्यंतरप्रसिद्धामाकाशस्योत्पत्तिं वारयितुं शक्नोत्येकस्य वाक्यस्य व्या
पारद्वयासंभवात् स्रष्टा त्वेकोऽपि क्रमेणानेकं सृजेदित्येकवाक्यकल्पनायां संभवंत्यां न विरुद्धार्थत्वेन श्रुतिर्हातव्या न चास्माभिः स
कृच्छ्रुतस्य स्रष्टुः स्रष्टव्यद्वयसंबंधासंभवात् द्वयोश्च प्रथमजत्वासंभवात् विकल्पासंभवाच्चेति ॥ नैष दोषः तेजःसर्गस्य तैत्तिरीयके तृती
यत्वश्रवणात् तस्माद्वा एतस्मादात्मन आकाशः संभूत आकाशाद्वायुर्वायोरग्निरिति आशक्या हीयं श्रुतिरन्यथा परिणेतुं शक्या तु परिणे
तुं छांदोग्यश्रुतिः तदाकाशं वायुं च सृष्ट्वा तत्तेजोऽसृजतेति ॥ न हीयं श्रुतिस्तेजोजनिप्रधाना सती श्रुत्यंतरप्रसिद्धामाकाशस्योत्पत्तिं वारयितुं
शक्नोत्येकस्य वाक्यस्य व्यापारद्वयासंभवात् स्रष्टा त्वेकोऽपि क्रमेणानेकं सृजेदित्येकवाक्यकल्पनायां संभवंत्यां न विरुद्धार्थत्वेन
श्रुतिर्हातव्या न चास्माभिः सकृच्छ्रुतस्य स्रष्टुः स्रष्टव्यद्वयसंबंधोऽभिप्रेयते श्रुत्यंतरवशेन स्रष्टव्यांतरोपसंग्रहात् यथा च सर्वं खल्विदं
ब्रह्म तज्जलानिति शांत उपासीतेत्यत्र साक्षादेव सर्वस्य वस्तुजातस्य ब्रह्मजत्वं श्रूयमाणं न प्रदेशांतरविहितं तेजःप्रमुखमुत्पत्तिक्रमं वारयत्येवं तेजसो
ऽपि ब्रह्मजत्वं श्रूयमाणं न श्रुत्यंतरविहितं नभःप्रमुखमुत्पत्तिक्रमं वारयितुमर्हति ॥ ननु शमविधानार्थमेतद्वाक्यं तज्जलानिति शांत उपा
सीतेति श्रुतेर्नैतत्सृष्टिवाक्यं तस्मादेतन्न प्रदेशांतरप्रसिद्धं क्रममनुरोद्धुमर्हति ॥ तत्तेजोऽसृजतेत्येतत्सृष्टिवाक्यं तस्मादत्र यथाश्रुति क्र ॥३३॥
मो ग्रहीतव्य इति नेत्युच्यते न हि तेजःप्राथम्यानुरोधेन श्रुत्यंतरप्रसिद्धो वियत्पदार्थः परित्यक्तव्यो भवति पदार्थधर्मत्वात्क्रमस्यापि च तत्
तेजोऽसृजतेति नात्र क्रमस्य वाचकः ॥ कश्चिच्छब्दोऽस्ति अर्थात्तु क्रमोऽवगम्यते स च वायोरग्निरित्यनेन श्रुत्यंतरप्रसिद्धेन क्रमेण निवार्यते ॥

177/1913

विकल्पसमुच्चयौ तु वियदग्निजन्मनः प्रथमजत्वविषयावसंभवानभ्युपगमाभ्यां निवारितौ तस्मान्नास्ति श्रुत्योर्विप्रतिषेधः अपि च
छांदोग्ये येनाश्रुतं श्रुतं भवतीत्येतां प्रतिज्ञां वाक्योपक्रमे श्रुतां समर्थयितुमसमाम्नातमपि वियदुत्पत्तावुपसंख्यातव्यं किमंग पुन
स्तैत्तिरीयके समाम्नातं नभो न संगृह्यते ॥ यच्चोक्तमाकाशस्य सर्वेणानन्यदेशकालत्वाद्ब्रह्मणा तत्कार्यैश्च सह विदितमेव तदिति अतो न प्रतिज्ञा
हीयते न चैकमेवाद्वितीयमिति श्रुतिकोपो भवति क्षीरोदकवद्ब्रह्मनभसोरव्यतिरेकोपपत्तेरिति ॥ अत्रोच्यते न क्षीरोदकन्यायेनेदमेकवि
ज्ञानेन सर्वविज्ञानं नेतव्यं मृदादिदृष्टांतप्रणयनाद्धि प्रकृतिविकारन्यायेनैवेदं सर्वविज्ञानं नेतव्यमिति गम्यते क्षीरोदकन्यायेन च सर्ववि
ज्ञानं कल्प्यमानं न सम्यग्विज्ञानं स्यात् न हि क्षीरज्ञानगृहीतस्योदकस्य सम्यग्ज्ञानगृहीतत्वमस्ति न च वेदस्य पुरुषाणामिव मायाली
कवंचनादिभिरर्थावधारणमुपपद्यते सावधारणा चेयमेकमेवाद्वितीयमिति श्रुतिः क्षीरोदकन्यायेन नीयमाना पीड्येत न च स्वकार्यापे
क्षयेदं वस्त्वेकदेशविषयं सर्वविज्ञानमेकाद्वितीयतावधारणं चेति न्याय्यं मृदादिष्वपि हि तत्संभवात् न तदपूर्ववदुपन्यसितव्यं भवति श्वे
तकेतो यन्नु सोम्येदं महामना अनूचानमानी स्तब्धोऽस्युत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवतीत्यादिना ॥ तस्मादशेषवस्तुविषयमेवेदं सर्ववि
ज्ञानं सर्वस्य ब्रह्मकार्यतापेक्षयोपन्यस्यत इति द्रष्टव्यं ॥ यत्पुनरेतदुक्तं असंभवाद्गौणी गगनस्योत्पत्तिश्रुतिरिति अत्र ब्रूमः ॥ यावद्विकारं तु
विभागो लोकवत् ॥ तु शब्दोऽसंभवाशंकाव्यावृत्त्यर्थः ॥ न खल्वाकाशोत्पत्तावसंभवाशंका कर्तव्या यतो यावत्किंचिद्विकारजातं दृश्यते घ
टघटिकोदंचनादि वा कटककेयूरकुंडलादि वा सूचीनाराचनिस्त्रिंशादि वा तावानेव विभागो लोके लक्ष्यते न त्वविकृतं किंचित्कुतश्चिद्वि
भक्तमुपलभ्यते विभागश्चाकाशस्य पृथिव्यादिभ्योऽवगम्यते तस्मात्सोऽपि विकारो भवितुमर्हतीत्येतेन दिक्कालमनःपरमाणूनां
कार्यत्वं व्याख्यातं ननु आत्माप्याकाशादिभ्यो विभक्त इति तस्यापि कार्यत्वं घटादिवत्प्राप्नोति नात्मन आकाशः संभूत इति श्रुतेः यदि ह्या
त्मापि विकारः स्यात् तस्मात्परमन्यन्न श्रुतमित्याकाशादि सर्वं कार्यं निरात्मकमात्मनः कार्यत्वे स्यात् ॥ तथा च शून्यवादः प्रसज्येत आत्मत्वा
दात्मनो निराकरणशंकानुपपत्तिः न ह्यात्मागंतुकः कस्यचित् स्वयंसिद्धत्वात् न ह्यात्मन आत्मा प्रमाणमपेक्ष्य सिध्यति तस्य हि प्रत्यक्षादी
नि प्रमाणान्यप्रसिद्धप्रमेयसिद्धय उपादीयंते न ह्याकाशादयः पदार्थाः प्रमाणनिरपेक्षाः स्वयंसिद्धाः केनचिदभ्युपगम्यंते ॥ आत्मा
तु प्रमाणादिव्यवहाराश्रयत्वात्प्रागेव प्रमाणादिव्यवहारात्सिध्यति ॥ न चेदृशस्य निराकरणं संभवति आगंतुकं हि वस्तु निराक्रियते ॥

ब्रं०भा०
३२

न स्वरूपापायएव धर्मिनिराकर्त्तांनंदं वस्य स्वरूपं॥नत्यग्नेरौष्ण्यमग्निनानिराक्रियते तथाहमेवेदानींजानामि वर्त्तमानं वस्तु अहमेव
वातीनमतीतं वा॥ ज्ञास्यामि अहमेवानागतमनागतं तदेवं ज्ञास्यामीत्यतीतानागतवर्त्तमानभावेनान्यथा भवत्यपि ज्ञातव्यं न ज्ञा
तुरन्यथाभावोऽस्ति स सर्वदा वर्त्तमानस्वभावत्वात्॥तथा भस्मीभवत्यपि देहे नात्मन उच्छेदो वर्त्तमानस्वभावादन्यस्वभावत्वं वा संभाव
त्वं वा संभावयितुं शक्यमेवमत्यापन्नस्य वस्तभावत्वादेवाकार्यत्वमात्मनः कार्यत्वं चाकाशस्य यदुक्तं समानजातीयमनेकं कार
णद्रव्यं व्योम्नो नास्तीति तत्त्वयुच्यते न तावत् समानजातीयमेवारभते न भिन्नजातीयमिति नियमोऽस्ति न हि तंतूनां तत्संयोगानां च
समानजातीयत्वं गुणात्वाभ्युपगमान्नचेमिति न कारणानामपि तुरीवेमादीनां समानजातीयत्वनियमोऽस्ति स्यादेतत् समवायिका
रणविषय एवसमानजातीयत्वाभ्युपगमो न कारणांतरविषय इति॥ तदप्यनैकांतिकं सूत्रगोवालैरनेकजातीयैरारब्धुः सृज्य
मानाहृष्टत्वेन तथा रुरुकुरूर्णादिभिश्चविचित्रा॥ नृकंबलान्वितं त्वं न सत्वद्रव्यत्वाद्यपेक्षया वा समानजातीयत्वं कल्प्यमाने नियमान
र्थक्यं सर्वस्य सर्वेण समानजातीयत्वान्नाप्यनेकमेवारभते नैकमिति नियमोऽस्ति॥ अणुमनसोराद्यकर्मारंभाभ्युपगमात् एके
काद्धि परमाणुर्मनश्चाद्यं कर्मारंभते न द्रव्यांतरैः संहत्येत्यभ्युपगम्यते॥ द्रव्यारंभ एवानेकारंभकत्वनियम इति चेत्॥ न परिणामा
भ्युपगमात् भवेदेष नियमो यदि संयोगसचिवं द्रव्यं द्रव्यांतरस्यारंभकमभ्युपगम्येत तत्तु द्रव्यं विशेषवदवस्थांतरमापद्य
मानं कार्यं नामाभ्युपगम्यते तत्र क्वचिदनेकं परिणमते मृद्बीजांकुरादिभावेन क्वचिदेकं परिणमते क्षीरादिदध्यादिभावेन नेश्व
रशासनमस्ति अनेकमेव कारणं कार्यं जनयतीत्यतः श्रुतिप्रामाण्यादेकस्माद्ब्रह्मण आकाशादिमहाभूतोत्पत्तिक्रमेण ज
गज्जातमिति निश्चीयते तथा चोक्तमुपसंहारदर्शनान्नेति चेन्न क्षीरवद्धीति॥ यच्चोक्तमाकाशस्योत्पत्तौ न पूर्वोत्तरकालयोर्वि
शेषः संभावयितुं शक्यत इति तदयुक्तं येनैव हि विशेषण पृथिव्यादिभ्यो व्यतिरिच्यमानं नभः स्वरूपवदिदानीमध्यवसीयते स ३२
एव विशेषः प्रागुत्पत्तेर्नासीदिति गम्यते यथा चैतद्ब्रह्म स्थूलादिभिः पृथिव्यादिस्वभावैः स्वभाववदस्थूलमनण्वित्यादिश्रुति
भ्य एवमाकाशस्वभावेनाभिनस्वभाववदनाकाशमिति श्रुतेरवगम्यते॥ तस्मात्प्रागुत्पत्तेरनाकाशमिति स्थितं यदप्युक्तं
तं पृथिव्यादिवैधर्म्यादाकाशस्याजत्वमिति तदप्यसत् श्रुतिविरोधे सत्युत्पत्त्यसंभवानुमानस्याभासत्वोपपत्तेरुत्पत्त्यनुमानस्य

179/1913

च दर्शनस्यादनित्यमाकाशमनित्यगुणाश्रयत्वाद्घटवदित्यादिप्रयोगसंभवाच्चात्मन्यनैकांतमिति चेन्न तस्यौपनिषदं प्रत्यनि
त्यगुणाश्रयत्वासिद्धेर्विभ्वादीनां चाकाशस्योत्पत्तिवादिनं प्रत्यसिद्धत्वात् यच्चोक्तं एतच्छब्दाच्चेति तत्राप्यमृतत्वश्रुतिस्तावद्वियदमृता
दिवौकस इतिवद्रष्टव्या उत्पत्तिप्रलययोरुपपादितत्वात् आकाशवत्सर्वगतश्च नित्य इत्यपि प्रसिद्धत्वेनाकाशेनोपमानं क्रियते
न निरतिशयमहत्वायनाकाशसमानत्वाय यथेषुरिव सविता धावतीति क्षिप्रगतित्वायोच्यते न युतुल्यगतित्वाय तद्वत्॥ एतेना
नंतत्वोपमानश्रुतिर्व्याख्याता ज्यायानाकाशादित्यादिश्रुतिभ्यश्च ब्रह्मणः सकाशादाकाशस्यानपरिमाणत्वसिद्धिर्न तस्य प्र
तिमा अस्तीति च ब्रह्मणोऽनुपमानत्वं दर्शयति अतोऽन्यदार्तमिति च ब्रह्मणोऽन्येषामाकाशादीनामार्तत्वं दर्शयति तपसि ब्र
ह्मशब्दवदाकाशस्य जन्मश्रुतेर्गौणत्वमित्येतदाकाशसंभवश्रुत्यनुमानाभ्यां परिहृतं तस्माद्ब्रह्मकार्यं वियदिति सिद्धं॥ एतेन मा
तरिश्वा व्याख्यातः॥८॥ अतिदेशोऽयं तेन वियद्व्याख्यानेन मातरिश्वापि वियदाश्रयो वायुर्व्याख्यातः तत्राप्येते यथायोगं प
क्षा रचयितव्याः न वायुरुत्पद्यते छांदोगानामुत्पत्तिप्रकरणेऽनाम्नानादित्येकः पक्षः अस्ति तु तैत्तिरीयाणामुत्पत्तिप्रकरणे
आम्नानमाकाशाद्वायुरिति पक्षांतरं॥ ततश्च श्रुत्योर्विप्रतिषेधे सति गौणी वायोरुत्पत्तिश्रुतिरसंभवादित्यपरोऽभिप्रायः अस
भवश्च सैषानस्तमिता देवता यद्वायुरित्यस्तमयप्रतिषेधादमृतत्वादिश्रवणाच्च प्रतिज्ञानुपरोधाद्यावद्विकारं च वियतोऽगा
भ्युपगमादुत्पद्यते वायुरिति सिद्धांतः अस्तमयप्रतिषेधोऽपरविद्याविषय आपेक्षिकोऽग्न्यादीनामिव वायोरस्तमयाभावात्कृत
प्रतिविधानं चामृतत्वादिश्रवणं॥ ननु वायोराकाशस्य च तुल्ययोरुत्पत्तिप्रकरणे श्रवणाश्रवणयोरेकमेवाधिकरणमुभ
यविषयमस्तु किमतिदेशेनासति विशेष इत्युच्यते सत्यमेवं तथापि मंदधियां शब्दमात्रकृताशंकानिवृत्त्यर्थोऽयमतिदेशः
क्रियते संवर्गविद्यादिषु ह्युपास्यतया वायोर्महाभागत्वश्रवणादस्तमयप्रतिषेधादिभ्यश्च भवति नित्यत्वाशंका कस्यचिदि
ति॥ असंभवस्तु सतोऽनुपपत्तेः॥९॥ वियत्पवनयोरसंभाव्यमानजन्मनोरप्युत्पत्तिमुपश्रुत्य ब्रह्मणोऽपि भवेत्कुतश्चिदु
त्पत्तिरिति स्यात्कस्यचिन्मतिः तथा विकारेभ्य एवाकाशादिभ्य उत्तरेषां विकाराणामुत्पत्तिमुपश्रुत्याकाशस्यापि विकारादेव
ब्रह्मण उत्पत्तिरिति कश्चिन्मन्येत तामाशंकामाकाशादिभ्य उत्तरेषां विकाराणामुत्पत्तिमुपश्रुत्याकाशस्यापि विकारादेव ब्रह्मण उत्प

त्तिरिति कश्चिन्मन्येत तामाशंकामपनेतुमिदं सूत्रं असंभवस्त्विति। नखलु ब्रह्मणः सदात्मकस्य कुतश्चिदन्यतः संभव उत्पत्तिराशं
कितव्या कस्मादनुपपत्तेः॥ सन्मात्रं हि ब्रह्म न तस्य सन्मात्रादेवोत्पत्तिः संभवत्यसत्यतिशये प्रकृतिविकारभावानुपपत्तेर्नापि सद्वि
शेषाद्दृष्टविपर्ययात्सामान्याद्धि विशेषा उत्पद्यमाना दृश्यन्ते मृदो घटादयो न तु विशेषेभ्यः सामान्यं नाप्यसतो निरात्मकत्वात्
तथासतः सज्जायेतेति चाक्षेपश्रवणात् स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिप इति ब्रह्मणो जनयितारं
वारयति वियत्पवनयोः पुनरुत्पत्तिः प्रदर्शिता न तु ब्रह्मणः साऽस्तीति वैषम्यं॥ ननु विकारेभ्यो विकारान्तरोत्पत्तिदर्शना
त् ब्रह्मणोऽपि विकारत्वं भवितुमर्हति॥ मूलप्रकृत्यनभ्युपगमेऽनवस्थाप्रसंगात् या मूलप्रकृतिरभ्युपगम्यते तदेव नो ब्रह्मेत्यविरोधः॥
तेजोऽतस्तथाह्याह॥१०॥ छांदोग्ये सन्मूलत्वं तेजसः श्रावितं तैत्तिरीयके तु वायुमूलत्वं तत्र तेजोयोनिं प्रति श्रुतिविप्रतिपत्तौ सत्यां प्रा
प्तं तावद्ब्रह्मयोनिकं तेज इति कुतः सदेवेत्युपक्रम्य तत्तेजोऽसृजतेत्युपदेशात् सर्वविज्ञानप्रतिज्ञायाश्च ब्रह्मप्रभवत्वे सर्वस्य संभवात्
तज्जलानिति वाविशेषश्रुतेरेतस्माज्जायते प्राण इति चोपक्रम्य श्रूयते सर्वस्याविशेषेण ब्रह्मजत्वोपदेशात्तैत्तिरीयके च स तपस्तप्त्वा
इदं सर्वमसृजत यदिदं किंचेत्यविशेषश्रवणात्तस्माद्वायोरग्निरिति क्रमोपदेशाद्द्रष्टव्या वायोरनंतरमग्निः संभूत इत्येवं प्रा
प्ते ब्रूमः तेजोऽतो मातरिश्वनो जायत इति कस्मात्तथाह्याह वायोरग्निरिति॥ अव्यवहिते तेजसो ब्रह्मजत्वे सत्यसति वायुजत्वे वायोरग्निरि
ति इयं श्रुतिः कदर्थिता स्यात् ननु क्रमार्था भविष्यतीत्युक्तं नेति ब्रूमः॥ तस्माद्वा एतस्मादात्मन आकाशः संभूत इति पुरस्तात्संभवत्यु
पादानस्यात्मनः पंचमीनिर्देशात्तस्यैव च संभवतेरिहाधिकारादुपरस्ताच्च पृथिव्या ओषधय इत्युपादानपंचमीदर्शनाद्वा
योरग्निरित्युपादानापंचम्यैवेति गम्यते॥ अपि च वायोरूर्ध्वमग्निः संभूत इति कल्प्य उपपदार्थयोगः क्लृप्तस्तु कारककार्थयोगो वायो
रग्निः संभूत इति तस्मादेषा श्रुतिर्वायुयोनित्वं तेजसोऽवगमयति नन्वितरापि श्रुतिर्ब्रह्मयोनित्वं तेजसोऽवगमयति तत्तेजोऽसृजतेति नैतस्याः
पारंपर्यजत्वेऽप्यविरोधात् यदापि ह्याकाशं वायुं च सृष्ट्वा वायुभावापन्नं ब्रह्म तेजोऽसृजतेति कल्प्यते तदापि ब्रह्मजत्वं तेजसो न विरुध्य
ते यथा तस्याः शृतं तस्या दधि तस्या आमिक्षेत्यादि दर्शयति च ब्रह्मणो विकारात्मनावस्थानं तदात्मानं स्वयमकुरुतेति॥ तथा चेश्वरस्म
रणं भवति बुद्धिर्ज्ञानमसंमोह इत्याद्युपक्रम्य भवंति भावा भूतानां मत्त एव पृथग्विधा इति यद्यपि बुद्ध्यादयः स्वकारणेभ्यः प्रत्यक्षं भ

३३

181|1913

वंतो दृश्यंते तथापि सर्वस्य भावजातस्य साक्षात्प्रणाड्या वेश्वरवंश्यत्वादेतेनाक्रमवत्सृष्टिवादिन्यः श्रुतयो व्याख्याताः तासां सर्वथो
पपत्तेः क्रमवत्सृष्टिवादिनीनां त्वन्यथानुपपत्तेः प्रतिज्ञापि सद्वंश्यत्वमात्रमपेक्षते नाव्यवहितजन्यत्वमित्यविरोधः॥ ॥आपः॥११॥
अतस्तथाह्याहेत्यनुवर्तते आपोऽतस्तेजसो जायंते कस्मात्तथाह्याह तदपोऽसृजतेति अग्नेरापइति च सति वचने नास्ति संशयः॥ तेज
सस्तु सृष्टिं व्याख्याय पृथिव्या व्याख्यास्यन्नपोऽन्तरीयामित्याप इति सूत्रयांबभूव॥ ॥पृथिव्यधिकाररूपशब्दांतरेभ्यः॥१२॥ ता आप
ऐक्षंत बह्व्यः स्याम प्रजायमहीति ता अन्नमसृजंतेति श्रूयते तत्र संशयः किमनेनान्नशब्देन व्रीहियवाद्यभ्यवहार्यं वौदनाद्युच्यते किं
वा पृथिवीति तत्र प्राप्तं तावद्व्रीहियवाद्योदनादि वा परिग्रहीतव्यमिति तत्र ह्यन्नशब्दः प्रसिद्धो लोके वाक्यशेषोऽप्येतमर्थमुपोद्बलय
यति तस्माद्यत्र क्व च वर्षति तदेव भूयिष्ठमन्नं भवतीति व्रीहियवाद्येव हि सति वर्षे बहु भवति न पृथिवीत्येवं प्राप्ते ब्रूमः पृथिव्येवाय
मन्नशब्देनाद्भ्यो जायमाना विवक्ष्यत इति कस्मादधिकाराद्रूपाच्छब्दांतराच्चाधिकारस्तावत् तत्तेजोऽसृजत तदपोऽसृजतेति म
हाभूतविषयो दृश्यते तत्र क्रमप्राप्तां पृथिवीं महाभूतं विलंघ्य नाकस्माद्व्रीहियवादिपरिग्रहो न्याय्यः॥ तथा रूपमपि वाक्यशेषे पृ
थिव्यनुगुणं दृश्यते यत्कृष्णं तदन्नस्येति॥ न ह्योदनादेरभ्यवहार्यस्य कृष्णत्वनियमोऽस्ति नापि व्रीह्यादीनां॥ ननु पृथिव्याः कृष्णत्वं
न तथाश्वेतत्वादपि हि न पौराणिका अपि पृथिवीच्छायां शर्वरीमुपदिशंति सा च कृष्णाभासेत्यतः कृष्णरूपं पृथिव्या इति श्लिष्यते॥ श्रुत्यंत
रमपि समानाधिकारमद्भ्यः पृथिवीति भवति तद्यदपां शर आसीत्तत्समहन्यत सा पृथिव्यभवदिति च पृथिव्यास्तु व्रीह्याद्युत्पत्तिं दर्श
यति पृथिव्या ओषधय ओषधीभ्योऽन्नमिति च एवमधिकारादिषु पृथिव्याः प्रतिपादकेषु सत्सु कुतो व्रीह्यादिप्रतिपत्तिः प्रसिद्धिरप्यधिका
राधिभिरेव बाध्येत॥ वाक्यशेषोऽपि पार्थिवत्वादन्नाद्यस्य तद्द्वारेण पृथिव्या एवाद्भ्यः प्रसवत्वं सूचयतीति द्रष्टव्यं तस्मात्पृथिवीयमन्न
शब्देति॥ ॥तदभिध्यानादेव तु तल्लिंगात्सः॥१३॥ किमिमानि वियदादीनि भूतानि स्वयमेव स्वविकारान् सृजंत्याहोस्वित्परमेश्व
र एव तेन तेनात्मनावतिष्ठमानोऽभिध्यायन् तं तं विकारं सृजतीति संदेहे सति प्राप्तं तावत् स्वयमेव सृजंतीति कुतः॥ आकाशाद्वायुर्वा
युरग्निरित्यादि स्वातंत्र्यश्रवणात् ननु चेतनानां स्वतंत्राणां प्रवृत्तिः प्रतिषिद्धेति नैष दोषस्तेजोऽप्यपेक्षत ता आप ऐक्षंतेति च भूतानामपि
चेतनादित्वश्रवणादित्येवं प्राप्ते अभिधीयते स एव तु परमेश्वरस्तेन तेनात्मनावतिष्ठमानोऽभिध्यायन् तं तं विकारं सृजतीति॥ कु

शां०भा०
३४

तल्लिंगात् तथाहि शास्त्रं यः पृथिव्यां तिष्ठन् यः पृथिवीमंतरो यमयतीत्येवंजातीयकं साध्यक्षाणामेव भूतानां प्रवृत्तिं दर्शयति॥ तथा
सोऽकामयत बहु स्यां प्रजायेयेति॥ प्रस्तुत्य सच्चत्यच्चाभवत् तदात्मानं स्वयमकुरुतेति च तस्यैव सर्वात्मभावं दर्शयति यन्वीक्षाश्रवण
मप्तेजसोस्तत्परमेश्वरावेशप्रज्ञावशादेव द्रष्टव्यं नान्योतोस्ति द्रष्टेतीक्षित्रंतरप्रतिषेधात् प्रकृतत्वाच्च सत ईक्षितुः तदैक्षत बहु स्यां प्रजा
येयेत्यत्र॥ विपर्ययेण तु क्रमोऽत उपपद्यते च॥१४॥ भूतानामुत्पत्तिक्रमश्चिंतितः अथेदानीमप्ययक्रमश्चिंत्यते किमनियतेन क्रमेणाप्य
य उतोत्पत्तिक्रमेणाथ वा तद्विपरीतेनेति त्रयोऽपि वाऽप्युत्पत्तिस्थितिप्रलया भूतानां ब्रह्मायत्ताः श्रूयंते यतो वा इमानि भूतानि जायंते येन जा
तानि जीवंति यत्प्रयंत्यभिसंविशंतीति॥ तत्रानियमो विशेषाभावादिति प्राप्तमथवोत्पत्तेः क्रमस्य श्रुतत्वात्प्रलयस्यापि क्रमाकांक्षिणः स
एव क्रमः स्यादित्येवं प्राप्ते ततोऽब्रूमो विपर्ययेण तु प्रलयक्रमोऽत उत्पत्तिक्रमाद्भवितुमर्हति तथाहि लोके दृश्यते येन क्रमेण सोपानमारू
ढस्ततो विपरीतेन क्रमेणावरोहतीति॥ अपि च दृश्यते मृदो जाता घटशरावादयोऽप्ययकाले मृद्भावमप्यंति अद्भ्यश्च जातं हिमकरकादि अ
द्भावमप्येतीति॥ अतश्चोपपद्यते एतद्यत्पृथिव्यद्भ्यो जाता सती स्थितिकालव्यतिक्रांतावपोऽपीयात् आपश्च तेजसो जाताः सत्यस्ते
जोऽपीयुः एवं क्रमेण सूक्ष्मं सूक्ष्मतरं चानंतरं कारणमपीत्य सर्वं कार्यजातं परमकारणं परमसूक्ष्मं ब्रह्माप्येतीति वेदितव्यं नहि स्वकार
णाव्यतिक्रमेण कारणकारणे कार्याप्ययो न्याय्यः॥ स्मृतावप्युत्पत्तिक्रमविपर्ययेणैवाप्ययक्रमस्तत्र तत्र प्रदर्शितो जगत्प्रति
ष्ठा देवर्षे पृथिव्यप्सु प्रलीयते ज्योतिष्यापः प्रलीयंते ज्योतिर्वायौ प्रलीयत इत्येवमादावुत्पत्तिक्रमस्तूत्पत्तावेव श्रुतत्वान्नाप्य
ये भवितुमर्हति न चासावयोग्यत्वादप्ययेनाकांक्ष्यते नहि कार्ये ध्रियमाणे कारणस्याप्ययो युक्तः कारणाप्यये कार्यस्यावस्थाना
नुपपत्तेः कार्याप्यये तु कारणस्यावस्थानं युक्तं मृदादिष्वेवं दृष्टत्वात्॥ ॥अंतरा विज्ञानमनसी क्रमेण तल्लिंगादिति चेन्नाविशे
षात्॥१५॥ भूतानामुत्पत्तिप्रलयावनुलोमप्रतिलोमक्रमाभ्यां भवत इत्युक्तं॥ आत्मादिरुत्पत्तिः प्रलयश्चात्मांत इत्युप्युक्तं सें ३४
द्रियस्य तु मनसो बुद्धेश्च सद्भावः प्रसिद्धः श्रुतिस्मृत्योः॥ बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च इंद्रियाणि हयानाहुरि॥ त्यादिलिंगे
भ्यः॥ तयोरपि कस्मिंश्चिदंतराले क्रमेणोत्पत्तिप्रलयावुपसंग्राह्यौ सर्वस्य वस्तुजातस्य ब्रह्मजत्वाभ्युपगमात्॥ अपि चाथर्वणे उ
त्पत्तिप्रकरणे भूतानामात्मनश्चांतराले करणान्यनुक्रम्यंते॥ एतस्माज्जायते प्राणो मनः सर्वेंद्रियाणि च खं वायुर्ज्योतिरापः पृथिवी

183/1913

विश्वस्य धारिणीति तस्मात्पूर्वोक्तोत्पत्तिप्रलयक्रमभंगप्रसंगो भूतानामिति चेन्नाविशेषाद्यदि तावद्भौतिकानि करणानि ततो भूतोत्प
त्तिप्रलयाभ्यामेवैषामुत्पत्तिप्रलयौ भवत इति नैतयोः क्रमांतरं मृग्यं भवति भौतिकत्वलिंगं करणानामन्नमयं हि सोम्य मनः आपो
मयः प्राणस्तेजोमयी वागित्येवंजातीयकं॥ व्यपदेशोऽपि क्वचिद्भूतानां करणानां च ब्राह्मणपरिव्राजकन्यायेन नेतव्यः॥ अथ त्वभौ
तिकानि करणानि तथापि न भूतोत्पत्तिक्रमः करणैर्विशिष्यते प्रथमं करणान्युत्पद्यंते चरमं भूतानि उत्पद्यंते चरमं वा करणानीति॥
आथर्वणे तु समाम्नायक्रममात्रं करणानां भूतानां च न तत्रोत्पत्तिक्रम उच्यते॥ तथान्यत्रापि पृथगेव भूतक्रमात्करणक्रम आम्नायते प्र
जापतिर्वा इदमग्र आसीत्स आत्मानमैक्षत स मनोऽसृजत तन्मन एवासीत्तदात्मानमैक्षत तद्वाचमसृजतेत्यादिना तस्मान्नास्ति भूतो
त्पत्तिक्रमस्य भंगः॥ ॥चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्तद्भावभावित्वात्॥१६॥ स्तो जीवस्याप्युत्पत्तिप्रलयौ जातो देव
दत्तो मृतो देवदत्त इत्येवंजातीयकाल्लौकिकाद्व्यपदेशाज्जातकर्मादिसंस्कारविधानाच्चेति स्यात्कस्यचिद्भ्रांतिस्तामपनुदामः॥ न जीवस्यो
त्पत्तिप्रलयौ स्तः शास्त्रफलसंबंधोपपत्तेः शरीरानुविनाशिनि हि जीवे शरीरांतरगतेष्टानिष्टफलप्राप्तिपरिहारार्थौ विधिप्रतिषेधा
वनर्थकौ स्यातां श्रूयते च जीवापेतं वाव किलेदं म्रियते न जीवो म्रियत इति ननु लौकिको जन्ममरणव्यपदेशो जीवस्य दर्शितः स
त्यं दर्शितः॥ भाक्तस्त्वेष जीवस्य जन्ममरणव्यपदेशः किमाश्रयः पुनरयं मुख्यो यदपेक्षया भाक्त इत्युच्यते चराचरव्यपाश्रयः स्थाव
रजंगमशरीरविषयौ जन्ममरणशब्दौ स्थावरजंगमानि हि भूतानि जायंते म्रियंते च॥ अतस्तद्विषयौ जन्ममरणशब्दौ मुख्यौ संतौ त
त्स्थे जीवात्मन्युपचर्येते तद्भावभावित्वात् शरीरप्रादुर्भावतिरोभावयोर्हि सतोर्जन्ममरणशब्दौ भवतो नासतोः न हि शरीरसंबंधादन्यत्र
जीवो जातो मृतो वा केनचिदुपलक्ष्यते स वा अयं पुरुषो जायमानः शरीरमभिसंपद्यमानः स उत्क्रामन्म्रियमाण इति शरीरसंयोग
वियोगनिमित्तावेव जन्ममरणशब्दौ दर्शयति जातकर्मविधानमपि देहप्रादुर्भावापेक्षमेव द्रष्टव्यमभावाज्जीवप्रादुर्भावस्य जीव
वस्य परस्मादात्मन उत्पत्तिर्वियदादीनामिवास्ति नास्ति वेत्येतदुत्तरेण सूत्रेण वक्ष्यति देहाश्रयौ तावज्जीवस्य स्थूलावुत्पत्तिप्रल
यौ न स्त इत्येतदनेन सूत्रेणावोचत्॥ ॥नात्माऽश्रुतेर्नित्यत्वाच्च ताभ्यः॥१७॥ अस्त्यात्मा जीवाख्यः शरीरेंद्रियपंजराध्यक्षः कर्मफ
लसंबंधी स किं व्योमादिवदुत्पद्यते ब्रह्मण आहोस्विद्ब्रह्मवदेव नोत्पद्यत इति श्रुतिविप्रतिपत्तेर्विशयः॥ कासुचिच्छ्रुतिष्वग्निविस्फु

लिंगादिनिदर्शनेन जीवात्मनः परस्मान्ब्रह्मण उत्पत्तिराम्नायते कासुचिन्नु विकृतस्यैव परस्य ब्रह्मणः कार्यप्रवेशेन जीवभावो विज्ञायते तेन वो
त्पत्तिराम्नायत इति तत्र प्राप्तं तावदुत्पद्यते जीव इति कुतः। प्रतिज्ञानुपरोधादेवमेकस्मिन्विदिते सर्वं विदितमिति यप्रतिज्ञा सर्ववस्तुजा
तस्य ब्रह्मप्रभवत्वे सति नोपरुध्यते तत्वांतरत्वे तु जीवस्य प्रतिज्ञेयमुपरुध्येत न चाविकृतः परमात्मैव जीव इति शक्यते विज्ञातुं लक्षणभेदा
त्। अपहतपाप्मत्वादिधर्मको हि परमात्मा तद्विपरीतो हि जीवो विभागाच्चास्य विकारत्वसिद्धिर्यावान्हि आकाशादिः प्रविभक्तः स स
र्वो विकारस्तस्य चाकाशादेरुत्पत्तिः समधिगता जीवात्मापि पुण्यापुण्यकर्मा सुखदुःखभुक्प्रतिशरीरं प्रविभक्त इति तस्यापि प्रपंचोत्प
त्त्यवसरे उत्पत्तिर्भवितुमर्हति। अपि च यथाग्नेः क्षुद्रा विस्फुलिंगा व्युच्चरंत्येवमेवास्मादात्मनः सर्वे प्राणा इति प्राणादेर्भोग्यजातस्य
सृष्टिं शिष्ट्वा सर्व एत आत्मानो व्युच्चरंतीति भोक्तॄणामात्मनां पृथक्सृष्टिं शास्ति यथा सुदीप्तात्पावकाद्विस्फुलिंगाः सहस्रशः प्रभ
वंते सरूपास्तथाक्षराद्विविधाः सोम्य भावाः प्रजायंते तत्र चैवापियंतीति च जीवात्मनामुत्पत्तिप्रलयावुच्यते सरूपवचनात् जीवात्मा
नो हि परमात्मना सरूपा भवंति चैतन्ययोगात्। न च क्वचिदश्रवणमन्यत्र श्रवणमन्यत्र श्रुतं वारयितुमर्हति। श्रुत्यंतरगतस्याप्यविरु
द्धस्याधिकस्यार्थस्य सर्वत्रोपसंहर्तव्यत्वात् प्रवेशश्रुतिरप्येवं सति विकारभावापत्त्यैव व्याख्यातव्या तदात्मानं स्वयमकुरुतेत्यादिव
त्तस्मादुत्पद्यते जीव इत्येवं प्राप्ते ब्रूमो नात्मा जीव उत्पद्यत इति कस्मादश्रुतेर्नह्यस्योत्पत्तिप्रकरणे श्रवणमस्ति भूयःसु प्रदेशेषु ननु क्व
चिदश्रवणमन्यत्र श्रुतं न वारयतीत्युक्तं सत्यमुक्तं उत्पत्तिरेव तस्य न संभवतीति वदामः कस्मान्नित्यत्वाच्च ताभ्यः चशब्दादजत्वा
दिभ्यश्च नित्यत्वं ह्यस्य श्रुतिभ्योऽवगम्यते तथा जलस्य न संभवतीति वदामः कस्मान्नित्यत्वाच्च ताभ्यः चशब्दादजत्वादिमविकारि
त्वमविकृतस्यैव ब्रह्मणो जीवात्मनावस्थानं ब्रह्मात्मना चेति। न चैवंरूपस्योत्पत्तिरुपपद्यते ताः काः श्रुतयः न जीवो म्रियते स वा
एष महानज आत्माजरोऽमरोऽमृतोऽभयो ब्रह्म न जायते म्रियते वा विपश्चिदजो नित्यः शाश्वतोऽयं पुराणः। तत्सृष्ट्वा तदेवानुप्रा
विशदनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि स एष इह प्रविष्ट आनखाग्रेभ्यः। तत्त्वमसि अहं ब्रह्मास्मि अयमात्मा ब्र ३५
ह्म सर्वानुभूरित्येवमाद्या नित्यत्वादिवादिन्यः सत्यो जीवस्योत्पत्तिं प्रतिबध्नंति ननु प्रविभक्तत्वाद्विकारो विकारत्वाच्चोत्पद्यत इत्यु
क्तमत्रोच्यते नास्य प्रविभागः स्वतोऽस्ति एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतांतरात्मेति श्रुतेः। बुद्ध्याद्युपाधिनिमित्तं त्वस्य वि

185/1913

भागप्रतिभानं आकाशस्येव घटादिसंबंधनिमित्तं तथा च शास्त्रं स वा अयमात्मा ब्रह्म विज्ञानमयो मनोमयः प्राणमयश्चक्षुर्मयः श्रो
त्रमय इत्येवमादि ब्रह्मण एवाविकृतस्य सतोऽस्यैकस्यानेकबुद्ध्यादिमयत्वं दर्शयति। तन्मयत्वं चास्य विविक्तस्वरूपानभिव्यक्त्यात दुप
रक्तस्वरूपत्वं स्त्रीमयो जाल्म इत्यादिवद्द्रष्टव्यं यदपि क्वचिदस्योत्पत्तिप्रलयश्रवणं तदप्यत एवोपाधिसंबंधान्नेतव्यमुपाध्युत्पत्त्या व
स्योत्पत्तिः तत्प्रलये चैव प्रविलय इति। तथा च दर्शयति। प्रज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्तीति त
थोपाधिप्रविलय एवायं नात्मप्रविलय इत्येतदप्यत्रैव मा भगवान्मोहांतमापीपदन्न वा अहमिदं विजानामि न प्रेत्य संज्ञास्तीति प्रश्न
पूर्वकं प्रतिपादयति न वा अरेऽहं मोहं ब्रवीम्यविनाशी वा अरेऽयमात्मानुच्छित्तिधर्मा मात्रासंसर्गस्त्वस्य भवतीति प्रतिज्ञानुपरोधोऽप्य
विकृतस्यैव ब्रह्मणो जीवभावाभ्युपगमात् लक्षणभेदोऽप्यनयोरुपाधिनिमित्त एव अत ऊर्ध्वं विमोक्षायैव ब्रूहीति च प्रकृतस्यैव विज्ञा
नमयस्यात्मनः सर्वसंसारधर्मप्रत्याख्यानेन परमात्मभावप्रतिपादनात् तस्मान्नैवात्मोत्पद्यते प्रविलीयते चेति। ज्ञोऽत एव।१८।
स किं कारणभुजामिव आगंतुकचैतन्यः स्वतोऽचेतनः अहोस्वित्सांख्यानामिव नित्यचैतन्यस्वरूप एवेति वादिविप्रतिपत्तेः सं
शयः। किं तावत्प्राप्तमागंतुकमात्मनश्चैतन्यमात्ममनःसंयोगजमग्निघटसंयोगजरोहितादिगुणवदिति प्राप्तं नित्यचैतन्यत्वे हि सु
प्तमूर्छितग्रहाविष्टानामपि चैतन्यं स्यात् ते पृष्टाः संतो न किंचिद्वयमचेतयामहीति वजल्पंति स्वस्थाश्च चेतयमाना दृश्यंते अतः कदाचित्
चेतन्यत्वादागंतुकचैतन्य आत्मेत्येवं प्राप्ते अभिधीयते ज्ञो नित्यचैतन्योऽयमात्मा अत एव यस्मादेव नोत्पद्यते परमेव ब्रह्माविकृतमुपाधिसं
पर्काज्जीवभावेनावतिष्ठते परस्य हि ब्रह्मणश्चैतन्यस्वरूपत्वमाम्नातं विज्ञानमानंदं ब्रह्म सत्यं ज्ञानमनंतं ब्रह्म अनंतरोऽबाह्यः कृत्स्नः प्र
ज्ञानघन एवेत्यादिश्रुतिषु तदेव चेत्परं ब्रह्म जीवस्तस्माज्जीवस्यापि नित्यचैतन्यस्वरूपत्वमग्न्यौष्ण्यप्रकाशवदिति गम्यते विज्ञान
मयप्रक्रियायां श्रुतयो भवंति असुप्तः सुप्तानभिचाकशीति अत्रायं पुरुषः स्वयंज्योतिर्भवति न हि विज्ञातुर्विज्ञातेर्विपरिलोपो वि
द्यत इत्येवंरूपाः। अथ यो वेदेदं जिघ्राणीति स आत्मेति च सर्वैः करणद्वारैरिदं वेदेदं वेदेति विज्ञानेनानुसंधानात्तद्रूपत्वसिद्धिः
नित्यचैतन्यस्वरूपत्वे घ्राणाद्यानर्थक्यमिति चेन्न गंधादिविषयविशेषपरिच्छेदार्थत्वात् तथा हि दर्शयति गंधाय घ्राणमित्यादि। य
च्चु सुप्तादयो न चेतयंत इति तस्य श्रुत्यैव परिहारोऽभिहितः सुषुप्तं प्रकृत्य यद्वै तन्न पश्यति पश्यन्वै तन्न द्रष्टव्यं न पश्यति न

ब्रं०भा०२
३६

हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते ऽविनाशित्वात् न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येदित्यादिना एतदुक्तं भवति विषयाभावादि
यमचेतयमानता न चैतन्याभावादिति यथा वियदाश्रयस्य प्रकाशस्य प्रकाश्याभावादनभिव्यक्तिर्न स्वरूपाभावात् तद्वद्वैशेषिका
दितर्कः श्रुतिविरोधे आभासीभवति तस्मान्नित्यचैतन्यस्वरूप एवात्मेति निश्चिनुमः॥ ॥उत्क्रान्तिगत्यागतीनाम्॥१९॥ इदानीं तु
किंपरिमाणो जीव इति चिंत्यते किमणुपरिमाण उत मध्यमपरिमाण उताहोस्विन्महापरिमाण इति ननु चनात्मोत्पद्यते नित्यचैत
न्यश्चायमित्युक्तं॥ अतश्च पर एवात्मा जीव इत्यापतति परस्य चात्मनोऽनंतत्वमाम्नातं तत्र कुतो जीवस्य परिमाणचिंतावतार इति॥
उच्यते सत्यमेतत् उत्क्रान्तिगत्यागतिश्रवणानि तु जीवस्य परिच्छेदं प्रापयंति स्वशब्देन चास्य क्वचिदणुपरिमाणत्वमाम्नायते॥ तस्य सर्व
स्यानाकुलस्योपपादनायायमारंभः तत्र प्राप्तं तावदुत्क्रान्तिगत्यागतीनां श्रवणादणुर्जीव इति॥ उत्क्रान्तिस्तावत् स यदास्माच्छरीरादु
त्क्रामति सहैवैतैः सर्वैरुत्क्रामतीति गतिर्ये वै के चास्माल्लोकात् प्रयंति चंद्रमसमेव ते सर्वे गच्छंतीति॥ आगतिस्तस्माल्लोकात्पुनरे
त्यस्मै लोकाय कर्मण इति आसामुत्क्रान्तिगत्यागतीनां श्रवणात् परिच्छिन्नस्तावज्जीव इति प्राप्नोति नहि विभोश्चलनमवकल्प
त इति सति च परिच्छेदे शरीरपरिमाणत्वस्यार्हतपरीक्षायां निरस्तत्वादणुरात्मेति गम्यते॥ स्वात्मना चोत्तरयोः॥२०॥ उत्क्रान्तिः क
दाचिदचलतोऽपि ग्रामस्वाम्यनिवृत्तिवद्देहस्वाम्यनिवृत्त्या कर्मक्षयेणावकल्प्येत उत्तरे तु गत्यागती नाचलतः संभवतः स्वात्मना हि
तयोः संबंधो भवति गमेः कर्तृस्थक्रियत्वात् अमध्यमपरिमाणस्य च गत्यागती अणुत्व एव संभवतः सत्योश्च गत्यागत्योरुत्क्रान्तिर
प्यपसृप्तिरेवेति प्रतीयते नह्यनपसृप्तस्य देहाद्गत्यागती स्यातां देहप्रदेशानां चोत्क्रान्तावपादानत्ववचनाच्चक्षुष्टो वा मूर्ध्नो वान्येभ्यो वा शरी
रदेशेभ्य इति॥ स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामति शुक्रमादाय पुनरैति स्थानमिति चांतरेऽपि शरीरे शारीर
स्य गत्यागती भवतः॥ तस्मादप्यणुत्वसिद्धिः॥ ॥नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात्॥२१॥ अथापि स्यान्नाणुरयमात्मा क ३६
स्मात् अतच्छ्रुतेः अणुत्वविपरीतपरिमाणश्रवणादित्यर्थः॥ स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेषु आकाशवत्सर्व
गतश्च नित्यः सत्यं ज्ञानमनंतं ब्रह्मेत्येवंजातीयिका हि श्रुतिरात्मनोऽणुत्वं प्रतिषेधतीति चेन्नैष दोषः कस्मादितराधिकारात् पर
स्य ह्यात्मनः प्रक्रियायामेषा परिमाणांतरश्रुतिः परस्यैवात्मनः प्राधान्येन वेदांतेषु वेदितव्यत्वेन प्रकृतत्वात् विरजः पर आका

187/1913

श इत्येवंविधाच्च परस्यैवात्मनस्तत्र तत्र विशेषाधिकारात्॥ ननु योऽयं विज्ञानमयः प्राणेष्विति शारीर एव महत्त्वसंबंधित्वेन
प्रतिनिर्दिश्यते॥ शास्त्रदृष्ट्या त्वेष निर्देशो वामदेववद्द्रष्टव्यः तस्मात्प्राज्ञविषयत्वात् परिमाणांतरश्रवणस्य न जीवस्याणुत्वं वि
रुध्यते॥ स्वशब्दोन्मानाभ्यां च॥२२॥ इतश्चाणुरात्मा यतः साक्षादेवास्याणुत्ववादी शब्दः श्रूयते एषोऽणुरात्मा चेतसा वेदितव्यो य
स्मिन्प्राणः पंचधा संविवेशेति प्राणसंबंधाच्च जीवस्यायमणुरभिहित इति गम्यते तथोन्मानमपि जीवस्याणिमानं गमयति वालाग्र
शतभागस्य शतधा कल्पितस्य च भागो जीवः स विज्ञेय इति आराग्रमात्रो ह्यवरोऽपि दृष्ट इति चोन्मानांतरं॥ नन्वणुत्वे सत्येकदेशस्थस्य स
कलदेहगता उपलब्धिर्विरुध्यते दृश्यते च जाह्नवीह्रदनिमग्नानां सर्वांगशैत्योपलब्धिर्निदाघसमये च सकलदेहगतपरितापोपलब्धि
रिति अत उत्तरं पठति॥ ॥अविरोधश्चंदनवत्॥२३॥ यथा हि हरिचंदनबिंदुः शरीरैकदेशसंबद्धोऽपि सन् सकलदेहव्यापिनमाह्लादं क
रोति एवमात्मापि देहैकदेशस्थः सकलदेहव्यापिनीमुपलब्धिं करिष्यति। त्वक्संबंधाच्चास्य सकलशरीरगता वेदना न विरुध्यते
त्वगात्मनोर्हि संबंधः कृत्स्नायां त्वचि वर्तते त्वक् च कृत्स्नशरीरव्यापिनीति॥ ॥अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृदि हि॥२४॥
अत्राह यदुक्तमविरोधश्चंदनवदिति तदयुक्तं दृष्टांतदार्ष्टांतिकयोरतुल्यत्वात् सिद्धे ह्यात्मनो देहैकदेशस्थत्वे चंदनदृष्टांतो भवति प्रत्य
क्षं तु चंदनस्यावस्थितिवैशेष्यमेकदेशस्थत्वं सकलदेहाह्लादनं चात्मनः पुनः सकलदेहोपलब्धिमात्रं प्रत्यक्षं नैकदेशवर्तित्वमनुमे
यं तु स्यादिति यदुच्यते न चात्रानुमानं संभवति॥ किमात्मनः सकलशरीरगता वेदना त्वगिंद्रियस्येव सकलदेहव्यापिनः सतः किं वा वि
भोर्नभस इव आहोस्विच्चंदनबिंदोरिवाणोरेकदेशस्थस्येति संशयानतिवृत्तिरिति॥ अत्रोच्यते नायं दोषः कस्मादभ्युपगमादभ्युपग
म्यते ह्यात्मनोऽपि चंदनस्येव देहैकदेशवर्तित्वमवस्थितिवैशेष्यं कथमिति उच्यते हृदि ह्येष आत्मा पठ्यते वेदांतेषु हृदि ह्येष आत्मा स
वा एष आत्मा स एष आत्मा हृदि कतम आत्मेति योऽयं विज्ञानमयः प्राणेषु हृद्यंतर्ज्योतिः पुरुष इत्याद्युपदेशेभ्यः तस्माद्दृष्टांतदार्ष्टां
तिकयोरवैषम्यादुक्तमेवैतदविरोधश्चंदनवदिति॥ ॥गुणाद्वालोकवत्॥२५॥ चैतन्यगुणव्याप्तेर्वाणोरपि सतो जीवस्य
सकलदेहव्यापि कार्यं न विरुध्यते यथा लोके मणिप्रदीपप्रभृतीनामपवरकैकदेशवर्तिनामपि प्रभापवरकव्यापिनी सती कृ
त्स्नेऽपवरके कार्यं करोति तद्वत्॥ स्यात्कदाचिच्चंदनस्य सावयवत्वात् सूक्ष्मावयवविसर्पणेनापि सकलदेहे आह्लादयितृत्वं न त्वणोर्जीवस्या

ब्रं०भा०२
३०

वयवाः संति येरयं सकलं देहं विप्रसर्पेदित्याशंक्याह गुणाद्वा लोकवदित्युक्तं कथं पुनर्गुणो गुणिव्यतिरेकेणान्यत्र वर्तेत न हि पटस्य शु
क्लो गुणः पटव्यतिरेकेणान्यत्र वर्तमानो दृश्यते प्रदीपप्रभावद्भवेदिति चेन्न तस्या अपि द्रव्यत्वाभ्युपगमात् ॥ निबिडावयवं हि तेजोद्रव्यं
प्रदीपः प्रविरलावयवं तु तेजोद्रव्यमेव प्रभेति ॥ अनुत्तरं पठति ॥ ॥ व्यतिरेको गंधवत् ॥ २६ ॥ यथा गुणस्यापि सतो गंधस्य गंधवद्द्रव्य
व्यतिरेकेण वृत्तिर्भवति अप्राप्तेष्वपि कुसुमादिषु गंधवत्सु कुसुमादिगंधोपलब्धेरेवमणोरपि सतो जीवस्य चैतन्यगुणव्यतिरेको भ
विष्यति अतश्चानैकांतिकमेतद्गुणत्वाद्रूपादिवदाश्रयविश्लेषानुपपत्तिरिति गुणस्यैव सतो गंधस्याश्रयविश्लेषदर्शनात् ॥ गंध
स्यापि सहैवाश्रयेण विश्लेष इति चेत् ॥ तत्प्रसिद्धमूलद्रव्यात् विश्लेषे सत्यस्य क्षयप्रसंगात् क्षीयमाणमपि तत्पूर्वावस्थया ॥ नो गम्यते अन्य
था तत्पूर्वावस्थैर्गुरुत्वादिभिर्हीयेत स्यादेतत् गंधाश्रयाणां विश्लिष्टानामल्पत्वात्सन्नपि विश्लेषो नोपलक्ष्यते सूक्ष्मा हि गंधपरमाणवः
सर्वतो विप्रसृता गंधबुद्धिमुत्पादयंति नासिकापुटमनुप्रविशंत इति चेत् ॥ नातींद्रियत्वात्परमाणूनां स्फुटस्य गंधोपलब्धेश्च नागकेसरादि
पुनवल्लोकप्रतीतिर्गंधवद्द्रव्यमाघ्रातमिति गंध एवाघ्रात इति तु लौकिकाः प्रतियंति रूपादिष्वाश्रयव्यतिरेकानुपलब्धेर्गंधस्याप्ययु
क्त आश्रयव्यतिरेक इति चेत् ॥ न प्रत्यक्षत्वादनुमानाप्रवृत्तेस्तस्माद्यथा लोके दृष्टं तत्तथैवानुमंतव्यं निरूपकैर्नान्यथा न हि रसो गुणो
जिह्वयोपलभ्यत इत्यतो रूपादयोऽपि गुणा जिह्वयैवोपलभ्येरन्निति नियंतुं शक्यते ॥ तथा च दर्शयति ॥ २७ ॥ हृदयायतनत्वमणुप
रिमाणत्वं चात्मनो विधाय तस्यैवालोमभ्य आनखाग्रेभ्य इति चैतन्येन गुणेन समस्तशरीरव्यापित्वं दर्शयति ॥ पृथगुपदेशात् ॥ २८ ॥
प्रज्ञया शरीरं समारुह्येति चात्मप्रज्ञयोः कर्तृकरणभावेन पृथगुपदेशाच्चैतन्यगुणेनैवास्य शरीरव्यापिता गम्यते तदेषां प्राणा
नां विज्ञानेन विज्ञानमादायेति च कर्तुः शारीरात् पृथग्विज्ञानस्योपदेश एतमेवाभिप्रायमुपोद्बलयति तस्मादणुरात्मेत्येवं प्राप्ते क्र
मः ॥ तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत् ॥ २९ ॥ तुशब्दः पक्षं व्यावर्तयति नैतदस्त्यणुरात्मेति ॥ उत्पत्त्यश्रवणात् हि परस्यैव तु ब्र ३७
ह्मणः प्रवेशश्रवणात्तादात्म्योपदेशाच्च परमेव ब्रह्म जीव इत्युक्तं परमेव चेद्ब्रह्म जीवः तस्माद्यावत्परं ब्रह्म तावानेव तु जीवो भवितुम
र्हति परस्य ब्रह्मणो विभुत्वमाम्नातं तस्माद्विभुर्जीवः तथा च स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेष्विति एवंजातीय
का जीवविषया विभुत्ववादाः श्रौताः स्मार्ताश्च समर्थिता भवंति न चाणोर्जीवस्य सकलशरीरगता वेदनोपपद्यते त्वक्संबंधात्स्यादिति

189/1913

चेत् ॥ न कंटकतोदनेऽपि सकलशरीरगतैव वेदना प्रसज्येत त्वक्कंटकयोर्हि संयोगः कृत्स्नायां त्वचि वर्तते त्वक् च सकलकलेवरव्यापि
नीति पादतल एव तु कंटकनुन्नो वेदनां प्रतिलभते न चाणोर्गुणव्याप्तिरुपपद्यते गुणस्य गुणिदेशत्वात् गुणत्वमेव हि गुणिनमनाश्रि
त्य गुणस्य हीयेत प्रदीपप्रभायाश्च द्रव्यांतरत्वं व्याख्यातं गंधोऽपि गुणत्वाभ्युपगमात् साश्रय एव संचरितुमर्हति अन्यथा गुणत्वहानिप्रसं
गात् तथा चोक्तं द्वैपायनेन उपलभ्याप्सु चेद्गंधं केचि पुर्नेवपुराणाः ॥ पृथिव्यामेव तं विद्यादपो वायुं च संश्रितमिति ॥ यदि चैतन्यं जी
वस्य समस्तशरीरं व्याप्नुयान्नाणुर्जीवः स्याच्चैतन्यमेव ह्यस्य स्वरूपमग्नेरिवौष्ण्यप्रकाशौ नात्र गुणगुणिविभागो विद्यत इति ॥ शारी
रपरिमाणत्वं च प्रत्याख्यातं पारिशेष्याद्विभुर्जीवः ॥ कथं तर्ह्यणुत्वादिव्यपदेश इत्यत आह तद्गुणसारत्वात्तु तद्व्यपदेश इति तस्या बुद्धेर्गु
णास्तद्गुणा इच्छा द्वेषः सुखं दुःखमित्येवमादयस्तद्गुणाः सारः प्रधानं यस्यात्मनः संसारित्वे संभवति स तद्गुणसारस्तस्य भावस्तद्गुणसारत्वं
न हि बुद्धेर्गुणैर्विना केवलस्यात्मनः संसारित्वमस्ति बुद्ध्युपाधिधर्माध्यासनिमित्तं हि कर्तृत्वभोक्तृत्वादिलक्षणं संसारित्वमकर्तु
रभोक्तुश्चासंसारिणो नित्यमुक्तस्य सत आत्मनस्तस्मात्तद्गुणसारत्वाद्बुद्धिपरिमाणेनास्य परिमाणव्यपदेशः तदुत्क्रांत्यादिभिश्चास्य सं
सारिणो नित्यमुक्तस्य सत आत्मनस्तस्मात्तद्गुणसारत्वाद्बुद्धिपरिमाणेनास्य परिमाणव्यपदेशः तदुत्क्रांत्यादिभिश्चास्योत्क्रांत्या
दिव्यपदेशान्न स्वतंत्रः तथा च बालाग्रशतभागस्य शतधा कल्पितस्य तु भागो जीवः स विज्ञेयः स चानंत्याय कल्पत इत्यणुत्वं
जीवस्योक्त्वा तस्यैव पुनरानंत्यमाह तच्चैवमेव समंजसं स्याद्यद्यौपचारिकमणुत्वं जीवस्य भवेत् पारमार्थिकं चानंत्यं न ह्युभयं मु
ख्यमवकल्प्येत न चानंत्यमौपचारिकमणुत्वं जीवस्येति शक्यं विज्ञातुं सर्वोपनिषत्सु ब्रह्मात्मभावस्य प्रतिपिपादयिषितत्वात् ॥
तथेतरस्मिन्नप्युन्मानवचने बुद्धेर्गुणेनात्मगुणेन चैव आराग्रमात्रो ह्यवरोऽपि दृष्ट इति च बुद्धिगुणसंबंधेनैवाराग्रमात्रतां शास्ति न
स्वेनैवात्मना ॥ एषोऽणुरात्मा चेतसा वेदितव्य इत्यत्रापि जीवस्याणुपरिमाणत्वं शिष्यते परस्यैवात्मनः चक्षुराद्यनवगाह्यत्वं
न ज्ञानप्रसादगम्यत्वं च प्रकृतत्वात् जीवस्यापि च मुख्याणुपरिमाणत्वानुपपत्तेस्तस्माद्दुर्ज्ञानत्वाभिप्रायमिदमणुत्वव
चनं उपाध्यभिप्रायं वा द्रष्टव्यं ॥ तथा प्रज्ञया शरीरं समारुह्येत्येवंजातीयकेऽपि भेदोपदेशे बुद्ध्यैवोपाधिभूतया जीवः श
रीरं समारुह्येत्येवं योजयितव्यं व्यपदेशमात्रं वा शिलापुत्रकस्य शरीरमित्यादिवत् न ह्यत्र गुणगुणिभावो विद्यत इत्युक्तं हृद

शां०भा०२
३८

पायतनत्ववचनमपि बुद्धेरेव तदायतनत्वात्॥ तथोत्क्रांत्यादीनामप्युपाध्यायत्ततां दर्शयति कस्मिन्न्वहमुत्क्रांत उत्क्रांतो भविष्या
मि कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामीति स प्राणमसृजतेत्युत्क्रांत्यभावे हि गत्यागत्योरप्यभावो विज्ञायते न ह्यनपसृप्तस्य देहाद्गत्याग
ती स्यातामेवमुपाधिगुणसारत्वाज्जीवस्याणुत्वादिव्यपदेशः प्राज्ञवत् यथा प्राज्ञस्य परमात्मनः सगुणेषूपासनेषूपाधिगुणसारत्वा
दणीयस्त्वादिव्यपदेशोऽणीयान्व्रीहेर्वा यवाद्वा मनोमयः प्राणशरीरः सर्वगंधः सर्वरसः सत्यकामः सत्यसंकल्प इत्येवंप्रकारस्तद्वत्
स्यादेतत् यदि बुद्धिगुणसारत्वादात्मनः संसारित्वं कल्प्येत ततो बुद्ध्यात्मनोर्भिन्नयोः संयोगावसानमवश्यंभावीत्यतो बुद्धिवियोगे स
त्यात्मनो विभक्तस्यानालक्ष्यत्वादसत्त्वमसंसारित्वं वा प्रसज्येतेति अत उत्तरं पठति॥३०॥ यावदात्मभावित्वाच्च न दोषस्तद्दर्शना
त्॥३०॥ येन मनंतरनिर्दिष्ट दोषप्राप्तिराशंकनीया कस्माद्यावदात्मभावित्वाद्बुद्धिसंयोगस्य यावदयमात्मा संसारी भवति यावदस्य
सम्यग्दर्शनेन संसारित्वं न निवर्तते तावदस्य बुद्ध्या संयोगो न शाम्यति यावदेव चायं बुद्ध्युपाधिसंबंधस्तावदेवास्य जीवत्वं संसारित्वं
च॥ परमार्थतस्तु न जीवो नाम बुद्ध्युपाधिपरिकल्पितस्वरूपव्यतिरेकेणास्ति न हि नित्यमुक्तस्वरूपात्सर्वज्ञादीश्वरादन्यश्चेतनो धातु
र्द्वितीयो वेदांतार्थनिरूपणायामुपलभ्यते नान्योऽतोऽस्ति द्रष्टा श्रोता मंता विज्ञाता नान्यदतोऽस्ति द्रष्टृ श्रोतृ मंतृ विज्ञातृ तत्त्वमसि अहं ब्रह्मा
स्मीत्यादिश्रुतिशतेभ्यः॥ कथं पुनरवगम्यते यावदात्मभावी बुद्धिसंयोग इति तद्दर्शनादित्याह तथा हि शास्त्रं दर्शयति योऽयं विज्ञानमयः
प्राणेषु हृद्यंतर्ज्योतिः पुरुषः स समानः सन्नुभौ लोकावनुसंचरति ध्यायतीव लेलायतीवेत्यादि॥ तत्र विज्ञानमय इति बुद्धिमय इत्येत
दुक्तं भवति प्रदेशांतरे विज्ञानमयो मनोमयः प्राणमयश्चक्षुर्मयः श्रोत्रमय इति। तत्र विज्ञानमय इति बुद्धिमय इत्येतदुक्तं भवति प्रदेशां
तरे विज्ञानमयो मनोमयः प्राणमयश्चक्षुर्मयः श्रोत्रमय इति विज्ञानस्य मनआदिभिः सह पाठात् बुद्धिमयत्वं च तद्गुणसारत्वमेवा
भिप्रेयते यथा लोके स्त्रीमयो देवदत्त इति स्त्रीरागादिप्रधानोऽभिधीयते तद्वत् स समानः सन्नुभौ लोकावनुसंचरतीति च लोकांत ३८
रगमनेऽप्यवियोगं बुद्ध्या दर्शयति॥ केन समानस्तयैव बुद्ध्येति गम्यते संनिधानात् तद्दर्शयति ध्यायतीव लेलायतीवेति एतदुक्तं
भवति नायं स्वतो ध्यायति नापि चलति ध्यायंत्यां बुद्धौ ध्यायतीव चलंत्यां बुद्धौ चलतीवेति॥ अपि च मिथ्याज्ञानपुरःसरोऽयमात्मनो
बुद्ध्युपाधिसंबंधो न च मिथ्याज्ञानस्य सम्यग्ज्ञानादन्यत्र निवृत्तिरस्तीत्यतो यावदब्रह्मात्मतानवबोधस्तावदयं बुद्ध्युपाधिसंबंधो

191/1913

न शाम्यति दर्शयति च वेदाहमेतं पुरुषं महांतं। आदित्यवर्णं तमसः परस्तात्तमेव विदित्वातिमृत्युमेति नान्यः पंथा विद्यतेऽयना
येति॥ ननु सुषुप्तिप्रलययोर्न शक्यते बुद्धिसंबंध आत्मनोऽभ्युपगंतुं सता सोम्य तदा संपन्नो भवति स्वमपीतो भवतीति वचनात्कृत्स्न
विकारप्रलयाभ्युपगमाच्च तत्कथं यावदात्मभावित्वं बुद्धिसंबंधस्येति। अत्रोच्यते॥ पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात्॥३१॥ यथा
लोके पुंस्त्वादीनि बीजात्मनाविद्यमानान्येव बाल्यादिष्वनुपलभ्यमानान्यविद्यमानवदभिप्रेयमाणानि यौवनादिष्वाविर्भवंति
नाविद्यमानान्युत्पद्यंते षंढादीनामपि तदुत्पत्तिप्रसंगात् एवमयमपि बुद्धिसंबंधः शक्त्यात्मना विद्यमान एव सुषुप्तप्रलययोः पुनः प्र
बोधप्रसवयोराविर्भवति। एवं ह्येतद्युज्यते नह्याकस्मिकी कस्यचिदुत्पत्तिः संभवति अतिप्रसंगात्॥ दर्शयति च सुषुप्तादुत्थानमविद्या
त्मकबीजसद्भावकारितं सति संपद्य न विदुः सति संपद्यामह इति। त इह व्याघ्रो वा सिंहो वेत्यादिना तस्मात्सिद्धमेतद्यावदात्मभावी बुद्ध्यु
पाधिसंबंध इति॥ ॥नित्योपलब्ध्यनुपलब्धिप्रसंगोऽन्यतरनियमो वाऽन्यथा॥३२॥ तच्चात्मन उपाधिभूतमंतःकरणं मनो बुद्धिर्विज्ञानं
चित्तमिति चानेकधा तत्राभिलप्यते क्वचिच्च वृत्तिविभागेन संशयादिवृत्तिकं मन इत्युच्यते निश्चयादिवृत्तिकं बुद्धिरिति तच्चैवंभूतमंत
ःकरणमवश्यं अस्तीत्यभ्युपगंतव्यं॥ अन्यथा ह्यनभ्युपगम्यमाने तस्मिन्नित्योपलब्ध्यनुपलब्धिप्रसंगः स्यात् आत्मेंद्रियविषयाणा
मुपलब्धिसाधनानां सन्निधाने सति नित्यमेवोपलब्धिः प्रसज्येताथ सत्यपि हेतुसंबंधाने फलाभावस्ततो नित्यमेवानुपलब्धिः प्र
सज्येत न चैवं दृश्यते। अथवान्यतरस्यात्मन इंद्रियस्य वा शक्तिप्रतिबंधोऽभ्युपगंतव्यो न चात्मनः शक्तिप्रतिबंधः संभवति अवि
क्रियत्वात्॥ नापींद्रियस्य नहि तस्य पूर्वोत्तरयोः क्षणयोरप्रतिबद्धशक्तिकस्य सतोऽकस्माच्छक्तिः प्रतिबध्येत तस्माद्यस्यावधा
नानवधानाभ्यामुपलब्ध्यनुपलब्धी भवतस्तन्मनः॥ तथा च श्रुतिः अन्यत्रमना अभूवं नादर्शमन्यत्रमना अभूवं नाश्रौष
मिति मनसा ह्येव पश्यति मनसा शृणोतीति च कामादयश्चास्य वृत्तय इति दर्शयति कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिर
धृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एवेति तस्मादुक्तमेतत्तद्गुणसारत्वात्तद्व्यपदेश इति॥ ॥कर्ता शास्त्रार्थवत्त्वात्॥३३॥ त
द्गुणसारत्वाधिकारेणैवापरोऽपि जीवधर्मः प्रपंच्यते कर्ता चायं जीवः स्यात् कस्मात् शास्त्रार्थवत्त्वात्॥ एवं च यजेत जुहुयात् दद्यादित्येवं
विधं विधिशास्त्रमर्थवद्भवति अन्यथा तदनर्थकं स्यात् तद्धि कर्तुः सतः कर्तव्यविशेषमुपदिशति न वासति कर्तृत्वे तदुपपद्येत तथेदम

मप्यात्मन्यर्थवद्भवति एष हि द्रष्टा श्रोता मंता बोद्धा कर्ता विज्ञानात्मा पुरुषः इति ॥ विहारोपदेशात् ॥ ३४ ॥ इतश्च जीवस्य कर्तृत्वं यज्जीवप्र
क्रियायां संबध्यमाने विहारमुपदिशति स ईयतेऽमृतो यत्र कामम् इति स्वे शरीरे यथाकामं परिवर्तत इति च ॥ ॥ उपादानात् ॥ ३५ ॥ इत
श्चास्य कर्तृत्वं यज्जीवप्रक्रियायामेव करणानामुपादानं संकीर्तयति तदेषां प्राणानां विज्ञानेन विज्ञानमादाय इति प्राणान्गृहीत्वा इति च ॥
व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः ॥ ३६ ॥ इतश्च जीवस्य कर्तृत्वं यदस्य लौकिकीषु वैदिकीषु च क्रियासु कर्तृत्वं व्यपदिशति वि
ज्ञानं यज्ञं तनुते कर्माणि तनुतेऽपि च इति ननु विज्ञानशब्दो बुद्धौ समधिगतः कथमनेन जीवस्य कर्तृत्वं सूच्यत इति । नेत्युच्यते । जीवस्यैवैष नि
र्देशो न बुद्धेः न चेज्जीवस्य स्यान्निर्देशविपर्ययः स्याद्विज्ञानेनेत्येवं निरदेक्ष्यत ॥ तथा ह्यन्यत्र बुद्धिविवक्षायां विज्ञानशब्दस्य करणवि
भक्तिनिर्देशो दृश्यते तदेषां प्राणानां विज्ञानेन विज्ञानमादाय इति इह तु विज्ञानं यज्ञं तनुत इति कर्तृसामानाधिकरण्यनिर्देशाद्बुद्धिव्य
तिरिक्तस्यैवात्मनः कर्तृत्वं सूच्यत इत्यदोषः ॥ अत्राह यदि बुद्धिव्यतिरिक्तो जीवः कर्ता स्यात् स स्वतंत्रः सन् प्रियं हितं चैवात्मनो नियमेन सं
पादयेद्विपरीतमपि तु संपद्यमानमुपलभ्यते न च स्वतंत्रस्यात्मन ईदृशी प्रवृत्तिरनियमेनोपपद्यते इत्यत उत्तरं पठति ॥ ॥ उपलब्धिवद
नियमः ॥ ३७ ॥ यथायमात्मोपलब्धिं प्रति स्वतंत्रोऽप्यनियमेनेष्टमनिष्टं चोपलभते एवमनियमेनैवेष्टमनिष्टं च संपादयिष्यति उपल
ब्धावप्यस्वातंत्र्यमुपलब्धिहेतूपादानोपलंभादिति चेत् ॥ न विषयप्रकल्पनमात्रप्रयोजनत्वादुपलब्धिहेतूनां उपलब्धौ तु नान्यापेक्ष
त्वमात्मनश्चैतन्ययोगात् ॥ अपि चार्थक्रियायामपि नात्यंतमात्मनः स्वातंत्र्यमस्ति देशकालनिमित्तविशेषापेक्षत्वात् ॥ न च सहा
यापेक्षस्य कर्तुः कर्तृत्वं निवर्तते भवंति ह्येधोदकाद्यपेक्षत्वात् ॥ न च सहायापेक्षस्य कर्तुः कर्तृत्वं निवर्तते भवंति ह्येधोदकाद्यपेक्षस्या
पि पक्तुः पक्तृत्वं सहकारिवैचित्र्याच्चेष्टानिष्टार्थक्रियायामनियमेन प्रवृत्तिरात्मनो न विरुध्यते ॥ ॥ शक्तिविपर्ययात् ॥ ३८ ॥ इतश्च
विज्ञानव्यतिरिक्तो जीवः कर्ता भवितुमर्हति यदि पुनर्विज्ञानशब्दवाच्या बुद्धिरेव कर्त्री स्यात्ततः शक्तिविपर्ययः स्यात् करणशक्तिर्बुद्धे ३९
र्हीयेत कर्तृशक्तिश्चापद्येत सत्यां च बुद्धेः कर्तृशक्तौ तस्या एवाहंप्रत्ययविषयत्वमभ्युपगंतव्यं अहंकारपूर्विकाया एव प्रवृत्तेः सर्वत्र दर्श
नात् अहं गच्छाम्यहं भुंजेऽहं पिबामीति तस्याश्च कर्तृशक्तियुक्तायाः सर्वार्थकारि करणमन्यत् कल्पयितव्यं शक्तोऽपि हि सन् कर्ता कर
णमुपादाय क्रियासु प्रवर्तमानो दृश्यते ततश्च संज्ञामात्रे विसंवादः स्यान्न वस्तुभेदः कश्चित् ॥ करणव्यतिरिक्तस्य कर्तृत्वाभ्युपगमात् ॥ स

193/1913

माध्यभावाच्च ॥ ३९ ॥ योऽप्ययमौपनिषदात्मप्रतिपत्तिप्रयोजनः समाधिरुपदिष्टो वेदांतेषु आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्या
सितव्यः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः ओं इत्येवं ध्यायथ आत्मानम् इत्येवंलक्षणः सोऽप्यसत्यात्मनः कर्तृत्वे नोपपद्येत तस्मादप्यस्य क
र्तृत्वसिद्धिः ॥ ॥ यथा च तक्षोभयथा ॥ ४० ॥ एवं तावच्छास्त्रार्थवत्त्वादिभिर्हेतुभिः कर्तृत्वं शारीरस्य प्रदर्शितं तत्पुनः स्वाभाविकं वा स्यादुपा
धिनिमित्तं वेति चिंत्यते ॥ तत्रैतैरेव शास्त्रार्थवत्त्वादिभिर्हेतुभिः स्वाभाविकं कर्तृत्वं अपवादहेत्वभावादित्येवं प्राप्ते ब्रूमः न स्वाभाविकं कर्तृ
त्वमात्मनः संभवति अनिर्मोक्षप्रसंगात् कर्तृत्वस्वभावत्वे ह्यात्मनो न कर्तृत्वान्निर्मोक्षः संभवत्यग्नेरिवौष्ण्यात् न च कर्तृत्वादनिर्मुक्तस्या
स्ति पुरुषार्थसिद्धिः कर्तृत्वस्य दुःखरूपत्वात् ॥ ननु स्थितायामपि कर्तृत्वशक्तौ कर्तृत्वकार्यपरिहारात् पुरुषार्थः सेत्स्यति । तत्परिहार
श्च निमित्तपरिहारात् यथाग्नेर्दहनशक्तियुक्तस्यापि काष्ठवियोगाद्दहनकार्याभावस्तद्वत् न निमित्तानामपि शक्तिलक्षणेन संबं
धेन संबद्धानामत्यंतपरिहारासंभवात् ॥ ननु मोक्षसाधनात् मोक्षः सेत्स्यति न साधनायत्तस्यानित्यत्वात् । अपि च नित्यशुद्धबुद्धमुक्ता
त्मप्रतिपादनात् मोक्षसिद्धिरभिहिता तादृगात्मप्रतिपादनं च न स्वाभाविके कर्तृत्वेऽवकल्पेत तस्मादुपाधिधर्माध्यासेनैवात्मनः कर्तृत्वं
न स्वाभाविकं तथा च श्रुतिः ध्यायतीव लेलायतीव इति आत्मेंद्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः इति चोपाधियुक्तस्यैवात्मनो भोक्तृ
त्वादिविशेषलाभं दर्शयति नहि विवेकिनां परस्मादन्यो जीवो नाम कर्ता भोक्ता वा विद्यते नान्योऽतोऽस्ति द्रष्टा इत्यादिश्रवणात् ॥ प
र एव तर्हि संसारी कर्ता भोक्ता च प्रसज्येत परस्मादन्यश्चेच्चितिमान् बुद्ध्यादिसंघातव्यतिरिक्तो न स्यात् ॥ नाविद्याप्रत्युपस्थापित
त्वात् कर्तृत्वभोक्तृत्वयोः ॥ तथा च शास्त्रं यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति इत्यविद्यावस्थायां कर्तृत्वभोक्तृत्वे दर्शयित्वा विद्याव
स्थायां तदेव कर्तृत्वभोक्तृत्वे निवारयति यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत् इति ॥ तथा स्वप्नजागरितयोरात्मन उपाधि
संपर्ककृतं श्रमं श्येनस्येवाकाशे विपरिपतनतः श्रावयित्वा तदभावं सुषुप्तौ प्राज्ञेनात्मना संपरिष्वक्तस्य श्रावयति तद्वा अस्यैतदात्मका
ममाप्तकाममकामं रूपमशोकांतरम् इत्यारभ्य एषास्य परम आनंद इत्युपसंहारात् तदेतदाहाचार्यो यथा च तक्षोभयथेत्यर्थे ॥ वायं च नैवं
मंतव्यं स्वाभाविकमेवात्मनः कर्तृत्वमग्नेरिवौष्ण्यमिति यथा तु लोके तक्षा वास्यादिकरणहस्तः कर्ता दुःखी भवति स एव स्वगृहं प्राप्तो
विमुक्तवास्यादिकरणः स्वस्थो निर्व्यापारः सुखी भवति एवमविद्याप्रत्युपस्थापितद्वैतसंपृक्त आत्मा स्वप्नजागरितावस्थयोः कर्ता

शां०भा०२ दुःखीभवतिसतच्छ्रमापनुत्तयेस्वमात्मानंपरंब्रह्मप्रविश्यविमुक्तकार्यकरणसंघातोऽकर्तासुखीभवतिसंप्रसादावस्थायांतथाच
॥४०॥ मुक्त्यावस्थायामप्यविद्याध्वांतंविद्याप्रदीपेनविधूयात्मैवकेवलोनिर्वृतःसुखीभवतितक्षदृष्टांतश्चैतावतांशेनद्रष्टव्यःतक्षाहि
विशिष्टेषुतक्षणादिषुव्यापारेष्वपेक्ष्यैवप्रतिनियतानिकरणानिवास्यादीनिकर्ताभवतिस्वशरीरेणत्वकर्तैवएवमयमात्मासर्वव्या
पारेष्वपेक्ष्यैवमनआदीनिकरणानिकर्ताभवतिस्वात्मनात्वकर्तैवेतिनत्वात्मनस्तक्ष्णइवावयवाःसंतियैर्हस्तादिभिरिववास्यादि
नितक्षामनआदीनिकरणान्यात्मोपाददीतन्यस्येद्वायत्तूक्तंशास्त्रार्थवत्त्वादिभिर्हेतुभिःस्वाभाविकमात्मनःकर्तृत्वमितितत्रविधि
शास्त्रंतावद्यथाप्राप्तंकर्तृत्वमुपादायकर्तव्यविशेषमुपदिशतिनकर्तृत्वमात्मनःप्रतिपादयतिनचस्वाभाविकंकर्तृत्वमस्यास्तिब्र
ह्मात्मत्वोपदेशादित्यवोचामतस्मादविद्याकृतंकर्तृत्वमुपादायविधिशास्त्रंप्रवर्तिष्यतेकर्ताविज्ञानात्मापुरुषइत्येवंजातीयक
मपिशास्त्रमनुवादरूपत्वाद्यथाप्राप्तमेवाविद्याकृतंकर्तृत्वमनुवदिष्यतिएतेनविहारोपादानेपरिहृतेतयोरप्यनुवादरूप
त्वात्॥ननुसंध्येस्थानेप्रसुप्तेषुकरणेषुस्वेशरीरेयथाकामंपरिवर्ततइतिविहारउपदिश्यमानःकेवलस्यात्मनःकर्तृत्वमाव
हतितथोपादानेपितदेषांप्राणानांविज्ञानेनविज्ञानमादायेतिकरणेषुकर्मकरणविभक्तिश्रूयमाणेकेवलस्यैवात्मनःकर्तृत्वंग
मयतिइतिअत्रोच्यतेनतावत्संध्येस्थानेऽत्यंतमात्मनःकरणविरमणमस्तिसधीःस्वप्नोभूत्वेमंलोकमतिक्रामतीति॥तत्रापि
धीसंबंधश्रवणात्तथाचस्मरंतिइंद्रियाणामुपरमेमनोनविरतंयदिसेवतेविषयानेवतद्विद्यात्स्वप्नदर्शनमितिकामादयश्च
मनसोवृत्तयइतिश्रुतिःताश्चस्वप्नेदृश्यंतेतस्मात्समनाएवस्वप्नेविहरतिविहारोपिचतत्रत्योवासनामयएवनतुपारमार्थिकोस्ति
तथाचश्रुतिरिवकारानुबद्धमेवस्वप्नंव्यावर्णयतिउतेवस्त्रीभिःसहमोदमानोजक्षदुतेवापिभयानिपश्यन्निति॥लौकिका
अपितथैवस्वप्नंकथयंतिआरुक्षमिवगिरिशृंगंअद्राक्षमिववनराजिमिति॥तथोपादानेपियद्यपिकरणेषुकर्मकरणवि ४०
भक्तिनिर्देशस्तथापितत्संपृक्तस्यैवात्मनःकर्तृत्वंद्रष्टव्यंकेवलेकर्तृत्वासंभवस्यदर्शितत्वात्॥भवतिचलोकेनेकप्रकाराविवक्षा
योधायुध्यंतेयोधैराजायुध्यतइतिअपिचास्मिन्नुपादानेकरणव्यापारोपरममात्रंविवक्ष्यतेनस्वातंत्र्यंकस्यचित्अबुद्धि
पूर्वकस्यापिस्वापेउपरमस्यदृष्टत्वात्॥यस्त्वयंव्यपदेशोदर्शितोविज्ञानंयज्ञंतनुतइतिसबुद्धेरेवकर्तृत्वंप्रापयति

193/1913

विज्ञानशब्दस्यतत्रप्रसिद्धत्वान्मनोऽनंतरंपाठाच्चतस्यश्रद्धैवशिरइतिचविज्ञानमयस्यात्मनःश्रद्धाद्यवयवत्वसंकीर्तनात्श्रद्धादीनां
चबुद्धिधर्मत्वप्रसिद्धेः॥विज्ञानंदेवाःसर्वेब्रह्मज्येष्ठमुपासतइतिचवाक्यशेषात्ज्येष्ठत्वस्यचप्रथमजत्वस्यबुद्धौप्रसिद्धत्वात्स
एषवाचश्चित्तस्योत्तरोत्तरक्रमोयद्यज्ञइतिचश्रुत्यंतरेयज्ञस्यवाग्बुद्धिसाध्यत्वावधारणात्नचबुद्धेःशक्तिविपर्ययःकरणानांकर्तृत्वाभ्यु
पगमेभवतिसर्वकारकाणामेवस्वस्वव्यापारेकर्तृत्वस्यावश्यंभावित्वात्उपलब्ध्यपेक्षंत्वेषांकरणत्वंसाचात्मनोनचतस्यामप्यस्यकर्तृ
त्वमस्तिनित्योपलब्धिस्वरूपत्वात्अहंकारपूर्वकमपिकर्तृत्वंनोपलब्धुर्भवितुमर्हतिअहंकारस्याप्युपलभ्यत्वात्नचैवंसतिकरणांत
रकल्पनाप्रसंगोबुद्धेःकरणत्वाभ्युपगमाध्यभावस्तुशास्त्रार्थवत्त्वेनपरिहृतोयथाप्राप्तमेवकर्तृत्वमुपादायसमानाधिविधाना
त्तस्मात्कर्तृत्वमप्यात्मनउपाधिसंबंधनिबंधनमेवेतिस्थितं॥परात्तुतच्छ्रुतेः॥४१॥यदिदमविद्यावस्थायामुपाधिनिबंधनंकर्तृत्वंजी
वस्याभिहितंतत्किमनपेक्ष्येश्वरंभवत्याहोस्विदीश्वरापेक्षमितिभवतिविचारणातत्रप्राप्तंतावन्नेश्वरमपेक्षतेजीवःकर्तृत्वइतिकस्मादपे
क्षाप्रयोजनाभावात्अयंहिजीवःस्वयमेवरागद्वेषादिदोषयुक्तःकारकांतरसामग्रीसंपन्नःकर्तृत्वमनुभवितुंशक्नोतितस्यकिमीश्वरः
करिष्यतिनचलोकेप्रसिद्धिरस्तिकृष्यादिकासुक्रियास्वनडुहादिवदीश्वरोपेक्षितव्यइतिक्लेशात्मकेनचकर्तृत्वेनजंतून्संसृजतईश्वरस्य
नैर्घृण्यंप्रसज्येतविषमफलंचैषांकर्तृत्वंविदधतोवैषम्यं॥ननुवैषम्यनैर्घृण्येनसापेक्षत्वादित्युक्तंसत्यमुक्तंसतित्वीश्वरस्यसापेक्ष
त्वसंभवेसापेक्षत्वंचेश्वरस्यसंभवतिसतोर्जंतूनांधर्माधर्मयोःतयोश्चसद्भावःसतिजीवस्यकर्तृत्वेतदेवचकर्तृत्वमीश्वरापेक्षंस्यात्किं
विषयमीश्वरस्यापेक्षत्वमुच्यते॥अकृताभ्यागमश्चैवंजीवस्यप्रसज्येततस्मात्स्वतएवास्यकर्तृत्वमित्येतांप्राप्तितुशब्देनव्यावर्त्यप्रतिजा
नीतेपरादितिअविद्यावस्थायांकार्यकरणसंघाताविवेकदर्शिनोजीवस्याविद्यातिमिरांधस्यसतःपरस्मादात्मनःकर्माध्यक्षा
त्सर्वभूताधिवासात्साक्षिणश्चेतयितुरीश्वरात्तदनुज्ञयाकर्तृत्वभोक्तृत्वलक्षणस्यसंसारस्यसिद्धिःतदनुग्रहहेतुकेनचविज्ञा
नेनमोक्षस्यसिद्धिर्भवितुमर्हतिकुतस्तच्छ्रुतेःयद्यपिदोषप्रयुक्तःसामग्रीसंपन्नश्चजीवःयद्यपिचलोकेकृष्यादिषुकर्मसुनेश्व
रकारणत्वंप्रसिद्धंतथापिसर्वास्वेवप्रवृत्तिष्वीश्वरोहेतुकर्तेतिश्रुतेरवसीयते॥तथाहिश्रुतिर्भवतिएषह्येवसाधुकर्मकारयति
तंयमेभ्योलोकेभ्यउन्निनीषतेएषउएवासाधुकर्मकारयतितंयमधोनिनीषतइतियआत्मनितिष्ठन्नात्मानमंतरोयमयतीतिचैवंजाती

श्रीभा० २
॥ ४३ ॥

यिकानन्वेवमीश्वरस्य कारयितृत्वे सति वैषम्यनैर्घृण्ये स्यातामकृताभ्यागमश्च जीवस्येति तेनोच्यते॥ ॥कृतप्रयत्नापेक्षस्तु विहितप्र
तिषिद्धावैयर्थ्यादिभ्यः॥४२॥ तु शब्दश्चोदितदोषव्यावर्तनार्थः कृतोपि प्रयत्नो जीवस्य धर्माधर्मलक्षणस्तदपेक्ष एवेनमीश्वरः का
रयति अतश्चैते चोदिता दोषा न प्रसज्यन्ते जीवकृतधर्माधर्मवैषम्यापेक्षमेव तत्फलानि विषमं विभजेत्पर्जन्यवदीश्वरो निमित्तमात्रे
पाय यथा लोके नानाविधानां गुच्छगुल्मादीनां व्रीहियवादीनां चासाधारणेभ्यः स्वबीजेभ्यो जायमानानां साधारणनिमित्तं भवति पर्ज
न्यः न ह्यसति पर्जन्ये रसपुष्पफलपलाशादिवैषम्यं तेषां जायते नाप्यसत्सु स्वबीजेषु एवं जीवकृतप्रयत्नापेक्ष ईश्वरस्तेषां शुभाशुभं वि
दधादिति श्लिष्यते। ननु कृतप्रयत्नत्वमेव जीवस्य परायत्ते कर्तृत्वे नोपपद्यते नैष दोषः परायत्तेपि हि कर्तृत्वे करोत्येव जीवः कुर्वन्तं हि तमी
श्वरः कारयति अपि च पूर्वप्रयत्नमपेक्ष्येदानीं कारयति पूर्वतरं च प्रयत्नमपेक्ष्य पूर्वमकारयदित्यनादित्वात्संसारस्यानवद्यं॥ कथं पु
नरवगम्यते कृतप्रयत्नापेक्ष ईश्वर इति विहितप्रतिषिद्धावैयर्थ्यादिभ्य इत्याह॥ एवं स्वर्गकामो यजेत ब्राह्मणो न हन्तव्य इत्येवंजातीय
कस्य विहितस्य प्रतिषिद्धस्य चावैयर्थ्यं भवति अन्यथा तदनर्थकं स्यात् ईश्वर एव हि विधिप्रतिषेधयोर्नियुज्येत अत्यन्तपरतन्त्रत्वाज्जीव
स्य तथा विहितकारिणमप्यनर्थेन संसृजेत प्रतिषिद्धकारिणमप्यर्थेन ततश्च प्रामाण्यं वेदस्यास्तमियादीश्वरस्य चात्यन्तानपेक्षत्वे लौकि
कस्यापि पुरुषकारस्य वैयर्थ्यं तथा देशकालनिमित्तानां पूर्वोक्तदोषप्रसंगश्चेत्येवंजातीयकं दोषजातमादिग्रहणेन दर्शयति॥ ॥अंशो
नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके॥४३॥ जीवेश्वरयोरुपकार्योपकारकभाव उक्तः स च संबंधयोरेव दृष्टो
लोके यथा स्वामिभृत्ययोर्यथा वाग्निविस्फुलिंगयोः॥ ततश्च जीवेश्वरयोरुपकार्योपकारकभावाभ्युपगमात् किं स्वामिभृत्यवत्संबंधः
आहोस्विदग्निविस्फुलिंगवदित्यस्यां विचिकित्सायामनियमो वा प्राप्नोति अथवा स्वामिभृत्यप्रकार एवेशित्रीशितव्यभावस्य प्रसिद्ध
त्वात् स एव संबंध इति प्राप्नोति अतो ब्रवीति अंश इति जीव ईश्वरस्यांशो भवितुमर्हति यथाग्नेर्विस्फुलिंगः अंश इवांशः न हि
निरवयवस्य मुख्योंशः संभवति कस्मात्पुनर्निरवयवत्वात् स एव न भवति नानाव्यपदेशात् सोन्वेष्टव्यः स विजिज्ञासितव्यः एतमेव वि ॥४३॥
दित्वा मुनिर्भवति य आत्मनि तिष्ठन्नात्मानमन्तरो यमयतीति चैवंजातीयको भेदनिर्देशो नासति भेदे युज्यते॥ ननु चायं नानाव्यप
देशः सुतरां स्वामिभृत्यसारूप्ये युज्यत इति अत आह अन्यथा चापीति॥ न च नानाव्यपदेशादेव केवलादंशत्वप्रतिपत्तिः किं तर्हि अन्यथा

195|1913

च व्यपदेशो भवति अनानात्वस्य प्रतिपादकः तथा ह्येके शाखिनो दाशकितवादिभावं ब्रह्मण आमनन्ति आथर्वणिकाः ब्रह्मसूक्ते ब्रह्म दा
शा ब्रह्म दासा ब्रह्मेमे कितवा उत इत्यादिना दाशा य एते कैवर्ताः प्रसिद्धाः ये चामी दासाः स्वामिष्वात्मानमुपक्षपयन्ति ये चान्ये कितवा द्यूतकृतस्ते
सर्वे ब्रह्मैव इति हीनजन्तूदाहरणेन सर्वेषामेव नामरूपकृतकार्यकरणसंघातप्रविष्टानां जीवानां ब्रह्मत्वमाह॥ तथान्यत्रापि ब्रह्मप्रक्रि
यायामयमेवार्थः प्रपंच्यते। त्वं स्त्री त्वं पुमानसि त्वं कुमार उत वा कुमारी॥ त्वं जीर्णो दण्डेन वंचसि त्वं जातो भवसि विश्वतोमुख इति सर्वाणि रू
पाणि विचित्य धीरो नामानि कृत्वाभिवदन्यदास्ते इति च नान्योतोस्ति द्रष्टेत्यादिश्रुतिभ्यश्चास्यार्थस्य सिद्धेः चैतन्यं चाविशिष्टं जीवेश्वर
योर्यथाग्निविस्फुलिंगयोरौष्ण्यं अतो भेदाभेदावगमाभ्यामंशत्वावगमः कुतश्चांशत्वावगमः॥ मंत्रवर्णात्॥४४॥ मंत्रवर्णश्चैतमर्थमवगमय
ति तावानस्य महिमा ततो ज्यायांश्च पूरुषः॥ पादोस्य विश्वा भूतानि त्रिपादस्यामृतं दिवीति अत्र भूतशब्देन जीवप्रधानानि स्थावरजंगमा
नि दिशति। अहिंसन्सर्वभूतान्यन्यत्र तीर्थेभ्य इति प्रयोगात् अंशः पादो भाग इत्यनर्थान्तरं तस्मादप्यंशत्वावगमः॥ अपि च स्मर्यते॥४५॥
ईश्वरगीतास्वपीश्वरांशत्वं जीवस्य स्मर्यते ममैवांशो जीवलोके जीवभूतः सनातन इति॥ तस्मादप्यंशत्वावगमः॥ यत्तूक्तं स्वामिभृ
त्यादिष्वेवेशित्रीशितव्यभावो लोके प्रसिद्ध इति यद्यप्येषा लोके प्रसिद्धिस्तथापि शास्त्रात्त्वंशांशित्वमीशित्रीशितव्यभावश्च निश्चीय
ते निरतिशयोपाधिसंपन्नश्चेश्वरो निहीनोपाधिसंपन्नान् जीवाननुप्रशास्तीति न किंचिद्विप्रतिषिध्यते॥ अत्राह ननु जीवस्येश्वरांशत्वा
भ्युपगमे तदीयेन संसारदुःखोपभोगेनांशिन ईश्वरस्यापि दुःखित्वं स्यात् यथा लोके हस्तपादाद्यन्यतमांगगतेन दुःखेनांशिनो देवदत्त
स्य दुःखित्वं तद्वत् ततश्च तत्प्राप्तानां महत्तरं दुःखं प्राप्नुयात् अतो वरं पूर्वावस्थः संसार एवास्त्विति सम्यग्दर्शनानर्थक्यप्रसंगः स्यादि
ति अत्रोच्यते॥ ॥प्रकाशादिवन्नैवं परः॥४६॥ यथा जीवः संसारदुःखमनुभवति नैवं परः ईश्वरोनुभवतीति प्रतिजानीमहे जी
वो ह्यविद्यावेशवशाद्देहाद्यात्मभावमिव गत्वा तत्कृतेन दुःखेन दुःख्यहमित्यविद्याकृतं दुःखोपभोगमभिमन्यते नैवं परस्येश्वरस्य
देहाद्यात्मभावो दुःखाभिमानो वास्ति जीवस्याप्यविद्याकृतनामरूपनिर्वृत्तदेहेन्द्रियाद्युपाध्यविवेकधर्मनिमित्त एव दुःखाभि
मानो न तु पारमार्थिकोस्ति यथा च स्वदेहगतदाहच्छेदादिनिमित्तं दुःखं तदभिमानभ्रान्त्यानुभवति तथा पुत्रमित्रादियोगोचरमपि
दुःखं तदभिमानभ्रान्त्यैवानुभवति अहमेव पुत्रोहमेव मित्रमित्येवं स्नेहवशेन पुत्रमित्रादिष्वभिनिविशमानस्ततश्च निश्चितमे

शां०भा०२
॥ ५२ ॥

मेतदवगम्यते मिथ्याभिमानभ्रमनिमित्त एव दुःखानुभव इति व्यतिरेकदर्शयति नाच्चैवमवगम्यते ॥ तथाहि पुत्रमित्रादिसुख
दुःखेषूपविष्टेषु तत्संबंधाभिमानिष्वितरेषु च पुत्रो मृतो मित्रं मृतमित्येवमाभाषितेषु येषामेव पुत्रमित्रादिमत्त्वाभिमानस्तेषामेव तन्नि
मित्तं दुःखमुत्पद्यते नाभिमानहीनानां परिव्राजकानां अतश्च लौकिकस्यापि पुंसः सम्यग्दर्शनार्थवत्त्वं दृष्टं किमुत विषयशून्यादात्म
नोन्यद्वस्त्वंतरमपश्यतो नित्यचैतन्यमात्रस्वरूपस्येति ॥ तस्मान्नास्य सम्यग्दर्शनानर्थक्यप्रसंगः ॥ प्रकाशादिवदिति निदर्शनोपन्यासः यथा
प्रकाशः सौर्यश्चांद्रमसो वा वियद्व्याप्यवतिष्ठमानो अंगुल्याद्युपाधिसंबंधात्तेषु ऋजुवक्रादिभावं प्रतिपद्यमानेषु तत्तद्भावमिव प्रतिपद्यमा
नोपि न परमार्थतस्तद्भावं प्रतिपद्यते यथा वा आकाशो घटादिषु गच्छत्सु गच्छन्निव विभाव्यमानोपि न परमार्थतो गच्छति यथा चोदशरावा
दिकंपनात्तदनुगते सूर्यप्रतिबिंबे कंपमानोपि न तद्वान्सूर्यः कंपत एवमविद्याप्रत्युपस्थापितेन बुद्ध्याद्युपहिते जीवाख्येंशे दुःखायमा
नेपि न तद्वानीश्वरो दुःखायते जीवस्यापि दुःखप्राप्तिरविद्यानिमित्तैवेत्युक्तं तथाविद्यानिमित्तजीवभावव्युदासेन ब्रह्मभावमेव
जीवस्य प्रतिपादयंति वेदांता तत्त्वमसीत्येवमादयः ॥ तस्मान्नास्ति जैवेन दुःखेन परमात्मनो दुःखित्वप्रसंगः ॥ स्मरंति च ॥४७॥
स्मरंति च व्यासादयो यथा जैवेन दुःखेन परमात्मा दुःखायत इति ॥ तत्र यः परमात्मा हि स नित्यो निर्गुणः स्मृतः ॥ न लिप्यते फलै
श्चापि पद्मपत्रमिवांभसा ॥ कर्मात्मा त्वपरो योसौ मोक्षबंधैः संयुज्यते स सप्तदशकेनापि राशिना युज्यते पुनरिति चशब्दात्समामनंति
चेति वाक्यशेषः तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योभिचाकशीति एकस्तथा सर्वभूतांतरात्मा न लिप्यते लोकदुःखेन बाह्य इति
चात्राह यदि तर्ह्येक एव सर्वेषां भूतानां अंतरात्मा स्यात्तर्हि कथमनुज्ञापरिहारौ स्यातां लौकिकौ वैदिकौ चेति ॥ ननु चांशो जीव ईश्वर
स्येत्युक्तं तद्भेदाच्चानुज्ञापरिहारौ तदाश्रयावव्यतिकीर्णावुपपद्येते मत्र चोद्यत इति उच्यते नैतदेवम् अनंशत्वमपि हि जीवस्याभेदवादि
न्यः श्रुतयः प्रतिपादयंति तत्सृष्ट्वा तदेवानुप्राविशत् नान्योतोस्ति द्रष्टा मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति तत्त्वमसि अहं ब्र ॥ ५२ ॥
ह्मास्मीत्येवंजातीयकाः ॥ ननु भेदाभेदावगमाभ्यामंशत्वं प्रसिध्यतीत्युक्तं ॥ स्यादेतदेवं यद्युभावपि भेदाभेदौ प्रतिपादयिषितौ
स्यातां अभेद एव त्वत्र प्रतिपादयिषितो ब्रह्मात्मतत्त्वप्रतिपत्तौ पुरुषार्थसिद्धेः स्वभावप्राप्तस्तु भेदोनूद्यते न च निरवयवस्य ब्रह्मणो मु
ख्योंशो जीवः संभवतीत्युक्तं तस्मात्पर एवैकः सर्वेषां भूतानामंतरात्मा जीवभावेनावस्थित इत्यतो वक्तव्यानुज्ञापरिहारोपपत्तिः

197/1913

स्नो भ्रमः ॥ ॥अनुज्ञापरिहारौ देहसंबंधाज्ज्योतिरादिवत् ॥ ५० ॥ अतो भार्यामुपेयादित्यनुज्ञा गुर्वंगनां नोपगच्छेदिति परिहारः तथाग्नी
षोमीयं पशुं संज्ञपयेदित्यनुज्ञा न हिंस्यात्सर्वा भूतानीति परिहारः एवं लोकेपि मित्रमुपसेवितव्यमित्यनुज्ञा शत्रुः परिहर्तव्य इति परिहारः
एवंप्रकारावनुज्ञापरिहारौ एकत्वेप्यात्मनो देहसंबंधात्स्यातां देहैः संबंधो देहसंबंधः कः पुनर्देहसंबंधः ॥ देहादिरयं संघातोहमेवेत्या
त्मनि विपरीतप्रत्ययोत्पत्तिः दृष्टा च सा सर्वप्राणिनां अहं गच्छाम्यहमागच्छाम्यहमंधोहमनंधोहं मूढोहं पंडित इत्येवमात्मिका न ह्यस्याः स
म्यग्दर्शनादन्यन्निवारकमस्ति प्राक् सम्यग्दर्शनात्प्रतता एषा भ्रांतिः सर्वजंतुषु तदेवमविद्यानिमित्तदेहाद्युपाधिसंबंधकृतात् ह्योगादे
कात्म्याभ्युपगमेप्यनुज्ञापरिहाराववकल्पेते ॥ सम्यग्दर्शिनस्तर्ह्यनुज्ञापरिहारानर्थक्यं प्राप्तं ॥ न तस्य कृतार्थत्वान्नियोज्यत्वानुपपत्तेः
हेयोपादेययोर्हि नियोज्यो नियोक्तव्यः स्यात् आत्मनस्त्वतिरिक्तं हेयमुपादेयं वा वस्तु पश्यन् कथं नियुज्येत न त्वात्मात्मन्येव नियोज्यः स्यात् ॥
शरीरव्यतिरेकदर्शिन एव नियोज्यत्वमिति चेन्न तत्संहतत्वाभिमानात् सत्यं व्यतिरेकदर्शिनो नियोज्यत्वं तथापि व्योमादिवद्देहाद्यसंहत
त्वमपश्यत एवात्मनो नियोज्यत्वाभिमानः न हि देहाद्यसंहतत्वदर्शिनः कश्चिदपि नियोगो दृष्टः किमुतैकात्म्यदर्शिनः ॥ न च नियोगा
भावात्सम्यग्दर्शिनो यथेष्टचेष्टाप्रसंगः सर्वत्राभिमानस्यैव प्रवर्तकत्वादभिमानाभावाच्च सम्यग्दर्शिनः ॥ तस्माद्देहसंबंधादेवानुज्ञा
परिहारौ ज्योतिरादिवत् यथा ज्योतिष एकत्वेप्यग्निः क्रव्यात्परिह्रियते नेतरो यथा च प्रकाशः एकस्यापि सवितुरमेध्यप्रदेशसंबंधः परि
ह्रियते नेतरः शुचिभूमिप्रविष्टः यथा भौमाः प्रदेशा वज्रवैडूर्यादय उपादीयंते भौमा अपि संतो नरकलेवरादयः परिह्रियंते यथा मूत्रपु
रीषं गवां पवित्रतया परिगृह्यते तदेव जात्यंतरे परिवर्ज्यते तद्वत् ॥ ॥असंततेश्चाव्यतिकरः ॥४८॥ स्यातां तावदनुज्ञापरिहारौ एक
स्यात्मनो देहविशेषयोगात् यस्त्वयं कर्मफलसंबंधः स चैकात्म्याभ्युपगमे व्यतिकीर्येत स्वाम्येकत्वादिति चेत् नैतदेवं असंततेर्न हि क
र्तुर्भोक्तुश्चात्मनः संततः सर्वैः शरीरैः संबंधोस्ति उपाधितंत्रो हि जीव इत्युक्तं उपाध्यसंतानाच्च नास्ति जीवसंतानः ततश्च कर्मव्यतिक
रः फलव्यतिकरो वा न भविष्यति ॥ ॥आभास एव च ॥ आभास एव चैष जीवः परस्यात्मनो जलसूर्यकादिवत्प्रतिपत्तव्यो न स एव साक्षा
न्नापि वस्त्वंतरं अतश्च यथा नैकस्मिन् जलसूर्यके कंपमाने जलसूर्यकांतरं कंपत एवं नैकस्मिन् जीवे कर्मफलसंबंधिनि जीवांतरस्य तत्सं
बंधः ॥ एवमव्यतिकर एव कर्मफलयोः आभासस्य चाविद्याकृतत्वात्तदाश्रयस्य संसारस्याविद्याकृतत्वोपपत्तिरस्य तत्संबंधः ॥ एवमव्य

शं॰भा॰२ तिकर एव कर्मफलयोराभासस्य चाविद्याकृतत्वात्तदाश्रयस्य संसारस्याविद्याकृतत्वोपपत्तिरतस्तद्व्युदासेन च पारमार्थिकस्य ब्रह्मभाव
४३ स्योपदेशोपपत्तिः॥ येषां तु बहव आत्मानस्ते च सर्वे सर्वगतास्तेषामेवैष व्यतिकरः प्राप्नोति कथं बहवो विभवश्चात्मानश्चैतन्यमात्रस्वरू
पा निर्गुणा निरतिशयाश्च तदर्थं साधारणं प्रधानं तन्निमित्तेषां भोगापवर्गसिद्धिरिति सांख्याः सति बहुत्वे विभुत्वे च घटकुड्यादिसमा द्रव्य
मात्रस्वरूपाः स्वतोऽचेतना आत्मानस्तदुपकरणानि चाणूनि मनांस्यचेतनानि तत्रात्मद्रव्याणां मनोद्रव्याणां च संयोगान्नव इच्छादयो वै
शेषिका आत्मगुणा उत्पद्यन्ते ते चाव्यतिरेकेण प्रत्येकमात्मसु समवयन्ति संसारस्तेषां नवानामात्मगुणानामत्यंतानुत्पादो मोक्ष इति का
णादास्तत्र सांख्यानां तावच्चैतन्यस्वरूपत्वात्सर्वात्मनां संनिधानाद्यविशेषाच्चैकस्य सुखदुःखसंबंधे सर्वेषां सुखदुःखसंबंधः प्राप्नो
ति स्यादेतत्प्रधानप्रवृत्तेः पुरुषकैवल्यार्थत्वाद्व्यवस्था भविष्यति। अन्यथा हि विभूतिख्यापनार्था प्रधानप्रवृत्तिः स्यात्तथा चानिर्मोक्षः प्रस
ज्येतेति नैतत्सारं न ह्यभिलषितसिद्धिनिबंधना व्यवस्था शक्या विज्ञातुमुपपत्त्या तु कयाचिद्व्यवस्थोच्येतासत्यां पुनरुपपत्तौ कामं मा भूद
भिलषितं पुरुषकैवल्यं प्राप्नोति तु व्यवस्थाहेत्वभावाद्व्यतिकरः काणादानामपि यदैकेनात्मना मनः संयुज्यते तदात्मांतरैरपि नांतरीय
कः संयोगः स्यात्संनिधानाद्यविशेषात्ततश्च हेत्वविशेषात्ततश्च हेत्वविशेषात्फलाविशेष इत्येकस्यात्मनः सुखदुःखसंयोगे स
[redacted]
सु सर्वगतेषु प्रतिशरीरं बाह्याभ्यंतराविशेषेण सन्निहितेषु मनोवाक्कायैर्धर्माधर्मलक्षणमदृष्टमुपार्ज्यते सांख्यानां तावत्तदनात्म
समवायि प्रधानवर्ति प्रधानसाधारण्यान्न प्रत्यात्मं सुखदुःखोपभोगस्य नियामकमुपपद्यते काणादानामपि पूर्ववत्साधारणे
नात्ममनःसंयोगेन निर्वर्तितस्यादृष्टस्याप्यस्यैवात्मन इदमदृष्टमिति नियमहेत्वभावादेष एव दोषः॥ स्यादेतदहमिदं फलं प्रा
प्नवानि इदं परिहराणि इत्थं प्रयते इत्थं करवाणीत्येवंविधा अभिसंध्यादयः प्रत्यात्मं प्रवर्तमाना अदृष्टस्यात्मनां च स्वस्वामिभा ॥ ४३ ॥
वं नियंस्यंतीति नेत्याह॥ ॥अभिसंध्यादिष्वपि चैवं॥५२॥ अभिसंध्यादीनामपि साधारणेनैवात्ममनःसंयोगेन सर्वात्मस
न्निधौ क्रियमाणानां नियमहेतुत्वानुपपत्तेरुक्तदोषानुषंग एव॥ ॥प्रदेशादिति चेन्नांतर्भावात्॥५३॥ अथोच्येत विभुत्वेप्यात्म
नः शरीरप्रतिष्ठेन मनसा संयोगः शरीरावच्छिन्न एवात्मप्रदेशे भविष्यत्यतः प्रदेशकृता व्यवस्थाभिसंध्यादीनामदृष्टस्य सुखदु

199/1913

खयोश्च भविष्यति। तदपि नोपपद्यते कस्मादंतर्भावाद्विभुत्वाविशेषात्सर्व एवात्मनः सर्वशरीरेष्वंतर्भवंति तत्र वैशेषिकः शरीरा
वच्छिन्नोप्यात्मप्रदेशो न शक्यः कल्पयितुं कल्प्यमानोप्ययं निष्प्रदेशस्यात्मनः प्रदेशः काल्पनिकत्वादेव न पारमार्थिकं कार्यं नियंतुं
शक्नोति शरीरमपि सर्वात्मसन्निधावुत्पद्यमानमस्यैवात्मनो नेतरेषामिति न नियंतुं शक्यं प्रदेशविशेषाभ्युपगमेपि द्वयोरात्मनोः समा
नसुखदुःखभाजोः कदाचिदेकेनैव तावच्छरीरेणोपभोगसिद्धिः स्यात्समानप्रदेशस्यापि द्वयोरात्मनोरदृष्टस्य संभवात्तथा हि देव
दत्तो यस्मिन्प्रदेशे सुखदुःखमन्वभूत्तस्मात्प्रदेशादुपक्रांते तच्छरीरे यज्ञदत्तशरीरेण तं प्रदेशमनुप्राप्ते तस्यापीतरेण समानः सुखदुः
खानुभवो दृश्यते स न स्याद्यदि देवदत्तयज्ञदत्तयोः समानप्रदेशमदृष्टं न स्यात्स्वर्गाद्यनुपभोगप्रसंगश्च प्रदेशवादिनः स्याद्ब्राह्मणादिश
रीरप्रदेशेष्वदृष्टनिष्पत्तेः प्रदेशांतरवर्तित्वाच्च स्वर्गाद्युपभोगस्य सर्वगतत्वानुपपत्तिश्च बहूनामात्मनां दृष्टांताभावाद्वद तावत्के बहवः
समानप्रदेशाश्चेति रूपादय इति चेन्न तेषामपि धर्म्यंशेनाभेदाल्लक्षणभेदाच्च न तु बहूनामात्मनां लक्षणभेदोस्ति अंत्यविशेष
वशाद्भेदोपपत्तिरिति चेन्न भेदकल्पनायां अंत्यविशेषकल्पनायाश्चेतरेतराश्रयत्वादाकाशादीनामपि विभुत्वं ब्रह्मवादिनो सिद्धं का
र्यत्वाभ्युपगमात्तस्मादात्मैकत्वपक्ष एव सर्वदोषाभावादिति सिद्धं॥ ॥इति श्रीशारीरकमीमांसाभाष्ये शंकरभगवत्पादकृतौ द्वितीया
ध्यायस्य तृतीयः पादः समाप्तः॥३॥ तथा प्राणाः॥१॥ वियदादिविषयः श्रुतिविप्रतिषेधस्तृतीयेन पादेन परिहृतश्चतुर्थेनेदानीं प्राण
विषयः परिह्रियते तत्र तावत्तत्तेजोसृजतेति तस्माद्वा एतस्मादात्मन आकाशः संभूत इति चैवमादिषूत्पत्तिप्रकरणेषु प्राणानामुत्पत्तिर्नाम्ना
यते क्वचिच्चानुत्पत्तिरेवैषामाम्नायते असद्वा इदमग्र आसीत्तदाहुः किं तदसदासीदित्यृषयो वाव तेऽग्रे सदासीत्तदाहुः के ते ऋषय इति प्रा
णा वाव ऋषय इत्यत्र प्रागुत्पत्तेः प्राणानां सद्भावश्रवणादन्यत्र तु प्राणानामुत्पत्तिः पठ्यते यथाग्नेः क्षुद्रा विस्फुलिंगा व्युच्चरंत्येवमेवास्मा
दात्मनः सर्वे प्राणा इति एतस्माज्जायते प्राणो मनः सर्वेंद्रियाणि चेति सप्त प्राणाः प्रभवंति तस्मादिति च स प्राणमसृजत प्राणाच्छ्रद्धां
खं वायुर्ज्योतिरापः पृथिवींद्रियं मनोऽन्नमिति चैवमादिषु प्रदेशेषु तत्र च श्रुतिविप्रतिषेधादन्यतरनिर्धारणकारणानिरूपणाच्चाप्र
तिपत्तिः प्राप्नोति। अथवा प्रागुत्पत्तेः सद्भावश्रवणाद्गौणी प्राणानामुत्पत्तिश्रुतिरिति प्रतिपत्तिः प्राप्नोति॥ अत इदं पठति तथा प्राणा इति क
थं पुनरत्र तथेति अक्षरानुलोम्यं प्रकृतोपमानाभावात्सर्वगतात्मबहुत्ववादिदूषणमतीतानंतरपादांते प्रकृतं तत्तावन्नोपमानं संभ

शां०भा०
४४

वतिसादृश्याभावात्साहचर्येदिसत्युपमानंस्याद्यथासिंहस्तथाबलवर्मेति अदृष्टसाम्यप्रतिपादनार्थमिमियद्युक्तेनयथादृष्टस्यसर्वास्
संनिधावुत्पद्यमानस्यानियतत्वंनेमंवप्राणानामपिसर्वानात्मनःप्रत्यनियतत्वमितिनदपिदेहानियमेनैवोक्तत्वात्पुनरुक्तंभवेत्॥ नचजीवे
नेप्राणाउपमीयेरन्सिद्धांतविरोधाज्जीवस्यसृष्ट्युत्पत्तिराख्यातोप्राणानांनत्पत्तिर्थ्याविख्यासितानुस्मान्नथेत्संबद्धमिवप्रतिभातिन
उदाहरणोपात्तेनाप्युपमानेनसंबंधोपपत्तेः अत्रप्राणोत्पत्तिवाक्यजातमुदाहरणमस्मादात्मनःसर्वेप्राणाःसर्वेलोकाःसर्वेदेवाः
सर्वाणिभूतानिव्युच्चरंतीत्येवंजातीयकंनत्वयथालोकादयःपरस्माद्ब्रह्मणःउत्पद्यंतेनथाप्राणाअपीत्यर्थःतथैतस्माज्जायतेप्राणोम
नःसर्वेंद्रियाणिचखंवायुर्ज्योतिरापःपृथिवीविश्वस्यधारिणीत्येवमादिष्वपिस्वादिवत्प्राणानामुत्पत्तिरितिदृष्टव्यंअथवामानव्यापन्नत्वह
ष्टस्येवमादिषुव्यवहितोपमानसंबंधस्याव्याप्तिनत्वाद्यथातीतानंतरपादायुक्ताविपरादयःपरस्यब्रह्मणोविकाराःसमधिगतास्तथाप्राणा
अपिपरस्यब्रह्मणोविकाराइतियोजयितव्यंकःपुनःप्राणानांविकारत्वेहेतुःश्रुतत्वमेवननुकेषुचित्प्रदेशेषुप्राणानामुत्पत्तिर्नश्रूयतेइत्यु
क्तंनदयुक्तंप्रदेशांतरेषुश्रवणात्॥ ४ ॥ नहिक्वचिदश्रवणमन्यत्रश्रुतंनिवर्तयितुमुत्सहतेनतस्माच्छ्रुतत्वाविशेषादाकाशादिवत्प्राणानामु
त्पत्तिश्रुतिरितिनत्त्वस्याद्गौण्यसंभवादितिगौण्यासंभवोगौण्यसंभवः॥ नहिप्राणानामुत्पत्तिश्रुतिर्गौणीसंभवतिप्रतिज्ञाहानिप्रसंगा
तकस्मिन्नुभगवोविज्ञातेसर्वमिदंविज्ञातंभवतीत्येकविज्ञानेनसर्वविज्ञानंप्रतिज्ञायतत्साधनायेदमाम्नायतेएतस्माज्जायतेप्राणइत्यादि
सावप्रतिज्ञाप्राणादेहस्यसमस्तस्यजगतोब्रह्मविकारत्वेसप्रकृतिव्यतिरेकेणविकाराभावात्सिध्यतिगौण्यांतुप्राणानामुत्पत्तिश्रुतौप्रतिज्ञै
यंहीयेतनथाचप्रतिज्ञार्थमुपसंहरतिपुरुषएवेदंविश्वंकर्मतपोब्रह्मपरामृतमितिब्रह्मैवेदंविश्वंइदंवरिष्ठमितिचतथात्मनोवाअरेद
र्शनेनश्रवणेनमत्याविज्ञानेनेदंसर्वंविदितमित्येवंजातीयकासुश्रुतिषुएषैवप्रतिज्ञायोजयितव्याकथंपुनःप्रागुत्पत्तेःप्राणानांसत्ता
वगंतेंतन्मूलप्रकृतिविषयंअप्राणोह्यमनाःशुभ्रोह्यक्षरात्परतःपरइतिमूलप्रकृतेःप्राणादिसमस्तविशेषरहितत्वावधारणात्
अवांतरप्रकृतिविषयत्वेनतत्स्वविकारापेक्षंप्रागुत्पत्तेःप्राणसद्भावावधारणमितिद्रष्टव्यंव्याकृतविषयाणामपिभूयसीनामवस्थानां
श्रुतिस्मृत्योःप्रकृतिविकारभावप्रसिद्धेः॥ वियदधिकरणेहिगौण्यसंभवादितिपूर्वपक्षसूत्रत्वाद्गौणीजन्मश्रुतिरसंभवादितिव्याख्या ॥४४॥
तंतदनुरोधेनत्विहापिगौणीजन्मश्रुतिरसंभवादितिव्याचक्षाणैःप्रतिज्ञाहानिरुपेक्षितास्यात्॥ तत्प्राक्श्रुतेश्च॥ इतश्चाकाशादीनामिव
प्राणानामपिमुख्यैवजन्मश्रुतिर्यज्जायतइतिश्रुतंजन्मवाचिपदंप्राणेषुप्राक्श्रुतंतदुत्तरेष्वप्याकाशादिष्वनुवर्ततेएतस्माज्जायतेप्राण

201/1913

इत्यत्राकाशादिषुचमुख्यंजन्मइतिप्रतिष्ठापितंतत्सामान्यात्प्राणेष्वपिमुख्यमेवजन्मभवितुमर्हतीतिनह्येकस्मिन्प्रकरणेएकस्मिंश्चवा
क्येएकःशब्दःसकृदुच्चरितोबहुभिःसंबध्यमानःक्वचिन्मुख्यःक्वचिद्गौणइत्यध्यवसातुंशक्यंवैरूप्यप्रसंगात्तथासप्राणमसृजतप्राणा
च्छ्रद्धांइत्यत्रापिप्राणेषुश्रुतःसृजतिःपरेष्वपिउत्पत्तिमत्सुश्रद्धादिष्वनुषज्यतेयत्रापिपश्चाच्छ्रुतउत्पत्तिवचनःशब्दःपूर्वैःसंबध्यतेतत्राप्येष
एवन्यायोयथासर्वाणिभूतानिव्युच्चरंतीत्ययमंतेपठितोव्युच्चरंतिशब्दःपूर्वैरपिप्राणादिभिःसंबध्यते॥ तत्पूर्वकत्वाद्वाचः॥ ४॥ यद्यपितत्ते
जोऽसृजतेत्यस्मिन्प्रकरणेप्राणानामुत्पत्तिर्नपठ्यतेतेजोबन्नानामेवत्रयाणांभूतानामुत्पत्तिश्रवणात्तथापिब्रह्मप्रकृतिकतेजोब
मे न्नपूर्वकत्वाभिधानाद्वाक्प्राणमनसांतत्सामान्याच्चसर्वेषामेवप्राणानांब्रह्मप्रभवत्वंसिद्धंभवतितथाह्येकस्मिन्नेवप्रकरणेतेजोबन्नपू
र्वकत्वंवाक्प्राणमनसामाम्नायतेअन्नमयंहिसोम्यमनःआपोमयःप्राणःतेजोमयीवागिति।तत्रयदितावन्मुख्यमेषामन्नादिमय
त्वंततोवर्ततएवब्रह्मप्रभवत्वं॥ अथभाक्तंतथापिब्रह्मकर्तृकायांनामरूपव्याक्रियायांश्रवणाद्येनाश्रुतंश्रुतंभवतीतिचोपक्रमोदितदात्म्य
मितिचोपसंहाराच्छ्रुत्यंतरप्रसिद्धेश्चब्रह्मकार्यत्वप्रपंचनार्थमेवमनआदीनामन्नादिमयत्ववचनमितिगम्यतेश्रुतंश्रुतंभवतीतिचोपक्र
मोदितदात्म्यमिदंसर्वमितिचोपसंहाराच्छ्रुत्यंतरप्रसिद्धेश्चब्रह्मकार्यत्वप्रपंचनार्थमेवमनआदीनामन्नादिमयत्ववचनमितिगम्यतेतस्मादपिप्रा
णानांब्रह्मविकारत्वसिद्धिः॥ ॥सप्तगतेर्विशेषितत्वाच्च॥ ५॥ उत्पत्तिविषयःश्रुतिविप्रतिषेधःप्राणानांपरिहृतःसंख्याविषयइदानीं
परिहियतेतत्रमुख्यंप्राणमुपरिष्टाद्वक्ष्यतिइदंतुकतीतरेप्राणाइतिसंप्रधारयतिश्रुतिविप्रतिपत्तेश्चात्रविमर्शःक्वचित्सप्तप्राणाः
संकीर्त्यंतेसप्तप्राणाःप्रभवंतितस्मादितिक्वचिदष्टौप्राणाग्रहत्वेनगुणेनसंकीर्त्यंतेष्टौग्रहाअष्टावतिग्रहाइतिक्वचिन्नवसप्तवै
शीर्षण्याःप्राणाद्वाववांचावितिक्वचिद्दशनववैपुरुषेप्राणानाभिर्दशमीति।क्वचिदेकादशदशेमेपुरुषेप्राणाआत्मैकादश
इतिक्वचिद्द्वादशसर्वेषांस्पर्शानांत्वगेकायनमित्यत्रक्वचित्त्रयोदशचक्षुश्चद्रष्टव्यंचेत्यत्रएवंविप्रतिपन्नाःप्राणेयत्तांप्रतिश्रुतयः
किंतावत्प्राप्तंसप्तैवप्राणाइतिकुतःगतत्वात्तेतावगम्यंतेसप्तप्राणाःप्रभवंतितस्मादित्येवंविधासुश्रुतिषुविशेषितास्त्वेतेसप्तवैशी
र्षण्याःप्राणाइत्यत्रननुगुहाशयानिहिताःसप्तसप्तेतिवीप्साश्रयतेसासप्तभ्योतिरिक्तान्प्राणानगमयतिनैषदोषःपुरुषभेदाभिप्रा
येयंवीप्साप्रतिपुरुषंसप्तसप्तप्राणाइतिनतत्त्वभेदाभिप्रायासप्तसप्तान्येप्राणाइतिनन्वष्टत्वादिकापिसंख्याप्राणेषूदाहृताकथंस

शां०भा०
॥ ४५ ॥

पेव स्युः सप्तसु दाहृतासु विरोधाच्च न्यूनमसंख्याध्यवसानं न्याय्यं ततः स्तोककल्पनानुरोधात्सप्तसंख्याध्यवसानं हि विभेदापेक्षं
च संख्यान्तरश्रवणमिति गम्यते अत्रोच्यते। हस्तादयस्तु स्थितेऽतो नैवं॥६॥ हस्तादयस्त्वपरे सप्तभ्योऽतिरिक्ताः प्राणाः श्रूयन्ते हस्तो
वै ग्रहः स कर्मणातिग्राहेण गृहीतो हस्ताभ्यां हि कर्म करोतीत्येवमाद्यासु श्रुतिषु स्थिते च सप्तत्वातिरेके सप्तत्वमन्तर्भावाच्छक्यते सं
भावयितुं हीनाधिकसंख्याविप्रतिपत्तौ ह्यधिका संख्या संग्राह्या भवति तस्यां हि हीनान्तर्भवति न तु हीनायामधिका ततश्चैवं
मत्वा स्तोककल्पनानुरोधात्सप्तैव प्राणाः स्युरिति उत्तरसंख्यानुरोधात्त्वेकादशैते प्राणाः स्युः॥ तथा चोदाहृता श्रुतिः दशेमे पुरु
षे प्राणा आत्मैकादश इति आत्मशब्देन चात्रान्तःकरणं परिगृह्यते॥ करणाधिकारात् ननु एकादशत्वादधिके द्वादशत्वत्रयोदशत्वे उ
दाहृते सत्यं नैकादशभ्यः कार्यजातेभ्योऽधिकं कार्यजातमस्ति यदर्थमधिकं करणं कल्प्येत शब्दस्पर्शरूपरसगन्धविषयाः पंच
बुद्धिभेदास्तदर्थानि पंच बुद्धीन्द्रियाणि वचनादानविहरणोत्सर्गानन्दाः पंच कर्मभेदास्तदर्थानि पंच कर्मेन्द्रियाणि सर्वार्थविषयं
त्रैकाल्यवर्ति मननमेकमनेकवृत्तिकमेकमेव वृत्तिभेदात्क्वचिद्भिन्नवद्व्यपदिश्यते मनो बुद्धिरहंकारश्चित्तं चेति तथा च श्रुतिः कामाद्या नानाविधा
वृत्तीरनुक्रम्याह एतत्सर्वं मन एवेति॥ अपि च सप्त शीर्षण्यान्प्राणानभिमन्यमानस्य चत्वार एव प्राणा अभिमताः स्युः स्थानभेदाद्ध्येते च
त्वारः सन्तः सप्त गण्यन्ते द्वे श्रोत्रे द्वे चक्षुषी द्वे नासिके एका वागिति॥ न चैतावतामेव वृत्तिभेदा इतरे प्राणा इति शक्यं वक्तुं॥ हस्तादिवृत्तीना
मत्यन्तविजातीयत्वात् तथा नव वै पुरुषे प्राणा नाभिर्दशमीत्यत्रापि देहच्छिद्रभेदाभिप्रायेणैव दश प्राणा उच्यन्ते न प्राणतत्त्वभेदाभिप्रा
येण नाभिर्दशमीति वचनात् नहि नाभिर्नाम कश्चित्प्राणः प्रसिद्धोऽस्ति मुख्यस्य तु प्राणस्य भवति नाभिरप्येकं विशेषायतनमित्यतो ना
भिर्दशमीत्युच्यते क्वचिदुपासनार्थं कतिचित्प्राणा गण्यन्ते क्वचित्प्रदर्शनार्थं तदेवं विचित्रे प्राणेयत्ताम्नाने सति क्व किंपरमाम्नानमिति
विवेक्तव्यं कार्यजातवशात्त्वेकादशत्वाम्नानं प्राणविषयं प्रमाणमिति स्थितं॥ इयमपरा सूत्रद्वययोजना सप्तैव प्राणाः स्युर्यतः सप्तानामेव
गतिः श्रूयते तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्तीत्यत्र ननु सर्वशब्दोऽप्युच्यते कथं सप्तानामेव गतिः प्रति
ज्ञायत इति विशेषितत्वादित्याह सप्तैव प्राणा अवसरादयस्त्वक्पर्यन्ता विशेषिताः इह प्रकृताः स यत्रैष चाक्षुषः पुरुषः पराङ् पर्यावर्ततेऽथा
रूपज्ञो भवतीत्येकीभवति न पश्यतीत्याहुरित्येवमादिनानुक्रमणेन प्रकृतगामी च सर्वशब्दो भवति यथा सर्वे ब्राह्मणा भोजिता इति ये नि

४५

मंत्रिताः प्रकृता ब्राह्मणास्त एव सर्वशब्देनोच्यन्ते नान्ये एवमिहापि ये प्रकृताः सप्त प्राणास्त एव सर्वशब्देनोच्यन्ते नान्य इति ननु
च विज्ञानमष्टममनुक्रान्तं कथं सप्तानामेवानुक्रमणं नैष दोषः मनोविज्ञानयोस्तत्त्वाभेदाद्वृत्तिभेदेऽपि सप्तत्वोपपत्तेः तस्मात्सप्त
व प्राणा इत्येवं प्राप्ते ब्रूमः। हस्तादयस्त्वपरे सप्तभ्योऽतिरिक्ताः प्राणाः प्रतीयन्ते हस्तो वै ग्रह इत्यादिश्रुतिषु ग्रहत्वं च बंधनभावो गृह्य
ते बध्यते क्षेत्रज्ञोऽनेन ग्रहसंज्ञकेन बंधनेनेति स च क्षेत्रज्ञो नैकस्मिन्नेव शरीरे बध्यते शरीरान्तरेष्वपि तुल्यत्वाद्बंधनस्य तस्माच्छ
रीरान्तरसंचारीदं ग्रहसंज्ञकं बंधनमित्यर्थादुक्तं भवति तथा च स्मृतिः पुर्यष्टकेन लिंगेन प्राणाद्येन स युज्यते तेन बद्धस्य वै बंधो
मोक्षो मुक्तस्य तेन चेति प्राक् मोक्षात् ग्रहसंज्ञकेनानेन बंधनेनावियोगं दर्शयति आथर्वणे च विषयेन्द्रियानुक्रमणे चक्षुश्च
द्रष्टव्यं चेत्यत्र तुल्यवद्धस्तादीनीन्द्रियाणि सविषयाण्येवानुक्रामति हस्तौ चादातव्यं चोपस्थश्चानन्दयितव्यं च पायुश्च विसर्जयित
व्यं चेति तथा दशेमे पुरुषे प्राणा आत्मैकादशस्ते यदास्माच्छरीरान्मर्त्यादुत्क्रामन्त्यथ रोदयन्तीत्येकादशानां प्राणानामुत्क्रान्तिं द
र्शयति सर्वशब्दोऽपि च प्राणशब्देन संबध्यमानोऽशेषान्प्राणानभिदधानो न प्रकरणवशेन सप्तस्वेवावस्थापयितुं शक्य
ते प्रकरणाच्छब्दस्य बलीयस्त्वात् सर्वे ब्राह्मणा भोजिता इत्यत्रापि सर्वेषामेवावनिवर्तिनां ब्राह्मणानां ग्रहणं न्याय्यं सर्वशब्द
स्य सामर्थ्यात्सर्वभोजनासंभवात्तु तत्रामंत्रितमात्रविषया सर्वशब्दस्य वृत्तिराश्रिता इह तु न किंचित्सर्वशब्दार्थसंकोचकारणम
स्ति तस्मात्सर्वशब्देनात्राशेषाणां प्राणानां परिग्रहः॥ प्रदर्शनार्थं च सप्तानामनुक्रमणमित्यनवद्यं तस्मादेकादशैव प्राणाः शब्दतः का
र्यतश्चेति सिद्धं॥ ॥अणवश्च॥७॥ अधुना प्राणानामेव स्वभावान्तरमभ्युच्चिनोति अणवश्चैते प्रकृताः प्राणाः प्रतिपत्तव्याः। अ
णुत्वं चैषां सौक्ष्म्यपरिच्छेदौ न परमाणुतुल्यत्वं कृत्स्नदेहव्यापिकार्यानुपपत्तिप्रसंगात् सूक्ष्मा एते प्राणाः स्थूलाश्चेत्स्युर्मरणका
ले शरीरान्निर्गच्छन्तो बिलादहिरिवोपलभ्येरन्म्रियमाणस्य पार्श्वस्थैः परिच्छिन्नाश्चैते प्राणाः॥ सर्वगताश्चेत्स्युः उत्क्रान्तिग
त्यागतिश्रुतिकोपः स्यात् तद्गुणसारत्वं च जीवस्य न सिध्येत॥ सर्वगतानामपि वृत्तिलाभः शरीरदेशे स्यादिति चेन्न वृत्तिमात्रस्य
करणत्वोपपत्तेः यदेव ह्युपलब्धिसाधनं वृत्तिरन्यद्वा तस्यैव नः करणत्वं संज्ञामात्रे विवाद इति करणानां व्यापित्वकल्पना निरर्थिका त
स्मात्सूक्ष्माः परिच्छिन्नाश्च प्राणा इत्यध्यवस्यामः॥ श्रेष्ठश्च॥८॥ मुख्यश्च प्राणः इतरप्राणवद्ब्रह्मविकार इत्यतिदिशति तन्वि

203/1913

ब्रं॰भा॰२
५६

पणेवसर्वप्राणानांब्रह्मविकारत्वंव्याख्यातमेतस्माज्जायतेप्राणोमनःसर्वेंद्रियाणिचेतिसर्वेंद्रियमनोव्यतिरिक्तेनापिप्राणस्योत्प
त्तिश्रवणात्सप्राणमसृजतेत्यादिश्रवणाभ्यश्चकिमर्थःपुनरभिदेशःअधिकाशंकापाकरणार्थः॥नासदासीथहिब्रह्मप्रधानेसूक्तेमंत्र
वर्णोभवति।नमृत्युरासीदमृतंनतर्हिनरात्र्याऽअन्हआसीत्प्रकेतः॥आनीदवातंस्वधयातदेकंतस्माद्धान्यंनपरःकिंचनास।इतिसआ
नीदितिप्राणकर्मोपादानात्प्रागुत्पत्तेःसंतमिवप्राणंसत्वयतितस्मादजःप्राणइतिज्ञायतेकस्यापिन्मतिस्तान्मतिदेशेनापनुदतिअनीदद्धे
यिनप्रागुत्पत्तेःप्राणसद्भावंसत्वयतिअवातमितिविशेषणादप्राणोह्यमनाःशुभ्रइतिचमलप्रकृतेःप्राणादिसमस्तविशेषविरहस्यद
र्शितत्वात्तस्मात्कारणसद्भावप्रतिपादनार्थएवायमानीदिशब्दःश्रेष्ठइतिचमुख्यंप्राणमभिदधातिप्राणोवज्येष्ठश्चश्रेष्ठश्चेतिश्रुतिर्ज्येष्ठ
श्रेष्ठः प्राणःशुक्रनिषेककालादारभ्यतस्यवृत्तिलाभान्नचेत्तस्यतथावृत्तिलाभःस्यात्योनौनिषिक्तंशुक्रंएवसंभवेत्श्रोत्रादीनांतुक
र्णात्वादिस्थानविभागनिष्पत्तौवृत्तिलाभादज्येष्ठत्वंश्रेष्ठश्चप्राणोगुणाधिक्यान्नवैशक्यास्यामदृतेजीवितुमितिश्रुतेः॥नवायुक्रियेपृ
थगुपदेशात्॥८॥सपुनर्मुख्यःप्राणःकिंस्वरूपइतीदानींजिज्ञास्यतेतत्राप्राप्तंतावत्श्रुतेर्वायुःप्राणइतिएवंहिश्रूयतेयःप्राणःसवायु
सएषवायुःपंचविधःप्राणोपानोव्यानउदानःसमानइतिअथवातंत्रांतरीयाभिप्रायात्समस्तकरणवृत्तिःप्राणइतिप्राप्तमेवंहितंत्रांत
रीयाआचक्षतेसामान्याकरणवृत्तिःप्राणाद्यावायवःपंचेति॥अत्रोच्यतेनवायुःप्राणोनापिकरणव्यापारःकुतःपृथगुपदेशात्वायो
तावत्प्राणस्यपृथगुपदेशोभवतिप्राणएवब्रह्मणश्चतुर्थःपादःसवायुनाज्योतिषाभातिचतपतिचेतिनहिवायुरेवसत्वायोःपृथगुप
दिश्येततथाकरणवृत्तेरपिपृथगुपदेशोभवतिवागादीनिकरणान्यनुक्रम्यतत्रतत्रपृथक्प्राणस्यानुक्रमणाद्वृत्तिवृत्तिमतोश्चाभेद
न्नहिकरणव्यापरणव्यापारएवसन्करणेभ्यःपृथगुपदिश्येततथैतस्माज्जायतेप्राणोमनःसर्वेंद्रियाणिचखंवायुरित्येवमादयोपिवायोः
करणेभ्यश्चप्राणस्यपृथगुपदेशाःअनुसर्तव्याःनचसमस्तानांकरणानामेकावृत्तिः॥संभवतिप्रत्येकमेकैकवृत्तित्वात्समुदायस्यचा
कारकत्वात्॥ननुपंजरचालनन्यायेनैतद्भविष्यतियथैकपंजरवर्तिनएकादशापिपक्षिणःप्रत्येकंप्रतिनियतव्यापाराःसंतःसंभूयैकं
पंजरंचालयंतिएवमेकशरीरवर्तिनःएकादशप्राणाःप्रत्येकंप्रतिनियतवृत्तयःसन्तःसंभूयैकांप्राणाख्यांवृत्तिंप्रतिलप्स्यंतइति
नेत्युच्यतेयुक्तंतत्रप्रत्येकवृत्तिभिरवांतरव्यापारैःपंजरचालनानुरूपैरेवोपेताःपक्षिणःसहसंभूयैकंपंजरंचालयेयुरितितथादृष्टत्वा

2011913

दिहतुश्रवणाद्यवांतरव्यापारोपेताःप्राणाःनसंभूयप्राण्युरितियुक्तंप्रमाणाभावात्स्यंतविजातीयत्वाच्चश्रवणादिभ्यःप्राणनस्य
तथाप्राणस्यश्रेष्ठत्वाद्युद्धोषणंगुणभावोपगमश्चतंप्रतिवागादीनांनकारणवृत्तिमात्रेप्राणेवकल्प्यतेतस्मादन्योवायुक्रियाभ्यांप्रा
णःकथंतर्हिश्रुतिःयःप्राणःसवायुरितिउच्यतेवायुरेवायमध्यात्ममापन्नःपंचव्यूहोविशेषात्मनावतिष्ठमानःप्राणोनामभरायते
नतत्वांतरंनापिवायुमात्रंअतश्चोभेअपिभेदाभेदश्रुतीनविरुध्येतेस्यादेतत्प्राणोपितर्हिजीववदस्मिञ्छरीरेस्वतंत्रःप्राणोतिश्रेष्ठत्वा
द्गुणभावोपगमश्चतंप्रतिवागादीनांतथाहिअनेकधाभूतिःप्राणस्यप्रोच्यतेसुप्तेषुवागादिषुप्राणएकोजागर्तिप्राणएकोमृत्युनो
नाप्तःप्राणसंवर्गोवागादीनसंवृंक्तेप्राणइतरान्प्राणान्रक्षतिमातेवपुत्रानितितस्मात्प्राणस्यापिजीववत्स्वातंत्र्यप्रसंगस्तंपरिहरति।
चक्षुरादिवत्तुतत्सहशिष्ट्यादिभ्यः॥१०॥तुशब्दःप्राणस्यजीववत्स्वातंत्र्यंव्यावर्तयतियथाचक्षुरादीनिराजप्रकृतिवज्जीवस्यकर्तृत्वंभो
क्तृत्वंचप्रतिकरणानिनस्वतंत्राणितथामुख्योपिप्राणोराजमंत्रिवज्जीवस्यसर्वार्थत्वेनोपकरणभूतोनस्वतंत्रःकुतस्तत्सहशिष्ट्यादि
भ्यःतैश्चक्षुरादिभिःसहैवप्राणःशिष्यतेप्राणसंवादादिषु॥समानधर्मणांचसहशासनंयुक्तंबृहदादिवत्आदिशब्देनसंहत
त्वाचेतनत्वादीन्प्राणस्यस्वातंत्र्यनिराकरणहेतून्दर्शयति॥स्यादेतत्चक्षुरादितत्प्राणस्यजीवंप्रतिकरणभावेभ्युपगम्यमाने
विषयांतरंरूपादिवत्प्रसज्येतरूपालोचनादिभिर्हिवृत्तिभिर्यथास्वंचक्षुरादीनांजीवंप्रतिकरणभावोभवतिअपिचैकादशैवका
र्यज्ञातानिरूपालोचनादीनिपरिगणितानिनियदर्थमेकादशप्राणाःसंगृहीताःनतुद्वादशमपरंकार्यज्ञानमधिगम्यतेयदर्थमयं
द्वादशःप्राणःप्रतिज्ञायेतइत्यतउत्तरंपठति॥अकरणत्वाच्चनदोषस्तथाहिदर्शयति॥११॥नतावद्विषयांतरप्रसंगोदोषः॥
अकरणत्वात्प्राणस्यनहिचक्षुरादिवत्प्राणस्यविषयपरिच्छेदेनकरणत्वमभ्युपगम्यतेनचास्यैतावताकार्याभावएवकस्मात्त
थाहिश्रुतिःप्राणांतरेष्वसंभाव्यमानंमुख्यस्यप्राणस्यवैशेषिकंकार्यंदर्शयतिप्राणसंवादादिषुअथहप्राणाअहंश्रेयसिव्यूदि
दिरेइत्युपक्रम्ययस्मिन्वउत्क्रांतइदंशरीरंपापिष्ठतरमिवदृश्येतसवःश्रेष्ठइतिचोपन्यस्यप्रत्येकंवागादिउत्क्रमणेनतद्वृत्तिमात्रही
नंयथापूर्वंजीवनंदर्शयित्वाप्राणोच्चिक्रमिषायांवागादिशैथिल्यापत्तिंशरीरपातप्रसंगंचदर्शयतीश्रुतिःप्राणमितितांशरीरेद

ग्रं०भा०२
॥ ५८ ॥

यच्छ्रुतिर्दर्शयति तान्वरिष्ठः प्राणउवाच मामोहमापद्यथाहमेवैतत्पंचधात्मानंविभज्यैतद्बाणमवष्टभ्यविधारयामीति चैतमेवार्थं
श्रुतिराह प्राणेन रक्षन्नवरं कुलायमिति सुप्तेषु चक्षुरादिषु प्राणमिति तां शरीररक्षां दर्शयति यस्मात्कस्माच्चांगात्प्राणउत्क्राम
ति तदेव तच्छुष्यतीति तेन यदश्नाति यत्पिबति तेनेतरान्प्राणानवतीति च प्राणमिति तां शरीरेंद्रियपुष्टिं दर्शयति कस्मिन्न्वहमुत्क्रांत
उत्क्रांतो भविष्यामि कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामीति स प्राणमसृजतेति च प्राणनिमित्ते जीवस्योत्क्रांतिप्रदर्शयति ॥ पंचवृ
त्तिर्मनोवद्व्यपदिश्यते ॥१२॥ इतश्चास्ति मुख्यस्य प्राणस्य वैशेषिकं कार्यं यत्कारणं पंचवृत्तिरयं व्यपदिश्यते श्रुतिषु प्राणोऽपानो
व्यानउदानः समान इति वृत्तिभेदश्चायं कार्यभेदापेक्षः प्राणः प्राग्वृत्तिरुच्छ्वासादिकर्मा अपानोऽवाग्वृत्तिर्निश्वासादिकर्मा व्यान
स्तयोः संधौ वर्तमानो वीर्यवत्कर्महेतुरुदान ऊर्ध्ववृत्तिरुत्क्रांत्यादिहेतुः समानः समं सर्वेष्वंगेषु योऽन्नरसान्नयतीत्येवं पंचवृत्तिः प्राणो
मनोवत् यथा मनसः पंचवृत्तयः एवं प्राणस्यापीत्यर्थः श्रोत्रादिनिमित्ताः शब्दादिविषया मनसः पंचवृत्तयः प्रसिद्धाः ॥ ननु
कामः संकल्प इत्याद्याः परिपठिताः परिगृह्येतरन्न पंचसंख्यातिरेकान्न च श्रोत्रादिनिरपेक्षा भूतभविष्यादिविषयापरा
मनसो वृत्तिरस्तीति समानः पंचसंख्यातिरेकः ॥ एवं तर्हि परमप्रतिषिद्धमनुमतं भवतीति न्यायादिह योगशास्त्रप्रसिद्धा मनसः
पंचवृत्तयः परिगृह्यंते प्रमाणविपर्ययविकल्पनिद्रास्मृतयो नाम बहुवृत्तित्वमात्रेण वा मनः प्राणस्य निदर्शनमिति द्रष्टव्यं जी
वोपकरणत्वमपि प्राणस्य पंचवृत्तित्वान्मनोवदिति योजयितव्यं ॥ ॥अणुश्च॥१३॥ अणुश्चायं मुख्यः प्राणः प्रत्येतव्यः इतरप्राण
वदणुत्वं चेहापि सौक्ष्म्यपरिच्छेदेन परिमाणतुल्यत्वं पंचभिः कृत्स्नशरीरव्यापित्वात्सूक्ष्मः प्राणउत्क्रांतौ पार्श्वस्थेनानुपलभ्य
मानत्वात्परिच्छिन्नश्चोत्क्रांतिगत्यागतिश्रुतिभ्यः ननु विभुत्वमपि प्राणस्य समाम्नायते समः प्लुषिणा समो मशकेन समो ना ॥ ५८ ॥
गेन सम एभिस्त्रिभिर्लोकैः समोऽनेन सर्वेणेत्येवमादिषु प्रदेशेषु नत्युच्यते आधिदैविकेन समष्टिव्यष्टिरूपेण हैरण्यगर्भेण
प्राणात्मनैवैतद्विभुत्वमाम्नायते नाध्यात्मिकेन अपि च समः प्लुषिणेत्यादिना साम्यवचनेन प्रतिप्राणिवर्तिनः प्राणस्य प
रिच्छेद एव प्रदर्श्यते तस्माददोषः ॥ ॥ज्योतिराद्यधिष्ठानं तु तदामननात् ॥१४॥ ते पुनः प्रकृताः प्राणाः किं स्वमहिम्नैव स्वस्मै

207/1913

स्मै कार्याय प्रभवंति आहोस्विद्देवताधिष्ठिताः प्रभवंतीति विचार्यते तत्र प्राप्तं तावद्यथा स्वकार्यशक्तियोगात्स्वमहिम्नैव प्राणाः प्रव
र्तेरन्निति ॥ अपि च देवताधिष्ठितानां प्राणानां प्रवर्तनाभ्युपगम्यमाने तासामेवाधिष्ठात्रीणां देवतानां भोक्तृत्वप्रसंगात्शारीरस्य भो
म क्तृत्वं प्रलीयेत ॥ अतः स्वमहिम्नैवैषां वृत्तिरित्येवं प्राप्ते इदमुच्यते ज्योतिराद्यधिष्ठानं त्विति तु शब्देन पक्षो व्यावर्त्यते ज्योतिरादिभिरग्न्याद्यभि
मानिभिर्देवताभिरधिष्ठितं वागादिकरणजातं स्वकार्येषु प्रवर्तत इति प्रतिज्ञानीते हेतुं व्याचष्टे तदामननादिति ॥ तथा ह्यामनंति अग्निर्वा
ग्भूत्वा मुखं प्राविशदित्यादि अग्नेश्चायं वाग्भावो मुखप्रवेशश्च देवतात्मनाधिष्ठातृत्वमंगीकृत्योच्यते न हि देवतासंबंधं प्रत्याख्यायाग्ने
र्वाचि मुखे वा कश्चिद्विशेषसंबंधो दृश्यते तथा वायुः प्राणो भूत्वा नासिके प्राविशदित्येवमाद्यपि योजयितव्यं तथान्यत्रापि वाग्घैव ब्रह्मण
श्चतुर्थः पादः सोऽग्निना ज्योतिषा भाति च तपति चेत्येवमादिना वागादीनामग्न्यादिज्योतिष्ट्ववचनेन तमेवार्थं द्रढयति स वै वाचमेव प्रथ
मामत्यवहत्सा यदा मृत्युमत्यमुच्यत सोऽग्निरभवदिति चैवमादिना वागादीनामग्न्यादिभावापत्तिवचनेनैतमेवार्थं द्योतयति सर्वत्र चा
ध्यात्माधिदैवविभागेन वागाद्यग्न्याद्यनुक्रमणमनयैव प्रत्यासत्त्या भवति स्मृतावपि वागध्यात्ममिति प्राहुर्ब्राह्मणास्तत्त्वदर्शिनः वक्त
व्यमधिभूतं तु वह्निस्तत्राधिदैवतमित्यादिना वागादीनामग्न्यादिदेवताधिष्ठितत्वं सप्रपंचं प्रदर्शितं ॥ यदुक्तं स्वकार्यशक्तियोगात्स्वमहि
म्नैव प्राणाः प्रवर्तेरन्निति तदयुक्तं शक्तानामपि शकटादीनामनडुहाद्यधिष्ठितानां प्रवृत्तिदर्शनात् उभयथोपपत्तौ चागमाद्देवताधिष्ठि
तत्वमेव निश्चीयते यदप्युक्तं देवतानामेवाधिष्ठात्रीणां भोक्तृत्वप्रसंगो न शारीरस्येति तत्परिह्रियते ॥ ॥प्राणवता शब्दात् ॥१५॥ सतीष्व
पि प्राणानामधिष्ठात्रीषु देवतासु प्राणवता कार्यकरणसंघातस्वामिना शारीरेणैषां प्राणानां संबंधः श्रुतेरवगम्यते तथा हि श्रुतिः अथ यत्रै
तदाकाशमनुविषण्णं चक्षुः स चाक्षुषः पुरुषो दर्शनाय चक्षुरथ यो वेदेदं जिघ्राणीति स आत्मा गंधाय घ्राणमित्येवंजातीयका शारीरेणै
व प्राणानां संबंधं श्रावयति अपि चानेकत्वात्प्रतिकरणमधिष्ठातृणां देवतानां न भोक्तृत्वमस्मिञ्छरीरे कल्पते एको ह्ययमस्मिञ्छरी
रे शारीरो भोक्ता प्रतिसंधानादिसंभवादवगम्यते ॥ तस्य च नित्यत्वात् ॥१६॥ तस्य च शारीरस्यास्मिञ्छरीरे भोक्तृत्वेन नित्यत्वं पुण्यपा
पोपलेपसंभवात्सुखदुःखोपभोगसंभवाच्च न देवतानां ता हि परस्मिन्नैश्वर्यपदे वर्तमाना न हीनेऽस्मिञ्छरीरे भोक्तृत्वं प्रतिलब्धु
मर्हंति श्रुतिश्च भवति पुण्यमेवामुं गच्छतीति शारीरेणैव च नित्यः प्राणानां संबंधः उत्क्रांत्यादिषु तदनुवृत्तिदर्शनात् ॥ तमुत्क्रामंतं प्रा

णोनुत्क्रामति प्राणमुत्क्रामंतं सर्वे प्राणा अनूत्क्रामंतीत्यादिश्रुतिभ्यस्तस्मात्सत्यपि करणानां नियंत्रीषु देवतासु न शारीरस्य भोक्तृ
त्वमपि गछति करणपक्षस्यैव हि देवता न भोक्तृपक्षस्येति ॥ ॥त इंद्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात् ॥१७॥ मुख्यश्चैक इतरे चैकादश प्रा
णा अनुक्रांतास्तत्रेदमपरं संदिह्यते किं मुख्यस्यैव प्राणस्य वृत्तिभेदा इतरे प्राणा आहोस्वित्तत्त्वांतराणीति किं तावत्प्राप्तं मुख्यस्यैव वृ
त्तिभेदा इति कुतः श्रुतेस्तथा हि श्रुतिर्मुख्यमितरांश्च प्राणान्सन्निधाप्य मुख्यात्मतामितरेषां ख्यापयति हंतास्यैव सर्वे रूपमसामेति
त एतस्यैव सर्वे रूपमभवन्निति प्राणैकशब्दत्वाच्चैकत्वाध्यवसाय इतरथा ह्यन्याय्यमनेकार्थत्वं प्राणशब्दस्य प्रसज्येत एकत्र वा मुख्य
त्वमितरत्र वा लाक्षणिकत्वमापद्येत तस्माद्यथैकस्यैव प्राणस्य प्राणाद्याः पंच वृत्तय एवं वागाद्या अप्येकादशेति एवं प्राप्ते ब्रूमः तत्त्वांतरा
ण्येव प्राणाद्वागादीनीति कुतः तद्व्यपदेशात् कोऽयं व्यपदेशः भेदेन व्यपदेशः प्रकृताः प्राणाः श्रेष्ठं वर्जयित्वावशिष्टा एकादशेंद्रियाण्यु
च्यंते श्रुतावेवं व्यपदेशभेददर्शनात् तस्मादात्मनः प्राणो मनः सर्वेंद्रियाणि चेति ह्येवंजातीयकेषु प्रदेशेषु पृथक् प्राणो व्यपदि
श्यते पृथक् चेंद्रियाणि ननु मनसोऽप्येवं सति वर्जनमिंद्रियत्वे प्राणवत्स्यात् मनः सर्वेंद्रियाणि चेति व्यपदेशभेददर्शनात् सत्यमेतत् स्मृतौ
त्वेकादशेंद्रियाणीति मनोऽपींद्रियत्वेन श्रोत्रादिवत्संगृह्यते प्राणस्य त्विंद्रियत्वं न श्रुतौ स्मृतौ वा प्रसिद्धमस्ति व्यपदेशभेदश्चायं तत्त्वभेदे
उपपद्यते तत्त्वैकत्वे तु स एवैकः सन् प्राण इंद्रियव्यपदेशं लभते न लभते चेति विप्रतिषिद्धं तस्मात्तत्त्वांतरभूता मुख्यादितरे कुतश्च तत्त्वांतरभू
ताः ॥ ॥भेदश्रुतेः ॥१८॥ भेदेन च वागादिभ्यः सर्वत्र प्राणः श्रूयते ते ह वाचमूचुरित्युपक्रम्य वागादीनसुरविध्वस्तानुपन्यस्योपसं
हृत्य वागादिप्रकरणमथ हेममासन्यं प्राणमूचुरित्यसुरविध्वंसिनो मुख्यस्य प्राणस्य पृथगुपक्रमणात् तथा मनो वाचं प्राणं तान्यात्म
नेऽकुरुतेत्येवमाद्या अपि भेदश्रुतय उदाहर्तव्यास्तस्मादपि तत्त्वांतरभूता मुख्यादितरे ॥ कुतश्च तत्त्वांतरभूताः ॥ ॥वैलक्षण्याच्च ॥१९॥
वैलक्षण्यं च भवति मुख्यस्येतरेषां च सुप्तेषु वागादिषु मुख्य एको जागर्ति स एव चैको मृत्युनानाप्तः आप्तास्त्वितरे तस्यैव च स्थित्युत्क्रांति
भ्यां देहधारणपतनहेतुत्वं नेंद्रियाणां विषयालोचनहेतुत्वं चेंद्रियाणां न प्राणस्य एवंजातीयको भूयाल्लक्षणभेदः प्राणेंद्रिया
णां तस्मादप्येषां तत्त्वांतरभावसिद्धिः यदुक्तं त एतस्यैव सर्वे रूपमभवन्निति श्रुतेः प्राण एवेंद्रियाणीति तदयुक्तं तत्रापि पौर्वापर्यालो
चनाद्भेदप्रतीतेः तथा हि वदिष्याम्येवाहमिति वाग्दध्रे इति वागादीनींद्रियाण्यनुक्रम्य तानि मृत्युः श्रमो भूत्वोपयेमे तस्माच्छ्राम्यत्येव वा ५८

209/1912

गिति च श्रमरूपेण मृत्युना ग्रस्तत्वं वागादीनामभिधायाथेममेव नाप्नोद्योऽयं मध्यमः प्राण इति पृथक् प्राणं मृत्युनानभिभूतमनुक्रा
मति अयं वै नः श्रेष्ठ इति च श्रेष्ठतामस्यावधारयति तस्मात्तदविरोधेन वागादिषु परिस्पंदलाभस्य प्राणायत्तत्वं तद्रूपभवनं वागादीना
मिति मंतव्यं न तादात्म्यं अत एव च प्राणशब्दस्येंद्रियेषु लाक्षणिकत्वसिद्धिस्तथा च श्रुतिः त एतस्यैव सर्वे रूपमभवन्निति तस्मादेत एते
नाख्यायंते प्राणा इतीति मुख्यप्राणविषयस्यैव प्राणशब्दस्येंद्रियेषु लाक्षणिकीं वृत्तिं दर्शयति तस्मात्तत्त्वांतराणि प्राणादिंद्रियाणी
ति ॥ ॥संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात् ॥२०॥ ॥सत्प्रक्रियायां तेजोबन्नानां सृष्टिं विधायोपदिश्यते सेयं देवतैक्षत हंताहमिमा
स्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति तत्र संशयः किं जीवक
र्तृकमिदं नामरूपव्याकरणं आहोस्वित्परमेश्वरकर्तृकमिति तत्र प्राप्तं तावज्जीवकर्तृकमेवेदं नामरूपव्याकरणमिति कुतः अ
नेन जीवेनात्मनेति विशेषणात् यथा लोके चारेणाहं परसैन्यमनुप्रविश्य संकलयानीत्येवंजातीयके प्रयोगे चारकर्तृकमेव सत्
सैन्यसंकलनं हेतुकर्तृत्वाद्राजात्मन्यध्यारोपयति … व्याकरवाणीत्युत्तमपुरुषप्रयोगेण अपि च डित्थडपित्थादिषु नामसु घट
शरावादिषु च रूपेषु जीवस्यैव व्याकर्तृत्वं दृष्टं तस्माज्जीवकर्तृकमेवेदं नामरूपव्याकरणमित्येवं प्राप्ते अभिधत्ते संज्ञामूर्तिक्लृप्तिस्तु
त्रिवृत्कुर्वत इति तु शब्देन पक्षं व्यावर्तयति संज्ञामूर्तिक्लृप्तिरिति नामरूपव्याक्रियेत्येतत् त्रिवृत्कुर्वत इति परमेश्वरं लक्षयति त्रिवृ
त्करणं तस्य निरपवादकर्तृत्वनिर्देशात् … यैषा संज्ञाक्लृप्तिर्मूर्तिक्लृप्तिश्चाग्निरादित्यश्चंद्रमा विद्युदिति तथा कुशकाशपलाशादिषु
पशुमृगमनुष्यादिषु च प्रत्याकृति प्रतिव्यक्ति चानेकप्रकारा सा खलु परमेश्वरस्यैव तेजोबन्नानां निर्मातुः कृतिर्भवितुमर्हति कु
तः उपदेशात् तथा हि सेयं देवतेत्युपक्रम्य व्याकरवाणीत्युत्तमपुरुषप्रयोगेण परस्यैव ब्रह्मणो व्याकर्तृत्वमिहोपदिश्यते न
नु जीवेनेति विशेषणाज्जीवकर्तृकत्वं व्याकरणस्याध्यवसितं नैतदेवं जीवेनेत्येतदनुप्रवेशेन संबध्यते आनंतर्यात् न व्याक
रवाणीत्यनेन तेन हि संबंधे व्याकरवाणीत्ययं देवताविषय उत्तमपुरुष औपचारिकः कल्प्येत न च गिरिनदीसमुद्रेषु नानाविधे
षु नामरूपेषु अनीश्वरस्य जीवस्य व्याकरणसामर्थ्यमस्ति येष्वपि चास्ति सामर्थ्यं तेष्वपि परमेश्वरायत्तमेव तत् ॥ न जीवो नाम
परमेश्वरादत्यंतभिन्नश्चार इव राज्ञः आत्मनेति विशेषणात् उपाधिमात्रनिबंधनत्वाच्च जीवभावस्य तेन तत्कृतमपि नामरूपव्या

करणं परमेश्वरकृतमेव भवति परमेश्वर एव च नामरूपयोर्व्याकर्तेति सर्वोपनिषत्सिद्धांतः आकाशो वै नाम नामरूपयोर्निर्वहिते
त्यादिश्रुतिभ्यस्तस्मात्परमेश्वरस्यैव त्रिवृत्कुर्वतः कर्म नामरूपव्याकरणं त्रिवृत्करणपूर्वकमेवेदमिह नामरूपव्याकरणं विवक्ष्यते
प्रत्येकं नामरूपव्याकरणस्य तेजोबन्नोत्पत्तिवचनेनैवोक्तत्वात् तच्च त्रिवृत्करणमग्न्यादित्यचंद्रविद्युत्सु श्रुतिर्दर्शयति यदग्ने रोहि
तं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्येत्यादिना तत्राग्निरितीदं रूपं व्याक्रियते सति च रूपव्याकरणे विषयप्रतिलंभा
दग्निरितीदं नाम व्याक्रियते एवमेवादित्यचंद्रविद्युत्स्वपि द्रष्टव्यं ॥ अनेन चाग्न्याद्युदाहरणेन भौमांभसतैजसेषु त्रिष्वपि द्रव्येष्व
विशेषेण त्रिवृत्करणमुक्तं भवत्युपक्रमोपसंहारयोः साधारण्यात् ॥ तथा हि विशेषेणैवोपक्रमः इमास्तिस्रो देवतास्त्रिवृत्त्रिवृदेकै
का भवतीत्यविशेषेणैव चोपसंहारः यदु रोहितमिवाभूदिति तेजसस्तद्रूपमित्येवमादिर्यद्वविज्ञातमिवाभूदित्येतासामेव देवतानां समा
स इत्येवमंतः तासां तिसृणां देवतानां बहिस्त्रिवृत्कृतानां सतीनामध्यात्ममपरं त्रिवृत्करणमुक्तमिमास्तिस्रो देवताः पुरुषं प्रा
प्य त्रिवृत्त्रिवृदेकैका भवतीति तदिदानीमाचार्यो यथाश्रुत्येवोपदर्शयन्नाशंकितं कंचिद्दोषं परिहरिष्यन् ॥ ॥ मांसादि भौमं यथा
शब्दमितरयोश्च ॥ २१ ॥ भूमेस्त्रिवृत्कृतायाः पुरुषेणोपभुज्यमानाया मांसादिकार्यं यथाशब्दं निष्पद्यते ॥ तथा हि श्रुतिः ॥ अन्न
मशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तत्पुरीषं भवति यो मध्यमस्तन्मांसं योऽणिष्ठस्तन्मन इति त्रिवृत्कृता भूमिरेवैषा व्रीहि
यवाद्यन्नरूपेणाद्यत इत्यभिप्रायः तस्याश्च स्थविष्ठं रूपं पुरीषभावेन बहिर्निर्गच्छति मध्यमं मध्यात्मं मांसं वर्धयत्यणि
ष्ठं तु मन एवमितरयोरप्यप्तेजसोर्यथाशब्दं कार्यमवगंतव्यं ॥ मूत्रं लोहितं प्राणश्चापां कार्यमस्थि मज्जा वाक् तेजस इति ॥ अ
त्राह यदि सर्वमेव त्रिवृत्कृतं भूतभौतिकमविशेषश्रुतेस्तासां त्रिवृतं त्रिवृतमेकैकामकरोदिति किंकृतस्तर्ह्ययं विशेषव्यप ४९
देशः इदं तेज इमा आप इदमन्नमिति तथाध्यात्ममिदमन्नस्याशितस्य कार्यं मांसादि इदमपां पीतानां कार्यं लोहितादि इदं
तेजसोऽशितस्य कार्यमस्थ्यादीनि अत्रोच्यते ॥ ॥ वैशेष्यात्तु तद्वादस्तद्वादः ॥ २२ ॥ तुशब्देन चोदितदोषमपनुदति विशेषस्य भा
वो वैशेष्यं भूयस्त्वमिति यावत् सत्यपि त्रिवृत्करणे क्वचित्कस्यचिद्भूतधातोर्भूयस्त्वमुपलक्ष्यते अग्नेस्तेजोभूयस्त्वमुदकस्याब्भूयस्त्वं पृथि

2/1/1913

व्या अन्नभूयस्त्वमिति व्यवहारप्रसिध्यर्थं चेदं त्रिवृत्करणं व्यवहारश्च त्रिवृत्कृतरज्जुवदेकत्वापत्तौ सत्यां न भेदेन भूतत्रयगो
चरो लोकस्य प्रसिध्येत्तस्मात्सत्यपि त्रिवृत्करणे वैशेष्यादेव तेजोबन्नविशेषवादो भूतभौतिकविषय उपपद्यते तद्वादस्त
द्वाद इति पदस्याभ्यासोऽध्यायपरिसमाप्तिं द्योतयति सुसंप्रदायं द्योतयन्नुपसंहरति ॥ ॥ इति श्रीमच्छारीरिकमीमांसा
भाष्ये शंकरभगवत्पादकृतौ द्वितीयाध्यायस्य चतुर्थः पादः समाप्तः ॥ ॥

॥ इतिशारीरकमीमांसाभाष्ये द्वितीयाध्यायः समाप्तः ॥

Bombay Branch of the Royal Asiatic Society

213/1913

अथशंकरभाष्यतृतीयाध्यायप्रारंभः

ब्रं॰भा॰३
१

श्रीगणेशाय नमः॥ हरिः ॐ॥ तदंतरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम्॥१॥ द्वितीयाध्याये स्मृतिन्यायविरोधो वेदांतवि-
हिते ब्रह्मदर्शने परिहृतः॥ परपक्षाणां चानपेक्षितत्वं प्रपंचितम्॥ श्रुतिविप्रतिषेधश्च परिहृतस्तत्र च जीवव्यतिरिक्तानि तत्त्वानि जीवोपकरणा-
नि ब्रह्मणो जायंत इत्युक्तं॥ अथेदानीमुपकरणोपहितस्य संसारगतिप्रकारं तदवस्थान्तराणि ब्रह्मसतत्त्वं विद्याभेदाभेदोपसंहारानुपसंहा-
रौ सम्यग्दर्शनात् पुरुषार्थसिद्धिः सम्यग्दर्शनोपायविधिप्रभेदो मुक्तिफलानियमश्चेत्येतदर्थजातं तृतीये ध्याये निरूपयिष्यते॥ प्रसंगा-
गतं च किमप्यन्यत्॥ तत्र प्रथमे तावत्पादे पंचाग्निविद्यामाश्रित्य संसरगतिप्रभेदः प्रदर्श्यते वैराग्यहेतोः तस्माज्जुगुप्सेतेति चांते श्रवणात्॥
जीवो मुख्यप्राणसचिवः सेंद्रियः समनस्को विद्याकर्मपूर्वप्रज्ञापरिग्रहः पूर्वदेहं विहाय देहांतरं प्रतिपद्यत इत्येतदवगतं॥ अथैनमेते प्राणा
अभिसमायंतीत्येवमादेरन्यतरं कल्याणतरं रूपं कुरुत इत्येवमंतात्संसारप्रकरणस्थाच्छब्दात् धर्माफलोपभोगसंभावाच्च॥ स किं देहबीजै-
र्भूतसूक्ष्मैरसंपरिष्वक्तो गच्छत्याहोस्वित्संपरिष्वक्त इति चिंत्यते॥ किं तावत्प्राप्तमसंपरिष्वक्त इति॥ कुतः करणोपादानवद्भूतोपादानस्याश्रुत-
त्वात्॥ स एतास्तेजोमात्राः समभ्याददान इति ह्यत्र तेजोमात्राशब्देन करणानामुपादानं संकीर्तयति॥ वाक्यशेषे चक्षुरादिसंकीर्तनात् ने-
वं भूतमात्रोपादानसंकीर्तनमस्ति॥ सुलभाश्च सर्वत्र भूतमात्रा यत्रैव देह आरब्धव्यस्तत्रैव संति तासां नयनं निःप्रयोजनं॥ तस्मादसंपरि-
ष्वक्तो यातीत्येवं प्राप्ते पठत्याचार्यस्तदंतरप्रतिपत्तौ रंहति संपरिष्वक्त इति॥ तदंतरप्रतिपत्तौ देहांतरप्रतिपत्तौ देहबीजैर्भूतसूक्ष्मैः संपरिष्व-
क्तो गच्छतीत्यवगंतव्यं॥ कुतः प्रश्ननिरूपणाभ्यां॥ तथा हि प्रश्नो वेत्थ यथा पंचम्यामाहुतावापः पुरुषवचसो भवंतीति॥ निरूपणं च प्रति-
वचनं द्युपर्जन्यपृथिवीपुरुषयोषित्सु पंचस्वग्निषु श्रद्धासोमवृष्ट्यन्नरेतोरूपाः पंचाहुतीर्दर्शयित्वा इति तु पंचम्यामाहुतावापः पुरु-
षवचसो भवंतीति॥ तस्मादद्भिः परिवेष्टितो जीवो व्रजतीति गम्यते॥ ननु अन्या श्रुतिर्जलौकावत्पूर्वदेहं न मुंचति यावन्न देहांतरमाक्रा- ॥१॥
मतीति दर्शयति तत्र यथा तृणजलायुकेति॥ तत्राप्यपरिवेष्टितस्यैव जीवस्य कर्मोपस्थापितप्रतिपत्तव्यदेहविषयभावनादीर्घीभावमात्रं
जलूकयोपमीयत इत्यविरोधः॥ एवं श्रुत्युक्ते देहांतरप्रतिपत्तिप्रकारे सति याः पुरुषमतिप्रभवाः प्रकल्पना व्यापिनां करणानामात्म-
नश्च देहांतरप्रतिपत्तौ कर्मवशाद्वृत्तिलाभस्तत्र भवति केवलस्यैवात्मनो वृत्तिलाभस्तत्र भवतींद्रियाणि च देहवदभिनवान्येव तत्र त-

215/1913

त्र भोगस्थान उत्पद्यंते॥ मन एव वा केवलं भोगस्थानमभिप्रतिपद्यते॥ जीव एव वा उत्प्लुत्य देहाद्देहांतरं प्रतिपद्यते शुक इव वृक्षाद्वृक्षांतरमित्येवमाद्याः
सर्वा एवानादर्तव्याः श्रुतिविरोधात्॥ ननु उदाहृताभ्यां प्रश्नप्रतिवचनाभ्यां केवलाभिरद्भिः संपरिष्वक्तो रंहतीति प्राप्नोति अप्शब्दश्रवणसामर्थ्यात्क-
थं सामान्येन प्रतिज्ञायते सर्वैरेव भूतसूक्ष्मैः संपरिष्वक्तो रंहतीति॥ अत उत्तरं पठति॥ आत्मकत्वात्तु भूयस्त्वात्॥२॥ तुशब्देन चोदितामाशंका-
मुच्छिनत्ति॥ त्र्यात्मिका ह्यापस्त्रिवृत्करणश्रुतेः तास्वारंभिकास्वभ्युपगतासु इतरदपि भूतद्वयमवश्यमभ्युपगंतव्यं भवति॥ त्र्यात्मकश्च देहस्त्र-
याणामपि तेजोबन्नानां तस्मिन्कार्योपलब्धेः॥ पुनश्च त्र्यात्मकस्त्रिधातुत्वात्त्रिभिर्वातपित्तश्लेष्मभिः न स भूतांतराणि प्रत्याख्याय केवला-
भिरद्भिरारब्धुं शक्यते॥ तस्माद्भूयस्त्वापेक्षोऽयमापः पुरुषवचस इति प्रश्नप्रतिवचनयोरप्शब्दो न कैवल्यापेक्षः सर्वदेहेषु हि रसलोहिता-
दि द्रवभूयस्त्वं दृश्यते॥ ननु पार्थिवो धातुर्भूयिष्ठो देहेषूपलक्ष्यते॥ नैष दोषः इतरापेक्षयाप्यां बाहुल्यं भविष्यति दृश्यते च शुक्रशोणित-
लक्षणेऽपि देहबीजे द्रवबाहुल्यं॥ कर्म च निमित्तकारणं देहांतरारंभकर्माणि चाग्निहोत्रादीनि सोमाज्यपयःप्रभृतिद्रवद्रव्यव्यपाश्रया-
णि कर्मसमवायिन्यश्चापः श्रद्धाशब्दोदिताः सह कर्मभिर्द्युलोकाख्येऽग्नौ हूयंत इति वक्ष्यति॥ तस्मादप्यपां बाहुल्यप्रसिद्धिः बाहुल्याच्च
शब्देन सर्वेषामेव देहबीजानां भूतसूक्ष्माणामुपादानमिति निरवद्यं॥ प्राणगतेश्च॥३॥ प्राणानां च देहांतरप्रतिपत्तौ गतिः श्रा-
व्यते तमुत्क्रामंतं सर्वे प्राणा अनूत्क्रामंतीत्यादि॥ श्रुतिभिः सा च प्राणानां गतिर्नाश्रयमंतरेण भवतीत्यतः प्राणगतिप्रयुक्ता॥ तदाश्र-
यभूतानामपामपि भूतांतरोपसृष्टानां गतिरवगम्यते॥ नहि निराश्रयाः प्राणाः क्वचिद्गच्छंति तिष्ठंति वा जीवतोऽदर्शनात्॥ अग्न्यादिगतिश्रु-
तेरिति चेन्न भाक्तत्वात्॥४॥ स्यादेतन्नैव प्राणा देहांतरप्रतिपत्तौ सह जीवेन गच्छंत्यग्न्यादिगतिश्रुतेः॥ तथा हि श्रुतिः मरणकाले वागादयः प्राणा अ-
ग्न्यादीन्देवान्गच्छंतीति दर्शयति॥ यत्रास्य पुरुषस्याग्निं वागप्येति वातं प्राण इत्यादिनेति चेन्न॥ भाक्तत्वाद्वागादीनामग्न्यादिगतिश्रुतिर्गौणी लोमसु
केषु चादर्शनादोषधीर्लोमानि वनस्पतीन्केशा इति तत्राम्नायते॥ न हि लोमानि केशाश्चोत्प्लुत्य ओषधीर्वनस्पतींश्च गच्छंतीति संभवति॥ न च जीवस्य
प्राणोपाधिप्रत्याख्याने गमनमवकल्पते॥ नापि प्राणैर्विना देहांतर उपभोग उपपद्यते॥ विस्पष्टं च प्राणानां सह जीवेन गमनमन्यत्र श्रावितं॥ अतो वागाद्य-
धिष्ठात्रीणामग्न्यादिदेवतानां वागाद्युपकारिणीनां मरणकाल उपकारनिवृत्तिमात्रमपेक्ष्य वागादयोऽग्न्यादीन्गच्छंतीत्युपचर्यते॥ प्रथमेऽश्रवणा-
दिति चेन्न॥ ता एव ह्युपपत्तेः॥५॥ स्यादेतत्कथं पुनः पंचम्यामाहुतावापः पुरुषवचसो भवंतीत्येतन्निर्धार्यते यावता नैव प्रथमेऽग्नावपां श्रवणम-

त्तिः॥ इह द्युलोकप्रभृतयः॥ पंचाग्नयः॥ पंचानामाहुतीनामाधारत्वेनाधीतास्तेषां च प्रथमेऽसौ वाव लोको गौतमाग्निरित्युपन्यस्य त
स्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वतीति श्रद्धा होम्यद्रव्यत्वेन वेदिता॥ न तत्रापो होमद्रव्यतया श्रुताः॥ यदि नाम पर्जन्यादिषूत्तरेषु चतु
र्ष्वग्निष्वपां होमद्रव्यता परिकल्प्यते॥ परिकल्प्यतां नाम प्रत्ययविशेषः प्रसिद्धिसामर्थ्यात्॥ तस्माद्युक्तः पंचम्यामाहुतावपां पुरुषभाव
इति चेत्तेषु होतव्यतया निर्दिष्टानां सोमादीनामब्बहुलत्वोपपत्तेः॥ प्रथमे त्वग्नौ श्रुतां श्रद्धां परित्यज्याश्रुता आपः परिकल्प्यन्त इति सा
हसमेतत्॥ श्रद्धा च नाम यतस्तत्रापि प्रथमेऽग्नौ ता एवापः श्रद्धाशब्देनाभिप्रेयन्ते॥ कुत एतत् उपपत्तेः॥ एवं ह्यादिमध्यावसानसंगानादना
कुलमेतदेकं वाक्यमुपपद्यते॥ इतरथा पुनः पंचम्यामाहुतावपां पुरुषवचस्त्वप्रकारे पृष्टे प्रतिवचनावसरे प्रथमाहुतिस्थाने यद्यनपो होमद्र
व्यं श्रद्धा नामावतारयेत्ततोऽन्यथा प्रश्नोऽन्यथा प्रतिवचनमित्येकवाक्यता न स्यात्॥ इति तु पंचम्यामाहुतावापः पुरुषवचसो भवंतीति चो
पसंहरन्नेतदेव दर्शयति॥ श्रद्धाकार्यं च सोमवृष्ट्यादि स्थूलीभवदब्बहुलं लक्ष्यते॥ सा च श्रद्धाया अप्त्वे युक्तिः॥ कारणानुरूपं कार्यं हि भवति॥
न च श्रद्धाख्यः प्रत्ययो मनसो जीवस्य वा धर्मः सन् धर्मिणो निष्कृष्य होमायोपादातुं शक्यते॥ पश्वादिभ्य इव हृदयादीनीति॥ आप एव
श्रद्धा भवेयुः श्रद्धाशब्दश्चाप्सूपपद्यते॥ वैदिकप्रयोगदर्शनात् श्रद्धा वा आप इति॥ तनुत्वं श्रद्धासारूप्यं गच्छंत्यापो देहबीजभूता इ
त्यतः श्रद्धाशब्दाः स्युर्यथा सिंहपराक्रमो नरः॥ सिंहशब्दो भवतीति॥ श्रद्धापूर्वककर्मसमवायाच्चाप्सु श्रद्धाशब्द उपपद्यते मंचशब्द
इव पुरुषेषु॥ श्रद्धाहेतुत्वाच्च श्रद्धाशब्दोपपत्तिरापो हास्मै श्रद्धां संनमंते पुण्याय कर्मण इति श्रुतेः॥ अश्रुतत्वादिति चेन्नेष्टादिका
रिणां प्रतीतेः॥ ६॥ ॥अथापि प्रश्नप्रतिवचनाभ्यामापः श्रद्धादिक्रमेण पंचम्यामाहुतौ पुरुषाकारं प्रतिपद्येरन्नाम तु तत्संपरिष्व
क्ता जीवा रंहेयुरश्रुतत्वात्॥ न ह्यत्राप इव जीवानां श्रावयिता कश्चिच्छब्दोऽस्ति॥ तस्माद्रंहति संपरिष्वक्त इत्ययुक्तमिति चेन्नैष दोषः॥
कुतः इष्टादिकारिणां प्रतीतेः॥ अथ य इमे ग्राम इष्टापूर्ते दत्तमित्युपासते ते धूममभिसंभवंतीत्युपक्रम्येष्टादिकारिणां धूमादिना ॥२॥
पितृयाणेन पथा चंद्रप्राप्तिं कथयत्याकाशाच्चंद्रमसमेष सोमो राजेति॥ त एवेहापि प्रतीयंते तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां
जुह्वति तस्या आहुतेः सोमो राजा संभवतीति श्रुतिसामान्यात्॥ तेषां चाग्निहोत्रदर्शपूर्णमासादिकर्मसाधनभूता दधिपयःप्रभृतयो द्र
वभूयस्त्वात्प्रत्यक्षमेवापः संति ता आहवनीये हुताः सूक्ष्मा आहुत्यपूर्वरूपाः सत्यस्तानिष्टादिकारिण आश्रयंति॥ तेषां च शरीरं नैधने

217/1913

न विधानेनांत्येऽग्नावृत्विजो जुह्वत्यसौ स्वर्गाय लोकाय स्वाहेति॥ ततस्ताः श्रद्धापूर्वककर्मसमवायिन्य आहुतिमय्य आपोऽपूर्वरूपाः
सत्यस्तानिष्टादिकारिणो जीवान्परिवेष्ट्यामुं लोकं फलदानाय नयंतीति यत्तदत्र जुहोतिनाभिधीयते श्रद्धां जुह्वतीति॥ तथा चा
ग्निहोत्रे षट्प्रश्नीनिर्वचनरूपेण वाक्यशेषेण ते वा एते आहुती हुते उत्क्रामत इत्येवमादिनाग्निहोत्राहुत्योः फलारंभाय लोकांतर
प्राप्तिः प्रदर्शिता॥ तस्मादाहुतिमयीभिरद्भिः संपरिष्वक्ता जीवा रंहंति स्वकर्मफलोपभोगायेति श्लिष्यते॥ कथं पुनरिदमिष्टादि
कारिणां स्वकर्मफलोपभोगाय रंहणं प्रतिज्ञायते यावता तेषां धूमप्रतीकेन वर्त्मना चंद्रमसमधिरूढानामन्नभावं दर्शयत्येष सो
मो राजा तद्देवानामन्नं तं देवा भक्षयंतीति ते चंद्रं प्राप्यान्नं भवंति तांस्तत्र देवा यथा सोमं राजानमाप्यायस्वापक्षीयस्वेत्येवमेनांस्त
त्र भक्षयंतीति च समानविषयं श्रुत्यंतरं॥ न च व्याघ्रादिभिरिव देवैर्भक्ष्यमाणानामुपभोगः संभवतीत्यत उत्तरं पठति॥ ॥भाक्तं वाना
त्मवित्त्वात्तथा हि दर्शयति॥ ७॥ वाशब्दश्चोदितदोषव्यावर्तनार्थः॥ भाक्तमेषामन्नत्वं न मुख्यं॥ मुख्ये ह्यन्नत्वे स्वर्गकामो यजेते
त्येवंजातीयकाधिकारश्रुतिरुपरुध्येत चंद्रमंडले चेदिष्टादिकारिणामुपभोगो न स्यात्किमर्थमधिकारिण इष्टाद्यायासबहुलं क
र्म कुर्युरन्नशब्दश्चोपभोगहेतुत्वसामान्यादनन्नेऽप्युपचर्यमाणो दृश्यते॥ यथा विशोऽन्नं राज्ञां पशवोऽन्नं विशामिति॥ तस्मादिष्ट
स्त्रीपुत्रमित्रभृत्यादिभिरिव गुणभावोपगतैरिष्टादिकारिभिर्यत्सुखविहरणं देवानां तदेवैषां भक्षणमभिप्रेतं न मोदकादिवच्च
र्वणं निगरणं वा॥ न ह वै देवा अश्नंति न पिबंत्येतदेवामृतं दृष्ट्वा तृप्यंतीति च देवानां चर्वणादिव्यापारं वारयति॥ तेषां चेष्टादिकारि
णां देवान्प्रति गुणभावोपगतानामप्युपभोग उपपद्यते॥ राजोपजीविनामिव परिजनानामनात्मवित्त्वाच्चेष्टादिकारिणां देवोपभो
ग्यभाव उपपद्यते॥ तथा हि श्रुतिरनात्मविदां देवोपभोग्यतां दर्शयति॥ अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति न स वेद यथा प
शुरेवं स देवानामिति॥ स चास्मिन्नपि लोके इष्टादिभिः कर्मभिः प्रीणयन् पशुवद्देवानामुपकरोत्यमुष्मिन्नपि लोके तदुपजीवी त
दादिष्टं फलमुपभुंजानः पशुवदेव देवानामुपकरोतीति गम्यते॥ नात्मवित्त्वात्॥ तथा हि दर्शयति॥ इत्यस्यापरा व्याख्या॥ अनात्म
विदो ह्येते केवलकर्मिण इष्टादिकारिणो न ज्ञानकर्मसमुच्चयानुष्ठायिनः॥ पंचाग्निविद्यामिहात्मविद्येत्युपचरंति॥ प्रकरणात्
पंचाग्निविज्ञानविहीनत्वाच्चेदमिष्टादिकारिणां गुणवादेनान्नत्वमुद्भाव्यते॥ पंचाग्निविज्ञानप्रशंसायै पंचाग्निविद्या हीह वि
धित्सिता वाक्यतात्पर्यावगमात्॥ तथा हि श्रुत्यंतरं चंद्रमंडले भोगसद्भावं दर्शयति॥ स सोमलोके विभूतिमनुभूय पुनरावर्तत इति॥ त

शां०भा० ३ तथान्यदपि श्रूयते रमयेयमानं पितॄणां जीतलोकानामानंदाः स एकः कर्मदेवानामानंदो ये कर्मणा देवत्वमभिसंपद्यंत इतीष्टादि-
३ कारिणां देवैः संवसतां भोगप्राप्तिं दर्शयति॥ एवं भोक्तृत्वादन्नवचनस्येष्टादिकारिणो जीवा रंहंतीति प्रतीयते॥ तस्माद्रंहति॥ संपरि-
ष्वक्त मेवोक्तं॥ ॥कृतात्ययेनुशयवान्दृष्टस्मृतिभ्यां यथेतमनेवंच॥ ८॥ इष्टादिकारिणां धूमादिना वर्त्मना चंद्रमंडलमारूढानां भु-
भोगानां ततः प्रत्यवरोह आम्नायते॥ तस्मिन्यावत्संपातमुषित्वाथैतमेवाध्वानं पुनर्निवर्तंते यथेतमित्यारभ्य यावद्रमणीयचरणा
रमणीयचरणीयचरणा ब्राह्मणादियोनिमापद्यंते कपूयचरणाः श्वादियोनिमिति॥ तत्रेदं विचार्यते॥ किं निरनुशया भुक्तकृत्स्नक-
र्मणो वारोहंत्याहोस्वित्सानुशया इति॥ किं तावत्प्राप्तं निरनुशया इति॥ कुतः यावत्संपातमिति विशेषणात् संपातशब्देनात्र कर्मा-
शय उच्यते॥ संपतत्यनेनास्माल्लोकादमुं लोकं फलोपभोगायेति॥ यावत्संपातमुषित्वेति च कृत्स्नस्य तस्य तत्रैव भुक्ततां दर्श-
यति। तेषां यदा तत्पर्यवैतीति च श्रुत्यंतरेणैष एवार्थः प्रदर्श्यते॥ स्यादेतद्यावदमुष्मिंल्लोके उपभोक्तव्यं कर्म तावदुपभुक्त इति क-
ल्पयिष्यामीति। नैवं कल्पयितुं शक्यते। यत्किंचेत्यन्यत्र परामर्शात्॥ प्राप्यांतं कर्मणस्तस्य यत्किंचेह करोत्ययं॥ तस्माल्लोका-
त्पुनरेत्यस्मै लोकाय कर्मण इति ह्यपरा श्रुतिः॥ यत्किंचेति विशेषपरामर्शेन कृत्स्नस्येह कृतस्य कर्मणस्तत्र क्षपिततां दर्शयति॥ अ-
पि च प्रायणमनारब्धफलस्य कर्मणोभिव्यंजकं प्राक् प्रायणादारब्धफलेन कर्मणा प्रतिबद्धस्याभिव्यक्त्यनुपपत्तेः॥ तच्चा-
विशेषाद्यावत्किंचिदनारब्धफलं तस्य सर्वस्याभिव्यंजकं॥ नहि साधारणनिमित्ते नैमित्तिकमसाधारणं भवितुमर्हति॥ न ह्यवि-
शिष्टे प्रदीपसंनिधौ घटोभिव्यज्यते॥ न पट इत्युपपद्यते॥ तस्मान्निरनुशया अवरोहंतीत्येवं प्राप्ते ब्रूमः॥ कृतात्ययेनुशयवानि-
ति॥ येन कर्मबृंदेन चंद्रमसमारूढाः॥ फलोपभोगाय तस्मिन्नुपभोगेन क्षपिते तेषां यदंबुमयं शरीरं चंद्रमस्युपभोगायार-
ब्धं तदुपभोगक्षयदर्शनशोकाग्निसंपर्कात्प्रविलीयते सवितृकरसंपर्कादिव हिमकरकाः हुतभुगर्चिःसंपर्कादिव च घृतकाठि-
न्यं ततः कृतात्यये कृतस्येष्टादिकर्मणः फलोपभोगेनोपक्षये सति सानुशया एवेमम॥ वरोहंति॥ केन हेतुनाह दृष्टस्मृतिभ्या- ३
मित्याह तथा हि प्रत्यक्षा श्रुतिः सानुशयानामवरोहं दर्शयति तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन्॥ ब्रा-
ह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वाथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरन्॥ श्वयोनिं वा सूकरयोनिं वा चं-
डालयोनिं वा इति॥ चरणशब्देनात्रानुशयः सूच्यत इति वर्णयिष्यति दृष्टश्चायं जन्मनैव प्रतिप्राण्युच्चावचरूप उपभोगः प्रवि-
भज्यमान आकस्मिकत्वासंभवादनुशयसद्भावं सूचयत्यभ्युदयप्रत्यवाययोः॥ सुकृतदुःकृतहेतुत्वस्य सामान्यतः शास्त्रेणावग-

219/1913

मितत्वात्॥ स्मृतिरपि वर्णा आश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय ततः शेषेण विशिष्टदेशजातिकुलरूपायुःश्रुतवृत्तवि-
त्तसुखमेधसो जन्म प्रतिपद्यंत इति सानुशयानामेवावरोहं दर्शयति कः पुनरनुशयो नामेति॥ केचित्तावदाहुः स्वर्गार्थस्य कर्मणो भु-
क्तफलस्यावशेषः कश्चिदनुशयो नाम भांडानुसारिस्नेहवद्भांडं रिच्यमानं न सर्वात्मना रिच्यते यथा भांडानुसार्येव कश्चित्स्नेहः शेषो-
वतिष्ठते तथानुशयोपीति॥ ननु कार्यविरोधित्वाददृष्टस्य न भुक्तफलस्यावशेषस्यावस्थानं न्याय्यं॥ नायं दोषो न हि सर्वात्मना
भुक्तफलत्वं कर्मणः प्रतिजानीमहे॥ ननु निरवशेषकर्मफलोपभोगाय चंद्रमंडलमारूढाः॥ बाढं॥ तथापि स्वल्पकर्मावशेष-
मात्रेण तत्रावस्थातुमलभ्यते॥ यथा किल कश्चित्सेवकः सकलैः सेवोपकरणै राजकुलमुपसृप्तश्चिरप्रवासात्परिक्षीणबहू-
पकरणः छत्रपादुकादिमात्रावशेषो न राजकुलेवस्थातुं शक्नोत्येवमनुशयमात्रपरिग्रहो न चंद्रमंडलेवस्थातुं शक्नोतीति॥ न
चैतद्युक्तमिव न हि स्वर्गार्थकर्मणो भुक्तफलस्यावशेषानुवृत्तिरुपपद्यते॥ कार्यविरोधित्वादित्युक्तं॥ नन्वेतदप्युक्तं न स्वर्गफलस्य
कर्मणो निखिलस्य भुक्तफलत्वं भविष्यतीति॥ तदेतदपेशलं स्वर्गार्थं किल कर्म स्वर्गस्थस्यैव स्वर्गफलं निखिलं न जनयति स्व-
र्गच्युतस्यापि कंचित्फललेशं जनयतीति॥ न शब्दप्रमाणकानामीदृशी कल्पना चकल्पते॥ स्नेहभांडे तु स्नेहलेशानुवृत्तिर्दृ-
ष्टत्वादुपपद्यते॥ तथा सेवकस्योपकरणलेशानुवृत्तिर्दृश्यते॥ न त्विह तथा स्वर्गफलस्य कर्मणो लेशोनुवर्तमानोनुशय इति।
यदि हि येन सुकृतेन कर्मणा यागादिना स्वर्गमन्वभूवंस्तस्यैव कश्चिदेकदेशोनुशयः कल्प्येत॥ ततो रमणीय एवैकोनुशयः स्यान्न वि-
परीतस्तत्रेयमनुशयविभागश्रुतिरुपरुध्येत। यत्किंचेत्यविशेषपरामर्शात्सर्वस्येह कृतस्य कर्मणः फलोपभोगेनांतं प्राप्य निरनुशयाऽ
अवरोहंतीति॥ नैतदेवमनुशयसद्भावस्यावगमितत्वात् यत्किंचिदिह कृतमामुष्मिकफलं कर्मारब्धभोगं तत्सर्वं फलोपभोगे-
न क्षपयित्वेति गम्यते॥ यदप्युक्तं प्रायणमविशेषादनारब्धफलं कृत्स्नमेव कर्माभिव्यनक्ति तत्र केनचित्कर्मणामुष्मिन्
लोके फलमारभ्यते केनचिदस्मिन्नित्ययं विभागो न संभवतीति तदप्यनुशयसद्भावप्रतिपादनेनैव प्रत्युक्तमपि च केन
हेतुना प्रायणमनारब्धफलस्य कर्मणोभिव्यंजकं प्रतिज्ञायत इति वक्तव्यं॥ मारब्धफलेन कर्मणा प्रतिबद्धस्येतरस्य वृत्त्यु-
द्भवानुपपत्तेस्तदुपशमात्प्रायणकाले वृत्त्युद्भवो भवतीति यद्युच्यते ततो वक्तव्यं यथैव हि प्राक् प्रायणादारब्धफलेन कर्मणा प्र-
तिबद्धस्येतरस्य वृत्त्युद्भवानुपपत्तिरेवं प्रायणकालेपि विरुद्धफलस्यानेकस्य कर्मणो युगपत्फलारंभासंभवात्प्रतिबद्धस्य दुर्बल-

स्यद्युद्धवानुपपत्तिरिति॥ न ह्यनारब्धफलत्वसामान्येन जात्यंतरोपभोग्यफलमप्यनेकं कर्मैकस्मिन्प्रायणे युगपदभिव्यक्तं
सदेकां जातिमारभत इति शक्यं वक्तुं प्रतिनियतफलत्वविरोधान्नापि कस्यचित्कर्मणः प्रायणेऽभिव्यक्तिः॥ कस्यचिदुच्छेद इति श
क्यं वक्तुं॥ एकांतिकफलत्वविरोधान्नहि प्रायश्चित्तादिभिर्हेतुभिर्विना कर्मणामुच्छेदः संभाव्यते स्मृतिरपि विरुद्धफलेन कर्म
णा प्रतिबद्धस्य कर्मांतरस्य चिरमवस्थानं दर्शयति॥ कदाचित्सुकृतं कर्म कूटस्थमिह तिष्ठति॥ मज्जमानस्य संसारे यावद्दुःखा-
द्विमुच्यते॥ इत्येवं जातीयका॥ यदि च कृत्स्नमनारब्धफलं कर्मैकस्मिन्प्रायणेऽभिव्यक्तं सदेकां जातिमारभेत॥ ततः स्वर्गनरक-
तिर्यग्योनिष्वधिकारानवगमाद्धर्माधर्मानुत्पत्तौ निमित्ताभावान्नोत्तरा जातिरुपपद्येत॥ ब्रह्महत्यादीनां चैकैकस्य कर्मणोऽनेकजन्मनिमि
त्तत्वं स्मर्यमाणमुपरुध्येत न च धर्माधर्मयोः स्वरूपसाधनादिसमधिगमः शास्त्रादतिरिक्तकारणशक्यः संभावयितुं॥ न च दृष्टफल
स्य कर्मणः कारीर्यादेः प्रायणमभिव्यंजकं संभवतीत्यव्यापिकापीयं प्रायणस्याभिव्यंजकत्वकल्पना॥ प्रदीपोपन्यासोऽपि कर्म
बलाबलप्रदर्शनेनैव प्रतिनीतः स्थूलसूक्ष्मरूपाभिव्यक्तिवच्चेदं द्रष्टव्यं॥ यथा प्रदीपः समानेऽपि संनिधाने स्थूलं रूपमभि
व्यनक्ति न सूक्ष्ममेवं प्रायणं समानेऽप्यनारब्धफलस्य कर्मजातस्य प्राप्तावसरत्वे बलवतः कर्मणो वृत्तिमुद्भावयति न दुर्बलस्ये
ति॥ तस्माच्छ्रुतिस्मृतिन्यायविरोधादश्लिष्टोऽयमशेषकर्माभिव्यक्त्यभ्युपगमः॥ शेषकर्मसद्भावे निर्मोक्षप्रसंग इत्ययमप्यस्था
ने संभ्रमः सम्यग्दर्शनादशेषकर्मक्षयश्रुतेः॥ तस्मात्स्थितमेतदनुशयवंतोऽवरोहंतीति॥ ते चावरोहंतो यथेतमनेवं चावरोहंति॥ य
थेतमिति यथागतमित्यर्थः॥ अनेवमिति तद्विपर्ययेणेत्यर्थः॥ धूमाकाशयोः पितृयाणेऽध्वन्युपात्तयोरवरोहे संकीर्तनाद्य
थेतशब्दाच्च यथागतमिति प्रतीयते॥ रात्र्याद्यसंकीर्तनादभ्राद्युपसंख्यानाच्च विपर्ययोऽपि प्रतीयते॥ॐ॥ चरणादिति चेन्नो
पलक्षणार्थेति कार्ष्णाजिनिः॥९॥ अथापि स्याद्या श्रुतिरनुशयसद्भावप्रतिपादनायोदाहृता तद्य इह रमणीयचरणा इ
ति सा खलु चरणाद्योन्यापत्तिं दर्शयति नानुशयादन्यच्चरणमन्योऽनुशयश्चरणं चारित्रमाचारः शीलमित्यनर्थांतरम॥ अ
नुशयस्तु भुक्तफलात्कर्मणोऽतिरिक्तं कर्माभिप्रेतं॥ श्रुतिश्च कर्माचरणे भेदेन व्यपदिशति यथाकारी यथाचारी तथा
भवतीति॥ यान्यनवद्यानि कर्माणि तानि सेवितव्यानि यान्यस्माकं सुचरितानि तानि त्वयोपास्यानीति च॥ तस्माच्चरणाद्योन्या
पत्तिश्रुतेर्नानुशयसिद्धिरिति चेन्नैष दोषो यतोऽनुपलक्षणार्थैषा चरणश्रुतिः कार्ष्णाजिनिराचार्यो मन्यते॥ॐ॥ आनर्थ ॥४॥

221/1913

क्यमिति चेन्न तदपेक्षत्वात्॥१०॥ स्यादेतत्कस्मात्पुनश्चरणशब्देन श्रौतं शीलं विहाय लाक्षणिकोऽनुशयः प्रत्याय्यते॥ ननु शीलस्यै
व श्रौतस्य विहितप्रतिषिद्धस्य साध्वसाधुरूपस्य शुभाशुभयोन्यापत्तिः फलं भविष्यति॥ अवश्यं च शीलस्यापि किंचित्फलमभ्युपग
न्तव्यमन्यथा ह्यानर्थक्यमेव शीलस्य प्रसज्येतेति चेन्नैष दोषः कुतः॥ तदपेक्षत्वात्॥ इष्टादि हि कर्मजातं चरणापेक्षं॥ नहि सदाचारही
नः कश्चिदधिकृतः स्यादाचारहीनं न पुनंति वेदा इत्यादिस्मृतिभ्यः॥ पुरुषार्थत्वेऽप्याचारस्य नानर्थक्यमिष्टादिकर्मजाते फलमारभ
माणे तदपेक्ष एवाचारस्तत्रैव कंचिदतिशयमारप्स्यते॥ कर्म च सर्वार्थकारीति श्रुतिस्मृतिप्रसिद्धिस्तस्मात्कर्मैव शीलोपलक्षितमनुशय
भूतं योन्यापत्तौ कारणमिति कार्ष्णाजिनेर्मतं॥ नहि कर्मणि संभवति शीलाद्योन्यापत्तिर्युक्ता॥ नहि पद्भ्यां पलायितुं पारयमाणो जानुभ्यां
रंहितुमर्हतीति॥ॐ॥ सुकृतदुष्कृते एवेति तु बादरिः॥११॥ बादरिस्त्वाचार्यः सुकृतदुष्कृते एव चरणशब्देन प्रत्याय्येते इति मन्यते॥ चर
णमनुष्ठानं कर्मेत्यनर्थांतरं॥ तथा ह्यविशेषेण कर्ममात्रे चरतिः प्रयुज्यमानो दृश्यते॥ यो हीष्टादिलक्षणं पुण्यं कर्म करोति तं लौकिका
आचक्षते धर्मं चरत्येष महात्मेति॥ आचारोऽपि च धर्मविशेष एव॥ भेदव्यपदेशस्तु कर्मचरणयोर्ब्राह्मणपरिव्राजकन्यायेनाप्युपपद्यते॥
तस्माद्रमणीयचरणाः प्रशस्तकर्माणः कपूयचरणा निंदितकर्माण इति निर्णयः॥ॐ॥ अनिष्टादिकारिणामपि च श्रुतं॥१२॥ इष्टादिका
रिणश्चंद्रमंडलं गच्छंतीत्युक्तं॥ ये त्वन्ये इष्टादिकाकारिभ्यामपि किं चंद्रमसं गच्छंत्युत न गच्छंतीति चिंत्यते॥ तत्र तावदाह॥ इष्टादिकारिण ए
व चंद्रमंडलं गच्छंतीत्येतन्न॥ कस्माद्यतोऽनिष्टादिकारिणामपि चंद्रमंडलं गंतव्यत्वं श्रुतं॥ तथा ह्यविशेषेण कौषीतकिनः समामनंति॥ ये
वै के चास्माल्लोकात्प्रयंति चंद्रमसमेव ते सर्वे गच्छंतीति॥ देहारंभोऽपि च पुनर्जायमानानां नांतरेण चंद्रप्राप्तिमवकल्पते॥ पंचम्यामाहुता
वित्याहुतिसंख्यानियमात्॥ तस्मात्सर्व एव चंद्रमसमासीदेयुः॥ इष्टादिकारिणामितरेषां च समानगतित्वं न युक्तमिति चेन्न॥ इत
रेषां चंद्रमंडले भोगाभावात्॥ॐ॥ संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात्॥१३॥ तुशब्दः पक्षं व्यावर्तयति॥ नैतदस्ति
सर्वे चंद्रमसं गच्छंतीति॥ भोगाय हि चंद्रारोहणं न निःप्रयोजनं नापि प्रत्यवरोहायैव यथा कश्चिद्वृक्षमारोहति पुष्पफलोपादानाय
न निःप्रयोजनं नापि पतनायैव॥ भोगश्चानिष्टादिकारिणां चंद्रमसि नास्तीत्युक्तं तस्मादिष्टादिकारिण एव चंद्रमसमारोहंति नेतरे
न तु संयमनं यमालयमवगाह्य स्वदुष्कृतानुरूपा यामीर्यातना अनुभूय पुनरेवेमं लोकं प्रत्यवरोहंति॥ एवंभूतौ तेषामारोहाव
रोहौ भवतः॥ कुतस्तद्गतिदर्शनात्॥ तथा हि यमवचनस्वरूपा श्रुतिः प्रयतामनिष्टादिकारिणां यमवश्यतां दर्शयति॥ न सांपरायः

प्रतिभाति बालं प्रमाद्यंतं वित्तमोहेन मूढं ॥ अयं लोको नास्ति पर इति मानी पुनः पुनर्वशमापद्यते मे इति ॥ वैवस्वतं संगमनं जनानामित्ये
शां०भा०३ वंजातीयकं च बह्वेव यमवश्यतापत्तिलिंगं भवति ॥ ॐ ॥ स्मरंति च ॥ १४ ॥ अपि च मनुव्यासप्रभृतयः शिष्टाः संयमने पुरे यमाय
॥५॥ त्तं कुत्सितकर्मविपाकं स्मरंति नाचिकेतोपाख्यानादिषु ॥ ॐ ॥ अपि सप्त ॥ १५ ॥ अपि च सप्त नरकाः रौरवप्रमुखा दुःकृतकर्मफलो
पभोगभूमित्वेन स्मर्यंते पौराणिकैस्ताननिष्टादिकारिणः प्राप्नुवंति चित्रगुप्तादयो नानाधिष्ठातारः स्मर्यंत इति चेत्याह ॥ ॐ ॥ तत्रापि च तद्व्यापारादवि
रोधः ॥ १६ ॥ तेष्वपि च सप्तसु नरकेषु तस्यैव यमस्याधिष्ठातृत्वव्यापाराभ्युपगमादविरोधः ॥ यमप्रयुक्ता एव हि ते चित्रगुप्तादयोऽधि
ष्ठातारः स्मर्यंते ॥ ॐ ॥ विद्याकर्मणोरिति तु प्रकृतत्वात् ॥ १७ ॥ पंचाग्निविद्यायां वेत्थ यथासौ लोको न संपूर्यत इत्यस्य प्रश्नस्य प्रतिवच
नावसरे श्रूयते अथैतयोः पथोर्न कतरेण चन तानीमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भवंति जायस्व म्रियस्वेत्येतत्तृतीयं स्थानं ॥ तेना
सौ लोको न संपूर्यत इति ॥ तत्रैतयोः पथोरिति विद्याकर्मणोरित्येतत् कस्मात् प्रकृतत्वात् ॥ विद्याकर्मणी हि देवयानपितृयाणयोः पथोः प्र
तिपत्तौ प्रकृते तद्य इत्थं विदुरिति विद्यया प्रतिपत्तव्यो देवयानः पंथाः प्रकीर्तितः ॥ इष्टापूर्ते दत्तमिति कर्मणा प्रतिपत्तव्यः पितृ
यानः पंथाः प्रकीर्तितस्तत्प्रक्रियायामथैतयोः पथोर्न कतरेण चनेति श्रुतं एतदुक्तं भवति ॥ ये न विद्यासाधनेन देवयानपथ्यधिकृ
ता नापि कर्मणा पितृयाणे तेषामेव क्षुद्रजंतुलक्षणोऽसकृदावर्ती तृतीयः पंथा भवतीति ॥ तस्मादपि नानिष्टादिकारिभिश्चंद्रमाः प्राप्य
ते स्यात्तत्तेऽपि चंद्रमसं आरुह्य ततोऽवरुह्य क्षुद्रजंतुत्वं प्रतिपत्स्यंत इति ॥ तदपि नारोहस्यारोहानर्थक्यात् ॥ अपि च सर्वेषु प्रयत्सु चंद्र
लोकं प्राप्नुवत्सु असौ लोकः प्रयद्भिः संपूर्यते ततः प्रश्नविरुद्धं प्रतिवचनं प्रसज्यते ॥ तथा हि प्रतिवचनं दातव्यं यथासौ लोको न संपूर्यते विरोहा
भ्युपगमादसंपूरणोपपत्तिरिति चेन्न श्रुतत्वात् ॥ सत्यमवरोहादप्यसंपूरणमुपपद्यते ॥ श्रुतिस्तु तृतीयस्थानसंकीर्तनेनासंपूरणं दर्शय
त्येतत् तृतीयं स्थानं ॥ तेनासौ लोको न संपूर्यत इति ॥ तेनानारोहादेवासंपूरणमिति युक्तं अवरोहस्य इष्टादिकारिष्वप्यविशिष्टत्वे सति तृ ॥५॥
तीयस्थानोक्त्यानर्थक्यप्रसंगात् ॥ तु शब्दस्तु प्रारब्धां शरीरवाक्यप्रभवामाशंकामुच्छिनत्ति ॥ एवं सत्यधिकृतापेक्षः कौषीत
कीयवाक्ये सर्वशब्दो व्यवतिष्ठते ॥ यद्वा केचाधिकृताः अस्माल्लोकात्प्रयंति चंद्रमसमेव ते सर्वे गच्छंतीति ॥ यत्पुनरुक्तं देहलाभोपपत्तये
सर्वे चंद्रमसं गंतुमर्हंति पंचम्यामाहुतावित्याहुतिसंख्यानियमादिति तत्प्रत्युच्यते ॥ ॐ ॥ न तृतीये तथोपलब्धेः ॥ न तृतीयस्थाने देहला
भाय पंचसंख्यानियम आहुतीनामादर्तव्यः ॥ कुतः तथोपलब्धेः ॥ तथा ह्यंतरेणैवाहुतिसंख्यानियमं वर्णितेन प्रकारेण तृतीयस्थान

223/1713

प्राप्तिरुपलभ्यते ॥ जायस्व म्रियस्वेत्येतत्तृतीयं स्थानमिति ॥ अपि च पंचम्यामाहुतावापः पुरुषवचसो भवंतीति मनुष्यशरीरहेतुत्वेना
हुतिसंख्या संकीर्त्यते न कीटपतंगादिशरीरहेतुत्वेन पुरुषशब्दस्य मनुष्यजातिवचनत्वात् ॥ अपि च पंचम्यामाहुतावापः पुरुषवचसो
भवंतीत्युपदिश्यते नापंचम्यां प्रतिषिध्यते ॥ वाक्यस्य द्व्यर्थतादोषात् ॥ तत्र येषामारोहावरोहौ संभवतस्तेषां पंचम्यामाहुतौ देह उद्भविष्यति येषां तु विनैवाहुतिसंख्यया भूतो
तरोपसृष्टाभिरद्भिर्देह आरप्स्यते ॥ ॐ ॥ स्मर्यतेऽपि च लोके ॥ १९ ॥ अपि च स्मर्यते लोके द्रोणधृष्टद्युम्नप्रभृतीनां सीताद्रौपदीप्रभृतीनां चायो
निजत्वं ॥ तत्र द्रोणादीनां योषिद्विषयैकाहुतिर्नास्ति ॥ धृष्टद्युम्नादीनां तु योषित्पुरुषविषये द्वे अप्याहुती न स्तः ॥ यथा च तत्राहुतिसंख्याना
नादर एवमन्यत्रापि भविष्यति ॥ बलाकाप्यंतरेणैव रेतःसेकं गर्भं धत्त इति लोकरूढिः ॥ ॐ ॥ दर्शनाच्च ॥ २० ॥ अपि च चतुर्विधे भूतग्रामे जरा
यजांडजस्वेदजोद्भिज्जलक्षणे स्वेदजोद्भिज्जयोरंतरेणैव ग्राम्यधर्ममुत्पत्तिदर्शनादाहुतिसंख्यानादरो भवत्येवमन्यत्रापि भविष्यति
ननु तेषां खल्वेषां भूतानां त्रीण्येव बीजानि भवंत्यांडजं जीवजमुद्भिज्जमित्यत्र त्रिविध एव भूतग्रामः श्रूयते ॥ कथं चतुर्विधत्वं भूतग्रामस्य प्रति
ज्ञातमिति अत्रोच्यते ॥ ॐ ॥ तृतीयशब्दावरोधः संशोकजस्य ॥ २१ ॥ आंडजं जीवजमुद्भिज्जमित्यत्र तृतीयेनोद्भिज्जशब्देनैव स्वेदजोपसंग्रहः कृतः प्र
त्येतव्यः ॥ उभयोरपि स्वेदजोद्भिज्जयोर्भूम्युदकोद्भेदप्रभवत्वस्य तुल्यत्वात् ॥ स्थावरोद्भेदात्तु विलक्षणो जंगमोद्भेद इत्यन्यत्र स्वेदजोद्भिज्जयो
र्भेदवाद इत्यविरोधः ॥ ॐ ॥ स्वाभाव्यापत्तिरुपपत्तेः ॥ २२ ॥ इष्टादिकारिणश्चंद्रमसमारुह्य तस्मिन्यावत्संपातमुषित्वा ततः सानुशया अव
रोहंतीत्युक्तं अथावरोहप्रकारः परीक्ष्यते तत्रेदमवरोहश्रुतिर्भवत्यथैतमेवाध्वानं पुनर्निवर्तंते यथेतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमो भवति ॥
धूमो भूत्वाभ्रं भवत्यभ्रं भूत्वा मेघो भवति मेघो भूत्वा प्रवर्षतीति ॥ तत्र संशयः ॥ किमाकाशादिस्वरूपमेवावरोहंतः प्रतिपद्यंते किं वाकाशा
दिसाम्यमिति ॥ तत्र प्राप्तं तावदाकाशादिस्वरूपमेव प्रतिपद्यंत इति ॥ कुतः एवं श्रुतिर्भवति ॥ इतरथा लक्षणा स्यात् अति लक्षणा विशये च श्रु
तिर्व्याख्यानलक्षणा तथा च वायुर्भूत्वा धूमो भवतीत्येवमादीन्यक्षराणि तत्स्वरूपापत्तावेवंकल्प्यते ॥ तस्मादाकाशादिस्वरूपप्रतिपत्तिरित्येवं
प्राप्ते ब्रूमः ॥ आकाशादिसाम्यं प्रतिपद्यंत इति ॥ चंद्रमंडले यदम्मयं शरीरमुपभोगार्थमारब्धं तदुपभोगक्षये सति प्रविलीयमानं सूक्ष्ममाकाश
सममं भवति ॥ ततो वायोर्वशमेति ॥ ततो धूमादिभिः संपृच्यत इति ॥ तदेतदुच्यते ॥ यथेतमाकाशमाकाशाद्वायुमित्येवमादिना ॥ कुत एतदुपपत्तेः एवं ह्येतदुपपद्य
ते ॥ न ह्यन्यस्यान्यभावो मुख्य उपपद्यते ॥ आकाशादिस्वरूपप्रतिपत्तौ च वायादिक्रमेणावरोहो नोपपद्यते ॥ विभुत्वाच्चाकाशेन नित्यसंबंधत्वा
न्न तत्सादृश्यापत्तेरन्यस्तत्संबंधो घटते ॥ श्रुत्यसंभवे च लक्षणाश्रयणं न्याय्यमेव ॥ अतिआकाशादितुल्यतापत्तिरेवात्राकाशादिभावाइत्यु
पचर्यते ॥ ॐ ॥ नातिचिरेण विशेषात् ॥ २३ ॥ तत्राकाशादिप्रतिपत्तौ प्राग्व्रीह्यादिप्रतिपत्तेर्भवति विशयः ॥ किं दीर्घं कालं पूर्वसादृश्येनाव-

ग्रं०भा३
६

स्थायां न रसादश्यं गच्छत्युतात्यमिति॥ तत्रानियमो नियमकारिणः शास्त्रस्याभावादित्येवं प्राप्त उत्तरमाह॥ नातिचिरेणेति॥ किमत्यम
ल्पं कालमाकाशादिभावेनावस्थाय वर्षधाराभिरिह मामापतन्ति॥ कुतः एतद्विशेषदर्शनात्॥ तथाहि व्रीह्यादिभावापत्तेरनन्तरं विशिन
ष्टमेव खल्वदुर्निष्प्रपतरमिति॥ नकारस्य कत्वादस्याप्रक्रियया लुप्तो मन्तव्यः॥ दुर्निष्प्रपतरं दुर्निष्प्रपतरं दुःखतरमस्माद्व्रीह्यादिभावा
न्निःसरणं भवतीत्यर्थः॥ तदत्र दुःखं निःप्रपतनं दर्शयत् पूर्वेषु सुखं निःप्रपतनं दर्शयति॥ सुखदुःखताविशेषश्चायं निःप्रपतनस्य कालाल्प
त्वदीर्घत्वनिमित्तस्तस्मिन्नवधौ शरीरानिष्पत्तेरुपभोगासंभवात्तस्माद्व्रीह्यादिभावापत्तेः॥ प्रागल्पेनैव कालेनावरोहः स्यादिति॥ ॐ॥
अन्याधिष्ठितेषु पूर्ववदभिलापात्॥ २४॥ तस्मिन्नेवावरोहे प्रवर्षणानन्तरं पठ्यते त इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा इति जायं
त इति॥ तत्र संशयः॥ किमस्मिन्नवधौ स्थावरजात्यापन्नाः स्थावरसुखदुःखभाजोऽनुशयिनो भवंत्याहोस्वित्क्षेत्रज्ञांतराधिष्ठितेषु स्थावरश
रीरेषु संश्लेषमात्रं गच्छंतीति॥ किं तावत्प्राप्तं स्थावरजात्यापन्नाः तत्सुखदुःखभाजोऽनुशयिनो भवंतीति॥ कुत एतत्॥ एवं जन्मनो मुख्यत्वोपपत्तेः
स्थावरभावस्य च श्रुतिस्मृत्योरुपभोगस्थानत्वप्रसिद्धेः पशुहिंसादियोगाच्चेष्टादेः कर्मजातस्यानिष्टफलत्वोपपत्तेस्तस्मान्मुख्यमेवेदमपि
व्रीह्यादिजन्म श्वादिजन्मवद्यथा श्वयोनिं वा सूकरयोनिं वा चांडालयोनिं वेति मुख्यमेवानुशयिनां श्वादिजन्म तत्सुखदुःखान्वितं भवत्येवं व्रीह्या
दिजन्मापीत्येवं प्राप्ते ब्रूमः अन्यैर्जीवैरधिष्ठितेषु व्रीह्यादिषु संसर्गमात्रमनुशयिनः प्रतिपद्यन्ते न तत्सुखदुःखभाजो भवंति॥ पूर्ववत्॥ यथा वायुधूमा
दिभावोऽनुशयिनां तत्संश्लेषमात्रमेवं व्रीह्यादिभावोऽपि जातिस्थावरैः संश्लेषमात्रं॥ कुत एतत् तद्वदेव हि इहाप्यभिलापात्॥ कोऽभिलापस्य तद्भावः॥ क
र्मव्यापारमंतरेण संकीर्तनं॥ यथाकाशादिषु प्रवर्षणांतेषु न कंचित्कर्मव्यापारं परामृशत्येवं व्रीह्यादिजन्मन्यपि तस्मान्नास्त्यत्र सुखदुः
खभाक्त्वमनुशयिनां॥ यत्र तु सुखदुःखभाक्त्वमभिप्रेति परामृशति तत्र कर्मव्यापारं रमणीयचरणाः कपूयचरणा इति च॥ अपि च मुख्ये
ऽनुशयिनां व्रीह्यादिजन्मनि व्रीह्यादिषु लूयमानेषु कंड्यमानेषु पच्यमानेषु भक्ष्यमाणेषु च तदभिमानिनोऽनुशयिनः प्रवसेयुः यो हि जी
वो यच्छरीरमभिमन्यते स तस्मिन्पीड्यमाने प्रवसतीति प्रसिद्धं॥ तत्र व्रीह्यादिभावाद्रेतःसिग्भावोऽनुशयिनां नाभिलप्येत ततः संसर्गमा
त्रमनुशयिनामन्याधिष्ठितेषु व्रीह्यादिषु भवति। एतेन जन्मनो मुख्यार्थत्वं प्रतिब्रूयादुपभोगस्थानत्वं च स्थावरभावस्य॥ न च वयमुपभोगस्था
वरभावस्यापजानीमहे॥ भवत्वन्येषां जंतूनामपुण्यसामर्थ्येन स्थावरभावमुपगतानां नामैतदुपभोगस्थानं॥ चंद्रमसस्त्ववरोहंतोऽनुशयिनो
न स्थावरभावमुपभुंजत इत्याचक्ष्महे॥ ॐ॥ अशुद्धमिति चेन्न शब्दात्॥ २५॥ यत्पुनरुक्तं पश्वादिहिंसादियोगादशुद्धमाध्वरिकं कर्म त
स्यानिष्टमपि फलमवकल्प्यत इत्यतो मुख्यमेवानुशयिनां व्रीह्यादिजन्मास्तु॥ तत्र गौणीकल्पनानर्थिकेति तत्परिह्रियते न शास्त्रहेतुः॥ ६

225/1918

त्वाद्धर्माधर्मविज्ञानस्य॥ अयं धर्मोऽयमधर्म इति शास्त्रमेव विज्ञाने कारणमतींद्रियत्वात्तयोरनियतदेशकालनिमित्तत्वाच्च यस्मि
न्देशकाले निमित्ते च यो धर्मोऽनुष्ठीयते स एव देशकालनिमित्तांतरेष्वधर्मो भवति तेन न शास्त्राद्धर्माधर्मविषयं विज्ञानं कस्यचिद
स्ति॥ शास्त्राच्च हिंसानुग्रहाद्यात्मको ज्योतिष्टोमो धर्म इत्यवधारितः स कथमशुद्ध इति शक्यते वक्तुं॥ ननु न हिंस्यात्सर्वा भूतानी
ति शास्त्रमेव भूतविषयां हिंसामधर्म इत्यवगमयति॥ बाढं उत्सर्गस्तु सः अपवादोऽग्नीषोमीयं पशुमालभेतेति उत्सर्गापवादयोश्च व्य
वस्थितविषयत्वं॥ तस्माद्विशुद्धं वैदिकं कर्म शिष्टैरनुष्ठीयमानत्वादनिंद्यमानत्वाच्च॥ न तस्य प्रतिरूपं फलं जातिस्थावरत्वं॥ न च श्वा
दिजन्मवदपि व्रीह्यादिजन्म भवितुमर्हति॥ तद्धि कपूयचरणानधिकृत्योच्यते नैवमिह वैशेषिकः॥ कश्चिदधिकारोऽस्त्यतश्चंद्रमं
डलस्खलितानामनुशयिनां व्रीह्यादिसंश्लेषमात्रं तद्भाव इत्युपचर्यते॥ ॐ॥ रेतःसिग्योगोऽथ॥ २६॥ इतश्च व्रीह्यादिसंश्लेषमात्रं त
द्भावोपचारेण व्रीह्यादिभावस्यानंतरं रेतःसिग्भाव आम्नायते॥ यो यो ह्यन्नमत्ति यो रेतः सिंचति
तद्भूय एव भवतीति॥ न चात्र मुख्यो रेतःसिग्भावः संभवति॥ चिरजातो हि प्राप्तयौवनो रेतःसिग्भवति कथमिवानुपचरितं तद्भावमद्यमा
नान्नानुगतोऽनुशयी प्रतिपद्येत॥ तत्र तावदवश्यमवगम्यते नावरोहे व्रीह्यादिभावावसरे तच्छरीरत्वयोरेतःसिग्योग एव रेतःसिग्भावोऽनुग
तव्यस्तद्वद्व्रीह्यादिभावोऽपि व्रीह्यादियोग एवेत्यविरोधः॥ ॐ॥ योनेः शरीरं॥ २७॥ अथ रेतःसिगवस्थानंतरं योनौ निषिक्ते रेतसि यो
नेः शरीरमनुशयिनामनुशयफलोपभोगाय जायत इत्याह शास्त्रं तद्य इह रमणीयचरणा इत्यादि॥ तस्मादप्यत्रैव सुखदुःखा
न्वितं भवतीति॥ तस्माद्व्रीह्यादिसंश्लेषमात्रमनुशयिनां तज्जन्मेति सिद्धं॥ २७॥ इति श्रीमच्छारीरकमीमांसाभाष्ये शंकरभगवत्पा
दकृतौ तृतीयाध्यायस्य प्रथमः पादः॥ १॥ संध्ये सृष्टिराह हि॥ १॥ अतिक्रांते पादे पंचाग्निविद्यामुदाहृत्य जीवस्य संसारगतिप्र
भेदः प्रपंचितः इदानीं तस्यैवावस्थाप्रभेदः प्रपंच्यते॥ इदमामनंति॥ स यत्र प्रस्वपितीत्युपक्रम्य न तत्र रथा न रथयोगा न पंथानो भवंत्यथ
रथान्रथयोगान्पथः सृजत इत्यादि॥ तत्र संशयः किं प्रबोध इव स्वप्नेऽपि पारमार्थिकी सृष्टिराहोस्विन्मायामयीति॥ तत्र तावत्प्र
तिपद्यते संध्ये सृष्टिरिति॥ संध्यमिति स्वप्नस्थानमाचष्टे॥ वेदे प्रयोगदर्शनात्॥ संध्यं तृतीयं स्वप्नस्थानमिति॥ द्वयोर्लोकस्थानयोः
प्रबोधसंप्रसादस्थानयोर्वा संधौ भवतीति संध्यं॥ तस्मिन्संध्ये स्थाने तथारूपा सृष्टिर्भवितुमर्हति॥ कुतः यतः प्रमाणभूता श्रु
तिरेवमाह अथ रथान्रथयोगान्पथः सृजत इत्यादि स हि कर्तेति चोपसंहारादेवमेवावगम्यते॥ ॐ॥ निर्मातारं चैके पुत्रादयश्च॥ २॥

शं०भा०३ अपि चैके शाखिन एतस्मिन्नेव संध्ये स्थाने कामानां निर्मातारमात्मानमामनंति॥ य एषु सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाण इ
॥७॥ ति॥ पुत्रादयश्च तत्र कामा अभिप्रेयंते काम्यंत इति॥ ननु कामशब्देनेच्छाविशेषा एवोच्येरन्नात्मनः॥ शतायुषः पुत्रपौत्रान्वृणीष्वेति प्रकृ
त्यांते कामानां त्वा कामभाजं करोमीति प्रकृतेषु तत्र पुत्रादिषु कामशब्दस्य प्रयुक्तत्वात्॥ प्राज्ञं चैनं निर्मातारं प्रकरणवाक्यशेषाभ्यां प्र
तीमः॥ प्राज्ञस्य हीदं प्रकरणमन्यत्र धर्मादन्यत्राधर्मादित्यादि तद्विषय एव च वाक्यशेषोपि॥ तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते॥ त
स्मिँल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चनेति प्राज्ञकर्तृका च सृष्टिस्तथ्यरूपा समधिगता जागरिताश्रया॥ तथा स्वप्नाश्रया॥ तथा
स्वप्नाश्रयापि सृष्टिर्भवितुमर्हति॥ तथा च श्रुतिः अथो खल्वाहुर्जागरितदेश एवास्यैष इति यानि ह्येव जाग्रत्पश्यति॥ तानि सुप्त इति स्व
प्नजागरितयोः समानन्यायतां श्रावयति॥ तस्मात्तथ्यरूपैव संध्ये सृष्टिरित्येवं॥ प्राप्ते प्रत्याह॥ ॐ॥ मायामात्रं तु कार्त्स्न्येनानभि
व्यक्तस्वरूपत्वात्॥ ३॥ तुशब्दः पक्षं व्यावर्तयति॥ नैतदस्ति यदुक्तं संध्ये सृष्टिः पारमार्थिकीति॥ मायैव संध्ये सृष्टिर्न परमार्थगंधोप्य
स्ति॥ कुतः कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात्॥ न हि कार्त्स्न्येन परमार्थवस्तुधर्मेणाभिव्यक्तस्वरूपः स्वप्नः॥ किं पुनरत्र कार्त्स्न्यमभिप्रेतं॥ दे
शकालनिमित्तसंपत्तिरबाधश्च॥ न हि परमार्थवस्तुविषयाणि देशकालनिमित्तान्यबाधश्च स्वप्ने संभाव्यंते॥ न तावत्स्वप्ने रथादीनामुचि
तो देशः संभवति॥ न हि देहदेशे रथादयोवकाशं लभेरन् स्यादेतद्बहिर्देहात्स्वप्नं द्रक्ष्यति॥ देशांतरितद्रव्यग्रहणात्॥ दर्शयति च श्रुतिर्बहि
र्देहात्स्वप्नं बहिष्कुलायादमृतश्चरित्वा स ईयतेमृतो यत्रकाममिति स्थितिगतिप्रत्ययभेदश्च नानिःसृते जंतौ सामंजस्यमवकल्प
त इति नेत्युच्यते॥ न हि सुप्तस्य जंतोः क्षणमात्रेण योजनशतांतरितं देशं पर्येतुं विपर्येतुं च ततः सामर्थ्यं संभाव्यते क्वचिच्च प्रत्यागमनवर्जि
तं स्वप्नं श्रावयति॥ कुरुष्वहमद्य शयानो निद्रयाभिप्लुतः स्वप्ने पांचालानभिगतश्चास्मिन्प्रतिबुद्धश्चेति॥ देहाच्चेदपेयात्पांचाले
षु प्रतिबुध्येत तानभिगत इति॥ कुरुष्वेव तु प्रतिबुध्यते॥ येन चायं देहेन देशांतरमश्नुवानो मन्यते॥ तमस्य पार्श्वस्थाः शयनदेश ए ॥७॥
व पश्यंति॥ यथाभूतानि चायं देशांतराणि स्वप्ने पश्यति॥ यथाभूतानि चायं देशांतराणि स्वप्ने पश्यंति॥ न तानि तथाभूतान्येव भवंति॥ परि
गतश्चेत्पश्येज्जाग्रद्वदर्थमाकलयेत्॥ दर्शयति च श्रुतिरंतरेव देहे स्वप्नं स यत्रैतत्स्वप्न्यया चरति ते हास्य लोका इत्युपक्रम्य स्वे शरीरे यथाकामं प
रिवर्तत इति अतश्च श्रुत्युपपत्तिविरोधाद्बहिःकुलायश्रुतिर्गौणी व्याख्यातव्या बहिरिव कुलायादमृतश्चरित्वेति॥ यो हि वसन्नपि श
रीरे न तेन प्रयोजनं करोति स बहिरिव शरीराद्भवतीति स्थितिगतिप्रत्ययभेदोप्येवं सति विप्रलंभ एवाभ्युपगंतव्यः॥ कालविसंवादो

पि च स्वप्ने भवति रजन्यां सुप्तो वासरं भारते वर्षे मन्यते॥ यथा मुहूर्तमात्रवर्तिनि स्वप्ने कदाचिद्बहून्वर्षपूगानतिवाहयति॥ निमित्ता
न्यपि च स्वप्ने न बुद्धये कर्मणे वोचितानि विद्यंते॥ करणोपसंहाराद्धि नास्य रथादिग्रहणाय चक्षुरादीनि संति॥ रथादिनिर्वर्तनेपि कुतोस्य
निमेषमात्रेण सामर्थ्यं॥ दारूणि वा॥ बाध्यंते चैते रथादयः स्वप्नदृष्टाः प्रबोधे॥ स्वप्न एव चैते सुलभबाधा भवंत्याद्यंतयोर्व्यभिचारदर्श
नात्॥ ग्रंथाग्रंथ ७००॥ रथोयमिति हि कदाचित्स्वप्ने निर्धारितः क्षणेन मनुष्यः संपद्यते॥ मनुष्योयमिति च निर्धारितः क्षणेन वृक्षः स्पष्टं
चाभावं रथादीनां स्वप्ने श्रावयति शास्त्रं न तत्र रथा न रथयोगा न पंथानो भवंतीत्यादि॥ तस्मान्मायामात्रं स्वप्नदर्शनं॥ ॐ॥ सूचकश्च हि
श्रुतेराचक्षते च तद्विदः॥ ४॥ मायामात्रत्वात्तर्हि न कश्चित्स्वप्ने परमार्थगंधोस्तीति नेत्युच्यते॥ सूचकश्च हि स्वप्नो भवति भविष्यतोः साध्वसा
धुनोः॥ तथा हि श्रूयते यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति समृद्धिं तत्र जानीयात्तस्मिन्स्वप्ननिदर्शन इति॥ तथा पुरुषं कृष्णं कृष्णदंतं पश्यति स
एनं हंतीत्येवमादिभिः स्वप्नैरचिरजीवित्वमावेद्यत इति श्रावयति॥ आचक्षते च स्वप्नाध्यायविदः॥ कुंजरारोहणादि स्वप्ने धन्यानि खर
यानान्यधन्यानीति॥ मंत्रदेवताद्रव्यविशेषनिमित्ताश्च केचित्स्वप्नाः सत्यार्थगंधिनो भवंतीति मन्यंते॥ तत्रापि भवतु नाम सूच्यमानस्य
वस्तुनः सत्यत्वं सूचकस्य तु स्त्रीदर्शनादेर्भवत्येव वैतथ्यं॥ बाध्यमानत्वादित्यभिप्रायः॥ तस्मादुपपन्नं स्वप्नस्य मायामात्रत्वं॥ यदुक्तमा
ह हीति तदेवं सति भाक्तं व्याख्यातव्यं॥ यथा लांगलं गवादीनुद्वहतीति निमित्तमात्रत्वादेवमुच्यते॥ न तु प्रत्यक्षमेव लांगलं गवादीनु
द्वहति एवं निमित्तमात्रत्वात्सुप्तो रथादीन्सृजते स हि कर्तेति वाच्यं॥ न तु प्रत्यक्षमेव सुप्तो रथादीन्सृजति॥ निमित्तत्वं चास्य रथादिप्र
तिभाननिमित्तभूतयोः सुकृतदुष्कृतयोः कर्तृत्वेनेति वक्तव्यमपि च संहि कं जागरिते विषयेंद्रियसंयोगादादित्यादिज्योतिर्व्यतिकरा
च्च स्वयंज्योतिष्ट्वं न निर्णीतं स्यात्॥ तस्माद्रथाद्यभाववचनं श्रुत्या रथादिसृष्टिवचनं तु भाक्तमिति व्याख्येयं॥ एतेन निर्माणश्रवणं व्या
ख्यातं॥ यदप्युक्तं॥ प्राज्ञमेनं निर्मातारमामनंतीति॥ तदप्यसत् श्रुत्यंतरे॥ स्वयं विहत्य स्वयं निर्माय स्वेन भासा स्वेन ज्योतिषा प्रस्वपि
तीति जीवव्यापारश्रवणात् इहापि य एषु सुप्तेषु जागर्तीति प्रसिद्धानुवादाज्जीव एवायं कामानां निर्माता संकीर्त्यते तस्य तु वाक्यशेषे
ण तदेव शुक्रं तद्ब्रह्मेति जीवभावं व्यावर्त्य ब्रह्मभाव उपदिश्यते तत्त्वमसीत्यादिवदिति न ब्रह्मप्रकरणं विरुध्यते॥ न चास्माभिः स्वप्ने
पि प्राज्ञव्यापारः प्रतिषिध्यते तस्य सर्वेश्वरत्वात्सर्वास्ववस्थास्वधिष्ठातृत्वोपपत्तेः॥ पारमार्थिकस्तु नायं संध्याश्रयः सर्गो विय
दादिसर्गवदित्येतावत्प्रतिपाद्यते॥ न च वियदादिसर्गस्यात्यंतिकं सत्यत्वमस्तीति प्रतिपादितं हि तदनन्यत्वमारंभणशब्दादि

ब्रं० भा०३
॥ ८१ ॥

ध्य इत्यत्र समस्तस्य स्वप्नस्य मायामात्रत्वं ॥ प्राकृतत्वात्मदर्शनाद्धि यदादिप्रपंचोऽव्यवस्थितरूपो भवति ॥ संध्याश्रयस्तु प्रपंचः प्रतिदि
नं बाध्यत इत्यतो वैतथिकमिदं संध्यस्य मायामात्रत्वमुदितं ॥ ३ ॥ पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बंधविपर्ययौ ॥ ५ ॥ अथापि स्या
त् परस्यैव तावदात्मनोंऽशो जीवोऽग्नेरिव विस्फुलिंगः तत्रैवं सति यथाग्निविस्फुलिंगयोः समाने दहनप्रकाशनशक्ती भवत एवं जीवेश्वर
योरपि ज्ञानैश्वर्यशक्ती ततश्च जीवस्य ज्ञानैश्वर्यवशात् सांकल्पिकी स्वप्ने रथादिसृष्टिर्भविष्यतीति ॥ अत्रोच्यते ॥ सत्यपि जीवेश्वरयोरंशां
शिभावे प्रत्यक्षमेव जीवस्येश्वरविपरीतधर्मत्वं ॥ किं पुनर्जीवस्येश्वरसमानधर्मत्वं नास्त्येव ॥ न नास्ति विद्यमानमपि तु तत्तिरोहित
मविद्यादिव्यवधानात् ॥ तत्पुनस्तिरोहितं सत् परमेश्वरमभिध्यायतो यतमानस्य विधूतध्वांतस्य तिमिरतिरस्कृतेव दृक्शक्तिरौ
षधिवीर्यादीश्वरप्रसादात् संसिद्धस्य कस्यचिदेवाविर्भवति ॥ न स्वभावत एव सर्वेषां जंतूनां ॥ कुतः ॥ ततो हीश्वराद्धेतोरस्य जीवस्य बंध
मोक्षौ भवतः ईश्वरस्वरूपापरिज्ञानाद्बंधः तत्स्वरूपपरिज्ञानात्तु मोक्षः ॥ तथा च श्रुतिः ॥ ज्ञात्वा देवं सर्वपाशापहानिः क्षीणैः क्लेशैः जन्म
मृत्युप्रहाणिः ॥ तस्याभिध्यानात्तृतीयं देहभेदे विश्वैश्वर्यं केवल आप्तकाम इत्येवमाद्या ॥ ५ ॥ देहयोगाद्वा सोऽपि ॥ ६ ॥ कस्मात्पुनर्जीवः प
रमात्मांश एव सन् तिरस्कृतज्ञानैश्वर्यो भवति ॥ युक्तं तु ज्ञानैश्वर्ययोरतिरस्कृतत्वं विस्फुलिंगस्येव दहनप्रकाशनयोरिति ॥ उच्यते ॥
सत्यमेवमेतत् सोऽपि तु जीवस्य ज्ञानैश्वर्यतिरोभावो देहयोगाद्देहेंद्रियमनोबुद्धिविषयवेदनादियोगाद्भवति ॥ अस्ति चात्रोपमा यथा
ग्नेर्दहनप्रकाशनसंपन्नस्यारणिगतस्य दहनप्रकाशने तिरोभवतः ॥ यथा वा भस्मच्छन्नस्य एवमविद्याप्रत्युपस्थापितनामरूपकृत
देहाद्युपाधियोगात् तदविवेकभ्रमकृतो जीवस्य ज्ञानैश्वर्यतिरोभावो वाशब्दो जीवेश्वरयोरन्यत्वाशंकाव्यावृत्त्यर्थः ॥ नन्वन्यो जीव ईश्वरा
त् तिरस्कृतज्ञानैश्वर्यत्वात् ॥ किं देहयोगकल्पनया नेत्युच्यते ॥ न ह्यन्यत्वं जीवस्येश्वरादुपपद्यते ॥ सेयं देवतैक्षतेत्युपक्रम्य अनेन जीवेनात्म
नानुप्रविश्येत्यात्मशब्देन जीवस्य परामर्शात् ॥ तत्सत्यं स आत्मा तत्त्वमसि ॥ श्वेतकेतो इति च जीवायोपदिशतीश्वरात्मत्वमतोऽनन्य एवेश्व
रात् ॥ जीवः सन् देहयोगात्तिरोहितज्ञानैश्वर्यो भवति ॥ अतश्च न सांकल्पिकी जीवस्य स्वप्ने रथादिसृष्टिर्घटते ॥ यदि च सांकल्पिकी
स्वप्ने रथादिसृष्टिः स्यान्नैवानिष्टं कश्चित्स्वप्नं पश्येन्न हि ॥ कश्चिदनिष्टं संकल्पयते ॥ यत्पुनरुक्तं जागरितदेशश्रुतिः स्वप्नस्य सत्यत्वं
ख्यापयतीति ॥ न तत्साम्यवचनं सत्यत्वाभिप्रायं ॥ स्वयंज्योतिष्ट्वविरोधात् ॥ श्रुत्यैव च स्वप्ने रथाद्यभावस्य दर्शितत्वात् ॥ जागरितप्रभव
वासनानिर्मितत्वात्तु स्वप्नस्य तत्तुल्यनिर्भासत्वाभिप्रायं ॥ तत्तस्मादुपपन्नं स्वप्नस्य मायामात्रत्वं ॥ ७ ॥ तदभावो नाडीषु तच्छ्रुतेरात्मनि च ॥

227/1913

॥ ६ ॥ स्वप्नावस्था परीक्षिता सुषुप्तावस्थेदानीं परीक्ष्यते ॥ तत्रैताः सुषुप्तविषयाः श्रुतयो भवंति क्वचिच्छ्रूयते ॥ तद्यत्रैतत्सुप्तः समस्तः संप्रस
न्नः स्वप्नं न विजानात्यासु तदा नाडीषु सृप्तो भवतीति ॥ अन्यत्र नाडीरनुक्रम्य श्रूयते ॥ ताभिः प्रत्यवसृप्य पुरीतति शेत इति ॥ तथान्यत्र नाडीरेवा
नुक्रम्य तासु तदा भवति ॥ यदा सुप्तः स्वप्नं न कंचन पश्यत्यथास्मिन्प्राण एवैकधा भवतीति ॥ तथान्यत्र य एषोंऽतर्हृदय आकाशस्तस्मिंछे
त इति तथान्यत्र सता सोम्य तदा संपन्नो भवति स्वमपीतो भवतीति ॥ प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नांतरमिति च ॥ तत्र सं
शयः ॥ किमेतानि नाड्यादीनि परस्परनिरपेक्षाणि भिन्नानि सुषुप्तिस्थानानि आहोस्वित्परस्परापेक्षतयैकं सुषुप्तिस्थानमिति ॥ किं ता
वत्प्राप्तं भिन्नानीति ॥ कुतः एकार्थत्वात् ॥ न ह्येकार्थानां क्वचित्परस्परापेक्षत्वं दृश्यते व्रीहियवादीनां नाड्यादीनां ॥ चैकार्थता सुषुप्तौ दृश्यते ॥
नाडीषु सुप्तो भवति पुरीतति शेत इति च तत्र तत्र सप्तमीनिर्देशस्य तुल्यत्वात् ॥ ननु वसति सप्तमीनिर्देशो दृश्यते ॥ सता सोम्य तदा संप
न्नो भवतीति ॥ नैष दोषस्तत्रापि सप्तम्यर्थस्य गम्यमानत्वात् ॥ वाक्यशेषे हि तत्रायतनैषी जीवः सदुपसर्पतीत्याह ॥ अन्यत्रायतनमलब्ध्वा
प्राणमेवोपश्रयत इति प्राणशब्देन तत्र प्रकृतस्य सत उपादानादायतनं च सप्तम्यर्थः ॥ सप्तमीनिर्देशोऽपि च वाक्यशेषे दृश्यते सति
संपद्य न विदुः सति संपद्यामह इति ॥ सर्वत्र च विशेषविज्ञानोपरमलक्षणं सुषुप्तं न विशिष्यते तस्मादेकार्थत्वान्नाड्यादीनां विकल्पेन कदा
चित्किंचित्स्थानं स्वापायोपसर्पतीति एवं प्राप्ते प्रतिपद्यते तदभावो नाडीष्वात्मनि चेति तदभाव इति तस्य प्रकृतस्य स्वप्नदर्शनस्याभावः सु
षुप्तमित्यर्थः ॥ नाडीष्वात्मनि चेति समुच्चयेनैतानि नाड्यादीनि स्वापायोपसर्पति न विकल्पेनेत्यर्थः ॥ कुतः तच्छ्रुतेः ॥ तथा हि सर्वेषां नाड्यादी
नां तत्र तत्र सुषुप्तिस्थानत्वं श्रूयते ॥ तच्च समुच्चये संगृहीतं भवति विकल्पे हि पक्षे बाधः ॥ स्यात् ॥ नन्वेकार्थत्वाद्विकल्पो नाड्यादीनां
व्रीहियवादिवदित्युक्तं ॥ नेत्युच्यते ॥ न ह्येकविभक्तिनिर्देशमात्रेणैकार्थत्वं विकल्पश्चापतति ॥ नानार्थत्वसमुच्चययोरप्येकविभ
क्तिनिर्देशदर्शनात् ॥ प्रासादे शेते पर्यंके शेत इत्येवमादिषु ॥ तथा नाडीषु पुरीतति ब्रह्मणि च स्वपितीत्युपपद्यते समुच्चयः ॥ त
था च श्रुतिः ॥ तासु तदा भवति यदा सुप्तः स्वप्नं न कंचन पश्यत्यथास्मिन्प्राण एकधा भवतीति ॥ समुच्चयं नाडीनां प्राणस्य च सुषुप्तौ श्राव
यत्येकवाक्योपादानात् प्राणस्य ब्रह्मत्वं समधिगतं प्राणस्तथानुगमादित्यत्र यत्रापि निरपेक्षा इव नाडीः सुप्तिस्थानत्वेन श्रावयत्यासु त
दा नाडीषु सृप्तो भवतीति ॥ तत्रापि प्रदेशांतरप्रसिद्धस्य ब्रह्मणोऽप्रतिषेधान्नाडीद्वारेण ब्रह्मण्येवावतिष्ठत इति प्रतीयते ॥ न चैवमपि ना
डीषु सप्तमी विरुध्यते ॥ नाडीभिरपि ब्रह्मोपसर्पन् ॥ सृप्त एव नाडीषु भवति यो हि गंगया सागरं गच्छति गत एव स गंगायां भवतीति अपि

शां०भा० चात्ररश्मिनाडीद्वारात्मकस्य ब्रह्मलोकमार्गस्य विवक्षितत्वात्। नाडीस्तुत्यर्थं तस्यापि संकीर्तनं। नाडीषु सृप्तो भवतीति तत्कीर्तनं न कश्चन पाप्मा
स्पृशतीति स्तुवन्नाडीः प्रशंसति॥ ब्रवीति च पाप्मस्पर्शाभावे हेतुं तेजसा हि तदा संपन्नो भवतीति। तेजसा नाडीगतेन पित्ताख्येनाभिव्याप्तकरणो न बाह्यान्विषयानी
॥९॥ क्षत इत्यर्थः॥ यद्वा तेजस इति ब्रह्मण एवायं निर्देशः॥ श्रुत्यंतरे ब्रह्मैव तेज एवेति। तेजःशब्दस्य ब्रह्मणि प्रयुक्तत्वात्। ब्रह्मणा हि तदा संपन्नो भव
ति नाडीद्वारेण। अतस्तं न कश्चन पाप्मा स्पृशतीत्यर्थः॥ ब्रह्मसंपत्तिश्च पाप्मस्पर्शाभावे हेतुः समधिगतः सर्वे पाप्मानोऽतो निवर्तन्तेऽपहतपा
प्मा ह्येष ब्रह्मलोक इत्यादिश्रुतिभ्यः॥ एवं च सति प्रदेशान्तरप्रसिद्धेन ब्रह्मणा सुषुप्तिस्थानेनानुगतो नाडीनां नयुः समाश्रितो भवति॥ तथापु
रीतत्प्रक्रियासंकीर्तनात्तदनुगुणमेव सुषुप्तिस्थानत्वं विज्ञायते॥ य एषोऽन्तर्हृदय आकाशस्तस्मिञ्शेत इति हि हृदयाकाशे सुषु
प्तिस्थानं प्रकृतमिदमुच्यते पुरीतति शेत इति॥ पुरीतदिति हृदयपरिवेष्टनमुच्यते॥ तदन्तरवर्तिन्यपि हृदयाकाशे शयानः ७१००० शक्यते पु
रीतति शेत इति वक्तुं प्राकारपरिक्षिप्तेऽपि हि पुरे वर्तमानः प्राकारे वर्तत इत्युच्यते॥ हृदयाकाशस्य च ब्रह्मत्वं समधिगतं दहर उत्तरेभ्य
इत्यत्र॥ तथा नाडीपुरीतत्समुच्चयोऽपि नाभिः प्रत्यवसृप्य पुरीतति शेत इत्येकवाक्योपादानादवगम्यते॥ सत्प्राज्ञयोश्च प्रसिद्धमेव ब्रह्मत्वं। आसु
श्रुतिषु त्रीण्येव सुषुप्तिस्थानानि संकीर्तितानि नाड्यः पुरीतद्ब्रह्म चेति॥ तत्रापि द्वारमात्रं नाड्यः पुरीतच्च ब्रह्मैव त्वेकं सुषुप्तिस्थानमपि च नाड्यः
पुरीतद्वा जीवस्योपाध्याधार एव भवति॥ तत्रास्य करणानि वर्तन्त इति न ह्युपाधिसंबन्धमन्तरेण स्वत एव जीवस्याधारः कश्चित्संभवति॥
ब्रह्माव्यतिरेकेण स्वमहिमप्रतिष्ठितत्वात्॥ ब्रह्माधारत्वमप्यस्य सुषुप्ते नैवाधाराधेयभेदाभिप्रायेणोच्यते॥ कथं तर्हि तादात्म्याभिप्रायेण।
यत आह॥ सता सोम्य तदा संपन्नो भवति स्वमपीतो भवतीति॥ स्वशब्देनात्माभिलप्यते स्वरूपमापन्नः सुप्तो भवतीत्यर्थः॥ अपि च
न कदाचिज्जीवस्य ब्रह्मणा संपत्तिर्नास्ति स्वरूपस्यानपायित्वात्॥ स्वप्नजागरितयोस्तूपाधिसंपर्कवशात्पररूपापत्तिमिवापेक्ष्य तदुप
शमात्सुषुप्ते स्वरूपापत्तिर्विवक्ष्यते॥ अतश्च सुषुप्तावस्थायां कदाचित्सता संपद्यते॥ कदाचिन्न संपद्यत इत्ययुक्तं॥ अपि च स्थानविकल्पा
भ्युपगमेऽपि विशेषविज्ञानोपशमलक्षणं तावत्सुषुप्तं न॥ क्वचिद्विशिष्यते॥ तत्र सति संपन्नस्तावदेकत्वान्न विजानातीति युक्तं॥ त
त्केन कं विजानीयादिति श्रुतेः॥ नाडीषु तु पुरीतति शयानस्य न किंचिदविज्ञाने कारणं शक्यं वक्तुं॥ भेदविषयत्वाद्यत्र वा अन्यदिव स्यात्तत्रा ९
न्योऽन्यत्पश्येदिति श्रुतेः॥ ननु भेदविषयस्याप्यतिदूरादिकारणमविज्ञाने स्यात् बाढमेवं स्याद्यदि जीवः स्वतः परिच्छिन्नोऽभ्युपगम्येत यथा
विष्णुमित्रः प्रवासी स्वगृहं न पश्यतीति॥ ननु जीवस्योपाधिव्यतिरेकेण परिच्छेदो विद्यते उपाधिगतमेवातिदूरादिकारणमविज्ञान इति यद्यु
च्येत॥ तथाप्युपाध्युपशान्तत्वात् सत्येव संपन्नो न विजानातीति युक्तं॥ न च वयमिह तुल्यवन्नाड्यादिसमुच्चयं प्रतिपादयामः॥ न हि नाड्यः सु

शां०भा० न्य इति॥ यत्पुनरुक्तं॥ यथा जलराशौ प्रक्षिप्तो जलबिन्दुर्नोद्धर्तुं शक्यते॥ एवं संपन्नो जीवो नोत्थातुमर्हतीति॥ तत्परिह्रियते॥ युक्तं तत्र वि
१० वेककारणाभावाज्जलबिन्दोरनुद्धरणमिह तु विद्यते विवेककारणं कर्म वाविद्या चेति वैषम्यं॥ दृश्यते च दुर्विवेचयोरप्यस्मज्जातीयैः क्षीरोदक
योः संसृष्टयोर्हंसेन विवेचनं॥ अपि च न जीवो नाम कश्चित्परस्माद्भिन्नो विद्यते यो जलबिन्दुरिव जलराशेः सतो विविच्येत॥ सदेव तूपाधि
संपर्काज्जीव इत्युपचर्यत इत्यसकृत्प्रपञ्चितं नेवं सति यावदेकोपाधिगता बन्धानुवृत्तिस्तावदेकजीवव्यवहार उपाध्यन्तरगता तु बन्धानुवृत्ति
र्जीवान्तरव्यवहारः॥ स एवायमुपाधिः स्वापप्रबोधयोर्बीजाङ्कुरन्यायेनेत्यतः स एव जीवः प्रतिबुध्यत इति युक्तं॥ ९॥ मुग्धेऽर्धसंपत्तिः प
रिशेषात्॥ १०॥ अस्ति मुग्धो नाम यं मूर्छित इति लौकिकाः कथयन्ति॥ स तु किमवस्थ इति परीक्षायामुच्यते॥ तिस्रस्तावदवस्थाः शरीरस्थस्य
जीवस्य प्रसिद्धा जागरितं स्वप्नः सुषुप्तमिति॥ चतुर्थी शरीरादपसृप्तिर्न तु पंचमी काचिदवस्था जीवस्य श्रुतौ स्मृतौ वा प्रसिद्धास्ति॥ तस्मा
च्चतसृणामेवावस्थानामन्यतमावस्था मूर्छेत्येवं प्राप्ते ब्रूमः॥ न तावन्मुग्धो जागरितावस्थो भवितुमर्हति॥ न ह्ययमिन्द्रियैर्विषयानीक्षते॥ स्या
देतदिषुकारन्यायेन मुग्धो भविष्यति॥ यथेषुकारो जाग्रदपीषुगतमनस्तया नान्यान्विषयानीक्षत एवं मुग्धो मुसलसंपातादिजनितदुः
खानुभवव्यग्रमनस्तया जाग्रदपि नान्यान्विषयानीक्षत इति न॥ अचेतयमानत्वादिषुकारो हि व्यापृतमना ब्रवीतीषुमेवाहमेतावन्तं कालमुप
लभमानोऽभूवमिति मुग्धस्तु लब्धसंज्ञो ब्रवीत्यन्धे तमस्यहमेतावन्तं कालं प्रक्षिप्तोऽभूवं न किंचिन्मया चेतितमिति॥ जाग्रतश्चैकविषयविष
क्तचेतसो देहो विध्रियते मुग्धस्य तु देहो धरण्यां पतति॥ तस्मान्न जागर्ति॥ नापि स्वप्नान्पश्यति निःसंज्ञत्वान्नापि मृतः प्राणोष्मणोर्भावात्॥ मु
ग्धे हि जन्तौ मृतोऽयं स्यान्न वा मृत इति संशयाना ऊष्मास्ति नास्तीति हृदयदेशमालभन्ते निश्चयार्थं प्राणोऽस्ति नास्तीति च नासिकादेशं॥ यदि
प्राणोष्मणोरस्तित्वं नावगच्छन्ति॥ ततो मृतोऽयमित्यध्यवसाय दहनायारण्यं नयन्ति॥ अथ तु प्राणमूष्माणं वा प्रतिपद्यन्ते ततो नायं मृत इत्यध्य
वसाय संज्ञालाभाय भिषज्यन्ति॥ पुनरुत्थानाच्च न दिष्टं गतो न हि यमराष्ट्रात्प्रत्यागच्छति॥ अस्तु तर्हि सुषुप्तो निःसंज्ञत्वादमृतत्वाच्च॥ न वैलक्ष
ण्यान्मुग्धः कदाचिच्चिरमपि नोच्छ्वसिति सवेपथुरस्य देहो वेपते पाणिपेषमात्रेण सुप्तमुत्थापनेनत्रः सुषुप्तस्तु प्रसन्नवदनस्तुल्यकालं
पुनः पुनरुच्छ्वसिति॥ निमीलिते अस्य नेत्रे भवतो न चास्य देहो वेपते॥ पाणिपेषणमात्रेण च सुप्तमुत्थापयन्ति॥ न तु मुग्धं मुद्गरघातेना १०
पि निमित्तभेदश्च भवति मोहस्वापयोर्मुसलसंपातादिनिमित्तत्वान्मोहस्य श्रमादिनिमित्तत्वाच्च स्वापस्य॥ न च लोकेऽस्ति प्रसिद्धिर्मुग्धः
सुप्त इति॥ परिशेषादर्धसंपत्तिर्मुग्धतेत्यवगच्छामः॥ निःसंज्ञत्वात्संपन्न इतरस्माच्च वैलक्षण्यादसंपन्न इति॥ कथं पुनरर्धसंपत्ति
र्मुग्धतेति शक्यं वक्तुं यावता॥ सुप्तं प्रति तावदुक्तं श्रुत्या सता सोम्य तदा संपन्नो भवति॥ अत्र स्तेनोऽस्तेनो भवति नैतं सेतुमहोरात्रे तरतो न सुकृ
तं न दुष्कृतमित्यादि॥ जीवे हि सुकृतदुष्कृतयोः प्राप्तिः सुखित्वदुःखित्वप्रत्ययोत्पादनेन भवति॥ न च सुखित्वप्रत्ययो वा सुषुप्ते वि

शां०भा० वात्ररश्मिनाडीद्वारात्मकस्य ब्रह्मलोकमार्गस्य विवक्षितत्वात् नाडीषु सुषुप्त्यर्थं कथं संकीर्तनं। नाडीषु सृप्तो भवतीति तत्कीर्तनं कथं न यथा प्रा
स्पृशतीति श्रुतेर्नाडीः प्रशंसति। प्रशंसतीति पाप्मस्पर्शाभावहेतुत्वेन सा नाडीगमनमपि तत्रस्तनाभिव्याप्तप्रकरणेन बाह्यान्विषयानी
॥९॥ क्षत इत्यर्थः। यदा तत्र स इति ब्रह्मण एवायं निर्देशः। श्रुत्यंतरे ब्रह्मैव तेजः एवेति। तेजःशब्दस्य ब्रह्मणि प्रयुक्तत्वात् ब्रह्मणा हि सदा संपन्नो भव
ति नाडीद्वारेणागमनं न कश्चन पाप्मा स्पृशतीत्यर्थः। ब्रह्मसंपन्नश्च पाप्मस्पर्शाभावे हेतुः समभिगतः सर्वे पाप्मानोऽतो निवर्तंतेऽपहतपा
प्मा ह्येष ब्रह्मलोक इत्यादिश्रुतिभ्यः। एवं च सति प्रदेशांतरप्रसिद्धेन ब्रह्मणा सुषुप्तिस्थानेनानुगता नाडीनां नयः समाश्रितो भवति। तथा पु
रीततो भवति ब्रह्मप्रक्रियासंकीर्तनान्नादनुगुणमेव सुषुप्तिस्थानत्वं विज्ञायते। य एषोऽन्तर्हृदय आकाशस्तस्मिन्शेते इति हि हृदयाकाशे सुषु
प्तिस्थाने प्रकृते इदमुच्यते पुरीतति शेत इति। पुरीतदिति हृदयपरिवेष्टनमुच्यते। तदंतरवर्तिन्यपि हृदयाकाशे शयानः ७१००० शक्यते पु
रीतति शेत इति वक्तुं प्राकारपरिक्षिप्तेऽपि हि पुरे वर्तमानः प्राकारे वर्तत इत्युच्यते। हृदयाकाशस्य च ब्रह्मत्वं समधिगतं दहर उत्तरेभ्य
इत्यत्र। तथा नाडीपुरीततसमुच्चयोऽपि ताभिः प्रत्यवसृप्य पुरीतति शेत इत्येकवाक्योपादानादवगम्यते। सत्प्राज्ञयोश्च प्रसिद्धमेव मतासु
श्रुतिषु त्रीण्येव सुषुप्तिस्थानानि संकीर्तितानि नाड्यः पुरीतद्ब्रह्म चेति। तत्रापि द्वारमात्रं नाड्यः पुरीतच्च ब्रह्मैवैकं सुषुप्तिस्थानमपि च नाड्यः
पुरीतद्वा जीवस्योपाध्याधार एव भवति। तत्रास्य करणानि वर्तंत इति नह्युपाधिसंबंधमंतरेण स्वत एव जीवस्याधारः कश्चित्संभवति।
ब्रह्माव्यतिरेकेण स्वमहिम्नि प्रतिष्ठत्वात्। ब्रह्माधारत्वमप्यस्य सुषुप्ते नैवाधाराधेयभेदाभिप्रायेणोच्यते। कथं तर्हि तादात्म्याभिप्रायेण।
यत आह। सता सोम्य तदा संपन्नो भवति स्वमपीतो भवतीति। स्वशब्देनात्माभिलप्यते स्वरूपमापन्नः सुषुप्तो भवतीत्यर्थः। अपि च
न कदाचिज्जीवस्य ब्रह्मणा संपत्तिर्नास्ति स्वरूपस्यानपायित्वात्। स्वप्नजागरितयोस्तूपाधिसंपर्कवशात्पररूपापत्तिमिवापेक्ष्य तदुप
शमात्सुषुप्ते स्वरूपापत्तिर्विवक्ष्यते। अतश्च सुषुप्तावस्थायां कदाचित्सता संपद्यते कदाचिन्न संपद्यत इत्ययुक्तं। अपि च स्थानविकल्पा
भ्युपगमेऽपि विशेषविज्ञानोपशमलक्षणं तावत्सुषुप्तं न क्वचिद्विशिष्यते। तत्र सति संपन्नस्तावदेकत्वान्न विजानातीति युक्तं। त
त्केन कं विजानीयादिति श्रुतेः। नाडीषु तु पुरीतति च शयानस्य न किंचिद्विज्ञाने कारणं शक्यं वक्तुं। भेदविषयत्वाय त्र चान्यदिव स्यात्तत्रा ९
न्योऽन्यत्पश्येदिति श्रुतेः। ननु भेदविषयस्याप्यतिदूरादिकारणमविज्ञाने स्यात्। बाढमेवं स्याद्यदि जीवः स्वतः परिच्छिन्नोऽभ्युपगम्येत यथा
विष्णुमित्रः प्रवासी स्वगृहं न पश्यतीति। न तु जीवस्योपाधिव्यतिरेकेण परिच्छेदो विद्यते उपाधिगतमेवातिदूरादिकारणमविज्ञान इति यद्यु
च्येत। तथाप्युपाधेरुपशांतत्वात्सत्येव संपन्नो न विजानातीति युक्तं। न च वयमिह तुल्यवन्नाड्यादीनां समुच्चयं प्रतिपादयामः। नहि नाड्यः स

शां०भा० न्य इति। यत्तु नरुक्तं। यथा जलराशौ प्रक्षिप्तो जलबिंदुर्नोद्धर्तुं शक्यते। एवं संपन्नो जीवो नोत्सत्तुमर्हतीति। तत्परिह्रियते। युक्तं तत्र वि
१० वेककारणाभावाज्जलबिंदोरनुद्धरणमिह तु विद्यते विवेककारणं कर्म चाविद्या चेति वैषम्यं। दृश्यते च दुर्विवेचयोरप्यस्मज्जातीयैः क्षीरोदक
योः संसृष्टयोर्हंसेन विवेचनं। अपि च न जीवो नाम कश्चित्परस्मादन्यो विद्यते यो जलबिंदुरिव जलराशेः सतो विविच्येत। सदेव तूपाधि
संपर्काज्जीव इत्युपचर्यत इत्यसकृत्प्रपंचितं। एवं सति यावदेकोपाधिगता बंधानुवृत्तिस्तावदेकजीवव्यवहारः उपाध्यंतरगतायां तु बंधानुवृत्तौ
जीवांतरव्यवहारः। स एवायमुपाधिः स्वापप्रबोधयोर्बीजांकुरन्यायेनेत्यतः स एव जीवः प्रतिबुध्यत इति युक्तं॥ ९॥ मुग्धेऽर्धसंपत्तिः प
रिशेषात्॥ १०॥ अस्ति मुग्धो नाम यं मूर्छित इति लौकिकाः कथयंति। स तु किमवस्थ इति परीक्षायामुच्यते। तिस्रस्तावदवस्थाः शरीरस्थस्य
जीवस्य प्रसिद्धा जागरितं स्वप्नः सुषुप्तमिति। चतुर्थी शरीरादपसृप्तिर्न तु पंचमी काचिदवस्था जीवस्य श्रुतौ स्मृतौ वा प्रसिद्धास्ति। तस्मा
च्चतसृणामेवावस्थानामन्यतमावस्था मूर्छेत्येवं प्राप्ते ब्रूमः। न तावन्मुग्धो जागरितावस्था भवितुमर्हति। नह्ययमिंद्रियैर्विषयानीक्षते। स्या
देतदिषुकारन्यायेन मुग्धो भविष्यति। यथेषुकारो जाग्रदपीष्वासक्तमनस्तया नान्यान्विषयानीक्षत एवं मुग्धो मुसलसंपातादिजनितदुः
खानुभवव्यग्रमनस्तया जाग्रदपि नान्यान्विषयानीक्षत इति न। चेतयमानत्वादिषुकारो हि व्यापृतमना ब्रवीतीषुमेवाहमेतावंतं कालमुप
लभमानोऽभूवमिति मुग्धस्तु लब्धसंज्ञो ब्रवीति अंधे तमस्यहमेतावंतं कालं प्रक्षिप्तोऽभूवं न किंचिन्मया चेतितमिति। जाग्रतश्चैकविषयविष
क्तचेतसो देहो विध्रियते मुग्धस्य तु देहो धरण्यां पतति। तस्मान्न जागर्ति नापि स्वप्नान्पश्यति निःसंज्ञत्वान्नापि मृतः प्राणोष्मणोर्भावात् मु
ग्धे हि जंतौ मृतोऽयं वा स्यान्न वा मृत इति संशयाना ऊष्मास्ति नास्तीति हृदयदेशमालभंते निश्चयार्थं प्राणोऽस्ति नास्तीति च नासिकादेशं। यदि
प्राणोष्मणोरस्तित्वं नावगच्छंति ततो मृत इत्यभिप्रेत्य दहनायारण्यं नयंति। अथ तु प्राणमूष्माणं वा प्रतिपद्यंते ततो नायं मृत इत्यध्य
वसाय संज्ञालाभाय भिषज्यंति। पुनरुत्थानाच्च न दिष्टं गतः। न हि यमराष्ट्रात्प्रत्यागच्छति। अस्तु तर्हि सुषुप्तो निःसंज्ञत्वादमृतत्वाच्च। न वैलक्ष
ण्यान्मुग्धः कदाचिच्चिरमपि नोच्छ्वसिति सवेपथुरस्य देहो भवति पाणिपेषमात्रेण सुप्तमुत्थापयेन्नेत्रः सुषुप्तः सुप्रसन्नवदनस्तुल्यकालं
पुनः पुनरुच्छ्वसिति। निमीलिते। अस्य नेत्रे भवतो न चास्य देहो वेपते। पाणिपेषणमात्रेण च सुप्तमुत्थापयंति। न तु मुग्धं मुद्गरघातेना १०
पि निमित्तभेदश्च भवति मोहस्वापयोः मुसलसंपातादिनिमित्तत्वान्मोहस्य श्रमादिनिमित्तत्वाच्च स्वापस्य। न च लोकेऽस्ति प्रसिद्धिर्मुग्धः
सुप्त इति। परिशेषादर्धसंपत्तिर्मुग्धतेत्यवगच्छामः। निःसंज्ञत्वात्संपन्न इतरस्माच्च वैलक्षण्यादसंपन्न इति। कथं पुनरर्धसंपत्ति
र्मुग्धतेति शक्यते वक्तुं। सुषुप्तं प्रति तावदुक्तं श्रुत्या सता सोम्य तदा संपन्नो भवति अत्र स्तेनोऽस्तेनो भवति नैतं सेतुमहोरात्रे तरतो न सु
कृतं न दुःकृतमित्यादि जीवे हि सुकृतदुःकृतयोः प्राप्तिः सुखित्वदुःखित्वप्रत्ययोत्पादनेन भवति। न च सुखित्वप्रत्ययो वा सुषुप्ते वि

शं०भा० १० न्य इति॥ यत्पुनरुक्तं॥ यथा जलराशौ प्रक्षिप्तो जलबिंदुर्नोद्धर्तुं शक्यते॥ एवं संपन्नो जीवो नोत्थातुमर्हतीति॥ तत्परिह्रियते॥ युक्तं तत्र वि
वेककारणाभावाज्जलबिंदोरनुद्धरणमिह तु विद्यते विवेककारणं कर्म वाविद्या चेति वैषम्यं॥ दृश्यते च दुर्विवेचयोरप्यस्मज्जातीयैः क्षीरोदक
योः संसृष्टयोर्हंसेन विवेचनं॥ अपि च न जीवो नाम कश्चित्परस्मादन्यो विद्यते यो जलबिंदुरिव जलराशेः सतो विविच्येत॥ सदेव तूपाधि
संपर्काज्जीव इत्युपचर्यत इत्यसकृत्प्रपंचितं तेनैवं सति यावदेकोपाधिगता बंधानुवृत्तिस्तावदेकजीवव्यवहारस्तूपाध्यंतरगतायां तु बंधानुवृत्तौ
जीवांतरव्यवहारः॥ स एवायमुपाधिः स्वापप्रबोधयोर्बीजांकुरन्यायेनेत्यतः स एव जीवः प्रतिबुध्यत इति युक्तं॥ ॐ॥ मुग्धेऽर्धसंपत्तिः प
रिशेषात्॥ १०॥ अस्ति मुग्धो नाम यं मूर्छित इति लौकिकाः कथयंति॥ स तु किमवस्थ इति परीक्षायामुच्यते॥ तिस्रस्तावदवस्थाः शरीरस्थस्य
जीवस्य प्रसिद्धा जागरितं स्वप्नः सुषुप्तमिति॥ चतुर्थी शरीरादपसृप्तिः॥ न तु पंचमी काचिदवस्था जीवस्य श्रुतौ स्मृतौ वा प्रसिद्धास्ति॥ तस्मा
च्चतसृणामेवावस्थानामन्यतमावस्था मूर्छेत्येवं प्राप्ते ब्रूमः॥ न तावन्मुग्धो जागरितावस्थो भवितुमर्हति॥ न ह्ययमिंद्रियैर्विषयानीक्षते॥ स्या
देतदिषुकारन्यायेन मुग्धो भविष्यति॥ यथेषुकारो जाग्रदपीष्वासक्तमनस्तया नान्यान्विषयानीक्षत एवं मुग्धो मुसलसंपातादिजनितदुः
खानुभवव्यग्रमनस्तया जाग्रदपि नान्यान्विषयानीक्षत इति न॥ चेतयमानत्वादिषुकारो हि व्यापृतमना ब्रवीतीषुमेवाहमेतावंतं कालमुप
लभमानोऽभूवमिति मुग्धस्तु लब्धसंज्ञो ब्रवीत्यंधे तमस्यहमेतावंतं कालं प्रक्षिप्तोऽभूवं न किंचिन्मया चेतितमिति॥ जाग्रतश्चैकविषयविष
क्तचेतसो देहो विध्रियते मुग्धस्य तु देहो धरण्यां पतति॥ तस्मान्न जागर्ति॥ नापि स्वप्नान्पश्यति निःसंज्ञत्वात्॥ नापि मृतः प्राणोष्मणोर्भावात्सु
मुग्धे हि जंतौ मृतोऽयं वा स्यान्न वा मृत इति संशयाना ऊष्मास्ति नास्तीति हृदयदेशमालभंते निश्चयार्थं प्राणोऽस्ति नास्तीति च नासिकादेशं॥ यदि
प्राणोष्मणोरस्तित्वं नावगच्छंति॥ ततो मृत इत्यध्यवसाय दहनायारण्यं नयंति॥ अथ तु प्राणमूष्माणं वा प्रतिपद्यंते ततो नायं मृत इत्यध्य
वसाय संज्ञालाभाय भिषज्यंति॥ पुनरुत्थानाच्च न दिष्टं गतो न हि यमराष्ट्रात्प्रत्यागच्छति॥ अस्तु तर्हि सुषुप्तो निःसंज्ञत्वादमृतत्वाच्च॥ न वैलक्ष
ण्यात् मुग्धः कदाचिच्चिरमपि नोच्छ्वसिति सवेपथुरस्य देहो वेपते पाणिपेषमात्रेण सुप्तमुत्थापयंति नत्रः सुषुप्तः प्रसन्नवदनस्तुल्यकालं
पुनः पुनरुच्छ्वसिति॥ निमीलिते चास्य नेत्रे भवतो न चास्य देहो वेपते॥ पाणिपेषणमात्रेण च सुप्तमुत्थापयंति॥ न तु मुग्धं मुद्गरघातेना १०
पि निमित्तभेदश्च भवति मोहस्वापयोर्मुसलसंपातादिनिमित्तत्वान्मोहस्य श्रमादिनिमित्तत्वाच्च स्वापस्य॥ न च लोकेऽस्ति प्रसिद्धिर्मुग्धः
सुप्त इति॥ परिशेषादर्धसंपत्तिर्मुग्धतेत्यवगच्छामः॥ निःसंज्ञत्वात्संपन्न इतरस्माच्च वैलक्षण्यादसंपन्न इति॥ कथं पुनरर्धसंपत्ति
र्मुग्धतेति शक्यते वक्तुं॥ यावता सुषुप्तं प्रति तावदुक्तं श्रुत्या सता सोम्य तदा संपन्नो भवति यत्र स्तेनोऽस्तेनो भवति नैतं सेतुमहोरात्रे तरतो न सु
कृतं न दुष्कृतमित्यादि॥ जीवे हि सुकृतदुष्कृतयोः प्राप्तिः सुखित्वदुःखित्वप्रत्ययोत्पादनेन भवति॥ न च सुखित्वप्रत्ययो वा सुषुप्ते वि

231/1913

द्यते॥ मुग्धेऽपि तौ प्रत्ययौ न विद्येते तस्मात्सुषुप्तवन्मुग्धेऽपि कृत्स्नसंपत्तिरेव भवितुमर्हति नार्धसंपत्तिरित्यत्रोच्यते॥ न
ब्रूमो मुग्धेऽर्धसंपत्तिर्जीवस्य ब्रह्मणा भवतीति॥ किं तर्हि अर्धेन सुषुप्तपक्षस्य भवति मुग्धत्वमर्धेन चावस्थांतरपक्षस्येति ब्रूमः॥ दर्शि
ते च मोहस्य स्वापेन साम्यवैषम्ये द्वारं चैतन्मरणस्य॥ यदास्य सावशेषं कर्म भवति तदा वाङ्मनसे प्रत्यागच्छतो यदा तु निरवशेषं क
र्म भवति॥ तदा प्राणोष्माणावपगच्छतस्तस्मादर्धसंपत्तिं ब्रह्मविद इच्छंति॥ यत्तूक्तं न पंचमी काचिदवस्था प्रसिद्धास्तीति नैष दोषः॥ कदा
चित्कीयमवस्थेति न प्रसिद्धा स्यात्प्रसिद्धा च लोकायुर्वेदयोः॥ अर्धसंपत्त्यभ्युपगमाच्च न पंचमी गण्यत इत्यनवद्यं॥ ॐ॥ न स्थानतोऽपि प
रस्योभयलिंगं सर्वत्र हि॥ ११॥ येन ब्रह्मणा सुषुप्त्यादिषु जीव उपाध्युपशमात्संपद्यते॥ तस्येदानीं स्वरूपं श्रुतिवशेन निर्धार्यते॥ संत्युभ
यलिंगाः श्रुतयो ब्रह्मविषयाः सर्वकर्मा सर्वकामः सर्वगंधः सर्वरस इत्येवमाद्याः सविशेषलिंगाः॥ अस्थूलमनण्वह्रस्वमदीर्घमित्येवमा
द्याश्च निर्विशेषलिंगाः॥ किमासु श्रुतिषूभयलिंगं ब्रह्म प्रतिपत्तव्यमुतान्यतरलिंगं॥ यदाप्यन्यतरलिंगं तदापि किं सविशेषमुत
निर्विशेषमिति मीमांस्यते॥ तत्रोभयलिंगश्रुत्यनुग्रहादुभयलिंगमेव ब्रह्मेत्येवं प्राप्त इदमुच्यते॥ न तावत्स्वत एव परस्य ब्रह्मण उभयलिं
गत्वमुपपद्यते॥ न ह्येकं वस्तु स्वत एव रूपादिविशेषोपेतं तद्विपरीतं चेत्यवधारयितुं शक्यं विरोधात्॥ अस्तु तर्हि स्थानतः पृथिव्याद्युपाधियोगा
दिति॥ तदपि नोपपद्यते॥ न ह्युपाधियोगादप्यन्यादृशस्य वस्तुनोऽन्यादृशः स्वभावः संभवति॥ न हि स्वच्छः सन्स्फटिकोऽलक्तकाद्युपाधियोगादस्व
च्छो भवति॥ भ्रममात्रत्वादस्वच्छताभिनिवेशस्योपाधीनां चाविद्याप्रत्युपस्थापितत्वात्॥ अतश्चान्यतरलिंगपरिग्रहेऽपि समस्तविशेषर
हितं निर्विकल्पमेव ब्रह्म प्रतिपत्तव्यं न तद्विपरीतं॥ सर्वत्र हि ब्रह्मस्वरूपप्रतिपादनपरेषु वाक्येष्वशब्दमस्पर्शमरूपमव्ययमित्ये
वमादिष्वपास्तसमस्तविशेषमेव ब्रह्मोपदिश्यते॥ ॐ॥ न भेदादिति चेन्न प्रत्येकमतद्वचनात्॥ १२॥ अथापि स्याद्यदुक्तं निर्विकल्पमेक
लिंगमेव ब्रह्म नास्य स्वतः स्थानतो वोभयलिंगत्वमस्तीति॥ तन्नोपपद्यते कस्माद्भेदात् भिन्ना हि प्रतिविद्यं ब्रह्मण आकारा उपदिश्यं
ते॥ चतुष्पाद्ब्रह्म षोडशकलं ब्रह्म वामनीत्वादिलक्षणं ब्रह्म त्रैलोक्यशरीरं वैश्वानरशब्दोदितं ब्रह्मेत्येवंजातीयकाः तस्मात्सविशेष
त्वमपि ब्रह्मणोऽभ्युपगंतव्यं॥ ननूक्तं नोभयलिंगत्वं ब्रह्मणः संभवतीति॥ अयमप्यविरोध उपाधिकृतत्वादाकारभेदस्यान्यथा हि नि
र्विषयमेव भेदशास्त्रं प्रसज्येतेति चेत्॥ नेति ब्रूमः॥ कस्मात्प्रत्येकमतद्वचनात्॥ प्रत्युपाधिभेदं ह्यभेदमेव ब्रह्मणः श्रावयति शास्त्रं य
श्चायमस्यां पृथिव्यां तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं शारीरस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेत्यादि॥ अतश्च
न भिन्नाकारयोगो ब्रह्मणः शास्त्रीय इति शक्यते वक्तुं॥ ॐ॥ अपि चैवमेके॥ १३॥ अपि चैवं भेददर्शननिंदापूर्वकमभेददर्शनमेवैके शाखिनः समा

शां०भा०३ मनंति॥ मनसैवेदमाप्तव्यं नेह नानास्ति किंचन मृत्योः स मृत्युं गच्छति य इह नानेव पश्यति॥ तथा भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं
४४ प्रोक्तं त्रिविधं ब्रह्ममेतदिति॥ समस्तस्य भोग्यभोक्तृनियंतृलक्षणस्य प्रपंचस्य ब्रह्मैकस्वभावतामधीयते॥ कथं पुनराकारवदुपदेशिनीष्व
नाकारोपदेशिनीषु च ब्रह्मविषयासु श्रुतिषु सतीष्वनाकारमेव ब्रह्मावधार्यते न विपरीतमित्यत उत्तरं पठति॥ ॐ॥ अरूपवदेव हि तत्प्रधानत्वा
त्॥१४॥ रूपाद्याकाररहितमेव ब्रह्मावधारयितव्यं न रूपादिमत्कस्मात्तत्प्रधानत्वात् स्थूलमनण्वह्रस्वमदीर्घमशब्दमस्पर्शमरूपमव्यय
माकाशो वै नाम नामरूपयोर्निर्वहिता ते यदंतरा तद्ब्रह्म दिव्यो ह्यमूर्तः पुरुषः सबाह्याभ्यंतरो ह्यजः॥ तदेतद्ब्रह्मापूर्वमनपरमनंतरमबाह्यमयमा
त्मा ब्रह्म सर्वानुभूरित्येवमादीनि हि वाक्यानि निःप्रपंचब्रह्मात्मतत्त्वप्रधानानि नार्थांतरप्रधानानीत्येतत्प्रतिष्ठापितं तत्तु समन्वयादित्यत्र
तस्मादेवंजातीयकेषु यथाश्रुतं निराकारमेव ब्रह्मावधारयितव्यं॥ इतराणि त्वाकारवद्ब्रह्मविषयाणि वाक्यानि न तत्प्रधानानि विहिता
नि॥ तेष्वसति विरोधे यथाश्रुतमाश्रयितव्यं॥ सति तु विरोधे तत्प्रधानान्यतत्प्रधानेभ्यो बलीयांसि भवंतीत्येष विनिगमनायां हेतुः येनोभयी
ष्वपि श्रुतिषु सतीष्वनाकारमेव ब्रह्मावधार्यते न पुनर्विपरीतमिति॥ का तर्ह्याकारवद्विषयाणां श्रुतीनां गतिरित्यत आह॥ ॐ॥ प्रकाशवच्चा
वैयर्थ्यात्॥१५॥ यथा प्रकाशः सौरश्चांद्रमसो वा वियद्व्याप्यावतिष्ठमानोंऽगुल्याद्युपाधिसंबंधात्तेष्वृजुवक्रादिभावं प्र
तिपद्यमानेषु तदाकारतामिव प्रतिपद्यते एवं ब्रह्मापि पृथिव्याद्युपाधिसंबंधात्तदाकारतामिव प्रतिपद्यते तदालंबनो ब्रह्मण आकारवि
शेषोपदेश उपासनार्थो न विरुध्यते॥ एवमवैयर्थ्यमाकारवद्ब्रह्मविषयाणामपि वाक्यानां भविष्यति न हि वेदवाक्यानां कस्यचिद
र्थवत्त्वं कस्यचिदनर्थकत्वमिति युक्तं प्रतिपत्तुं प्रमाणत्वाविशेषात्॥ नन्वेवमपि यत्पुरस्तात्प्रतिज्ञातं नोपाधियोगादप्युभयलिंगत्वं ब्रह्मणो
ऽस्तीति तद्विरुध्यते नेति ब्रूमः॥ उपाधिनिमित्तस्य वस्तुधर्मत्वानुपपत्तेः॥ उपाधीनां चाविद्याप्रत्युपस्थापितत्वात्॥ सत्यामेव चैव नैसर्गिका
मविद्यायां लोकवेदव्यवहारावतार इति तत्र तत्रावोचाम॥ ॐ॥ आह च तन्मात्रं॥१६॥ आह च श्रुतिश्चैतन्यमात्रं विलक्षणरूपांतररहितं
निर्विशेषं ब्रह्म स यथा सैंधवघनोऽनंतरोऽबाह्यः॥ कृत्स्नो रसघन एवैवं वा अरेऽयमात्माऽनंतरोऽबाह्यः॥ कृत्स्नः प्रज्ञानघन एवेति एतदुक्तं ४४
भवति॥ नास्यात्मनोंऽतर्बहिर्वा चैतन्यादन्यद्रूपमस्ति चैतन्यमेव तु निरंतरमस्य स्वरूपं यथा सैंधवघनस्यांतर्बहिश्च लवणरस एव
निरंतरो भवति न रसांतरं तथैवेति॥ दर्शयति चाथो अपि स्मर्यते॥१७॥ दर्शयति च श्रुतिः पररूपप्रतिषेधेनैव ब्रह्म निर्विशेषत्वात्॥ अथा
त आदेशो नेति नेति अन्यदेव तद्विदितादथो अविदितादधीति यतो वाचो निवर्तंते अप्राप्य मनसा सह इत्येवमाद्या॥ बाष्कलिना च बाध्वः
पृष्टः सन्नवचनेनैव ब्रह्म प्रोवाचेति श्रुतं॥ स होवाचाधीहि भो इति स ह तूष्णीं बभूव तं ह द्वितीये तृतीये वा वचन उवाच ब्रूमः॥ खलु त्वं तु

233/1913

न विजानासि उपशांतोऽयमात्मेति॥ तथा स्मृतिष्वपि परप्रतिषेधेनैवोपदिश्यते॥ ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते॥ अनादिम
त्परं ब्रह्म न सत्तन्नासदुच्यते इत्येवमाद्यासु॥ तथा विश्वरूपधरो नारायणो नारदमुवाचेति स्मर्यते॥ माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद॥
सर्वभूतगुणैर्युक्तं नैवं मां ज्ञातुमर्हसि॥ ॐ॥ अत एव चोपमा सूर्यकादिवत्॥१८॥ यत एव चायमात्मा चैतन्यस्वरूपो निर्विशेषो वाङ्मनसा
तीतः परप्रतिषेधोपदेश्यो ऽत एव चास्योपाधिनिमित्तामपारमार्थिकीं विशेषवत्तामभिप्रेत्य जलसूर्यकादिवदित्युपमोपादीयते मो
क्षशास्त्रेषु यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन्॥ उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मेति॥ एक
एव तु भूतात्मा भूते भूते व्यवस्थितः॥ एकधा बहुधा चैव दृश्यते जलचंद्रवत् इति चैवमादिषु॥ अत्र प्रत्यवस्थीयते॥ ॐ॥ अंबुवदग्रहणात्तु न
तथात्वं॥१९॥ न जलसूर्यादितुल्यत्वमिहोपपद्यते॥ तद्वदग्रहणात्सूर्यादिभ्यो हि मूर्तेभ्यः पृथग्भूतं विप्रकृष्टदेशं मूर्तं च जलं गृह्यते तत्र यु
क्तः सूर्यादिप्रतिबिंबोदयो न त्वात्मा मूर्तो न चास्मात्पृथग्भूता विप्रकृष्टदेशाश्चोपाधयः॥ सर्वगतत्वात्सर्वानन्यत्वाच्च॥ तस्मादयुक्तोऽयं दृ
ष्टांत इति अत्र प्रतिविधीयते॥ ॐ॥ वृद्धिह्रासभाक्त्वमंतर्भावादुभयसामंजस्यादेवं॥२०॥ युक्त एव त्वयं दृष्टांतो विवक्षितांशसंभवात् न हि
दृष्टांतदार्ष्टांतिकयोः क्वचित्कंचिद्विवक्षितमंशं मुक्त्वा सर्वसारूप्यं केनचिद्दर्शयितुं शक्यते सर्वसारूप्ये हि दृष्टांतदार्ष्टांतिकभावोच्छेद एव
स्यात् न चेदं स्वमनीषिकया जलसूर्यकादिदृष्टांतप्रणयनं शास्त्रप्रणीतस्य त्वस्य प्रयोजनमात्रमुपन्यस्यते॥ किं पुनरत्र विवक्षितं सारूप्य
मिति॥ तदुच्यते॥ वृद्धिह्रासभाक्त्वमिति॥ जलगतं हि सूर्यप्रतिबिंबं जलवृद्धौ वर्धते जलह्रासे ह्रसति जलचलने चलति जलभेदे भि
द्यत इत्येवं जलधर्मानुविधायि भवति न तु परमार्थतः सूर्यस्य तथात्वमस्त्येवं परमार्थतो विकृतमेकरूपमपि सद्ब्रह्म देहाद्युपाध्यंत
र्भावाद्भजत इवोपाधिधर्मान् वृद्धिह्रासादीनेवमुभयोर्दृष्टांतदार्ष्टांतिकयोः सामंजस्यादविरोधः॥ ॐ॥ दर्शनाच्च॥२१॥ दर्शयति च श्रुतिः
परस्यैव ब्रह्मणो देहादिषूपाधिष्वंतरनुप्रवेशं॥ पुरश्चक्रे द्विपदः पुरश्चक्रे चतुष्पदः पुरः स पक्षी भूत्वा पुरः पुरुष आविशदिति॥ अनेन
जीवेनात्मनानुप्रविश्य इति च॥ तस्माद्युक्तमेतदत एव चोपमा सूर्यकादिवदिति तस्मान्निर्विकल्पैकलिंगमेव ब्रह्म नोभयलिंगं विपरीतलिंगं वेति सि
द्धं॥ अत्र केचिदधिकरणं कल्पयंति॥ प्रथमं तावत् किं प्रत्यस्तमितसर्वप्रपंचमेकाकारं ब्रह्मोत प्रपंचवदनेकाकारोपेतमिति॥ द्वि
तीयं तु स्थिते प्रत्यस्तमितप्रपंचत्वे किं सल्लक्षणं ब्रह्मोत बोधलक्षणमुतोभयलक्षणमिति॥ अत्र वयं वदामः॥ सर्वथाप्यानर्थक्यमः
धिकरणांतरारंभस्येति॥ यदि तावदनेकलिंगत्वं परस्य ब्रह्मणो निराकर्तव्यमिति॥ अयं प्रयासस्तत्पूर्वेणैव न स्थानतोऽपीत्यनेनाधि
करणेन निराकृतमित्युत्तरमधिकरणं प्रकाशवच्चेति व्यर्थमेव भवेन्न च सल्लक्षणमेव ब्रह्म न बोधलक्षणमिति शक्यं वक्तुं विज्ञान

ब्रं०भा० ९२

घन एवं त्वादिश्रुतिवैयर्थ्यप्रसंगात् कथं वा निरस्तचैतन्यं ब्रह्म चैतन्यस्वजीवत्वात्तिबोपदिश्येत नापि बोधलक्षणमेव ब्रह्म न सल्लक्षण
मिति शक्यं वक्तुं ॥ अस्तीत्येवोपलब्धव्य इत्यादिश्रुतिवैयर्थ्यप्रसंगात् कथं वा निरस्तसत्ताको बोधोऽभ्युपगम्येत ॥ नाप्युभयलक्षणमेव ब्र
ह्मेति शक्यं वक्तुं ॥ पूर्वाभ्युपगमबाधप्रसंगात् ॥ सत्ता बाहुसेन च बोधेन बोधव्या हन्त याच सत्तयैव पितं ब्रह्म प्रतिज्ञातानानस्य तदेव पूर्वाद्दु
करणप्रतिषिद्धं सप्रपंचत्वं प्रसज्येत ॥ अनुत्तरत्वदोषः ॥ इति चेन्मैकस्यानेकस्वभावत्वानुपपत्तेः ॥ अथ सत्तैव बोधो बोध एव सत्ता नानयो
योः परस्परमाद्व्यतिरस्तीति यद्युच्येत ॥ तथापि किं सल्लक्षणं ब्रह्मेति बोधलक्षणमुतोभयलक्षणमित्ययं विकल्पो निरालंबन एव स्या
स्यात् ॥ सूत्राणि चैकाधिकरणानि नेवाऽस्माभिर्नीयानि ॥ अपि च ब्रह्मविषयाः श्रुतिः साकारं चनाकारं प्रतिपादयन्तीति विप्रतिपन्नास्व
नाकारेति ब्रह्मणि परिगृहीतेऽवश्यं वक्तव्यं तासां श्रुतीनां मांगतिरत्नाहयें गम्यकात्र्यवत्त्वादीस्त्मान्यर्थवंतरासं पद्यते ॥ यदप्याहुः कारवादिनोः
विषुनयः प्रपंचप्रविलयमनुभुते वा आकारसतिप्रसर्वा एवनं घघगर्वाद् इति दपिनसमीचीनमिवलक्ष्यते कथं ये हि वरविद्याधिकारे केचित्प्रपं
चाऽवंते ॥ ७५००० यथा मुक्ताहस्तत्वहरवः शातारयोस्तयं वे हरयो यं वे रखाक्षहस्तात्रिवकुनि चामंनानि से त्वेव भारयत्तेभवंनिप्रविलयार्थास्तंदंतद्दु
त्या पूर्वमनपरमनंतरमवाह्यमित्युपसंहरायेपुनरुपासनाविधानाधिकारे प्रपंचाऽवंते ॥ यथा मनोमयः प्राणशरीरो भारूपः इत्येवमादयोऽनेनप्र
प्रविलयार्थत्वान्नार्थं ॥ तत्क्रतुकुर्वीत इत्येतं जातीयकेन प्रयत्नेनैवोपासनविधिनां संबंधात् ॥ श्रुत्वा चैवं जातीयकानां गुणानामुपासना
र्थत्वे च कल्पमानेन लक्षणया प्रविलयार्थत्वमवकल्प्यते ॥ सर्वेषां साधारणे प्रविलयार्थत्वे सत्यरूपवदेवहितलधानत्वादिति ॥ विनि
गमनकारणावचनमनवकाशं स्यात् ॥ फलेमथेषां यथोपदेशं कचिद्दुरितक्षयः कचिदैश्वर्यप्राप्तिः कचित्क्रममुक्तिरित्येवं गम्यत एवैवं सर्वेषां ॥ पा
र्थं यार्थत्वे वोपासनवाक्यानां ब्रह्म वाक्यानां ममायनैकवाक्यत्वं ॥ कथं चैषामेकवाक्यतोपेक्षतइतिवक्तव्यमेकनियोगप्रतीतेः प्रयाजद
र्शपूर्णमासवाक्यवदितिचेन्न ॥ ब्रह्म वाक्येषु नियोगाभावात् ॥ वस्तुमात्रपर्यवसायित्वात् ॥ ब्रह्म वाक्यानि न नियोगोपदेशीनी होनद्दस्त्वेण प्रबोधित
मेतत्तु समन्वयादित्यत्र ॥ किं विषयश्चात्र नियोगोऽभिप्रेयतइत्यवक्तव्यं ॥ पुरुषोहि नियुज्यमानः कुर्विति स्वव्यापारे कस्मिंश्चिन्नियुज्येत तत्तु बद्ध
तप्रपंचप्रविलयो नियोगविषयो भविष्यति ॥ अप्रविलापितेहि न हि प्रपंचे ब्रह्मतत्त्वावबोधो न भवत्यतो ब्रह्म तत्त्वावबोधप्रत्यनीकभूतात् द्वैत
प्रपंचः प्रविलाप्यो ॥ यथा स्वर्गकामस्य यागोऽनुष्ठातव्य उपदिश्यत एवं मुमुक्षोरेकामस्य प्रपंचविलयो यथा तमसि व्यवस्थितं ॥ घटादितत्त्वमेव
भुत्समानेनतत्त्वसनीकभूतं तमः प्रविलाप्यत एवं ब्रह्मतत्त्वमवबुभुत्समानेन प्रत्यनीकभूतः प्रपंचः प्रविलापयितव्यः ॥ ब्रह्मस्वभावोहि प्रपं
नप्रपंचस्वभावं ब्रह्मणोऽनामरूपप्रपंचविलापनेन ब्रह्म तत्त्वावबोधो भवतीति ॥ अत्र वयं पृच्छामः ॥ कोऽयं प्रपंचप्रविलयो नाम ॥ किमग्निप्र
तप्तं घृतकाठिन्यप्रविलयवत्प्रपंचप्रविलयः कर्तव्यः ॥ आहोस्विदेकस्मिंश्चन्द्रे तिमिरकृतानेकचंद्रप्रपंचवदविद्याकृतो ब्रह्मणि नाम
नामरूपप्रपंचो

रूपप्रपंचो विद्यया प्रविलापयितव्य इति ॥ यदि तावद्विद्यमानोऽयं प्रपंचो देहादिलक्षण आध्यात्मिको बाह्यश्च पृथिव्यादिलक्षणः प्रविला
पयितव्य इत्युच्यते ॥ स पुरुषमात्रेणाशक्यः ॥ प्रविलापयितुमिति तत्प्रविलयोपदेशोऽशक्यविषय एतस्यादेकेन चादिमुक्तेन पृथिव्यादि
प्रविलयः ॥ कृत इदानीं पृथिव्यादिशून्यं जगदभविष्यत्तथाविद्याध्यस्तो ब्रह्मण्येकस्मिन्नयं प्रपंचो विद्यया प्रविलाप्यत इति ब्रूयात् ॥ ततो ब्र
ह्मैवाविद्याध्यस्तप्रपंचप्रत्याख्यानेनावेदितव्यमेकमेवाद्वितीयं ब्रह्म तत्सत्यं स आत्मा तत्त्वमसीति तस्मिन्विद्या स्वयमेवोत्पद्यते ॥ तया चा
विद्या बाध्यते ततश्चाविद्याध्यस्तः सकलोऽयं नामरूपप्रपंचः स्वप्नप्रपंचवत्प्रविलीयते ॥ अनावेदिते तु ब्रह्मणि ब्रह्मविज्ञानं कुरु प्रपंचप्र
विलयं चेति शतकृत्वोऽप्युक्ते न ब्रह्म विज्ञानं प्रपंचप्रविलयो वा जायते ॥ ननु वेदिते ब्रह्मणि तद्विज्ञानविषयः प्रपंचप्रविलयविषयो वा
नियोगः स्यान्न ॥ निःप्रपंचब्रह्मात्मत्वावेदनेनैवोभयसिद्धेः रज्जुस्वरूपप्रकाशनेनैव हि रज्जुस्वरूपविज्ञानमविद्याध्यस्तसर्पादिप्रपंचप्रविल
यश्च भवति न च कृतमेव पुनः क्रियते ॥ नियोज्योऽपि च प्रपंचावस्थो वा जीवो गम्यते जीवो नाम स प्रपंचपक्षस्यैव सोऽस्याद्ब्रह्मपक्षस्यैव वा प्रथमे
विकल्पेऽपि प्रपंचब्रह्मतत्त्वप्रतिपादनेन पृथिव्यादिवज्जीवस्यापि प्रविलापनत्वात्कस्य प्रपंचप्रविलापने नियोग उच्येत ॥ कस्य वा नियोगनिष्ठतया मो
क्षोऽवाप्तव्य उच्येत ॥ द्वितीयेऽपि ब्रह्मैवानियोज्यस्वभावं जीवस्य स्वरूपं जीवत्वं त्वविद्याकृतमेवेति प्रतिपादिते ब्रह्मणि नियोज्याभावान्नियोगा
भाव एव ॥ द्रष्टव्यादिशब्दा अपि परविद्याधिकारपठितास्तत्त्वाभिमुखीकरणप्रधाना न तत्त्वावबोधविधिप्रधाना ॥ लोकेऽपीदं पश्येदमा
कर्णयेति चैवं जातीयकेषु निर्देशेषु प्रणिधानमात्रं कुर्वित्युच्यते ॥ न साक्षाज्ज्ञानमेव कुर्विति उच्यते न साक्षाज्ज्ञानमेव कुर्विति ज्ञेयाभिमुख
स्यापि ज्ञानं कदाचिज्ज्ञायते कदाचिन्न ज्ञायते ॥ तस्मात्तं प्रति ज्ञानविषय एव दर्शयितव्यो ज्ञापयितुकामेन तस्मिन्दर्शिते स्वयमेव यथा
विषयं यथाप्रमाणं च ज्ञानमुत्पद्यते न च प्रमाणान्तरेणान्यथा प्रसिद्ध्यर्थेऽन्यथा ज्ञानं नियुक्तस्याप्युपपद्यते ॥ यदि पुनर्नियुक्तोऽहमित्यन्य
थाज्ञानं कुर्यान्न तु तज्ज्ञानं किं तर्हि मानसी सा क्रिया स्वयमेव चेदन्यथोत्पद्येत भ्रान्तिः स्याज्ज्ञानं तु प्रमाणजन्यं यथाभूतविषयं च न तन्नियो
गशतेनापि कारयितुं शक्यते न च प्रतिषेधशतेनापि वारयितुं शक्यते ॥ न हि तत्पुरुषतंत्रं वस्तुतंत्रमेव हि तत्तस्तेनापि नियोगाभावः ॥ किं
चान्यन्नियोगनिष्ठतयैव च पर्यवसायिनि आम्नाये यदभ्युपगतं मतमनियोज्यब्रह्मात्मत्वं जीवस्य तदप्रमाणकमेव स्यादथ शास्त्रमेवा
नियोज्यब्रह्मात्मत्वमस्य वक्ष्यति तदवबोधं च पुरुषं नियुंक्तेति ततो ब्रह्मशास्त्रस्यैकस्य द्व्यर्थपरता विरूपार्थपरता च प्रसज्येयाताम् ॥
नियोगपरतायां च श्रुतहानिरश्रुतकल्पना कर्मफलवन्मोक्षस्याऽदृष्टफलत्वमनित्यत्वं चेत्येवमादयो दोषा नैके न कथंचित्परिहर्तुं शक्यन्त
तस्मादवगतिनिष्ठान्येव ब्रह्मवाक्यानि न नियोगनिष्ठानि ॥ अतश्चैकनियोगप्रतीतेरेकवाक्यतेत्ययुक्तमभ्युपगम्यमानेऽपि च ब्रह्म

235/1913

शां०भा० ९२

घन एवंत्यादिश्रुतिविरोधप्रसंगात्कथं वा निरस्तचैतन्यं ब्रह्म चैतन्यस्य जीवस्यात्मेत्युपदिश्येत नापि बोधलक्षणमेव ब्रह्मानन्दलक्षण
मिति शक्यं वक्तुं ॥ अस्तीत्येवोपलब्धव्य इत्यादिश्रुतिविरोधप्रसंगात्कथं वा निरस्तसत्ताको बोधोऽभ्युपगम्येत ॥ नाप्युभयलक्षणमेव ब्रह्म
ेति शक्यं वक्तुं ॥ पूर्वाभ्युपगमबाधप्रसंगात् ॥ सत्ताव्यावृत्तेन च बोधेन बोधव्यावृत्तया च सत्तयोपेतं ब्रह्म प्रतिजानानस्य तदेव पूर्वाद्
करणप्रतिषिद्धं सप्रपंचत्वं प्रसज्येत ॥ श्रुतत्वाददोषः ॥ इति चेन्नैकस्यानेकस्वभावत्वानुपपत्तेः ॥ अथ सत्तैव बोधो बोध एव सत्ता नानयो
ः परस्परव्यावृत्तिरस्तीति यद्युच्येत ॥ तथापि किं सल्लक्षणं ब्रह्मोत बोधलक्षणमुतोभयलक्षणमित्ययं विकल्पो निरालंबन एव स्या
त् ॥ सूत्राणि चैकाधिकरणत्वेनैवास्माभिर्नीतानि ॥ अपि च ब्रह्मविषयासु श्रुतिषु साकारवदनाकारप्रतिपादनेन विप्रतिपन्नासु स्व
नाकारे तिष्ठन्त्यपरिशिष्टेति वक्तव्यमन्यतरासां श्रुतीनां गतिस्त्वादर्थं न प्रकाशवच्चेत्यादीसूत्राण्यर्थवंतराणि संपद्यते ॥ यद्यप्याकाशवादिन्यो
ऽपि श्रुतयः प्रपंचप्रविलयमुखेन नानाकारप्रतिषेधार्था एव न पृथगर्थास्तथापि समीचीनमित्यवलंब्यते कथं ये हि परविद्याधिकारे के चित्प्रपं
चा उच्यंते ॥ ७१००० यथा पुरुषोऽहरहः शतादशोऽयं वेहरयो यं वेदशाम सहस्राणि बहूनि यानि तानि वेत्येवमाद्यस्ते भवंति प्रविलयार्थास्तदेतद्
ला पूर्वमनपरमनंतरमबाह्यमित्युपसंहारोऽप्युनरुपासनविधानाधिकारे प्रपंचा उच्यंते ॥ यथा मनोमयः प्राणशरीरो भारूपः इत्येवमाद्यो नतेषां
प्रविलयार्थत्वं न्याय्यं ॥ स क्रतुं कुर्वीतेत्येवंजातीयकेन प्रकृतेनैवोपासनविधिना तेषां संबंधात् ॥ श्रुत्या चैवंजातीयकानां गुणानामुपासना
र्थत्वेन कल्प्यमानेन लक्षणया प्रविलयार्थत्वमेव कल्प्यते ॥ सर्वेषां साधारणे प्रविलयार्थत्वे सत्यरूपवदेवहितत्वप्रधानत्वादिति ॥ विनि
गमनकारणाभावेनमनवकाशं स्यात् ॥ फलेमध्ये पांयथोपदेशं कचिद्दुरितक्षयः कचिदैश्वर्यप्राप्तिः कचित्क्रममुक्तिरित्येवंगम्य एतेषां स्वर्गः ॥ पा
धेयगर्व्यमेवोपासनवाक्यानां ब्रह्मवाक्यानां चान्यार्थानेकवाक्यत्वं ॥ कथं चैषामेकवाक्यतोपेक्षत इति वक्तव्यमेकनियोगप्रतीतेः प्रयोजद
र्शपूर्णमासवाक्यवदिति चेन्न ॥ ब्रह्मवाक्येषु नियोगाभावात् ॥ वस्तुमात्रपर्यवसायिनि हि ॥ ब्रह्मवाक्यानि न नियोगोपदेशीनीत्येतद्विस्तरेणप्रलक्षित
मेतत्सुसमन्वयादिसूत्र ॥ किं विषयश्चात्र नियोगोऽभिप्रेयत इति वक्तव्यं ॥ पुरुषो हि नियुज्यमानः कुर्विति स्वव्यापारे कस्मिंश्चिन्नियुज्येत ननु द्वैत
प्रपंचविलयो नियोगविषयो भविष्यति ॥ अप्रविलापिते हि द्वैतप्रपंचे ब्रह्मतत्त्वावबोधो न भवति परतो ब्रह्मतत्त्वावबोधप्रत्यनीकभूतो द्वैत
प्रपंचः प्रविलाप्यो ॥ यथा स्वर्गकामस्य यागोऽनुष्ठातव्य उपदिश्यत एवमपवर्गकामस्य प्रपंचविलयो यथा चतमसि व्यवस्थितं ॥ घटादितत्त्वमेव
बुभुत्समानेन तत्प्रत्यनीकभूतं तमः प्रविलाप्यत एवं च ब्रह्मतत्त्वमवबुभुत्समानेन प्रत्यनीकभूतः प्रपंचः प्रविलापयितव्यः ॥ ब्रह्मस्वभावो हि प्रपं
नप्रपंचस्वभावं ब्रह्म तेन नामरूपप्रपंचविलापनेन ब्रह्मतत्त्वावबोधो भवतीति ॥ अत्र वयं पृच्छामः ॥ कोऽयं प्रपंचप्रविलयो नाम ॥ किमग्निप्र ९२
तापसंपर्कात् ॥ घनकाठिन्यप्रविलय इव प्रपंचप्रविलयः कर्तव्य ॥ आहोस्विदेकस्मिंश्चन्द्रे तिमिरकृतानेकचन्द्रप्रपंचवदविद्याकृतो ब्रह्मणि नाम

रूपप्रपंचो विद्यया प्रविलापयितव्य इति ॥ यदि तावद्विद्यमानोऽयं प्रपंचो देहादिलक्षण आध्यात्मिको बाह्यश्च पृथिव्यादिलक्षणः प्रविला
पयितव्य इत्युच्यते ॥ स पुरुषमात्रेणाशक्यः ॥ प्रविलापयितुमिति तत्प्रविलयोपदेशोऽशक्यविषय एव स्यादेकेन चादिमुक्तेन पृथिव्यादि
प्रविलयः ॥ कृत इदानीं पृथिव्यादिशून्यं जगदभविष्यत् अथाविद्याध्यस्तो ब्रह्मण्येकस्मिन्नयं प्रपंचो विद्यया प्रविलाप्यत इति ब्रूयात् ॥ ततो ब्र
ह्मैवाविद्याध्यस्तप्रपंचप्रत्याख्यानेनावेदितव्यमेकमेवाद्वितीयं ब्रह्म तत्सत्यं स आत्मा तत्त्वमसीति तस्मिन्नावेदिते विद्या स्वयमेवोत्पद्यते ॥ तया वि
विद्याबाधते ततश्चाविद्याध्यस्तः सकलोऽयं नामरूपप्रपंचः स्वप्नप्रपंचवत्प्रविलीयते ॥ अनावेदिते तु ब्रह्मणि ब्रह्मविज्ञानं कुरु प्रपंचप्र
विलयं चेति शतकृत्वोऽप्युक्ते न ब्रह्मविज्ञानं प्रपंचप्रविलयो वा जायते ॥ नन्वावेदिते ब्रह्मणि तद्विज्ञानविषयः प्रपंचप्रविलयविषयो वा
नियोगः स्यान्न ॥ निःप्रपंचब्रह्मतत्त्वावेदनेनैवोभयसिद्धेः रज्जुस्वरूपप्रकाशनेन हि रज्जुस्वरूपविज्ञानमविद्याध्यस्तसर्पादिप्रपंचप्रविल
यश्च भवति न च कृतस्य करणं पुनः क्रियते ननु नियोज्योऽपि च प्रपंचावस्थायोऽवगम्यते जीवो नाम स प्रपंचपक्षस्यैव सतो व्याख्यातृपक्षस्यैव वा प्रथमे
विकल्पे निःप्रपंचब्रह्मतत्त्वप्रतिपादनेन पृथिव्यादिजीवस्यापि प्रविलापितत्वात्कस्य प्रपंचप्रविलाये नियोग उच्यते ॥ कस्य वा नियोगान्निष्ठतयामो
क्षो वा प्रत्यय उच्यते ॥ द्वितीयेऽपि ब्रह्मैवानियोज्यस्वभावं जीवस्य स्वरूपं जीवत्वं त्वविद्याकृतमेवेति प्रतिपादिते ब्रह्मणि नियोज्याभावान्नियोगा
भाव एव ॥ द्रष्टव्यादिशब्दा अपि परविद्याधिकारपठितास्तत्त्वाभिमुखीकरणप्रधाना न तत्त्वावबोधविधिप्रधाना ॥ लोके पीदं पश्येदमा
कर्णयेति चैवंजातीयकेषु निर्देशेषु प्रणिधानमात्रं कुर्वित्युच्यते ॥ न साक्षाज्ज्ञानमेव कुर्विति उच्यते न साक्षाज्ज्ञानमेव कुर्विति क्रियाभिमुख
स्यापि ज्ञानं कदाचिज्जायते कदाचिन्न जायते ॥ तस्मात्तं प्रति ज्ञानविषय एव दर्शयितव्यो ज्ञापयितुकामेन तस्मिन्दर्शिते स्वयमेव यथा
विषयं यथाप्रमाणं च ज्ञानमुत्पद्यते न च प्रमाणान्तरेणान्यथाप्रसिद्धेऽर्थेऽन्यथा ज्ञानं नियुक्तस्याप्युपपद्यते ॥ यदि पुनर्नियुक्तोऽहमित्यन्य
थाज्ञानं कुर्यान्न तु तज्ज्ञानं किं तर्हि मानसी सा क्रिया स्वयमेव वेदन्यथोत्पद्यते भ्रांतिः साज्ज्ञानं तु प्रमाणजन्यं यथाभूतविषयं च न तन्नियो
गशतेनापि कारयितुं शक्यं तेन च प्रतिषेधशतेनापि वारयितुं शक्यते ॥ न हि तत्पुरुषतंत्रं वस्तुतंत्रमेव हि तदतोऽपि नियोगाभावः ॥ किं
चान्यन्नियोगनिष्ठतयैव पर्यवसायान्नायं यदभ्युपगमतमुनियोज्यब्रह्मात्मसंजीवस्य तदप्रमाणकमेव स्यात् व्यशास्त्रामेवा
नियोज्यब्रह्मात्मत्वमप्यचक्षीत तदवबोधे च पुरुषं नियुंजीत ततो ब्रह्मशास्त्रस्यैकस्य व्यर्थपरतापिरूपार्थपरता च प्रसज्येयातां ॥
नियोगपरतायां च श्रुतहानिरश्रुतकल्पना कर्मफलवन्मोक्षस्यादृष्टफलत्वमनित्यत्वं चेत्येवमादयो दोषा न केन चित्परिहर्तुं शक्यंत
तस्मादवगतिनिष्ठान्येव ब्रह्मवाक्यानि न नियोगनिष्ठानि ॥ अतश्चैव नियोगप्रतीतेरेकवाक्यत्वं न्ययुक्तमभ्युपगम्यमानेऽपि च ब्रह्म

वाक्यानि न नियोगशिष्टानि भवितुमर्हंति केवलं निःप्रपंचोपदेशेषु सप्रपंचोपदेशेषु वा सिद्धं ॥ न हि शास्त्रांतरादिभिः प्रमाणैर्नियोगभेदे गम्यमाने
ते सर्वत्रैको नियोग इति शक्यं वक्तुं ॥ प्रयाजदर्शपूर्णमासवाक्येष्वधिकारांशाभेदाद्युक्तमेकत्वं न हि सगुणनिर्गुणचोदनासु कश्चिदे
कत्वाकारांशोऽस्ति ॥ न हि भारूपत्वादयो गुणाः प्रपंचविलयोपकारिणो नापि प्रपंचप्रविलयः ॥ नारूपत्वादिगुणोपकारी परस्परविरोधित्वान्न
हि कृत्स्नप्रपंचप्रविलापनं प्रपंचैकदेशापेक्षणं चैकस्मिन्धर्मिणि युक्तं समावेशयितुं ॥ तस्मादस्मदुक्त एव विभाग आकाशवदनाकारोपदे
शानां युक्ततर इति ॥ ॐ ॥ प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः ॥ २१ ॥ द्वे वाव ब्रह्मणो रूपे मूर्तं चैवामूर्तं चेत्युपक्रम्य पंच महाभूता
नि द्वैराश्येन प्रविभज्यामूर्तरसस्य च पुरुषशब्दोदितस्य माहारजनादीनि रूपाणि दर्शयित्वा पुनः पठ्यते ॥ अथात आदेशो नेति नेति न ह्येतस्मा
दिति नेत्यन्यत्परमस्तीति ॥ तत्र कोऽस्य प्रतिषेधस्य विषय इति जिज्ञासामहे ॥ न ह्यत्रेदं तदिति किंचिद्विशेषितं किंचित्प्रतिषेध्यमुपलभ्यते ॥ इतिशब्दे
न त्वत्र प्रतिषेध्यं किंचित्समर्प्यते नेति नेतीति ॥ इतिपरत्वान्नञ्प्रयोगस्य इतिशब्दश्चायं संनिहितालंबन एवंशब्दसमानवृत्तिः प्रयुज्यमानो दृश्यते इ
ति हास्मा उपाख्याय कथयतीत्येवमादिषु संनिहितं चात्र प्रकरणसामर्थ्याद्रूपद्वयं सप्रपंचं ब्रह्मणस्तच्च ब्रह्म यस्य ते द्वे रूपे ॥ तत्र नः संशय उप
जायते किमयं प्रतिषेधो रूपे रूपवच्चोभयमपि प्रतिषेधत्याहोस्विदेकतरं यद्यप्येकतरं ततः किं ब्रह्म प्रतिषेधति रूपे परिशिनष्ट्याहो
स्विद्रूपे प्रतिषेधति ब्रह्म परिशिनष्टीति तत्र प्रकृतत्वाविशेषादुभयमपि प्रतिषेधतीत्याशंकामाह ॥ द्वौ चैतौ प्रतिषेधौ द्विर्नेतिशब्दप्रयोगा
त्तयोरेकेन सप्रपंचं ब्रह्मणो रूपं प्रतिषिध्यते परेण रूपवद्ब्रह्मेति भवति मतिरथवा ब्रह्मैव रूपवत्प्रतिषिध्यते ॥ तद्धि वाङ्मनसातीतत्वादसंभा
व्यमानसद्भावं प्रतिषेधार्हं न तु रूपप्रपंचः प्रत्यक्षादिगोचरत्वात्प्रतिषेधार्हः अभ्यासस्त्वादरार्थ इत्येवं प्राप्ते ब्रूमः ॥ न तावदुभयप्रतिषेध उपपद्य
ते शून्यवादप्रसंगात् ॥ किंचिद्धि परमार्थमालंब्यापरमार्थः प्रतिषिध्यते यथा रज्ज्वादिषु सर्पादयः स च परिशिष्यमाणे कस्मिंश्चिद्भावेऽव
कल्प्यते ॥ कृत्स्नप्रतिषेधे तु कोऽन्यो भावः परिशिष्यते ॥ अपरिशिष्यमाणे चान्यस्मिन्य इतरः प्रतिषेद्धुमारभ्यते ॥ तस्यैव परमार्थत्वापत्तेः प्र
तिषेधानुपपत्तिः ॥ नापि ब्रह्मप्रतिषेध उपपद्यते ॥ ब्रह्म ते ब्रवाणीत्याद्युपक्रमविरोधात् असन्नेव स भवति ॥ असद्ब्रह्मेति वेद चेदित्यादि नि
न्दाविरोधात् अस्तीत्येवोपलब्धव्य इत्यवधारणविरोधात् सर्ववेदांतकोपप्रसंगाच्च ॥ वाङ्मनसातीतत्वमपि ब्रह्मणो नाभावाभिप्रायेणाभिधी ३२
यते ॥ न हि महता परिकरबंधेन ब्रह्मविदाप्नोति परं सत्यं ज्ञानमनंतं ब्रह्मेत्यादिना वेदांतेषु ब्रह्म प्रतिपाद्य तस्यैव पुनरभावोऽभिलप्येत ॥ प्रक्षा
लनाद्धि पंकस्य दूरादस्पर्शनं वरमिति हि न्यायः प्रतिपादनप्रक्रिया त्वेषा यतो वाचो निवर्तंते अप्राप्य मनसा सहेति ॥ एतदुक्तं भवति वाङ्
मनसातीतमविषयांतःपाति प्रत्यगात्मभूतं नित्यशुद्धबुद्धमुक्तस्वभावं ब्रह्मेति ॥ तस्माद्ब्रह्मणो रूपप्रपंचं प्रतिषेधति परिशिनष्टि ब्रह्मेत्य
भ्युपगंतव्यं ॥ तदेतदुच्यते ॥ प्रकृतैतावत्त्वं हि प्रतिषेधतीति प्रकृतं यदेतावत्परिच्छिन्नं मूर्तामूर्तलक्षणं ब्रह्मणो रूपं तदेष शब्दः प्रति

237/1913

षेधति ॥ तद्धि प्रकृतं प्रपंचितं च पूर्वस्मिन्ग्रंथे अधिदैवतमध्यात्मं च तज्जनितमेव च वासनालक्षणमपरं रूपममूर्तरसभूतं पुरुषशब्दोदितं लिं
गात्मव्यपाश्रयं महारजनाद्युपमाभिर्दर्शितममूर्तरसस्य पुरुषस्य चक्षुर्ग्राह्यरूपयोगित्वानुपपत्तेस्तदेतत्सप्रपंचं ब्रह्मणो रूपं संनि
हितालंबनेनेतिकरणेन प्रतिषेधकनञ्प्रत्युपनीयत इति गम्यते ॥ ब्रह्म तु रूपविशेषणत्वेन षष्ठ्या निर्दिष्टं पूर्वस्मिन्ग्रंथे न स्वप्रधानत्वेन ॥ प्रपं
चिते च तदीये रूपद्वये रूपवतः स्वरूपजिज्ञासायामिदमुपक्रांतमथात आदेशो नेति नेतीति ॥ तत्र कल्पितरूपप्रत्याख्यानेन ब्रह्मणः स्वरूपावे
दनमिदमिति निर्णीयते ॥ तदास्पदं हीदं समस्तं कार्यं नेति नेतीति प्रसिद्धं ॥ युक्तं च कार्यस्य वाचारंभणशब्दादिभ्योऽसत्त्वमिति नेति नेतीति प्रतिषेद्धु
म् ॥ न तु ब्रह्मणः सर्वकल्पनामूलत्वात् ॥ न चात्रेयमाशंका कर्तव्या कथं हि शास्त्रं स्वयमेव ब्रह्मणो रूपद्वयं दर्शयित्वा स्वयमेव च पुनः प्रतिषेध
ति प्रक्षालनाद्धि पंकस्य दूरादस्पर्शनं वरमिति ॥ यतो नेदं शास्त्रं प्रतिपाद्यत्वेन ब्रह्मणो रूपद्वयं निर्दिशति लोकप्रसिद्धं त्विदं रूपद्वयं ब्रह्म
णि कल्पितं परामृशति प्रतिषेधाय शुद्धब्रह्मस्वरूपप्रतिपादनाय चेति निरवद्यं ॥ द्वौ चैतौ प्रतिषेधौ यथासंख्यन्यायेन द्वे अपि मूर्तामूर्ते
प्रतिषेधतः ॥ यद्वा पूर्वः प्रतिषेधो भूतराशिं प्रतिषेधत्युत्तरो वासनाराशिं ॥ अथवा नेति नेतीति वीप्सा यावत्किंचिदुत्प्रेक्षितं तन्स
र्वं भवतीत्यर्थः ॥ परिगणितप्रतिषेधे हि क्रियमाणे यदि नेदं ब्रह्म किमन्यत्तत्र ब्रह्म भवेदिति जिज्ञासा स्यात् ॥ वीप्सायां तु सत्यां समस्तस्य वि
षयजातस्य प्रतिषेधादविषयः प्रत्यगात्मा ब्रह्मेति जिज्ञासा निवर्तते ॥ तस्मात्प्रपंचमेव ब्रह्मणि कल्पितं प्रतिषेधति परिशिनष्टि ब्र
ह्मेति निर्णयः ॥ इतश्चैष एव निर्णयो यतस्तत्प्रतिषेधाद्भूयो ब्रवीति अन्यत्परमस्तीति ॥ अभावावसाने हि प्रतिषेधे किमन्यत्परमस्ती
ति ब्रूयात् ॥ नैषाक्षरयोजना नेति नेतीति ब्रह्मादिश्य तमेवादेशं पुनर्निर्वक्ति ॥ नेतीत्यस्य कोऽर्थः न ह्येतस्माद्ब्रह्मणो व्यतिरिक्तमस्तीत्य
तो नेति नेत्युच्यते ॥ पुनः स्वयं नास्तीत्यर्थः ॥ तच्च दर्शयत्यपरमप्रतिषिद्धं ब्रह्मास्तीति ॥ यदा पुनरेवमक्षराणि योज्यंते न ह्येतस्मादिति ने
ति ॥ न हि प्रपंचप्रतिषेधरूपादादेशनादन्यत्परमादेशनं ब्रह्मणोऽस्तीति तदा ततो ब्रवीति च भूय इत्येतन्नामधेयविषयं योजयितव्यं अथ ना
मधेयं सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यमिति हि ब्रवीति ॥ तच्च ब्रह्मावसाने प्रतिषेधे समंजसं भवति अभावावसाने तु प्रतिषे
धे किं सत्यस्य सत्यमित्युच्यते ॥ तस्माद्ब्रह्मावसानोऽयं प्रतिषेधो नाभावावसान इत्यध्यवस्यामः ॥ ॐ ॥ तदव्यक्तमाह हि ॥ २२ ॥ यत्तत्प्रतिषि
द्धात्प्रपंचजातादन्यत्परं ब्रह्म तदस्ति चेत्कस्मान्न गृह्यत इति उच्यते ॥ तदव्यक्तमनिंद्रियग्राह्यं सर्वदृश्यसाक्षित्वादाह ह्येवं श्रुतिः ॥
न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैस्तपसा कर्मणा वा ॥ स एष नेति नेत्यात्मा अगृह्यो न हि गृह्यते यत्तदद्रेश्यमग्राह्यं यदा ह्येवैष एत
स्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयने इत्याद्याः स्मृतिरप्यव्यक्तोऽयमचिंत्योऽयमविकार्योऽयमुच्यते ॥ इत्याद्या ॥ ॐ ॥ अपि संराधने प्र

त्यनुमानाभ्यां॥२३॥ अपि चैनमात्मानं निरस्तप्रपंचमव्यक्तं संराधनकाले पश्यंति संराधनं भक्तिध्यानप्रणिधानाद्यनुष्ठानं कथं पुनर
वगम्यते संराधनकाले पश्यंतीति॥ प्रत्यक्षानुमानाभ्यां श्रुतिस्मृतिभ्यामित्यर्थः॥ तथा हि श्रुतिः॥ परांचि खानि व्यतृणत्स्वयंभूस्तस्मात्प
राङ्पश्यति नांतरात्मन्॥ कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्निति॥ ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यति
निष्कलं ध्यायमान इति॥ चैवमाद्या स्मृतिरपि यं विनिद्रा जितश्वासाः संतुष्टाः संयतेंद्रियाः॥ ज्योतिः पश्यंति युंजानास्तस्मै योगात्मने
नमः॥ इति योगिनस्तं प्रपश्यंति भगवंतं सनातनमिति चैवमाद्या॥ ननु संराधकभावाभ्युपगमात्परेतरात्मनोरन्यत्वं स्यादिति॥ नेत्युच्य
ते॥ ॐ प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासात्॥२४॥ यथा प्रकाशाकाशसवितृप्रभृतयोऽंगुलिकरकोदकप्रभृतिषु कर्मसू
पाधिषु सविशेषा इवावभासंते॥ न च स्वाभाविकीमविशेषात्मतां जहति॥ एवमुपाधिनिमित्त एवायमात्मभेदः स्वतस्त्वैकात्म्यमे
व तथाहि वेदांतेष्वभ्यासेनासकृज्जीवप्राज्ञयोरभेदः प्रतिपाद्यते॥ ॐ अतोऽनंतेन तथा हि लिंगं॥२५॥ अतश्च स्वाभाविकत्वादभेद-
स्याविद्याकृतत्वाज्ज्ञाभेदस्य विद्यया विधूयाविद्यां जीवः परेणानंतेन प्राज्ञेनात्मनैकतां गच्छति॥ तथाहि लिंगं स यो ह वै तत्परं ब्रह्म
वेद ब्रह्मैव भवति ब्रह्मैव सन्ब्रह्माप्येतीति चैवमादि॥ ॐ उभयव्यपदेशात्त्वहिकुंडलवत्॥२६॥ अस्मिन्नेव संराध्यसंराधकभावमतां
तरमुपन्यस्यति स्वमतविशुद्धये क्वचिज्जीवप्राज्ञयोर्भेदो व्यपदिश्यते॥ ततस्तु तं पश्यति निष्कलं ध्यायमान इति ध्यातृध्यातव्यत्वेन द्रष्टृ
द्रष्टव्यत्वेन च परात्परं पुरुषमुपैति दिव्यमिति गंतृगंतव्यत्वेन यः सर्वाणि भूतान्यंतरो यमयतीति नियंतृनियंतव्यत्वेन॥ क्वचित्पुनस्तयोरेवा
भेदो व्यपदिश्यते तत्त्वमसि अहं ब्रह्मास्मि एष त आत्मा सर्वांतरः एष त आत्मांतर्याम्यमृत इति॥ तत्रैवमुभयव्यपदेशे सति
यद्यभेदैकांत एव परिगृह्येत भेदव्यपदेशो निरालंबन एव स्यादत उभयव्यपदेशदर्शनादहिकुंडलवदत्र तत्त्वं भवितुमर्हति॥ यथाहि
रित्यभेदः कुंडलाभोगप्रांशुत्वादीनि भेद एवमिहापीति॥ ॐ प्रकाशाश्रयवद्वा तेजस्त्वात्॥२७॥ अथवा प्रकाशाश्रयवदेतत्प्रतिपत्त
व्यं॥ यथा प्रकाशः सावित्रस्तदाश्रयश्च सविता नात्यंतभिन्नावुभयोरपि तेजस्त्वाविशेषादथ च भेदव्यपदेशभाजौ भवत एवमिहापी
ति॥ ॐ॥ पूर्ववद्वा॥२८॥ यथा वा पूर्वमुपन्यस्तं प्रकाशादिवच्चावैशेष्यमिति तथैव तद्भवितुमर्हति॥ तथा ह्यविद्याकृतत्वाद्बंधस्य विद्य
या मोक्ष उपपद्यते॥ यदि पुनः परमार्थ एव बंधः कश्चिदात्माहिकुंडलन्यायेन वा परस्यात्मनः संस्थानभूतः प्रकाशाश्रयन्यायेन चै
कदेशभूतोऽभ्युपगम्येत॥ ततः पारमार्थिकस्य बंधस्य तिरस्कर्तुमशक्यत्वान्मोक्षशास्त्रवैयर्थ्यं प्रसज्येत॥ न चात्रोभावपि भेदाभेदांशु

23911913

नि तुल्यवद्व्यपदिशति अभेदमेव हि प्रतिपाद्यत्वेन निर्दिशति भेदं तु पूर्वप्रसिद्धमेवानुवदत्यर्थांतरविवक्षया॥ तस्मात्प्रकाशादिवच्चाविशेष्य
मित्येष एव सिद्धांतः॥ ॐ॥ प्रतिषेधाच्च॥२९॥ इतश्चैष एव सिद्धांतो यत्कारणं परस्मादात्मनोऽन्यं चेतनं प्रतिषेधति शास्त्रं नान्योऽतोऽस्ति द्रष्टेत्ये
वमादि अथात आदेशो नेति नेति तदेतद्ब्रह्मापूर्वमनपरमनंतरमबाह्यमिति च ब्रह्मव्यतिरिक्तप्रपंचनिराकरणाच्चैष एव सिद्धांत इति गम्यते॥ ॐ
परमतः सेतून्मानसंबंधभेदव्यपदेशेभ्यः॥३०॥ यदेतन्निरस्तसमस्तप्रपंचं ब्रह्म निर्धारितमस्मात्परमन्यत्तत्त्वमस्ति नास्तीति श्रुतिविप्रति
पत्तेः संशयः॥ कानिचिद्धि वाक्यान्यापातेन प्रतिभासमानानि ब्रह्मणोऽपि परमन्यत्तत्त्वं प्रतिपादयंतीव तेषां परिहारमभि
धातुमयमुपक्रमः क्रियते॥ परमतो ब्रह्मणोऽन्येन तत्त्वेन भवितुमर्हति कुतः सेतुव्यपदेशादुन्मानव्यपदेशात्संबंधव्यपदेशाद्भेदव्यपदेशाच्च॥ सेतुव्यपदेशस्ता
वदथ य आत्मा स सेतुर्विधृतिरित्यात्मशब्दाभिहितस्य ब्रह्मणः सेतुत्वं कीर्तयति॥ सेतुशब्दश्च लोके जलसंतानविच्छेदकारणे मृद्दार्वादिचये
सिद्धः॥ इह तु सेतुशब्द आत्मनि प्रयुक्त इति लौकिकात्सेतोरिवात्मसेतोरन्यस्य वस्तुनोऽस्तित्वं गमयति॥ सेतुं तीर्त्वेति च तरतिशब्दप्रयो
गात्॥ यथा लौकिकं सेतुं तीर्त्वा जांगलमसेतुं प्राप्नोत्येवमात्मानं सेतुं तीर्त्वानात्मानमसेतुं प्राप्नोतीति गम्यते॥ उन्मानव्यपदेशश्च भव
ति तदेतद्ब्रह्म चतुष्पात् षोडशकलमिति॥ यच्च लोके उन्मितमेवावधिमिति परिच्छिन्नं कार्षापणादि ततोऽन्यद्वस्त्वस्तीति प्रसि
द्धं॥ तथा ब्रह्मणोऽप्युन्मानात्ततोऽन्येन वस्तुना भवितव्यमिति गम्यते॥ तथा संबंधव्यपदेशोऽपि भवति सता सोम्य तदा संपन्नो भवतीति शारीर
आत्मा प्राज्ञेनात्मना संपरिष्वक्त इति च भिन्नानां च मितसंबंधो दृष्टो यथा नराणां नगरेण जीवानां च ब्रह्मणा संबंधं व्यपदिशति सुषुप्तावत
स्ततः परमन्यदपि तत्त्वमस्तीति गम्यते॥ भेदव्यपदेशश्चैनमर्थं गमयति॥ तथा ह्यथ य एषोंऽतरादित्ये हिरण्मयः पुरुषो दृश्यत इत्यादि
दित्याधारमीश्वरं व्यपदिश्य ततो भेदेनाक्ष्याधारमीश्वरं व्यपदिशति अथ य एषोंऽतरक्षिणि पुरुषो दृश्यत इति॥ अतिदेशं चास्यामुना रूपादि
षु करोति॥ तस्यैतस्य तदेव रूपं यदमुष्य रूपं यावमुष्य गेष्णौ तौ गेष्णौ यन्नाम तन्नामेति सावधिकं चैश्वर्यमुभयोर्व्यपदिशति ये
चामुष्मात्परांचो लोकास्तेषां चेष्टे देवकामानां चेत्येकस्य ये चैतस्मादर्वाञ्चो लोकास्तेषां चेष्टे मनुष्यकामानां चेत्यपरस्य यथेदं माग
धस्य राज्यमिदं वैदेहस्येति॥ एवमेतेभ्यः सेतुत्वादिव्यपदेशेभ्यो ब्रह्मणः परमस्तीत्येवं प्राप्ते प्रतिपद्यते॥ सामान्यात्॥३१॥ तुशब्देन
प्रदर्शितां प्राप्तिं निरुणद्धि न ब्रह्मणोऽन्यत्किंचिद्भवितुमर्हति॥ प्रमाणाभावात्॥ न ह्यन्यस्यास्तित्वे किंचित्प्रमाणमुपलभामहे॥ स
र्वस्य हि जनिमतो वस्तुजातस्य जन्मादि ब्रह्मणो भवतीति निर्धारितमनन्यत्वं च कारणात्कार्यस्य॥ न च ब्रह्मव्यतिरिक्तं किंचिदजं संभवति॥
सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमित्यवधारणात्॥ एकविज्ञानेन च सर्वविज्ञानप्रतिज्ञानात् ब्रह्मातिरिक्तवस्त्वस्तित्वमवकल्प

शां०भा०३
९५

ते॥ननु सेतुत्वादिव्यपदेशाद्ब्रह्मणो व्यतिरिक्तं तत्त्वं सूचयतीत्युक्तं॥नेत्युच्यते॥सेतुव्यपदेशस्तावन्न ब्रह्मस्थापितस्य सद्भावं प्रतिपादयितुं क्षमते
सेतुरात्मेति ह्याह न पुनः ततः परमस्तीति॥तत्र परस्मिन्नसति सेतुत्वं नावकल्पत इति परं किमपि कल्प्येत एवं चेत्॥आत्मा हि बोधप्रसिद्धकल्प
ना॥अपि च सेतुव्यपदेशादात्मनो लौकिकसेतुनिदर्शनेन सत्वाद्यवस्करं प्रसक्तता मृदारुमयतापि प्रासंक्ष्यति न चैतदाप्यमजत्वादिश्रुतिवि
रोधात्॥सेतुसामान्यात्सेतुशब्द आत्मनि प्रयुक्त इति विज्ञायते॥जगतस्तन्मर्यादानां च विधारकत्वं सेतुसामान्यमात्मनोऽतः सेतुरिव सेतु
रिति प्रकृत आत्मा स्तूयते सेतुं तीर्त्वेत्यपि तरतिरतिक्रमासंभवात्प्राप्त्यर्थ एव वर्तते॥यथा व्याकरणं तीर्ण इति प्राप्त उच्यते॥नातिक्रान्तस्त
द्वत्॥ॐ॥बुद्ध्यर्थः पादवत्॥३२॥यदप्युक्तमुन्मानव्यपदेशादस्ति परमिति तत्राभिधीयते॥उन्मानव्यपदेशोऽपि न ब्रह्मव्यतिरिक्तवस्त्व
स्तित्वप्रतिपत्त्यर्थः किं तर्हि बुद्ध्यर्थः॥उपासनार्थ इति यावत्॥चतुष्पाद्ब्रह्म षोडशकलमिति चैवं॥रूसा बुद्धिः कथं नु नाम
ब्रह्मणि स्थिरा स्यादिति विकारद्वारेण ब्रह्मणउन्मानकल्पनं क्रियते नात्र विकारेण ब्रह्मणः सर्वैः पुंभिः बुद्धिः शक्यस्थापयितुं मन्दमध्यमो
त्तमबुद्धित्वात्पुंसामिति॥पादवद्यथा मनआकाशयोरध्यात्ममधिदैवतं च ब्रह्मप्रतीकयोराम्नातयोश्च वागादयो मनःसंबंधिनः पादाः
कल्प्यन्ते घ्राणादयो आकाशसंबंधिन आ ध्यानायेत्यर्थः॥अथवा पादवदिति यथा कार्षापणे पादविभागो व्यवहारप्राचुर्याय प्रक
ल्प्यते॥नहि सकलेनैव कार्षापणेन सर्वे जनाः सर्वदा व्यवहर्तुमीशते क्रयविक्रयपरिमाणानियमात्तद्वदित्यर्थः॥ॐ॥स्थानविशेषात्प्रका
शादिवत्॥३३॥इहेत्रसंबंधयोरपि व्यपदेशयोः परिहारोऽभिधीयते॥यदप्युक्तं संबंधव्यपदेशाद्भेदव्यपदेशाच्च परमतः स्यादिति॥तदप्यसत्॥
यत एकस्यापि स्थानविशेषापेक्षयैतौ व्यपदेशावुपपद्येते॥संबंधव्यपदेशे तावदयमर्थः॥बुद्ध्याद्युपाधिस्थानविशेषयोगादुद्भूतस्य वि
शेषविज्ञानस्योपाध्युपशमे य उपशमः स परमात्मना संबंध इत्युपाध्यपेक्षयैवोच्यते न भिन्नत्वापेक्षया॥तथा भेदव्यपदेशोऽपि ब्रह्मण
उपाधिभेदापेक्षयैवोपचर्यते न स्वरूपभेदापेक्षया॥प्रकाशादिवदित्युपमोपादानं॥यथैकस्य प्रकाशस्य सौरस्य चान्द्रमसस्य वोपाधियोगादु
पाधिभेदापेक्षयैवोपचर्यते न स्वरूपभेदापेक्षया॥...॥यथा वा सूचीपाशाकाशादिषूपाध्यपेक्षावेवैतौ व्यपदेशौ भ
पशान्तविशेषस्योपाध्युपशमानसंबंधव्यपदेशो भवत्युपधिभेदाच्च भेदव्यपदेशः॥यथा वा सूचीपाशाकाशादिषूपाध्यपेक्षावेवैतौ व्यपदेशौ भ ९५
वतस्तद्वत्॥उपपत्तेश्च॥३४॥उपपद्यते चात्रेदृश एव संबंधो नान्यादृशः॥स्वमपीतो भवतीति हि स्वरूपसंबंधमेनमामनन्ति स्वरूपस्य चा
नपायित्वान्न नरनगर्यायेन संबंधो घटते॥उपाधिकृतस्वरूपतिरोभावात्तु स्वमपीतो भवतीत्युपपद्यते॥तथा भेदोऽपि नान्यादृशः संभवति॥
बहुतरश्रुतिप्रसिद्धैकेश्वरत्वविरोधात्॥तथा च श्रुतिरेकस्याप्याकाशस्य स्थानकृतं भेदव्यपदेशमुपपादयति॥योऽयं बहिर्धा पुरुषादाका
शो योऽयमन्तः पुरुष आकाशो योऽयमन्तर्हृदय आकाश इति॥ॐ॥तथान्यप्रतिषेधात्॥३५॥एवं सेत्वादिव्यपदेशान्परपक्षहेतुनुन्म
थ्येदानीं स्वपक्षं प्रतिपादयन्नुपसंहरति॥तथान्यप्रतिषेधादपि न ब्रह्मणः परं वस्त्वन्तरमस्तीति गम्यते॥तथा हि स एवाधस्तादहमेवाधस्ता
दात्मैवाधस्तात्सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेद ब्रह्मैवेदं सर्वमात्मैवेदं सर्वं नेह नानास्ति किंचन यस्मात्परं नापरमस्ति किंचित्तदेत
द्ब्रह्मापूर्वमनपरमनन्तरमबाह्यमित्येवमादीनि वाक्यानि स्वप्रकरणस्थान्यन्यार्थत्वेन परिणेतुमशक्यमा
नानि॥ब्रह्मव्यतिरिक्तं वस्त्वन्तरं वारयन्ति सर्वान्तरश्रुतेश्च न परमात्मनोऽन्तरोऽन्य आत्मास्तीत्यवधार्यते॥ॐ॥अनेन सर्वगतत्वमायामश
ब्दादिभ्यः॥३६॥अनेन सेत्वादिव्यपदेशनिराकरणेनान्यप्रतिषेधसमाश्रयणेन च सर्वगतत्वमप्यात्मनः सिद्धं भवति॥अन्यथा
हि तन्न सिध्येत्सत्वादिव्यपदेशेषु हि मुख्येष्वङ्गीक्रियमाणेषु परिच्छेद आत्मनः प्रसज्येत सेत्वादीनामेवमात्मकत्वात्॥तथान्यप्रतिषेध
स्यासति वस्तु वस्त्वन्तरात्व्यावर्तत इति परिच्छेद एवात्मनः प्रसज्येत सर्वगतत्वं चास्यायामशब्दादिभ्यो विज्ञायते॥आयामशब्दादिभ्यो
विज्ञायते॥आयामशब्दो व्याप्तिवचनः शब्दः॥यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाश आकाशवत्सर्वगतश्च नित्यो ज्याया
नाकाशान्नित्यः सर्वगतः स्थाणुरित्येवमादयो हि श्रुतिस्मृतिन्यायाः सर्वगतत्वमात्मनो बोधयन्ति॥ॐ॥फलमत उपपत्तेः॥३७॥
तस्यैव ब्रह्मणो व्यावहारिक्यामीशित्रीशितव्यविभागावस्थायामयमन्यः स्वभावो वर्ण्यते॥यदेतदिष्टानिष्टव्यामिश्रलक्षणं कर्म
फलं संसारगोचरं त्रिविधं प्रसिद्धं जन्तूनां किमेतत्कर्मणो भवत्याहोस्विदीश्वरादिति भवति विचारणा॥तत्र तावत्प्रतिपद्यते फलमत ईश्वराद्भवि
तुमर्हतीति॥कुत उपपत्तेः॥स हि सर्वाध्यक्षः सृष्टिस्थितिसंहारान्विचित्रान्विदधद्देशकालविशेषाभिज्ञत्वात्कर्मिणां कर्मानुरू
पं फलं संपादयतीत्युपपद्यते॥कर्मणस्त्वनुक्षणविनाशिनः कालान्तरभावादि फलं भवतीत्यनुपपन्नमभावाद्भावानुपपत्तेः॥स्यादेतत्क
र्म विनश्यत्स्वकालमेव स्वानुरूपं फलमात्मस्थित्वा विनश्यति॥तत्फलं कालान्तरितं कर्त्रा भोक्ष्यत इति॥तदपि न परिशुध्यति॥प्राग्भोक्तृ
संबंधात्फलत्वानुपपत्तेः॥यत्काले हि यत्सुखं दुःखं वात्मना भुज्यते तस्यैव लोके फलत्वं प्रसिद्धं॥न ह्यसंबंधस्यात्मना सुखस्य दुःखस्य वा फ
लत्वं प्रतियन्ति लौकिकाः॥अथोच्येत कर्मकार्यादपूर्वात्फलमुत्पत्स्यत इति॥तदपि नोपपद्यते॥अपूर्वस्याचेतनस्य काष्ठलोष्टसमस्याचेत
नेनाप्रवर्तितस्य प्रवृत्त्यनुपपत्तेः॥तदस्तित्वे च प्रमाणाभावात्॥अर्थापत्तिः प्रमाणमिति चेन्नेश्वरसिद्धेरर्थापत्तिक्षयात्॥ॐ॥धर्मं जैमि
रत एव॥३८॥श्रुतत्वाच्च॥३८॥न केवलमुपपत्तेरेवेश्वरं फलहेतुं कल्पयामः॥किं तर्हि श्रुतत्वादपीश्वरमेव फलहेतुं मन्यामहे॥तथा हि श्रु
तिर्भवति॥स वा एष महानज आत्मान्नादो वसुदान इत्येवंजातीयका॥ॐ॥धर्मं जैमिनिरत एव॥३९॥जैमिनिराचार्यो धर्मं फ
लस्य दातारं मन्यते॥अत एव हेतोः श्रुतेरुपपत्तेश्च॥श्रूयते तावदयमर्थः स्वर्गकामो यजेतेत्येवमादिषु वाक्येषु तत्र च विधिश्रुतेर्वि
षयभावोपगमाद्यागः स्वर्गस्योत्पादक इति गम्यते॥अन्यथा ह्यननुष्ठातृको यागआपद्येत॥तत्रास्योपदेशवैयर्थ्यं स्यात्॥ननु क्ष

24/1/1913

शां०भा०३
९६

विनाशिनः कर्मणः फलं नोपपद्यत इति परित्यक्तोयं पक्षः॥ नैष दोषः॥ श्रुतिप्रामाण्यात्॥ श्रुतिश्चेत्प्रमाणं यथार्थं कर्मफलसंबंधः श्रु
तउपपद्यते॥ यथा कल्पयितव्यः॥ न चानुत्पाद्य किमप्यर्थउपपद्यते॥ वापूर्वं कर्म विनश्यत्कालांतरितं दातुं शक्नोतीत्यतः कर्मणो वा सूक्ष्मा का
चिदुत्तरावस्था फलस्य वा पूर्वावस्था अपूर्वं नामास्तीति तर्क्यते॥ उपपद्यते चायमर्थ उक्तेन प्रकारेण ईश्वरस्तु फलं ददातीत्यनुपपन्नमविचि
त्रस्य कारणस्य विचित्रकार्यानुपपत्तेर्वैषम्यनैर्घृण्यप्रसंगादनुष्ठानवैयर्थ्यापत्तेश्च तस्मादेव धर्मफलमिति॥ ॐ॥ पूर्वं तु बादराय
णो हेतुव्यपदेशात्॥ ४०॥ बादरायणस्त्वाचार्यः पूर्वोक्तमेवेश्वरं फलहेतुं मन्यते॥ केवलात्कर्मणोऽपूर्वाद्वा केवलात्फलमित्ययं पक्षस्तु
शब्देन व्यावर्त्यते॥ कर्मापेक्षादपूर्वापेक्षाद्वा यथा तथास्त्वीश्वरात्फलमिति सिद्धांतः॥ कुतः॥ हेतुव्यपदेशात्॥ धर्माधर्मयोरपि कारयितृत्वेने
श्वरो हेतुर्व्यपदिश्यते॥ फलस्य च दातृत्वेन॥ एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषत एष उ एवासाधु कर्म कारय
ति तं यमधो निनीषत इति स्मर्यते॥ चायमर्थो भगवद्गीतासु॥ यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति॥ तस्य तस्याचलां श्रद्धां तामेव वि
दधाम्यहं॥ स तया श्रद्धया युक्तस्तस्याराधनमीहते॥ लभते च ततः कामान्मयैव विहितान्हि तानिति॥ सर्ववेदांतेषु चेश्वरहेतुका एव
सृष्टयो व्यपदिश्यंते॥ तदेव चेश्वरस्य फलहेतुत्वं यत्स्वकर्मानुरूपाः प्रजाः सृजति॥ विचित्रकार्यानुपपत्त्यादयोपि दोषाः॥ कृतप्रयत्नापेक्ष
त्वादीश्वरस्य न प्रसज्यंते॥ ॐ॥ ॥ इति शारीरकमीमांसाभाष्ये शंकरभगवत्पादकृतौ तृतीयाध्यायस्य द्वितीयः पादः समाप्तः॥ ॐ
सर्ववेदांतप्रत्ययं चोदनाद्यविशेषात्॥ ॐ॥ व्याख्यातं विज्ञेयस्य ब्रह्मणस्तत्त्वमिदानीं तु प्रतिवेदांतं विज्ञानानि भिद्यंते न वेति विचार्यते॥ ननु
विज्ञेयं ब्रह्म पूर्वापरादिभेदरहितमेकरसं सैंधवघनवदवधारितं॥ कुतो विज्ञानभेदाभेदचिंतावतारः॥ न हि कर्मबहुत्ववत्॥ ब्रह्म
बहुत्वं वेदांतेषु प्रतिपिपादयिषितमिति शक्यं वक्तुं ब्रह्मण एकत्वादेकरूपत्वाच्च॥ न चैकरूपे ब्रह्मण्यनेकरूपाणि विज्ञानानि संभवं
ति॥ न ह्यन्यथार्थोऽन्यथाज्ञानमित्यभ्रांतं भवति॥ यदि पुनरेकस्मिन्ब्रह्मणि बहूनि विज्ञानानि वेदांतांतरेषु प्रतिपिपादयिषितानि तेषा
मेकमभ्रांतं भ्रांतानीतराणीत्यनाश्वासप्रसंगो वेदांतेषु॥ तस्मान्न तावत्प्रतिवेदांतं ब्रह्मविज्ञानभेद आशंकितुं शक्यते॥ नाप्यस्य ९६
चोदनाद्यविशेषादभेद उच्यते॥ ब्रह्मविज्ञानस्याचोदनालक्षणत्वादविधिप्रधानैर्हि वस्तुपर्यवसायिभिर्वाक्यैर्ब्रह्मविज्ञानं जन्यत इ
त्यवोचदाचार्यस्तत्तु समन्वयादित्यत्र॥ तत्कथमिमां भेदाभेदचिंतामारभत इति॥ तदुच्यते॥ सगुणब्रह्मविषया प्राणादिविषया चेयं विज्ञा
नभेदाभेदचिंतेत्यदोषः॥ अत्र हि कर्मवदुपासनानां भेदाभेदौ संभवतः॥ कर्मवदेव ह्युपासनानि दृष्टफलान्यदृष्टफलानि चोद्यंते क्रममुक्तिफ
लानि च कानिचित्सम्यग्ज्ञानोत्पत्तिद्वारेण तेषु तस्मिन्विचारः संभवति किं प्रतिवेदांतं विज्ञानभेद आहोस्विन्नेति॥ तत्र पूर्वपक्षहेतव एवं तावदुपन्यस्यंते॥

243/1913

नाम्नस्तावद्भेदप्रतिपत्तिहेतुत्वं प्रसिद्धं ज्योतिरादिषु॥ अस्ति चात्र वेदांतांतरविहितेषु विज्ञानेष्वन्यदन्यन्नाम तैत्तिरीयकं वाजसनेयकं
कौथुमकं शाट्यायनकमित्येवमादि॥ तथा रूपभेदोपि कर्मभेदस्य प्रतिपादकः प्रसिद्धो वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमित्येवमादिषु॥
अस्ति चात्र रूपभेदः यथा केचिच्छाखिनः पंचाग्निमामनंति॥ अपरे पुनः पंचैव पठंति॥ तथा प्राणसंवादादिषु केचिन्न्यूनान्वागादी
नामनंति केचिदधिकान्॥ तथा धर्मविशेषोपि कर्मभेदस्य प्रतिपादक आशंकितः कारीर्यादिषु॥ अस्ति चात्र धर्मविशेषो यथाथर्वणि
कानां शिरोव्रतमिति॥ एवं पुनरुक्तादयोपि भेदहेतवो यथासंभवं वेदांतांतरेषु योजयितव्याः॥ तस्मात्प्रतिवेदांतं विज्ञानभेद इत्येवं प्राप्ते
ब्रूमः॥ सर्ववेदांतप्रत्ययानि विज्ञानानि तस्मिंस्तस्मिन्वेदांते तान्येव तानि भवितुमर्हंति॥ कुतश्चोदनाद्यविशेषात्॥ आदिग्रहणेन शा
खांतराधिकरणसिद्धांतसूत्रोदिता अभेदहेतव इहाकृष्यंते॥ संयोगरूपचोदनाख्याविशेषादित्यर्थः॥ यथैकस्मिन्नग्निहोत्रे शाखाभे
देपि पुरुषप्रयत्नस्तादृश एव चोद्यते जुहुयादिति॥ एवं यो ह वै ज्येष्ठं च श्रेष्ठं च वेदेति वाजसनेयिनां छांदोगानां च तादृश्येव चोदना॥ प्रयोजनसं
योगोप्यविशिष्ट एव ज्येष्ठश्च श्रेष्ठश्च स्वानां भवतीति रूपमप्युभयत्र तदेव विज्ञानस्य यदुत ज्येष्ठश्रेष्ठादिविशेषणान्वितं समाख्यापि सैव प्रा
णविद्येति॥ तस्मात्सर्ववेदांतप्रत्ययत्वं विज्ञानानां॥ एवं पंचाग्निविद्या वैश्वानरविद्या शांडिल्यविद्येत्येवमादिष्वपि योजयितव्यं ये तु नामरू
पादयो भेदहेतव आभासास्ते प्रथम एव कांडे न नाम्ना स्यादचोदनाभिधानत्वादित्यारभ्य परिहृताः॥ इहापि कंचिद्विशेषमाशंक्य परिहरति॥ भेदान्ने
ति चेन्नैकस्यामपि॥ २॥ स्यादेतत्सर्ववेदांतप्रत्ययत्वं विज्ञानानां गुणभेदान्नोपपद्यते॥ तथा हि वाजसनेयिनः पंचाग्निविद्यां प्रस्तुत्य षष्ठमपर
मग्निमामनंति तस्याग्निरेवाग्निर्भवतीत्यादिना॥ छंदोगास्तु तं नामनंति॥ पंचसंख्ययैव च ते उपसंहरंत्यथ ह य एतानेवं पंचाग्नीन्वेदेति॥
येषां च स गुणोस्ति येषां च नास्ति कथमुभयेषामेका विद्योपपद्येत॥ न चात्र गुणोपसंहारः शक्यते प्रत्येतुं॥ पंचसंख्याविरोधात्॥ तथा प्रा
णसंवादे श्रेष्ठादन्यांश्चतुरः प्राणान्वाक्चक्षुःश्रोत्रमनांसि छंदोगा आमनंति वाजसनेयिनस्तु पंचममप्यामनंति रेतो वै प्रजापतिः प्रजाय
ते प्रजया पशुभिर्य एवं वेदेति॥ आवापोद्वापभेदाच्च वेद्यभेदो भवति वेद्यभेदाच्च विद्याभेदो द्रव्यदेवताभेदादिव यागस्येति चेत्॥ नैष दोषः॥ य
त एकस्यामपि विद्यायामेवंजातीयको गुणभेद उपपद्यते॥ यद्यपि षष्ठस्याग्नेरुपसंहारो न संभवति तथापि द्युप्रभृतीनां पंचानामग्नीनामुभयत्र प्र
त्यभिज्ञायमानत्वान्न विद्याभेदो भवितुमर्हति॥ न हि षोडशिग्रहणाग्रहणयोरतिरात्रो भिद्यते॥ पठ्यते च षष्ठोऽग्निश्छंदोगैरपि तं प्रेतं दि
ष्टमितोऽग्नय एव हरंतीति॥ वाजसनेयिनस्तु सांपादिकेषु पंचस्वग्निष्वनुवर्तमानयोः समिद्धूमादिकल्पनया निवृत्तये तस्याग्निरेवाग्निर्भव
ति समित्समिदित्यादि समामनंति स नित्यानुवादः॥ अथाप्युपासनार्थ एष वादस्तथापि स गुणः शक्यते छंदोगैरप्युपसंहर्तुं॥ न चात्र पंच

ब्रं०भा०३
३६

संख्याविरोधात्संख्याविरोधाच्चं क॥ संपादिकाम्यम अभिप्रायविशेषोऽस्यापंचसंख्या निक्षानुसारभूताव विधिसमवायिनीय दोषः॥
एवं प्राणसंवादादिष्वप्यधिकस्य गुणस्य तत्र तत्रोपसंहारोऽपि न विरुध्यते॥ न चावापोद्वापयोरभेदाद्भेदाद्विद्याभेदश्चासंख्यो
कस्य चिदंशस्यावापोद्वापयोरपि भूयसोऽविद्यमानाद्भेदावगमात्॥ तस्मादेकविद्यमेव॥३॥ स्वाध्यायस्य तथात्वेन हि समाचा
रेऽधिकाराच्च सववच्च तन्नियमः॥ यदप्युक्तमाथर्वणिकानां विद्यां प्रति शिरोव्रतापेक्षणादन्येषां चानपेक्षणाद्विद्याभेद इति॥ तत्प्र
त्युच्यते॥ स्वाध्यायस्यैष धर्मो न विद्यायाः॥ कथमिदमवगम्यते॥ यतस्तथात्वेन स्वाध्यायधर्मत्वेन समाचारे वेदव्रतोपदेशपरे ग्रन्थे आ
थर्वणिका इदमपि वेदव्रतेन व्याख्यातमिति समामनन्ति॥ नैतदचीर्णव्रतोऽधीते इति चाधिकृतविषयादेतच्छब्दादध्ययनशब्दाच्च स्वाध्यायोप
निबद्धाध्ययनधर्म एवैष निर्धार्यते॥ ननु तेषामेवैतां ब्रह्मविद्यां वदेत शिरोव्रतं विधिवद्यैस्तु चीर्णमिति ब्रह्मविद्यासंयोगश्रवणाद्
कैवल्यसर्वत्र ब्रह्मविद्येति संकीर्त्यते य धर्मः॥ नन्वत्राप्येतामिति प्रकृतप्रत्यवमर्शात्॥ प्रकृतत्वं च ब्रह्मविद्याया ग्रन्थविशेषापेक्षमिति ग्रं
थविशेषसंयोग एवैष धर्मः॥ सववच्च तन्नियम इति निदर्शननिर्देशः॥ यथा च सवाः सप्त सौर्यादयः शतौदनपर्यन्ता वेदान्तरोदि
तत्रेताग्न्यनभिसंबंधादाथर्वणोदितैकाग्निसंबंधाच्चाथर्वणिकानामेव नियम्यन्ते॥ तथैवायमपि धर्मः स्वाध्यायविशेषसंबं
धात्तत्रैव नियम्यते॥ तस्मादप्यनवद्यं विद्यैकत्वं॥३॥ दर्शयति च॥४॥ दर्शयति च वेदोऽपि विद्यैकत्वं सर्ववेदान्तेषु सर्वेषु वैद्यैकत्वोपदेशा
त्॥ सर्वे वेदा यत्पदमामनन्तीति॥ तथैतं ह्येव बह्वृचा महत्युक्थे मीमांसन्त एतमग्नावध्वर्यव एतं महाव्रते छन्दोगा इति च॥ महद्भयं वज्र
मुद्यतमिति च काठके उक्तस्येश्वरगुणस्य भयहेतुत्वस्य तैत्तिरीयके भेददर्शननिन्दायै परामर्शो दृश्यते॥ यदा ह्येवैष एतस्मिन्नुदरमन्त
रं कुरुते अथ तस्य भयं भवति तत्त्वेव भयं विदुषोऽमन्वानस्येति॥ तथा वाजसनेयके प्रादेशमात्रसंपादितस्य वैश्वानरस्य छान्दोग्ये सि
द्धवदुपादानं यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्त इति॥ तथा सर्ववेदान्तप्रत्ययत्वेनान्यत्र विहितानामुक्थादीनाम
न्यत्रोपासनं विधानाबोधादाम्नायदर्शनन्यायेनोपासनानामपि सर्ववेदान्तप्रत्ययत्वसिद्धिः॥४॥ उपसंहारोऽर्थाभेदाद्विधि
शेषवत्समाने च॥५॥ इदं प्रयोजनसूत्रं॥ स्थिते चैवं सर्ववेदान्तप्रत्ययत्वे विज्ञानानामन्यत्रोदितानां विज्ञानेषु गुणानामन्यत्रापि समा
ने विज्ञाने उपसंहारो भवत्यर्थाभेदात्॥ य एव हि तेषां गुणानामेकत्रार्थो विशिष्टविज्ञानोपकारः स एवान्यत्राप्युभयत्रापि हि तदेवैकं ३६
विज्ञानं॥ तस्मादुपसंहारो विधिशेषवत्॥ यथा विधिशेषाणामग्निहोत्रादिधर्माणां तदेकत्वे सर्वत्रैवार्थाभेदादुपसंहार एवमिहापि॥ यदि हि विज्ञा
नभेदो भवेत्ततो विज्ञानान्तरनिबद्धानां गुणानां प्रकृतिविकृतिभावाभावाच्च न स्यादुपसंहारः॥ विज्ञानैकत्वे तु नैवमिति सैव च प्रयोजनम
स्त्रस्य प्रपंचः सर्वभेदादित्यारभ्य भविष्यति॥५॥ अन्यथात्वं शब्दादिति चेन्नाविशेषात्॥६॥ वाजसनेयके ते ह देवा ऊचुर्हन्तासुरान्

245/1913

उद्गीथेनात्ययामेति ते ह वाचमूचुस्त्वं न उद्गायेति प्रक्रम्य वागादीन् प्राणानसुरपाप्मविद्धत्वेन निन्दित्वा मुख्यप्राणपरिग्रहः पठ्य
ते॥ अथ हेममासन्यं प्राणमूचुस्त्वं न उद्गायेति तेभ्य एष प्राण उदगायदिति॥ छान्दोग्येऽपि तद्ध देवा उद्गीथमाजह्रुरनेनैनानभिभविष्या
म इति प्रक्रम्येतरान् प्राणानसुरपाप्मविद्धत्वेन निन्दित्वा तथैव मुख्यप्राणपरिग्रहः पठ्यते॥ अथ ह य एवायं मुख्यः प्राणस्तमुद्गी
थमुपासांचक्रिरे इत्युभयत्रापि च प्रशंसया प्राणविद्याविधिरवसीयते॥ तत्र संशयः किमत्र विद्याभेदः स्यादाहोस्विद्विद्यैकत्वमिति॥
विद्यैकत्वमिति॥ किं तावत्प्राप्तं पूर्वेण न्यायेन तत्तु न युक्तं विद्यैकत्वं प्रक्रमभेदादन्यथा हि प्रक्रमन्ते वाजसनेयिनोऽन्यथा छन्दोगाः त्वं न उद्गा
येति॥ वाजसनेयिन उद्गीथस्य कर्तृत्वेन प्राणमामनन्ति छन्दोगास्तूद्गीथत्वेन तं ह उद्गीथमुपासांचक्रिर इति॥ तत्कथं विद्यैकत्वं स्यादिति चेन्नैष दो
षो न ह्येतावता विशेषेण विद्यैकत्वमुपगच्छति विशेषस्यापि बहुतरस्य प्रतीयमानत्वात्॥ तथा हि देवासुरसंग्रामोपक्रमत्वमसुराभ्यया
भिप्राय उद्गीथोपन्यासो वागादिसंकीर्तनं तन्निन्दया मुख्यप्राणव्यपाश्रयस्तद्वीर्याच्चासुरविध्वंसनमश्मलोष्टनिदर्शनेनैवं॥ बहवोऽर्था
उभयत्राप्यविशिष्टाः प्रतीयन्ते॥ वाजसनेयकेऽपि चोद्गीथसामानाधिकरण्यं प्राणस्य श्रुतमेष उ वा उद्गीथ इति तस्माच्छान्दोग्येऽपि कर्तृत्वं ल
क्षयितव्यं॥ तस्माच्च विद्यैकत्वमिति॥६॥ न वा प्रकरणभेदात्परोवरीयस्त्वादिवत्॥७॥ न वा विद्यैकत्वमत्र न्याय्यं विद्याभेद एवात्र न्याय्यः
कस्मात्प्रकरणभेदादित्यर्थः॥ तथा हीह प्रक्रमभेदो दृश्यते॥ छान्दोग्ये तावदोमित्येतदक्षरमुद्गीथमुपासीतेत्युद्गीथावयवस्योंकारस्यो
पास्यत्वं प्रस्तुत्य रसतमादिगुणोपव्याख्यानं कृत्वा खल्वेतस्यैवाक्षरस्योपव्याख्यानं भवतीति पुनरप्योंकारमेवोद्गीथावयवमों
कारमनुवर्त्य देवासुराख्यायिकाद्वारेण प्राणमुद्गीथमुपासांचक्रिर इत्याह॥ तत्र यद्युद्गीथशब्देन सकला भक्तिरभिप्रेयेत तस्या
श्च कर्तोद्गाता ऋत्विक् उपक्रमश्चोपरुध्येत लक्षणा च प्रसज्येत उपक्रमानुरोधेन तन्त्रेणैकस्मिन्वाक्ये उपसंहारेण भवितव्यं॥ त
स्मादत्रावयवोद्गीथावयव ओंकारेण प्राणदृष्टिरुपदिश्यते॥ वाजसनेयके तूद्गीथशब्देनावयवग्रहणकारणाभावात्सकलैव भ
क्तिरावेद्यते॥ त्वं न उद्गायेति च तस्याः कर्तोद्गाता ऋत्विक्प्राणत्वेन निरूप्यत इति॥ एष उ वा उद्गीथ इति तत्र उद्गीथसामानाधिकरण्यं
प्राणस्य तदात्म्यभूतत्वेनैव दिदर्शयिषितत्वात् सर्वात्मत्वप्रदर्शनार्थमिति न विद्यैकत्वमावहति सकलभक्तिविषय एव चात्र सा
प्युद्गीथशब्द इति वैषम्यं॥ न च प्राणस्योद्गातृत्वमसंभवेन हेतुनापविद्ध्यते॥ उद्गीथभाववदुद्गातृभावस्याप्युपासनार्थत्वे
नोपदिश्यमानत्वात् प्राणवीर्येणैव चोद्गातोद्गात्रं करोतीति नोद्गातृत्वासंभवः॥ तथा च तत्रैव श्रावितं वाचा च ह्येव स प्राणेन चोदगाय
दिति विवक्षितार्थभेदे गम्यमाने वाक्यच्छायानुकारमात्रेण समानार्थत्वमध्यवसातुं युक्तं॥ तथाभ्युदयवाक्ये पशुकामसंके

छां०भा०
३८

चत्रेधा तंदुलान्विभजेत ये मध्यमाः स्युस्तानग्नये दात्रे पुरोडाशमष्टाकपालं कुर्यादित्यादिनिर्दिष्टासाम्येऽप्युपक्रमभेदादभ्युदयवाक्ये दे
वतापनयो व्यवसितः॥ पशुकामवाक्ये तु यागविधिः स्तेयेहाप्युपक्रमभेदाद्विद्याभेदः॥ परोवरीयस्त्वादिवत्तु यथा परमात्मदृष्ट्याध्या
समासाम्न्याकाशो ह्येभ्यो ज्यायानाकाशः परायणं स एष परोवरीयानुद्गीथः स एषोऽनन्त इति परोवरीयस्त्वगुणविशिष्टमुद्गीथोपासनमभ
क्त्यादिश्य तद्विहिरण्यश्मश्रुत्वादिगुणविशिष्टोद्गीथोपासनाद्भिन्नं न त्वितरेतरगुणोपसंहार एकस्यां शाखायां॥ तद्वच्छाखान्तरस्थे प्राप्येवंजा
तीयकेषूपासनेष्विति॥ संख्यातन्येव तु रुक्मतीनुनद्दपि॥ अथो चान्ते संज्ञैकत्वादिद्वयैकत्वमाम्नायान्मुद्गीथविद्येति ह्युभयत्राप्येकसंज्ञे
ति॥ तदपि नोपपद्यते॥ उक्तं ह्येतं न वा प्रकरणभेदात्परोवरीयस्त्वादिवदिति॥ तदेव चात्रापि न्याय्यतरं॥ श्रुत्यक्षरानुगतं हि तत्संज्ञैकत्वं तु
स्तुत्यक्षरवाक्यमुद्गीथपरशब्दमात्रयोगाल्लोके व्यहं न्वभिरूपवर्यते॥ अस्ति चैतत्संज्ञैकत्वं प्रसिद्धभेदेष्वपि परोवरीयस्त्वाद्युपासनेषूद्गी
थविद्येति॥ तथा प्रसिद्धभेदानामप्यग्निहोत्रदर्शपूर्णमासादीनां काठकैकग्रंथपरिपठितानां काठकसंज्ञैकत्वं दृश्यते तथेहापि भविष्य
तीत्यन्तुनाग्निकक्षित्क्त्विदं वंजातीयको भेदहेतुस्तत्र भवितुं संज्ञैकत्वादिद्वैकत्वं यथा संसर्गविद्यादिषु॥ व्याप्तेश्च समंजसं॥९॥ ओमित्ये
तदक्षरमुद्गीथमुपासीतेत्यत्राक्षरोद्गीथशब्दयोः सामानाधिकरण्ये श्रूयमाणेऽध्यासापवादैकत्वविशेषणपक्षाणां प्रतिभासनात्क
तमोऽत्र पक्षो न्यायः स्यादिति विचारः॥ तत्राध्यासो नाम द्वयोर्वस्तुनोरनिवर्तितायामेवान्यतरबुद्धावन्यतरबुद्धिरध्यस्यते॥ यस्मिन्नि
तरबुद्धिरध्यस्यतेऽनुवर्तत एव तस्मिंस्तद्बुद्धिरध्यस्तेतरबुद्धावपि॥ यथा नाम्नि ब्रह्मबुद्धावध्यस्यमानायामप्यनुवर्तत एव नामबुद्धिः॥ न
ब्रह्मबुद्ध्या निवर्तते यथा वा प्रतिमादिषु विष्ण्वादिबुद्ध्यध्यास एवं तस्मिन्निहाप्यक्षरमुद्गीथबुद्धिरध्यस्येत उद्गीथे वाक्षरबुद्धिरिति॥ अपवादो
नाम यत्र कस्मिंश्चिद्वस्तुनि पूर्वनिविष्टायां पश्चादुपजायमाना यथार्था बुद्धिः पूर्वनिविष्टायां मिथ्याबुद्धेर्निश्चितायां पश्चादुपजायमाना
यथार्था बुद्धिः पूर्वनिविष्टाया मिथ्याबुद्धेर्निवर्तिका भवति यथा देहेन्द्रियसंघातात्मबुद्धिरात्मन्येवात्मबुद्ध्या निवर्त्यते तद्वत्॥ ए
वमिहाप्यक्षरबुद्ध्योद्गीथबुद्धिर्निवर्त्यते॥ यथा वा दिग्भ्रान्तिबुद्धिर्याथात्म्योद्गीथबुद्ध्या वाक्षरबुद्धिरिति॥ एकत्वं त्वक्षरोद्गीथशब्द
योरनतिरिक्तार्थवृत्तित्वं यथा द्विजोत्तमो ब्राह्मणो भूसुर इति॥ विशेषणं पुनः सर्ववेदव्यापिन ओंकारस्य ग्रहणप्रसंगे उ ३८
द्गीथविषयस्य समर्पणं यथा नीलं यदुत्पलं यदुत्पलं तदानयेत्येवमिहापि वाऽसौ ध्यातुकारस्तमुपासीतेत्येवं मत्वास्मिन् सामाना
धिकरण्ये वाक्ये विमृश्यमाने एते पक्षाः प्रतिभान्ति तत्रान्यतमनिर्धारणकारणाभावादनिर्धारणप्राप्तिरिदमुच्यते॥ व्याप्तेश्च सं
मंजसमिति॥ तत्राध्यासानुसारात् त्यागनिवेशपक्षत्रये अवर्तनप्राप्ता अस्त्वाहृत्य यः पक्षाः सर्वे दाह इति पर्युदस्य विशेषणपक्षमेवैकोऽभि

24/7/1913

एव यद्वद्वस्तु पादाधानतयाध्यासे तावद्या बुद्धिरितरत्राध्यस्यते तच्छब्दस्य लक्षणा इति नित्यं प्रसज्येत फलं च कल्प्येत॥ श्रूयत एव फलमाया
पिता ह वै कामानां भवतीत्यादीति चेन्न॥ तस्यान्यफलत्वात्॥ आप्त्यादिवादाप्तिफलं हि तन्नोद्गीथाध्यासस्य फलं अपवादे तु समान
फलाभावः॥ मिथ्याज्ञाननिवृत्तिः फलमिति चेन्न॥ पुरुषार्थोपयोगानवगमात्॥ न च कदाचिदप्योंकारादोंकारबुद्धिर्निवर्तते॥ उद्गीथाद्वा
उद्गीथबुद्धिः॥ न चेदं वाक्यं वस्तुतत्त्वप्रतिपादनपरं मुपासनविधिपरत्वात्॥ नाप्येकत्वपक्षः॥ संगच्छते निःप्रयोजनं हि तदा शब्दद्वयोच्चार
णं स्यादेकेनैव विवक्षितार्थसमर्पणात्॥ न चाहोत्रविषयेऽध्वर्यवविषये वाक्षरमोंकारशब्दवाच्यं उद्गीथशब्दप्रसिद्धिरस्ति॥ नापि
सकलायां साम्नो द्वितीयायां भक्तौ बुद्गीथशब्दवाच्यायामोंकारशब्दप्रसिद्धिर्येनानतिरिक्तार्थता स्यात्॥ परिशेषाद्विशेषणपक्षः प
रिगृह्यते॥ व्याप्तेः॥ सर्ववेदसाधारण्यात्॥ सर्वव्याप्यक्षरमिह मा प्रसंजीत्येतदुद्गीथशब्देनाक्षरं विशेष्यते॥ कथं नामोद्गीथावयवभूत
ओंकारो गृह्येत इति॥ ननु ह्यस्मिन्नपि पक्षे समाना लक्षणोद्गीथशब्दस्यावयवलक्षणार्थत्वात्॥ सत्यमेवमपि तु लक्षणायामसंनिकर्षवि
प्रतिकर्षो भवत एवाध्यासपक्षे ह्यर्थान्तरबुद्धिरर्थान्तरबुद्धिरर्थान्तरे विप्रकृष्टा भवतीति विप्रकृष्टा लक्षणा स्यात् विशेषणपक्षे त्ववयवि
वचनेन शब्देनावयवः समर्प्यत इति संनिकृष्टा समुदाये हि वृत्ताः शब्दा अवयवेष्वपि वर्तमाना दृष्टाः पटग्रामादिषु॥ अत एव व्याप्तेर्हेतोरो
मित्येतदक्षरमुद्गीथमित्येतद्विशेषणमिति समंजसमेतन्निरवद्यमित्यर्थः॥ ७॥ सर्वाभेदादन्यत्रेमे॥१०॥ वाजसनेयिनां छन्दोगानां च प्रा
णसंवादे श्रैष्ठ्यगुणान्वितस्य प्राणस्योपास्यत्वमुक्तं॥ वागादयोऽपि तत्र वसिष्ठत्वादिगुणान्विता उक्तास्ते च गुणाः प्राणे पुनः प्रत्यर्पिताः
यद्वा अहं वसिष्ठास्मि त्वं तद्वसिष्ठोऽसीत्यादिना अन्येषामपि तु शाखिनां कौषीतकिप्रभृतीनां प्राणसंवादेषु अथातो निःश्रेयसादानमेता ह वै देवता
अहंश्रेयसे विवदमाना इत्येवं जातीयकेषु प्राणस्य श्रैष्ठ्यमुक्तं॥ न त्विमे वसिष्ठादयो गुणा उक्ताः॥ तत्र संशयः किमिमे वसिष्ठत्वादयो
गुणाः क्वचिदुक्ता अन्यत्राप्यस्युर्नत्वा स्युरन्निति॥ तत्र प्राप्तं तावन्नास्युरन्निति॥ कुतः॥ एवंशब्दसंयोगात्॥ अथो एवं विद्वान्प्राणो
निःश्रेयसं विदित्वेति हि तत्र तत्र वेद्यं वाक्ये नवेद्यं वस्तु निवेद्यते एवंशब्दस्य संनिहितावलंबनेन शाखान्तरपरिपठितमेवंजातीयकं गुणजातं
शक्नोति निवेदयितुं॥ तस्मात्स्वप्रकरणस्थैरेव गुणैर्नियताकाङ्क्षत्वमित्येवं प्राप्ते प्रत्याह॥ अस्युरन्निमे गुणाः॥ क्वचिदुक्ता वसिष्ठत्वादयो
ऽन्यत्रापि॥ कुतः॥ सर्वाभेदात्॥ सर्वत्र हि तदेवैकं प्राणविज्ञानमभिन्नं प्रत्यभिज्ञायते॥ प्राणसंवादादिसारूप्यात्॥ अभेदे च विज्ञानस्य क
थमिमे गुणाः क्वचिदुक्ता अन्यत्र नास्युरन्॥ ननु एवंशब्दस्तत्र तत्र भेदेनैवंजातीयकं गुणजातं वेद्यत्वाय समर्पयतीत्युक्तं मंत्रोच्यते॥ यद्यपि
कौषीतकिब्राह्मणगतेन एवंशब्देन वाजसनेयिब्राह्मणगतं गुणजातमसंशब्दितमसंनिहितत्वान्न व्याप्येत तस्मिन्नेव विज्ञाने वाजसने
यिब्राह्मणगतेनैवंशब्देन तत्संशब्दितमिति तेन परशाखागतमप्यभिन्नविज्ञानावबद्धं गुणजातं स्वशाखागतान्येव निर्दिश्यतेन चैवश्रुति

ब्रं॰भा॰३ अन्तर्हानिरकृतकल्पना भवति॥ एकस्यामपि शाखायां कृता गुणाः कृता एव सर्वत्र भवंति॥ गुणवतो भेदाभावात्॥ न हि देवदत्तः शौर्या
दिगुणत्वेन स्वदेशे प्रसिद्धो देशांतरं गतस्तद्देशीयैरविभावितशौर्यादिगुणोऽन्यो भवति॥ यथा तत्र परिचयविशेषाद्देशांतरेऽपि देवदत्तगु
३१ णा विभाव्यंते॥ एवमभियोगविशेषाच्छाखांतरेषूपास्या गुणास्तस्मादेकप्रधानसंबंधा धर्मा एकत्रापि उच्यमानाः॥ सर्वत्रैवोपसंहर्त
व्या इति॥७॥ आनंदादयः प्रधानस्य॥११॥ ब्रह्मस्वरूपप्रतिपादनपराः श्रुतय आनंदरूपत्वं विज्ञानघनत्वं सर्वगतत्वं सर्वात्मत्वमित्येवंजा
तीयका ब्रह्मणो धर्माः क्वचित्केचिच्छ्रूयंते तेषु संशयः किमानंदादयो ब्रह्मधर्मा यावंतो यत्र श्रूयंते तावंत एव तत्र प्रतिपत्तव्याः॥ किं वा सर्वे सर्वत्रेति
तत्र यथाश्रुति विभागं धर्मप्रतिपत्तौ प्राप्तायामिदमुच्यते॥ आनंदादयः प्रधानस्य ब्रह्मणो धर्माः सर्वे सर्वत्र प्रतिपत्तव्याः॥ कस्मात् सर्वभेदादेव॥
सर्वत्र हि तदेवैकं प्रधानं विशेष्यं ब्रह्म न भिद्यते॥ तस्मात्सार्वत्रिकत्वं ब्रह्मधर्माणां॥ तेनैव पूर्वाधिकरणोदितेन देवदत्तशौर्यादिदृष्टांतेन॥ ननु
एवं सति प्रियशिरस्त्वादयोऽपि धर्माः सर्वे सर्वत्र संकीर्येरंस्तथा हि॥ तैत्तिरीयक आनंदमयमात्मानं प्रक्रम्याम्नायते॥ तस्य प्रियमेव शिरः॥ मो
दो दक्षिणः पक्षः प्रमोद उत्तरः पक्षः आनंद आत्मा ब्रह्म पुच्छं प्रतिष्ठेति तत उत्तरं पठति॥ प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे॥१२॥ प्रियशिरस्त्वा
दीनां धर्माणां तैत्तिरीयक आम्नातानां नास्त्यन्यत्र प्राप्तिः॥ यत्कारणं प्रियं मोदः प्रमोद आनंद इत्येते परस्परापेक्षया भोक्त्रंतरापेक्षया चोप
चितापचितरूपा उपलभ्यंते॥ उपचयापचयौ न ह्यसत्येव भेदेन॥ व्याख्यातादि तत्र अपि च परस्मिन्ब्रह्मणि चित्तावतारोपायत्वेन एते परिकल्प्यं
ते॥ न सति भेदेऽभेदवनगर्भे तु ब्रह्मैकमेवाद्वितीयमिति श्रुतिभ्यः॥ न चैते प्रियशिरस्त्वादयो ब्रह्मधर्माः कोशधर्मास्त्वेत इत्युक्तं पदृष्टस
स्माद्विराजादयो एवमपि स्फुटतराप्रप्राप्तिः॥ प्रियशिरस्त्वादीनां ब्रह्मधर्मत्वे तावत् कृत्स्नान्याय मात्रभिरमाचार्येण प्रदर्शितं तु प्रियशिरस्त्वा
द्यप्राप्तिरिति॥ अन्यायोऽन्येषु निश्चितेषु ब्रह्मधर्मेषूपासनार्थोपदिश्यमानेषु नेतव्यः॥ सगुणे ह्यास्मिन् सत्यकामत्वादिषु च॥ तेषु हि
सत्स्वप्युपास्यस्य ब्रह्मण एकत्वे प्रक्रमभेदादुपासनभेदे सति नान्योन्यधर्माणामन्योन्यत्र प्राप्तिः॥ यथा च द्वे नार्यावेकं नृपतिमुपासाते छ
त्रेणान्या चामरेणान्या तत्रोपास्यैकत्वेऽप्युपासनभेदो धर्मव्यवस्था च भवत्येवमिहापीति॥ उपचितापचितगुणत्वं हि सति भेदव्यवहा
रे सगुणे ब्रह्मण्युपपद्यते न निर्गुणे ब्रह्मण्युपपद्यते॥ न निर्गुणे परस्मिन्ब्रह्मण्यतो न सत्यकामत्वादीनां धर्माणां क्वचिच्छ्रुतानां स ३१
र्वत्र प्राप्तिरित्यर्थः॥ इतरे त्वर्थसामान्यात्॥१३॥ इतरे त्वानंदादयो धर्माः ब्रह्मस्वरूपप्रतिपादनायैवोच्यमाना अर्थसामान्यात्प्रतिपा
द्यस्य ब्रह्मणो धर्मिण एकत्वात्सर्वे सर्वत्र प्रतीयेरन्निति वैषम्यं॥ प्रतिपत्तिमात्रप्रयोजना हि त इति॥७॥ आध्यानाय प्रयोजनाभावात्
॥१४॥ काठके पठ्यते॥ इंद्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः॥ पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः॥ तत्र संशयः कि
मिमे सर्व एवार्था इत्यवगतः ततः परत्वेन प्रतिपाद्यंते उत पुरुष एवैभ्यः सर्वेभ्यः परः प्रतिपाद्यत इति॥ तत्र तावत्सर्वेषामेवैषां परत्वेन प्रतिपादन

249/1913

मिति भवतिमिति॥ तथा हि॥ श्रूयत इदमस्मात्परमिदमस्मात्परमिति॥ ननु बहुष्वर्थेषु परत्वेन प्रतिपिपादयिषितेषु वाक्यभेदः स्यान्नैष दोषः॥ वा
क्यबहुत्वोपपत्तेः॥ बहून्येव ह्येतानि वाक्यानि प्रभवंति॥ बहूनर्थान्परत्वोपेतान्प्रतिपादयितुं॥ तस्मात्प्रत्येकमेषां परत्वप्रतिपादनं कस्मा
त्प्रयोजनाभावात्॥ न हीतरेषु परत्वेन प्रतिपन्नेषु किंचित्प्रयोजनं दृश्यते॥ श्रूयते वा पुरुषे त्विंद्रियादिभ्यः परस्मिन्सर्वानर्थव्रातातीते प्रतिपन्ने
दृश्यते॥ प्रयोजनं मोक्षसिद्धिः॥ तथा च श्रुतिर्निचाय्य तं मृत्युमुखात्प्रमुच्यत इति॥ अपि च परप्रतिषेधेन काष्ठाशब्देन च पुरुषविषयमादरं दर्शय
न्पुरुषप्रतिपत्त्यर्थैव पूर्वापरप्रवाहोक्तिरिति दर्शयति॥ आध्यानायेत्याध्यानपूर्वकाय सम्यग्दर्शनायेत्यर्थः॥ सम्यग्दर्शनार्थमेवेहाध्या
नमुपदिश्यते॥ न त्वाध्यानमेव स्वप्रधानं॥१४॥ आत्मशब्दाच्च॥१५॥ इतश्च पुरुषप्रतिपत्त्यर्थैवेयमिंद्रियादिप्रवाहोक्तिर्यत्कारणमेष सर्वेषु भू
तेषु गूढोत्मा न प्रकाशते॥ दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिरिति प्रकृतं पुरुषमात्मेत्याह॥ अतश्चानात्मत्वमितरेषां विवक्षितमिति ग
म्यते॥ तस्यैव च दुर्विज्ञानतां संस्कृतमतिगम्यतां च दर्शयति॥ न हि ज्ञानाय वावयच्छेदात् मनसी प्राज्ञ इत्याध्यानं विदधाति॥ तद्व्याख्यानमा
नुमानिकमप्येकेषामित्यत्र॥ एवमनेकप्रकार आदरातिशयः श्रुतेः पुरुषे लक्ष्यते नेतरेषु॥ अपि च सोऽध्वनः पारमाप्नोति तद्विष्णोः प
रमं पदमित्युक्ते किं तदध्वनः पारं विष्णोः परमं पदमित्यस्यामाकांक्षायामिंद्रियाद्यनुक्रमणात्परमं पदप्रतिपत्त्यर्थ एवायमायास इत्यवसी
यते॥१५॥ आत्मगृहीतिरितरवदुत्तरात्॥१६॥ ऐतरेयके श्रूयते॥ आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किंचन मिषत्स ईक्षत लोकान्नु
सृजा इति स इमाँल्लोकानसृजतांभो मरीचीर्मरमाप इति आदि तत्र संशयः॥ किं पर एवात्मेहात्मशब्दे॥ नाभिलप्यते॥ उतान्यः कश्चिद
ति किं तावत्प्राप्तं न पर एवात्मेहात्मशब्दाभिलप्यो भवितुमर्हति॥ कस्माद्वाक्यान्वयदर्शनात्॥ ननु वाक्यान्वयः सुतरां परमात्मविषयो
दृश्यते॥ प्रागुत्पत्तेरात्मैकत्वावधारणादीक्षणपूर्वकस्रष्टृत्ववचनाच्च नेत्युच्यते॥ लोकसृष्टिवचनात्॥ परमात्मनि स्रष्टरि गृह्यमाणे म
हाभूतसृष्टिरादौ वक्तव्या॥ लोकसृष्टिवचनात्॥ परमात्मनि स्रष्टरि गृह्यमाणे महाभूतसृष्टिरादौ वक्तव्या॥ लोकसृष्टिस्त्विहादावु
पलभ्यते॥ लोकाश्च महाभूतसन्निवेशविशेषाः॥ तथा चांभःप्रभृतीँल्लोकत्वेनैव निर्वक्ति आदोंभः परेण दिवमित्याश्च महाभूतेदि
ना॥ लोकसृष्टिश्च परमेश्वराधिष्ठितेनापरेण केनचिदीश्वरेण क्रियत इति श्रुतिस्मृत्योरुपलभ्यते॥ तथा हि श्रुतिर्भवत्यात्मैवेदमग्र
आसीत्पुरुषविध इत्याद्या॥ स्मृतिरपि स वै शरीरी प्रथमः स वै पुरुष उच्यते॥ आदिकर्ता स भूतानां ब्रह्माग्रे समवर्तत इति॥ ऐतरेयिणो
ऽपि अथातो रेतसः सृष्टिः प्रजापते रेतो देवा इत्यत्र पूर्वस्मिन्प्रकरणे प्रजापतिकर्तृकां विविधां सृष्टिमामनंति॥ आत्मशब्दोऽपि तस्मिन्

ग्रं॰भा॰ २०

प्रयुज्यमानो ऽद एव आत्मैवेदमग्र आसीत्पुरुषविधिरित्यत्र यच्चावधारणमपि प्रागुत्पत्तेः स्वविकारापेक्षमुपपद्यते॥ ईक्षापि च तस्य तत्तन
त्वाभ्युपगमादुपपन्ना॥ अपि च ताभ्यो गामानयत्ताभ्यो ऽश्वमानयत्ताभ्यः पुरुषमानयत्ताभ्यो ऽब्रवीदिति चैवंजातीयको भूयान्व्यापारविशेषो
लौकिकेषु विशेषेषु वर्त्तमानो लोकप्रसिद्ध इहानुगम्यते॥ तस्माद्विशेषवानेव कश्चिदिहात्मा स्यादित्येवं प्राप्ते ब्रूमः॥ परएवात्मेहात्मशब्देन गृह्य
ते॥ इतरवद्यथेतरेषु सृष्टिश्रवणेषु तस्माद्वा एतस्मादात्मन आकाशः संभूत इत्येवमादिषु परस्यात्मनो ग्रहणं॥ यथा चेतरस्मिंल्लौकिक आत्म
शब्दप्रयोगे प्रत्यगात्मैव मुख्य आत्मशब्देन गृह्यते॥ तथेहापि भवितुमर्हति॥ यत्र त्वात्मैवेदमग्र आसीदित्येवमादौ पुरुषविध इत्यादि
विशेषणांतरश्रवणेऽपि॥ भवेत्तत्र विशेषवत्॥ आत्मनो ग्रहणं॥ अत्र पुनः परमात्मग्रहणानुगुणमेव विशेषणमप्युत्तरमुपलभ्यते॥ सऐक्ष
त लोकान्नु सृजा इति स इमांल्लोकानसृजतेत्येवमादि॥ तस्मात्तस्यैव ग्रहणमिति न्याय्यं॥ १६॥ अन्वयादिति चेत्स्यादवधारणात्॥ १७॥ आ
त्मवाक्यान्वयदर्शनात्परमात्मग्रहणमिति पुनर्यदुक्तं तत्परिहर्त्तव्यमत्रोच्यते॥ स्यादवधारणादिति॥ भवेदुपपन्नं परमात्मनो ग्रहणं कस्मा
दवधारणात्॥ परमात्मनो ग्रहणे हि प्रागुत्पत्तेरात्मैकत्वावधारणमांजसमवकल्प्यते॥ अन्यथा ह्यनांजसं स्यात्परिकल्प्येत लोकसृष्टिवचनं तु
श्रुत्यंतरे प्रसिद्धमहाभूतसृष्ट्यनंतरमिति योजयिष्यामि॥ यथा तत्तेजोऽसृजतेत्येतच्छ्रुत्यंतरप्रसिद्धं॥ वियद्वायुसृष्ट्यनंतरमित्ययूयुजमेव
मिहापि श्रुत्यंतरप्रसिद्धा हि समानविषया विशेषाः॥ श्रुत्यंतरेषूपसंहर्त्तव्या भवंति॥ योऽप्ययं व्यापारविशेषानुगमस्ताभ्यो गामानयदित्येव
मादिः सोऽपि विवक्षितार्थावधारणार्थानुगुण्येनैव गृहीतव्यो न ह्ययं सकलः कथाप्रबंधो विवक्षित इति शक्यं वक्तुं॥ तत्प्रतिपत्तौ पुरुषार्था
भावात्॥ ब्रह्मात्मत्वं त्विह विवक्षितं॥ तथा ह्यंभःप्रभृतीनां लोकानां लोकपालानां चाग्न्यादीनां सृष्टिं शिष्ट्वा करणानि करणायतनं च शरी
रमुपदिश्य स एव स्रष्टा कथं न्विदं मदृते स्यादिति वीक्ष्येदं शरीरं प्रविवेशेति दर्शयति स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यतेति॥ पुन
श्च यदि वाचाभिव्याहृतं यदि प्राणेनाभिप्राणितमित्येवमादिना करणव्यापारविवेचनपूर्वकमथ कोऽहमिति वीक्ष्य स एतमेव पुरुषं ब्रह्म
ततममपश्यदिति ब्रह्मात्मत्वदर्शनमवधारयति॥ तथोपरिष्टादेष ब्रह्मैष इंद्र इत्यादिना समस्तं भेदजातं सह महाभूतैरनुक्रम्य सर्वं तत्प्रज्ञा
नेत्रं प्रज्ञाने प्रतिष्ठितं प्रज्ञानेत्रो लोकः प्रज्ञा प्रतिष्ठा प्रज्ञानं ब्रह्मेति ब्रह्मात्मत्वदर्शनमेवावधारयति॥ तस्मादिहात्मगृहीतिरित्यनपवा
दः॥ अपरा योजना॥ १८॥ आत्मगृहीतिरितरवदुत्तरात्॥ वाजसनेयके कतम आत्मेति योऽयं विज्ञानमयः प्राणेषु हृद्यंतर्ज्योतिः पुरुष इत्यात्म
शब्देनोपक्रम्य तस्यैव सर्वसंगविमुक्तत्वप्रतिपादनेन ब्रह्मात्मतामवधारयति॥ तथा ह्युपसंहरति स वा एष महानज आत्माजरोऽम
रोऽमृतोऽभयो ब्रह्मेति॥ छांदोग्ये तु सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमित्यंतरेणैवात्मशब्दमुपक्रम्योदर्के स आत्मा तत्त्वमसीति
तादात्म्यमुपदिशति तत्र संशयस्तुल्यार्थत्वं वानयोराम्नानयोः स्यादतुल्यार्थत्वं वेति॥ अतुल्यार्थत्वमिति तावत्प्राप्तं॥ अतुल्यत्वादाम्ना

२०

251/1913

नयोः॥ न ह्याम्नानवैषम्ये सत्यर्थसाम्यं युक्तं प्रतिपत्तुं॥ आम्नानतंत्रत्वादर्थपरिग्रहस्य वाजसनेयके चात्मशब्दोपक्रमादात्मत्वोप
देश इति गम्यते छांदोग्ये तूपक्रमविपर्ययादुपदेशविपर्ययः॥ ननु छांदोग्यानामप्युदर्के तादात्म्योपदेश इत्युक्तं सत्यमुक्तं॥ उप
क्रमतंत्रत्वात्तूपसंहारस्य तादात्म्यसंपत्तिः सेति मन्यते॥ तथा प्राप्तेऽभिधीयते आत्मगृहीतिः सदेव सोम्येत्यत्र छांदोग्यानामपि भवितुमर्ह
ति॥ इतरवद्यथा कतम आत्मेत्यत्र वाजसनेयिनामात्मगृहीतिः॥ तथैव कस्मादुत्तरात्तादात्म्योपदेशात्॥ अन्वयादिति चेत्स्यादवधारणा
त्॥ यदुक्तमुपक्रमान्वयादुपक्रमे चात्मशब्दश्रवणाभावान्नात्मगृहीतिरिति तस्य कः परिहार इति चेत्सोऽभिधीयते॥ स्यादवधारणादि
ति॥ भवेदुपपन्नेहात्मगृहीतिरवधारणात्॥ तथा हि येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमित्येकविज्ञानेन सर्वविज्ञानमवधार्य
तत्संपिपादयिषया सदेव सोम्येत्याह॥ न चात्मगृहीतौ सत्यां संपद्यते॥ अन्यथा हि योऽयं मुख्य आत्मा स न विज्ञायत इति नैव सर्वविज्ञानं संप
द्यते॥ तथा प्रागुत्पत्तेरेकत्वावधारणं जीवस्य चात्मशब्देन परामर्शः॥ स्वापावस्थायां च तत्स्वभावसंपत्तिकथनं परिचोदनापूर्वकं च पुनः
पुनस्तत्त्वमसीत्यवधारणमिति सर्वमेतत्तादात्म्यप्रतिपादनायामेवावकल्पते॥ न तादात्म्यसंपादनायां॥ न चात्रोपक्रमतंत्रत्वोपन्यासो
न्याय्यो न ह्युपक्रमे आत्मत्वसंकीर्त्तनमनात्मत्वसंकीर्त्तनं वास्ति॥ सामान्योपक्रमश्च न वाक्यशेषगतेन विशेषेण विरुध्यते॥ विशेषा
कांक्षित्वात्सामान्यस्य सच्छब्दार्थोऽपि च पर्यालोच्यमानो न मुख्यादात्मनोऽन्यः संभवत्यतोऽन्यस्य वस्तुजातस्यारंभणशब्दादिभ्योऽनृतत्वोपपत्तेः॥
आम्नानवैषम्यमपि नावश्यमर्थवैषम्यमावहति आहर पात्रं पात्रमाहरेत्येवमादिष्वर्थसाम्येऽपि तद्दर्शनात्॥ तस्मादेवंजातीयकेषु वाक्ये
षु प्रतिपादनप्रकारभेदेऽपि प्रतिपाद्यार्थाभेद इति सिद्धं॥ कार्याख्यानादपूर्वं॥ १९॥ छंदोगा वाजसनेयिनश्च प्राणसंवादे श्वादिमर्या
दं प्राणस्यान्नमाम्नायतस्तस्यैवापो वास आमनंति॥ अनंतरं छंदोगा आमनंति॥ तस्माद्वा एतदशिष्यंतः पुरस्ताच्चोपरिष्टाच्चाद्भिः परि
दधतीति॥ वाजसनेयिनस्त्वामनंति तद्विद्वांसः॥ श्रोत्रिया अशिष्यंत आचामंत्यशित्वाचामंत्येतमेव तदनमनग्नं कुर्वंतो मन्यंते तस्मादेवंविदशिष्यन्नाचा
मेदशित्वा चाचामेदेतमेव तदनमनग्नं कुरुत इति॥ तत्र चाचमनमनग्नताचिंतनं च प्राणस्य प्रतीयते॥ तत्किमुभयमपि विधीयत उताचमनमेवोत अनग्नता
चिंतनमेवेति विचार्यते॥ किं तावत्प्राप्तमुभयमपि विधीयत इति कुतः॥ उभयस्याप्यवगम्यमानत्वादुभयमपि चैतदपूर्वत्वाद्विध्यर्हमथ
वाचमनमेवोत अनग्नताचिंतनमेवेति विचार्यते॥ किं तावत्प्राप्तमुभयमपि विधीयत इति कुतः॥ उभयस्याप्यवगम्यमानत्वादुभयम
पि चैतदपूर्वत्वाद्विध्यर्हमथवाचमनमेव विधीयते॥ विस्पष्टा हि तस्मिन्विधिविभक्तिः तस्मादेवंविदशिष्यन्नाचामेदशित्वा चाचामेदि
ति॥ तस्यैव तु स्तुत्यर्थमनग्नतासंकीर्त्तनमित्येवं प्राप्ते ब्रूमः॥ नात्राचमनस्य विधेयत्वमुपपद्यते कार्याख्यानात् प्राप्तमेव हीदं कार्यत्वेना

शं०भा३ चमनं प्राप्तमेव शिष्टेन तदर्थस्मृतिप्रसिद्धत्वादनूद्यते॥ ननु चेयं श्रुतिस्तस्याः स्मृतेर्मूलं स्यान्नेत्युच्यते॥ विषयनानात्वात्॥ सामान्यविषया हि
२३ स्मृतिः पुरुषमात्रसंबद्धं प्रायत्यार्थमाचमनं प्रापयति॥ श्रुतिस्तु प्राणविद्याप्रकरणपठिता तद्विषयमेवाचमनं विदधती विदध्यात्॥ न च भिन्न
विषययोः श्रुतिस्मृत्योर्मूलमूलिभावोऽवकल्पते न चेयं श्रुतिः प्राणविद्यासंयोग्यपूर्वमाचमनं विधास्यतीति शक्यमाश्रयितुं॥ पूर्वस्यैव पुरुष
मात्रसंयोगिन आचमनस्येह प्रत्यभिज्ञायमानत्वात्॥ अत एव च नोभयविधानं उभयविधाने च वाक्यं भिद्येत॥ तस्माद्यथाप्राप्तमेवाशिशिषता
मशितवतां चोभयत आचमनमनूद्य एतमेव तदनमनग्नं कुर्वन्तो मन्यन्त इति प्राणस्यानग्नताकरणसंकल्पोऽनेन वाक्येनाचमनीयास्वप्सु
प्राणविद्यासंबन्धित्वेनापूर्व उपदिश्यते॥ न चायमनग्नतावाद आचमनस्तुत्यर्थ इति न्याय्यमाचमनस्याविधेयत्वात्॥ स्वयं चानग्नतासंक
ल्पस्य विधेयत्वप्रतीतेः॥ न चैवं सत्येकस्याचमनस्योभयार्थताभ्युपगता भवति प्रायत्यार्थता परिधानार्थता चेति॥ क्रियान्तरत्वाभ्युपगमात्॥ क्रि
यान्तरमेव ह्याचमनं नाम प्रायत्यार्थं पुरुषस्याभ्युपगम्यते॥ तदीयास्त्वप्सु वासःसंकल्पनं नाम क्रियान्तरं परिधानार्थं प्राणस्याभ्युपग
म्यत इत्यनवद्यं॥ अपि च यदिदं किंचाश्वभ्य आ कृमिभ्य आ कीटपतंगेभ्यस्तत्तेऽन्नमित्यत्र तावन्न सर्वान्नाभ्यवहारश्चोद्यत इति शक्यं
वक्तुं॥ अशास्त्रत्वादशक्यत्वाच्च॥ सर्वं तु प्राणस्यान्नमितीयमन्नदृष्टिश्चोद्यते तत्साहचर्यादापो वास इत्यत्रापि नापामाचमनं चोद्यते॥ प्र
सिद्धानां त्वाचमनीयानामपां वासःकार्ये परिधानदृष्टिश्चोद्यत इति युक्तं न ह्यत्र द्वैधं संभवति अपि चाचमन्तीति वर्तमानापदेशित्वान्नायं शब्दो
विधिक्षमः॥ ननु मन्यन्त इत्यपि समानं वर्तमानापदेशित्वं सत्यमेतत् अवश्यविधेयेऽन्यतरस्मिन्वासःकार्यानग्नतासंकल्पन
मेवापूर्वं विधीयते॥ नाचमनं॥ पूर्ववत्प्राप्तत्वादित्युपपादितं॥ यदप्युक्तं विस्पष्टान्याचमने विधिविभक्तिरिति तदपि पूर्ववत्त्वेनैवाचमनस्य
प्रत्युक्तमत एव चाचमनस्याविधित्सितत्वादेतमेव तदनमनग्नं कुर्वन्तो मन्यन्त इत्यत्रैवैकैक एवावस्थिता मनन्ति तस्मादेवंविदित्या
दि तस्मान्माध्यंदिनानामपि पाठ आचमनानुवादेनैवं विदमेव प्रकृतप्राणवासोवित्त्वं विधीयत इति प्रतिपत्तव्यं॥ योऽप्ययमभ्युपगमः क्व
चिदाचमनं विधीयतां क्वचिद्वासोविज्ञानमिति सोऽपि न साधुरापो वास इत्यादिकाया वाक्यप्रवृत्तेः सर्वत्रैकरूपत्वात्॥ तस्माद्वासोविज्ञा
नमेवेह विधीयते नाचमनमिति न्याय्यं॥ समान एवं चाभेदात्॥१९॥ वाजसनेयिशाखायामग्निरहस्ये शाण्डिल्यनामाङ्किता विद्या विज्ञाता
तत्र च गुणाः श्रूयन्ते॥ स आत्मानमुपासीत मनोमयं प्राणशरीरं भारूपमित्येवमादयः तस्यामेव शाखायां बृहदारण्यके पुनः पठ्यते॥ २३
मनोमयोऽयं पुरुषो भाःसत्यस्तस्मिन्नन्तर्हृदये यथा व्रीहिर्वा यवो वा स एष सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ति यदिदं किंचेति॥ तत्र
संशयः॥ किमियमेका विद्याग्निरहस्यबृहदारण्यकयोर्गुणोपसंहारश्चेति विद्ये गुणानुपसंहारश्च किं तावत्प्राप्तं विद्याभेदो गुणव्यवस्था

253/1913

चेति॥ कुतः पौनरुक्त्यप्रसंगात्॥ भिन्नासु हि शाखासु अध्येतृवेदितृभेदात्पौनरुक्त्यपरिहारमाशंक्य विद्यैकत्वमध्यवसायैकत्रातिरिक्ता
गुणा इतरत्रोपसंह्रियन्ते प्राणसंवादादिष्विति युक्तं॥ एकस्यां पुनः शाखायामध्येतृवेदितृभेदाभावादशक्यपरिहारे पौनरुक्त्ये॥ न विप्रकृष्टदे
शस्थैका विद्या भवितुमर्हति॥ न चात्रैकमाम्नानं विद्याविधानार्थमपरं गुणविधानार्थमिति विभागः संभवति॥ तदा ह्यतिरिक्ता एव गुणा इत
रत्रेतरत्र चाम्नायेरन्समाना अपि उभयत्राम्नायन्ते मनोमयत्वादयः॥ तस्मान्नान्योन्यगुणोपसंहार इत्येवं प्राप्ते ब्रूमः॥ यथा भिन्नासु वि
द्यैकत्वं गुणोपसंहारश्च भवति॥ एवमेकस्यामपि शाखायां भवितुमर्हति॥ उपास्याभेदात्॥ तदेव हि ब्रह्म मनोमयत्वादिगुणकमुभयत्राप्यु
पास्यमभिन्नं प्रत्यभिजानीमहे॥ उपास्यं च रूपं विद्याया भेदमभ्युपगन्तुं शक्नुमः॥ नापि विद्याभेदे गुणव्यवस्थां॥ ननु पौनरुक्त्यप्रसंगाद्विद्या
भेदाध्यवसितः॥ नेत्युच्यते॥ अर्थविभागोपपत्तेः॥ एकं ह्याम्नानं विधानार्थमपरं गुणविधानार्थमिति न किंचिन्नोपपद्यते॥ ननु एवं सति
दपठितमग्निरहस्ये तद्बृहदारण्यके पठितव्यं स एव सर्वस्येशान इत्यादि यत्तु पठितमेव मनोमय इत्यादि तन्न पठितव्यं॥ नैष दोषः॥
तद्बलेनैव प्रदेशान्तरपठितविद्याप्रत्यभिज्ञानात्समानगुणाम्नानेन हि विप्रकृष्टदेशां शाण्डिल्यविद्यां प्रत्यभिज्ञाप्य तस्यामीशानत्वादयः प्रदि
श्यन्ते॥ अन्यथा हि कथं तस्या अयं गुणो विधीयेत॥ अपि च अप्राप्तांशोपदेशेनार्थवति वाक्ये संजातो प्राप्तांशपरामर्शो नित्यानुवादत
या अप्युपपद्यमानो न तद्बलेन प्रत्यभिज्ञामुपेक्षितुं शक्यते॥ तस्मादत्र समानायामपि शाखायां विद्यैकत्वं गुणोपसंहारश्चेत्युपपन्नं॥
संबन्धादेवमन्यत्रापि॥२०॥ बृहदारण्यके सत्यं ब्रह्मेत्युपक्रम्य तद्यत्तत्सत्यमसौ स आदित्यो य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षि
णेऽक्षन्पुरुष इति तस्यैव सत्यस्य ब्रह्मणोऽधिदैवमध्यात्मं चायतनविशेषमुपदिश्य व्याहृतिशरीरत्वं संपाद्य द्वे उपनिषदावादिश्येते तस्योपनि
षदहरित्यधिदैवतं तस्योपनिषदहमित्यध्यात्मं॥ तत्र संशयः॥ किमविभागेनैवैते उभे अप्युपनिषदावुभयत्रानुसंधातव्ये उत विभागेनैका
अधिदैवमेकाध्यात्ममिति॥ तत्र सूत्रेणैवोपक्रमते॥ यथा शाण्डिल्यविद्यायां विभागेनाप्यधीतायां गुणोपसंहार उक्त एवमन्यत्रापी
वंजातीयके विषये भवितुमर्हति॥ एकविद्याभिसंबन्धादेका ह्ययं सत्यविद्याधिदैवमध्यात्मं चाधीतोपक्रमाभेदाद्व्यतिषक्तपाठाच्च॥
कथं तस्यामुदितो धर्मस्तस्यां न भवेत्स्यात्॥ यो ह्याचार्ये कश्चिदनुगमनादिराचारश्चोदितः स ग्रामगतेऽरण्यगते च तुल्यवद्भवति॥ त
स्मादुभयोरप्युपनिषदोरुभयत्र प्राप्तिरित्येवं प्राप्ते प्रतिविधत्ते॥ नवा विशेषात्॥ न वोभयोरुभयत्र प्राप्तिः॥ कस्माद्विशेषात्॥ उपासन
स्थानविशेषोपसंधानादित्यर्थः॥ कथं स्थानविशेषोपबंध इति॥ उच्यते॥ य एष एतस्मिन्मण्डले पुरुष इति ह्याधिदैविकं पुरुषं प्रकृत्य तस्यो
पनिषदहरिति श्रावयति॥ चैतत्संनिहितालंबनं सर्वनाम तस्मादायतनविशेषव्यपाश्रयेणैवैते उपनिषदावुपदिश्येते॥ कुत उभयोरुभय

शं०भा० २२

न्यामि॥ नतेकएवात्मधिदैवमध्यात्मं च पुरुषः॥ एकस्यैव सत्यस्य ब्रह्मण आयतनद्वयप्रतिपादनात्॥ सत्यमेवमेतदेकस्यापि त्ववस्था
विशेषस्योपादानेनोपनिषद्विशेषवदेशात्॥ तदवस्थास्यैव साभाविनुमर्हति॥ अस्ति चायं दृष्टांतः॥ सत्यप्याचार्यस्वरूपानपाये यदाचा
र्यस्यासीनस्यानुवर्तनमुक्तं न तत्तिष्ठतो भवति। यच्च तिष्ठतः न तदासीनस्येति॥ प्रामाण्ययोस्त्वाचार्यस्वरूपानपायात्तत्स्वरूपानुबंधस्य
च धर्मस्य प्रामाण्यकृतविशेषाभावादुभयत्र तुल्यवद्भावदृष्टांतः॥ सतस्माच्च स्थानयोरुपनिषदोः॥ ७॥ दर्शयति॥ २२॥
अपि चैवंजातीयकानां धर्माणां व्यवस्थेति लिंगदर्शनं भवति॥ तैस्यैतस्य देवस्य रूपं यदमुष्य रूपं यावमुष्य गेष्णौ तौ गेष्णौ यन्नाम तन्नामेति॥ कथमस्य
लिंगत्वमिति चेदुच्यते॥ अक्ष्यादित्यस्थानभेदभिन्नान्॥ धर्मानन्योन्यस्मिन्ननुपसंहार्यान्मन्यमानो हाति॥ देशेनादित्यपुरुषगतान्रूपादीन
क्षिपुरुष उपसंहरति॥ तस्यैतस्य तदेव रूपमित्यादिना॥ तस्माद्व्यवतिष्ठते एवैते उपनिषदौ विनिर्णयः॥ संभृतिद्युव्याप्त्यपि चातः॥ २३॥
ब्रह्मज्येष्ठा वीर्या संभृतानि ब्रह्माग्रे ज्येष्ठं दिवमाततानेत्येवं राणायनीयानां खिलश्रुतौ वीर्यसंभृतिद्युनिवेशप्रभृतयो ब्रह्मणो विभूतयः पठ्यंते
तेषामेवोपनिषदि शांडिल्यविद्याप्रभृतयो ब्रह्मविद्याः पठ्यंते॥ तासु ब्रह्मविद्यासु ताः संभृत्याद्या ब्रह्मविभूतय उपसंक्रियेरन्न वेति विचारणायां
ब्रह्मसंबंधादुपसंहारप्राप्तौ पठति॥ संभृतिद्युव्याप्तिप्रभृतयो विभूतयः शांडिल्यविद्याप्रभृतिषु नोपसंहर्तव्याः॥ तएवायतनविशेषयो
गात्॥ तथाहि शांडिल्यविद्यायां हृदयायतनत्वं ब्रह्मण उक्तं एष म आत्मांतर्हृदय इति॥ तद्वदेव दहरविद्यायामक्ष्यायतनत्वं य एषोक्षिणि पुरु
षो दृश्यत इति॥ एवं तत्र तत्र तत्तदाध्यात्मिकमायतनमेतासु प्रतीयते॥ आधिदैविकास्त्वेता विभूतयः संभृतिप्रभृतयस्तासां कुत एतासु प्राप्तिः॥
ननु एतास्वप्याधिदैविक्यो विभूतयः श्रूयंते॥ ज्यायान्दिवो ज्यायानेभ्यो लोकेभ्यः एष उ एव भामनीरेष हि सर्वेषु लोकेषु भाति॥ यावान्वा
अयमाकाशस्तावानेषोंतर्हृदय आकाश उभे अस्मिन्द्यावापृथिवी अंतरेव समाहिते इत्येवमाद्यास्ताः संति चान्या
आयतनविशेषहीना अपीह ब्रह्मविद्याः षोडशकलाद्याः॥ सत्यमेवमेतत्तथाप्यत्र विद्यते विशेषः संभृत्याद्यनुपसंहारहेतुः॥ समानगुणा
म्नानेन हि प्रत्युपस्थापितास्तु विप्रकृष्टदेशास्वपि विद्यासु विप्रकृष्टदेशा गुणा उपसंक्रियेरन्निति युक्तं॥ संभृत्यादयस्तु शांडिल्यादिवाक्य २२
गोचराश्च गुणाः परस्परव्यावृत्तस्वरूपत्वान्न प्रदेशांतरवर्तिविद्याप्रकरणप्रत्युपस्थापनक्षमाः॥ न च ब्रह्मसंबंधमात्रेण प्रदेशांतरवर्तिविद्याप्रत्यु
पस्थापनमिति चेन्न विद्याभेदेपि तदुपपत्तेः॥ एकमपि हि ब्रह्म विभूतिभेदैरनेकधोपास्यत इति परोवरीयस्त्वादिदर्शनात्॥ तस्माद्वीर्यसंभृ
त्यादीनां शांडिल्यविद्यादिष्वनुपसंहार इति॥ ७॥ पुरुषविद्यायामिव चेतरेषामनाम्नानात्॥ २४॥ अस्ति तांडिनां पैंगिनां च रहस्यब्राह्म
णेषु पुरुषविद्या तत्र पुरुषो यज्ञः कल्पितः। तदीयमायुस्त्रेधा विभज्य सवनत्रयं कल्पितं॥ अशिशिषादीनि च दीक्षादिभावेन कल्पितान्य

न्ये च धर्मास्तत्र समधिगता आशीर्मंत्रप्रयोगादयः॥ तैत्तिरीयका अपि केचित्पुरुषयज्ञं कल्पयंति॥ तस्यैवं विदुषो यज्ञस्यात्मा यजमानः
श्रद्धा पत्नीत्येतेनानुवाकेन तत्र संशयः॥ किं यत इतरत्रोक्ताः पुरुषयज्ञस्य धर्मास्तैत्तिरीयकेप्युपसंहर्तव्याः॥ किं वा नोपसंहर्तव्या इति पुरुष
यज्ञत्वाविशेषादुपसंहारप्राप्तावाचक्ष्महे नोपसंहर्तव्या इति॥ कस्मात्तद्रूपप्रत्यभिज्ञानाभावात्॥ तदाहाचार्यः॥ पुरुषविद्यायामिवेति॥
यथैकेषां शाखिनां तांडिनां पैंगिनां च पुरुषविद्यायां आम्नानं नैवमितरेषां तैत्तिरीयाणां आम्नानमस्ति॥ तेषां हीतरविलक्षणमेव यज्ञसंप
द्दर्श्यते॥ पत्नीयजमानवेदवेदिबर्हिर्यूपाज्यपशुऋत्विगाद्यनुक्रमणात्॥ यदपि सवनसंपादनं तदपीतरविलक्षणमेव यत्सायं प्रातर्मध्यंदि
नं च तानि सवनानीति यदपि किंचिन्मरणावभृथत्वादिसामान्यं तदप्यल्पीयस्त्वाद्भूयसा वैलक्षण्येनाभिभूयमानं न प्रत्यभिज्ञापनक्षमं॥
न चैतत्तैत्तिरीयके पुरुषस्य यज्ञत्वं श्रूयते॥ विदुषो यज्ञस्येति हि नैते समानाधिकरणे षष्ठ्यौ विद्वानेव यो यज्ञस्तस्येति न हि पुरुषस्य मुख्यं
यज्ञत्वमस्ति॥ व्यधिकरणे त्वेते षष्ठ्यौ विदुषो यो यज्ञस्तस्येति॥ भवति हि पुरुषस्य मुख्यो यज्ञसंबंधः सत्यां च गतौ मुख्य एवार्थ आश्रयितव्यो न
भाक्तः॥ ननु आत्मा यजमान इति यजमानत्वं पुरुषस्य निर्ब्रुवन्वैयधिकरण्येनास्य यज्ञसंबंधं दर्शयति॥ अपि चैतस्यैवं विदुष इति सिद्धव
दनुवादश्रुतौ सत्यां पुरुषस्य च यज्ञभाव आत्मादीनां च यजमानादीभावं प्रतिपत्तमानस्य वाक्यभेदः स्यात्॥ अपि च संन्यासमात्मविद्यां
पुरस्तादुपदिश्यानंतरं तस्यैवं विदुष इत्याद्यनुक्रमणं पश्यतः पूर्वशेष एवैष आम्नायो न स्वतंत्र इति प्रतीमः॥ तथा चैकमेव फलमुभयोरुप
लभामहे॥ ब्रह्मणो महिमानमाप्नोतीति॥ इतरेषां त्वनन्यशेषः पुरुषविद्याम्नायः आयुरभिवृद्धिफलो ह्यसौ प्राह षोडशं वर्षशतं जीवति य एवं वेदेति
समभिव्याहारात्॥ तस्माच्छाखांतराधीतानां पुरुषधर्माणामाशीर्मंत्रादीनामप्राप्तिस्तैत्तिरीयके॥ ७॥ वेधाद्यर्थभेदात्॥ २५॥ आथर्वणि
कानामुपनिषदारंभे मंत्रः समाम्नायते सर्वं विध्य हृदयं प्रविध्य धमनीः प्रवृज्य त्रिधा विपृक्त इत्यादिः तांडिनां देव सवितः प्रसुव यज्ञमित्यादि
शाट्यायनिनां श्वेताश्वो हरितनीलोसीत्यादिः कठानां तैत्तिरीयाणां च शं नो मित्रः शं वरुण इत्यादिः वाजसनेयिनां तूपनिषदारंभे प्रवर्ग्यब्राह्म
णं पठ्यते॥ देवा ह वै सत्रं निषेदुरित्यादि कौषीतकिनामप्यग्निष्टोमब्राह्मणं ब्रह्म वा अग्निष्टोमो ब्रह्मैव तदहर्ब्रह्मणैव ते ब्रह्मोपयंति अमृतत्व
माप्नुवंति य एतदहरुपयंतीति किमिमे सर्वे प्रविध्यादयो मंत्राः प्रवर्ग्यादीनि च कर्माणि विद्यास्तूपसंह्रियरन् उत नोपसंह्रियरन्निति मी
मांसामहे॥ किं तावन्नः प्रतिभाति उपसंहार एवैषां विद्यास्विति॥ कुतः विद्याप्रधानानामुपनिषद्ग्रंथानां समीपे पाठात्॥ नन्वेषां विद्यार्थतया
विधानं नोपलभामहे॥ बाढमनुपलभमाना अपि त्वनुमास्यामहे संनिधिसामर्थ्यात्॥ न हि संनिधेरर्थवत्त्वे संभवत्यकस्मादसावाश्रयि
तुं युक्तः॥ ननु नैषां मंत्राणां विद्याविषयं किंचित्सामर्थ्यं पश्यामः॥ कथं च प्रवर्ग्यादीनि कर्माण्यन्यार्थत्वेनैव विनियुक्तानि संति विद्यार्थत्वेना

255/1913

षिप्रतिपाद्यमर्हति॥ नैष दोषः॥ सामर्थ्यं तावन्मंत्राणां विद्याविषयमपि किंचित्कल्पयितुं॥ हृदयादिसंकीर्तनात्। हृदयादीनि हि प्रायेणोपासने
ष्वायतनादिभावेनोपदिष्टानि तद्द्वारेणैव हृदयं प्रविध्येत्येवंजातीयकानां मंत्राणामुपपन्नमुपासनांगत्वं॥ दृष्टश्चोपासनेष्वपि मंत्रविनियोगो भूः
प्रतिपद्येऽमुनामुनामुनेत्येवमादिः॥ तथा प्रवर्ग्यादीनां कर्मणामन्यत्रापि विनियुक्तानां सतामविरुद्धो विद्यासु विनियोगो वाजपेयइव बृहस्पतिस
वस्येत्येवं प्राप्ते ब्रूमः॥ नैषामुपसंहारो विद्यास्विति॥ कस्मात्॥ वेधाद्यर्थभेदात्॥ हृदयं प्रविध्येत्येवंजातीयकानां मंत्राणां येऽर्था हृदयवेधादयो भिन्नाः
अनभिसंबद्धास्तु उपनिषदुदिताभिर्विद्याभिर्न तैर्वानाभिः संगंतुं सामर्थ्यमस्ति ननु हृदयस्योपासनेषूपयोगात्तद्द्वारक उपासनसंबंध उप
न्यस्तः॥ नेत्युच्यते॥ हृदयमात्रसंकीर्तनस्य ह्येवमुपयोगः॥ कथंचिदुक्तः स्यान्न हृदयमात्रमेव मंत्रार्थः॥ हृदयं प्रविध्य धमनीः प्रविध्येत्येवं
जातीयको हि न सकलो मंत्रार्थो विद्याभिरभिसंबध्यते॥ अभिचारविषयो ह्येषोऽर्थः॥ तस्मादाभिचारिकेण कर्मणा सर्वं प्रविध्येत्यस्य मंत्रस्या
भिसंबंधः॥ तथा देव सवितः प्रसुव यज्ञमित्यस्य यज्ञप्रसवलिंगत्वात्॥ यज्ञेन कर्मणाभिसंबंधस्तद्विशेषसंबंधस्तु प्रमाणांतरादनुस
र्तव्यः॥ एवमन्येषामपि मंत्राणां केषांचिल्लिंगेन केषांचिद्वचनेन केषांचित्प्रमाणांतरेणेत्येवमर्थांतरेषु विनियुक्तानां रहस्यपठितानाम
पि सतां न संनिधिमात्रेण विद्याशेषत्वोपपत्तिः॥ दुर्बलो हि संनिधिः श्रुत्यादिभ्य इत्युक्तं॥ प्रथमे तंत्रे श्रुतिलिंगवाक्यप्रकरणस्थानस
माख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षादित्यत्र तथा कर्मणामपि प्रवर्ग्यादीनामन्यत्र विनियुक्तानां न विद्याशेषत्वोपपत्तिः॥ न
ह्येषां विद्याभिः सहैकार्थ्यं किंचिदस्ति वाजपेये तु बृहस्पतिसवस्य स्पष्टं विनियोगांतरं वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेतेति॥
अपि चैकोऽयं प्रवर्ग्यः सकृदुत्पन्नो बलीयसा प्रमाणेनान्यत्र विनियुक्तो न दुर्बलेन प्रमाणेनान्यत्रापि विनियोगमर्हति॥ अगृह्य
माणविशेषत्वे हि प्रमाणयोरेतदेवं स्यात्॥ न तु बलवदबलवतोः प्रमाणयोरगृह्यमाणविशेषता संभवति बलवदबलवत्ताविशेषा
देव॥ तस्मादेवंजातीयकानां मंत्राणां कर्मणां वा न संनिधिपाठमात्रेण विद्याशेषत्वमाशंकितव्यं॥ अरण्यानुवचनादिधर्मसामा
न्यात्तु संनिधिपाठ इति संतोष्टव्यं॥ २५॥ हानौ तूपायनशब्दशेषत्वात्कुशाच्छंदस्स्तुत्युपगानवत्तदुक्तं॥ २६॥ अस्ति तांडिनां श्रुतिरश्व इ
व रोमाणि विधूय पापं चंद्र इव राहोर्मुखात्प्रमुच्य धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसंभवामीति॥ तथाथर्वणिकानां तदा वि
द्वान्पुण्यपापे विधूय निरंजनः परमं साम्यमुपैतीति॥ तथा शाट्यायनिनः पठंति॥ तस्य पुत्रा दायमुपयंति सुहृदः साधुकृत्यां द्विषंतः पापकृ
त्यामिति॥ तथैव कौषीतकिनः तत्सुकृतदुष्कृते विधूनुते तस्य प्रिया ज्ञातयः सुकृतमुपयंति॥ अप्रिया दुष्कृतमिति॥ तदिह क्वचित्सुकृ
तदुष्कृतयोर्हानं श्रूयते क्वचित्तयोरेव विभागेन प्रियैरप्रियैश्चोपायनं क्वचित्तूभयमपि हानमुपायनं च॥ तत्र ताव २३
न्न किंचिद्वक्तव्यमस्ति यत्राप्युपायनमेव श्रूयते न हानं तत्राप्यर्थादेव हानं संनिपतत्यन्यैरात्मीययोः सुकृतदुष्कृतयोरुपेयमानयोरावश्यकत्वाद्धानस्य

257/1913

यत्रापि हानमेव श्रूयते नोपायनं तत्रोपायनं संनिपतेद्वा न वेति विचिकित्सायामश्रवणादसंनिपातो विद्यांतरगोचरत्वाच्च शाखांतरीय
स्य श्रवणस्य॥ अपि चात्मकर्तृकं सुकृतदुष्कृतयोर्हानं परकर्तृकं तूपायनं॥ तयोरसत्यावश्यकभावे कथं हानेनोपायनमाक्षिप्येत
तस्मादसंनिपातो हानावुपायनस्येत्यस्यां प्राप्तौ पठति हानाविति हानौ त्वेतस्यां केवलायामपि श्रूयमाणायामुपायनं संनिपतितुम
र्हति तच्छेषत्वात्॥ हानशब्दशेषो ह्युपायनशब्दः समधिगतः कौषीतकिरहस्ये॥ तस्मादन्यत्र केवलहानश्रवणेऽप्युपायनानुवृत्तिः॥
यदुक्तमश्रवणाद्विद्यांतरगोचरत्वादनावश्यकत्वाच्चासंनिपात इति तदुच्यते॥ भवेदेषा व्यवस्था यद्यनुष्ठेयं किंचिदन्यत्रश्रु
तमन्यत्र निनीष्येत न त्विह हानमुपायनं वानुष्ठेयत्वेन संकीर्त्यते॥ विद्यास्तुत्यर्थं त्वनयोः संकीर्तनमित्थं महाभागा विद्या यत्सामर्थ्या
दस्य विदुषः सुकृतदुष्कृते संसारकारणभूते विधूयेते॥ ते चास्य सुहृद्द्विषत्सु निविश्येते इति स्तुत्यर्थे चास्मिन्संकीर्तने हानानंतरभा
वित्वेनोपायनस्य क्वचिच्छ्रुतत्वादन्यत्रापि हानश्रुतावुपायनानुवृत्तिं मन्यते स्तुतिप्रकर्षलाभाय प्रसिद्धा चार्थवादांतरापेक्षार्थवा
दांतरापेक्षार्थवादांतरप्रवृत्तिः॥ एकविंशो वा इतोऽसावादित्य इत्येवमादिषु॥ कथं हीहैकविंशतादित्यस्याभिधीयेतानपेक्ष्यमाणेऽर्थवादां
तरे द्वादश मासाः पंचर्तवस्त्रय इमे लोका असावादित्य एकविंश इत्यस्मिन्॥ तथा त्रिष्टुभौ भवतः सेंद्रियत्वायेत्येवमादिष्विंद्रियं वै त्रिष्टुबित्येवमाद्य
र्थवादांतरापेक्षा दृश्यते॥ स्तुत्यर्थत्वाच्चास्योपायनवादस्य कथमन्यदीये सुकृतदुष्कृते अन्यैरुपादीयेरन्निति नातीवाभिनिवेष्टव्यं॥ उपा
यनशब्दशेषत्वादिति च शब्दमुच्चारयन्स्तुत्यर्थामेवैतामनुवृत्तिं सूचयति॥ गुणोपसंहारविवक्षायां तूपायनार्थ
स्यैव हानावनुवृत्तिं ब्रूयात्तस्माद्गुणोपसंहारविचारप्रसंगेन स्तुत्युपसंहारप्रदर्शनार्थमिदं सूत्रं॥ कुशाच्छंदःस्तुत्युपगान
वदित्युपमोपादानं यथा भाल्लविनां कुशा वानस्पत्याः स्थ ता मा पातेत्यस्मिन्निगमे कुशानामविशेषेण वनस्पतियोनित्वश्रवणे
शाट्यायनिनामौदुंबराः कुशा इति विशेषवचनादौदुंबर्यः कुशा आश्रीयंते यथा च क्वचिद्देवासुरच्छंदसामविशेषेण पौर्वापर्यप्रसंगे
देवच्छंदांसि पूर्वाणीति॥ पैंग्याम्नायात्प्रतीयते यथा च षोडशिस्तोत्रे केषांचित्कालाविशेषप्राप्तौ समयाध्युषिते सूर्ये इत्यार्चश्रुतेः
श्रुतेः कालविशेषप्रतीतिः यथैव चाविशेषेणोपगानं केचित्समामनंति विशेषं भाल्लविनः॥ यथैतेषु कुशादिषु श्रुत्यंतरगतविशेषा
न्वयलक्षण्यामपि उपायनान्वय इत्यर्थः॥ श्रुत्यंतरकृतं हि विशेषं श्रुत्यंतरेणानभ्युपगच्छतः सर्वत्रैव विकल्पः स्यात्॥ स चान्या
य्यः सत्यां गतौ तदुक्तं॥ द्वादशलक्षण्यामपि तु वाक्यशेषत्वादितरपर्युदासः स्यात्प्रतिषेधे विकल्पः स्यात्प्रतिषेधे विक
ल्पः स्यादिति॥ अथवैतास्वेव विधूननश्रुतिष्वेतेन सूत्रेणैतच्चिंतयितव्यं॥ किमनेन विधूननवचनेन सुकृतदुष्कृतयोर्हानमभिधीयते

किं वार्थांतरमिति॥ न चैवं जायापितव्यं न हानं विधूननमभिधीयते॥ धूञ्कंपन इति स्मरणात्॥ दोधूयंते ध्वजाग्राणीति च वा
युना चाल्यमानेषु ध्वजाग्रेषु प्रयोगदर्शनात्॥ तस्माच्चालनं विधूननमभिधीयते चलनं विधूननमभिधीयते। चालनं तु सु
कृतदुःकृतयोः कंचित्कालं फलप्रतिबंधनादिति वं प्राप्तस्य प्रतिबंध्यं॥ हानस्त्वेवं विधूननशब्दो वर्तितुमर्हत्युपायनशब्द
शेषत्वात्॥ नहि परस्परिग्रहभूतयोरप्रहाणयोः सुकृतदुःकृतयोः परैरुपायनं संभवति॥ न हि परकीययोः सुकृतदुःकृत
योः परैरुपायनं संभाव्यते॥ तथापि तत्संकीर्तनानां तदानुगुण्येन हानमेव विधूननं नामेति निर्णेतुं शक्यते॥ क्वचिदपि
चरणविधूननसंनिधावुपायनं श्रूयमाणं कुशाछंदस्तुत्युपगानवद्विधूननस्याप्यस्य सर्वत्रापेक्षमाणं सर्वत्रैकं निर्णयकारणमु
पद्यते॥ न च चालनं ध्वजाग्रवत्सुकृतदुःकृतयोर्मुख्यं संभवति॥ अद्रव्यत्वात्॥ अश्व इव रोमाणि विधुन्वानः कंपयन्नंगानि स्वदेहवर्तेनरो
माण्यपि जीर्णानि शातयत्येवमश्व इव रोमाणि विधूय पापमिति च ब्राह्मणमनेकार्थत्वाभ्युपगमाच्च धातूनां स्मरणविरोधोऽस्त्विदु
कमिति व्याख्यातं॥ ७॥ सांपराये तर्तव्याभावात्तथा ह्यन्ये॥ २७॥ देवयानेन पथा पर्यंकस्थं ब्रह्माभिप्रस्थितस्य व्यध्वनि सुकृत
दुःकृतयोर्वियोगं कौषीतकिनः पर्यंकविद्यायामामनंति॥ स एतं देवयानं पंथानमापद्याग्निलोकमागच्छतीत्युपक्रम्य स आग
च्छति विरजां नदीं तां मनसैवात्येति तत्सुकृतदुःकृते विधूनुत इति॥ तत्किं यथाश्रुतमध्वन्येव वियोगवचनं प्रतिपत्तव्यं आहोस्वि
दादावेव देहात्सर्पणादिति विचारणायां श्रुतिप्रामाण्याद्यथाश्रुति प्रतिपत्तिप्रसक्तौ पठति सांपराय इति सांपरायो गमनमेव दे
हादेव सर्पणादुदयं विद्यासामर्थ्यात्सुकृतदुःकृतहानं भवतीति प्रतिजानीते हेतुं वाचष्टे तर्तव्याभावादिति॥ नहि विदुषः संपरेतस्य
विद्यया ब्रह्म संप्रेप्सतोऽन्तराले सुकृतदुःकृताभ्यां किंचित्प्राप्तव्यमस्ति॥ यदर्थं नीते कतिचित्क्षणान्यक्षीणे ते कल्प्येयातां विद्याविरुद्ध
फलत्वात्तु विद्यासामर्थ्येन तयोः क्षयस्य स एव विद्याफलाभिमुखत्वात्तदेव भवितुमर्हति॥ तस्मात्तदानीमेव सन्न्यसं सुकृतदुःकृतहानि
मामनंति॥ अश्व इव रोमाणि विधूय विपापमिति॥ तस्य पुत्रा दायमुपयंति सुहृदः साधुकृत्यां द्विषंतः पापकृत्यामिति च॥ ७॥
छंदत उभयाविरोधात्॥ २८॥ यदि च देहादुपसृप्तस्य देवयानेन पथा प्रस्थितस्यार्धपथे सुकृतदुःकृतक्षयोऽभ्युपगम्येत ततः पतिते २४
देहे यमनियमविद्याभ्यासात्मकस्य सुकृतदुःकृतक्षयहेतोः पुरुषप्रयत्नस्येच्छातोऽनुष्ठानानुपपत्तेः॥ तदनुपपत्तिरेव तद्धेतुकस्य
सुकृतदुःकृतक्षयस्य स्यात्॥ तस्मात्पूर्वमेव साधकावस्थायां छंदतोऽनुष्ठानं तस्य स्यात्॥ तत्पूर्वकं च सुकृतदुःकृतहानमिति द्रष्टव्यं
एवं निमित्तनैमित्तिकयोरुपपत्तिस्ताण्डिशाट्यायनिश्रुत्योश्च संगतिरिति॥ ७॥ गतेरर्थवत्त्वमुभयथान्यथा हि विरोधः॥ २९॥ क्वचि

259/1913

त्पुण्यपापहानिसंनिधौ देवयानः पंथाः श्रूयते॥ क्वचिन्न तत्र संशयः॥ किं हानावविशेषेणैव देवयानः पंथाः संपिपात उत विभागेन क्व
चित्संनिपतेत्॥ क्वचिन्नेति यथा तावद्धानावविशेषेणैवायमुपायनानुवृत्तिरेवं देवयानानुवृत्तिरपि भवितुमर्हति॥ अस्यां प्राप्तावाचक्ष्महे गतेर्दे
वयानस्य पार्थार्थवत्त्वमुभयथा विभागेन भवितुमर्हति॥ क्वचिदर्थवती गतिः क्वचिन्नेति न विशेषेण॥ अन्यथा ह्यविशेषेणैतस्यां गतावंगी
क्रियमाणायां विरोधः स्यात्॥ पुण्यपापे विधूय निरंजनः परमं साम्यमुपैतीत्यस्यां श्रुतौ देशांतरप्रापणी गतिर्विरुध्येत॥ कथं हि निरंजनो गंता
देशांतरं गच्छेत्॥ गंतव्यं च परमं साम्यं न देशांतरप्राप्त्यायत्तमित्यानर्थक्यमेवात्र गतेर्मन्यामहे॥ ७॥ उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकव
त्॥ ३०॥ उपपन्नश्चायमुभयथाभावः क्वचिदर्थवती गतिः क्वचिन्नेति॥ लक्षणार्थोपलब्धेर्गतिकारणभूतो ह्यर्थः पर्यंकगतिविद्यादिषु सगु
णेषूपासनेषूपलभ्यते॥ तत्र हि पर्यंकारोहणं पर्यंकस्थेन ब्रह्मणा संवदनं विशिष्टगंधादिप्राप्तिश्चेत्येवमादि बहु देशांतरप्राप्त्यायत्तं फलं श्रू
यते तत्रार्थवती गतिः॥ न तु सम्यग्दर्शनेन तल्लक्षणार्थोपलब्धिरस्ति॥ न ह्यात्मैकत्वदर्शिनामाप्तकामानामिहैव दग्धाशेषक्लेशबीजानामा
रब्धभोगकर्माशयक्षपणव्यतिरेकेणापेक्षितव्यं किंचिदस्ति॥ तत्रानर्थिका गतिः॥ लोकवच्चैष विभागो द्रष्टव्यः॥ यथा लोके ग्रामप्राप्तौ देशां
तरप्रापणः पंथा अपेक्ष्यते न आरोग्यप्राप्तावेवमिहापीति भूयश्चैनं विभागं चतुर्थाध्याये निपुणतरमुपपादयिष्यामः॥ ७॥ अनियमः सर्वा
सामविरोधः शब्दानुमानाभ्याम्॥ ३१॥ सगुणासु विद्यासु गतिरर्थवती न निर्गुणायां परमात्मविद्यायामित्युक्तं॥ सगुणासु च विद्यासु
कासुचिद्गतिः श्रूयते॥ यथा पर्यंकविद्यायामुपकोसलविद्यायां पंचाग्निविद्यायां दहरविद्यायामिति॥ नान्यासु यथा मधुविद्यायां शांडिल्य
विद्यायां षोडशकलविद्यायां वैश्वानरविद्यायामिति॥ तत्र संशयः किं यास्वेवैषा गतिः श्रूयते तास्वेव नियम्येत नियमेन सर्वाभिरेवंजाती
यकाभिर्विद्याभिरभिसंबध्येतेति॥ किं तावत्प्राप्तं नियम इति॥ यत्रैव श्रूयते तत्रैव भवितुमर्हति॥ प्रकरणस्य नियामकत्वात्॥ यद्यन्यत्र श्रूयमा
णापि सा विद्यांतरं गच्छेत् श्रुत्यादीनां प्रामाण्यं हीयेत सर्वस्य सर्वार्थत्वप्रसंगात्॥ अपि चार्चिरादिकैकैव गतिरुपकोसलविद्यायां पंचाग्निवि
द्यायां च तुल्यवत् पठ्यते॥ तत्सर्वार्थत्वेऽनर्थकं पुनर्वचनं स्यात्॥ तस्मान्नियम इत्येवं प्राप्ते पठत्यनियम इति॥ सर्वासामेवाभ्युदयप्राप्तिफला
नां सगुणानां विद्यानामविशेषेणैवैषा देवयानाख्या गतिर्भवितुमर्हति॥ ननु नियमाभ्युपगमे प्रकरणविरोध उक्तः॥ नैषोऽस्ति विरोधः शब्दानुमाना
भ्यां श्रुतिस्मृतिभ्यामित्यर्थः॥ तथा हि श्रुतिस्तद्य इत्थं विदुरिति पंचाग्निविद्यावतां देवयानं पंथानमवतारयंती ये चेमेऽरण्ये श्रद्धां तप इत्यु
पासत इति विद्यांतरशीलिनामपि पंचाग्निविद्भिः समानमार्गतां गमयति॥ कथं पुनरवगम्यते विद्यांतरशीलिनामियं श्रुतिरिति ननु श्र
द्धातपःपरायणानामेव स्यात्तन्मात्रश्रवणात्॥ नैष दोषः॥ नहि केवलाभ्यां श्रद्धातपोभ्यामंतरेण विद्याबलमेषा गतिर्लभ्यते॥ विद्यया तदा

शं०भा०३ रोहंति यत्र कामाः परागताः॥ न तत्र दक्षिणा यंति नाविद्वांसस्तपस्विन इति श्रुत्यंतरात्॥ तस्मादिह श्रद्धातपोभ्यां विद्यांतरोपलक्षणं॥ वाज
२९ सनेयिनस्तु पंचाग्निविद्याधिकारेऽधीयते य एवमेतद्विदुर्ये चामी अरण्ये श्रद्धां सत्यमुपासत इति॥ तत्र श्रद्धालवो ये सत्यं ब्रह्मोपासत इति व्या
ख्येयं॥ सत्यशब्दस्य ब्रह्मण्यसकृत्प्रयुक्तत्वात्॥ पंचाग्निविदां चेत्थंवित्तयैवोपात्तत्वात्॥ विद्यांतरपरायणानामेवैतदुपादानं न्याय्यं॥ अथ य
एतौ पंथानौ न विदुस्ते कीटाः पतंगा यदिदं दंदशूकमिति च मार्गद्वयभ्रष्टानां कष्टामधोगतिं गमयंती देवयानपितृयाणयोरेवैनानंतर्भाव
यति॥ तत्रापि विद्याविशेषादेव देवयानप्रतिपत्तिः॥ स्मृतिरपि॥ शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते॥ एकया यात्यनावृत्तिमन्ययावर्त
ते पुनरिति॥ यत्तु देवयानस्य पथो द्विराम्नानमुपकोसलविद्यायां पंचाग्निविद्यायां च तदुभयत्राप्यनुचिंतनार्थं॥ तस्मादनियमः॥३१॥
यावदधिकारमवस्थितिराधिकारिकाणां॥३२॥ विदुषो वर्तमानदेहपातानंतरं मुक्तिरुत्पद्यते न वेति चिंत्यते॥ ननु विद्यायाः साधनभूतायाः
संपत्तौ कैवल्यनिर्वृत्तिः स्यान्न वेति नेयं चिंतोपपद्यते॥ न हि पाकसाधनसंपत्तावोदनो भवेन्न वेति चिंता संभवति॥ नाप्यभुंजानस्तृ
प्येन्न वेति चिंत्यते॥ उपपन्ना त्वियं चिंता ब्रह्मविदामपि केषांचिदितिहासपुराणयोर्देहांतरोत्पत्तिदर्शनात्॥ तथा ह्यपांतरतमा नाम वेदा
चार्यः पुराणर्षिर्विष्णुनियोगात्॥ कलिद्वापरयोः संधौ कृष्णद्वैपायनो बभूवेति स्मरंति॥ वसिष्ठश्च ब्रह्मणो मानसः पुत्रः सन्निमि
शापादपगतपूर्वदेहः पुनर्ब्रह्मादेशान्मित्रावरुणाभ्यां संबभूवेति॥ भृग्वादीनामपि ब्रह्मण एव मानसानां पुत्राणां वारुणे यज्ञे पुनरु
त्पत्तिः स्मर्यते॥ सनत्कुमारोऽपि ब्रह्मण एव मानसः पुत्रः स्वयं रुद्राय वरप्रदानात्॥ स्कंदत्वेन प्रादुर्बभूव॥ एवमेव दक्षनारदप्रभृतीनां भू
यसी देहांतरोत्पत्तिकथा तेन तेन निमित्तेन भवति स्मृतौ श्रुतावपि मंत्रार्थवादयोः प्रायेणोपलभ्यते॥ तत्र केचित्पतिते पूर्वदेहे देहांतरमाद
दते॥ केचित्तु स्थित एव तस्मिन्योगैश्वर्यवशादनेकदेहादानन्यायेन॥ सर्वे चैते समधिगतसकलवेदार्थाः स्मर्यंते॥ तदेतेषां देहांतरोत्प
त्तिदर्शनात्प्राप्तं ब्रह्मविद्यायाः पाक्षिकं मोक्षहेतुत्वमहेतुत्वं वेति॥ अत उत्तरमुच्यते॥ न तेषामपांतरतमःप्रभृतीनां वेदप्रवर्तनादिषु लोकस्थिति
हेतुष्वधिकारेषु नियुक्तानामधिकारतंत्रत्वात्स्थितेः॥ यथासौ भगवान्सविता सहस्रयुगपर्यंतं जगतोऽधिकारं चरित्वा तदवसाने उद
यास्तमयवर्जितं कैवल्यमनुभवति॥ अथ तत ऊर्ध्व उदेत्य नैवोदेता नास्तमेतैकल एव मध्ये स्थातेति श्रुतेः॥ यथा च वर्तमाना ब्रह्मविदः आ २९
रब्धभोगक्षये कैवल्यमनुभवंति॥ तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्य इति श्रुतेः॥ एवमपांतरतमःप्रभृतयोऽपीश्वराः पर
मेश्वरेण तेषु तेष्वधिकारेषु नियुक्ताः संतः सत्यपि सम्यग्दर्शने कैवल्यहेतावक्षीणकर्माणो यावदधिकारमवतिष्ठंते तदवसाने चापवृज्य
ंत इत्यविरुद्धं॥ सकृत्प्रवृत्तमेव हि ते फलदानाय कर्माशयमतिवाहयंतः स्वातंत्र्येणैव गृहादिव गृहांतरमन्यमन्यं देहं संचरंतः स्वाधिकार

261/1913

निर्वर्तनायापरिमुषितस्मृतय एव देहेंद्रियप्रकृतिवशित्वान्निर्माय देहान्युगपत्क्रमेण वाधितिष्ठंति॥ न चैते जातिस्मरा इत्युच्यंते त एवैत इति
स्मृतिप्रसिद्धेः॥ यथा हि सुलभा ब्रह्मवादिनी जनकेन विवदितुकामा व्युदस्य स्वं देहं जनकमाविश्य व्युद्य तेन पश्चात्स्वमेवाविवेशेति स्मर्यते॥ य
दि ह्युपयुक्ते सकृत्प्रवृत्ते कर्मणि कर्मांतरं देहांतरारंभकारणमाविर्भवेत्॥ ततोऽन्यदप्यदग्धबीजं कर्मांतरं तद्वदेव प्रसज्येतेति ब्रह्मविद्यायाः
पाक्षिकं मोक्षहेतुत्वमहेतुत्वं वाशंकेत॥ न त्वियमाशंका युक्ता ज्ञानात्कर्मबीजदाहस्य श्रुतिस्मृतिप्रसिद्धत्वात्॥ तथा हि श्रुतिः॥ भिद्यते हृदयग्रं
थिश्छिद्यंते सर्वसंशयाः॥ क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावरे॥ स्मृतिलंभे सर्वग्रंथीनां विप्रमोक्ष इति चैवमाद्या॥ स्मृतिरपि॥ यथै
धांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन॥ ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथेति॥ बीजान्यग्न्युपदग्धानि न रोहंति यथा पुनः॥ ज्ञानद
ग्धैस्तथा क्लेशैर्नात्मा संपद्यते पुनरिति चैवमाद्या॥ न चाविद्यादिक्लेशदाहे सति क्लेशबीजस्य कर्माशयस्यैकदेशदाह एकदेशप्ररोहश्चेत्युपपद्य
ते॥ न ह्यग्निदग्धस्य शालिबीजस्यैकदेशप्ररोहो दृश्यते॥ प्रवृत्तफलस्य तु कर्माशयस्य मुक्तेषोरिव वेगक्षयान्निवृत्तिः तस्य तावदेव चिरमि
ति शरीरपातावधिकरणात्॥ तस्मादुपपन्ना यावदधिकारमाधिकारिकाणामवस्थितिः॥ न च ज्ञानफलस्यानैकांतिकता॥ तथा च श्रु
तिरविशेषेणैव सर्वेषां ज्ञानान्मोक्षं दर्शयति॥ तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्तथर्षीणां तथा मनुष्याणामिति॥ ज्ञानांतरेषु चैश्वर्या
दिफलेष्वासक्ताः स्युर्महर्षयः॥ ते पश्चादैश्वर्यक्षयदर्शनेन निर्विण्णाः परमात्मज्ञाने परिनिष्ठाः कैवल्यं प्रापुरित्युपपद्यते॥ ब्रह्मणा सह
ते सर्वे संप्राप्ते प्रतिसंचरे॥ परस्यांते कृतात्मानः प्रविशंति परं पदमिति स्मरणात्॥ प्रत्यक्षफलत्वाच्च ज्ञानस्य फलविरहाशंकानुपपत्तिः॥ क
र्मफले हि स्वर्गादावननुभवारूढे स्यादाशंका भवेद्वा न वेति॥ अनुभवारूढं तु ज्ञानफलं यत्साक्षादपरोक्षाद्ब्रह्मेति श्रुतेः॥ तत्त्वमसीति सि
द्धवदुपदेशात्॥ न हि तत्त्वमसीत्यस्य वाक्यस्यार्थस्तत्त्वं मृतो भविष्यसीत्येवं शक्यः परिणेतुं॥ तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदेऽहं मनुरभवं सू
र्यश्चेति च सम्यग्दर्शनकालमेव तत्फलं सर्वात्मत्वं दर्शयति॥ तस्मादैकांतिकी विदुषः कैवल्यसिद्धिः॥३२॥ अक्षरधियां त्ववरोधः सामा
न्यतद्भावाभ्यामौपसदवत्तदुक्तं॥३३॥ वाजसनेयके श्रूयते एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदंत्यस्थूलमनण्वह्रस्वमदीर्घमित्या
दि॥ तथाथर्वणे श्रूयते अथ परा यया तदक्षरमधिगम्यते॥ यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमित्यादि तथैवान्यत्रापि विशेषनिराकरण
द्वारेणाक्षरं परं ब्रह्म श्राव्यते॥ तत्र च क्वचित्केचिद्विशेषाः प्रतिषिध्यंते तासां विशेषप्रतिषेधबुद्धीनां किं सर्वासां सर्वत्र प्राप्ति
रुत व्यवस्थेति संशये श्रुतिविभागाद्व्यवस्थाप्राप्तावुच्यते॥ अक्षरविषयास्तु विशेषप्रतिषेधबुद्धयः सर्वाः सर्वत्रावरोद्धव्याः सामान्यतद्भा
वाभ्यां॥ समानो हि सर्वत्र विशेषनिराकरणरूपो ब्रह्मप्रतिपादनप्रकारः॥ तदेव च सर्वत्र प्रतिपाद्यं ब्रह्माभिन्नं प्रत्यभिज्ञायते॥ तत्र किमित्यन्य

शां०भा०३
२६

त्ररूतावुद्रयोन्यत्रनम्यकः॥ तथा च्छंदादयां प्रधानस्यैत्यत्र व्याख्यातं तत्र विधिस्वरूपाणि विशेषणानि चिंतितानीह प्रतिषेधरूपाणीति विशेषः
प्रपंचार्थश्चायं चिंताभेदः॥ यमस्त्वदितिनिदर्शनं॥ यथा जामदग्न्येऽहीने पुरोडाशिनीषूपसत्सु चोदितासु पुरोडाशप्रदानमंत्राणामग्ने होत्रं वेरध्वरमि
त्येवमादीनामुद्गातृवेदोत्पन्नानामप्यध्वर्युरभिसंबंधो भवत्यध्वर्युकर्तृकत्वात्पुरोडाशप्रदानस्य प्रधानतंत्रत्वाच्चांगानामेवमिहाप्यक्षरतंत्रत्वात्तु वि
शेषणानां यत्र क्वचिदुत्पन्नानामप्यक्षरेण सर्वत्राभिसंबंध इत्यर्थः॥ तदुक्तं प्रथमे कांडे गुणमुख्यव्यतिक्रमे तदर्थत्वान्मुख्येन वेदसंयोग इत्यत्र॥छ॥ इयं
दामननात्॥ ३४॥ द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते॥ तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीतीत्यध्यात्माधिकारे मं
त्रमाथर्वणिकाः श्वेताश्वतराः पठंति॥ तथा कठाः ऋतं पिबंतौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्धे॥ छायातपौ ब्रह्मविदो वदंति पंचाग्नयो ये च त्रि
णाचिकेताः इति॥ किमत्र विद्यैकत्वमुत विद्यानानात्वमिति संशयः॥ किं तावत्प्राप्तं विद्यानानात्वमिति॥ कुतः॥ विशेषदर्शनात्॥ द्वा सुपर्णेत्यत्र ह्ये
कस्य भोक्तृत्वं दृश्यते॥ एकस्य चाभोक्तृत्वं॥ ऋतं पिबंताविति तूभयोरपि भोक्तृत्वमेव दृश्यते तस्माद्वेद्यरूपं भिद्यमानं विद्यां भिनत्तीत्येवं प्राप्ते ब्रवीति विद्यै
कत्वमिति॥ कुतः॥ यत उभावप्येतयोर्मंत्रयोरियत्तापरिच्छिन्नं द्वित्वोपेतं वेद्यरूपमभिन्नमामनंति॥ ननु दर्शितो रूपभेदः॥ नेत्युच्यते॥ उभा
वप्येतौ मंत्रौ जीवद्वितीयमीश्वरं प्रतिपादयतो नार्थांतरं॥ द्वा सुपर्णेत्यत्र जीवे पिबत्यशनायाद्यतीतः परमात्मा प्रतिपाद्यते॥ वाक्यशेषेपि च
स एव प्रतिपाद्यमानो दृश्यते जुष्टं यदा पश्यत्यन्यमीशमिति॥ ऋतं पिबंताविति तु जीवे पिबत्यशनायाद्यतीतः परमात्मापि साहचर्यात्॥ छत्रि
न्यायेन पिबतीत्युपचर्यते परमात्मप्रकरणं ह्येतदन्यत्र धर्मादन्यत्राधर्मादित्युपक्रमात्॥ तद्विषय एव चात्रापि वाक्यशेषो भवति॥ यः सेतु
रीजानानामक्षरं ब्रह्म यत्परमिति॥ गुहां प्रविष्टावात्मानौ हि तद्दर्शनादित्यत्र चैतत्प्रपंचितं॥ तस्मान्नास्ति वेद्यभेदस्तस्माच्च विद्यैकत्वमपि च त्रिष्वप्ये
तेषु वेदांतेषु पौर्वापर्यालोचने परमात्मविद्यैवावगम्यते॥ तादात्म्यविवक्षयैव च जीवोपादानं नार्थांतरविवक्षया॥ न च परमात्मविद्या
यां भेदाभेदविचारावतारोस्तीत्युक्तं॥ तस्मात्प्रपंचार्थ एवैष योगस्तस्माच्चाधिकधर्मोपसंहार इति॥ अंतरा भूतग्रामवत्स्वात्मनः॥ ३५॥
यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वांतर इत्येवं द्विरुषस्तकहोडप्रश्नयोर्नैरंतर्येण वाजसनेयिनः समामनंति॥ तत्र संशयो विद्यैकत्वं
वा स्याद्विद्यानानात्वं वेति॥ विद्यानानात्वमिति तावत्प्राप्तमभ्याससामर्थ्यादन्यथा ह्यन्यूनातिरिक्तार्थे द्विराम्नानमनर्थकमेव स्यात्॥
तस्माद्यथाभ्यासात्कर्मभेद एवमभ्यासाद्विद्याभेद इत्येवं प्राप्ते प्रत्याहांतराम्नानाविशेषात्स्वात्मनो विद्यैकत्वमिति॥ सर्वांतरो हि स्व २७
आत्मोभयत्राप्यविशिष्टः पृच्छ्यते च प्रत्युच्यते च॥ न हि द्वावात्मानावेकस्मिन्देहे सर्वांतरौ संभवतः॥ तदा ह्येकस्यांजसं सर्वांतरत्वमवकल्प्ये
तैकस्य तु भूतग्रामवन्नैव सर्वांतरत्वं स्यात्॥ यथा च पंचभूतसमूहे देहे पृथिव्या आपोंऽतरास्तु आपस्तेजोंतरमिति सत्यप्यापेक्षिकेंतरत्वे नै
व सर्वांतरत्वं भवति तथेहापीत्यर्थः॥ अथवा भूतग्रामवदिति श्रुत्यंतरं निदर्शयति॥ यथैको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतांत

263/1913

र आत्मा आम्नायत एवमनयोरपि ब्राह्मणयोरित्यर्थः॥ तस्माद्वेद्यैकत्वाद्विद्यैकत्वात्॥छ॥ अन्यथा भेदानुपपत्तिरिति चेन्नोपदेशांतरवत्॥
॥३६॥ अथ यदुक्तमनभ्युपगम्यमाने विद्याभेदे आम्नानभेदानुपपत्तिरिति॥ तत्परिहर्तव्यमत्रोच्यते॥ नायं दोषः॥ उपदेशांतरवदुपप
त्तेर्यथा तांडिनामुपनिषदि षष्ठे प्रपाठके स आत्मा तत्त्वमसि श्वेतकेतो इति नवकृत्वोप्युपदेशे न विद्याभेदो भवति॥ एवमिहापि भविष्यति॥
कथं च नवकृत्व उपदेशेऽपि विद्याभेदो भवत्युपक्रमोपसंहाराभ्यामैकार्थ्यावगमात् भूय एव मा भगवान्विज्ञापयत्विति चैकस्यैवार्थस्य पु
नःपुनः प्रतिपादयितव्यत्वेनोपन्यासाच्छंकांतरनिराकरणेन चासकृदुपदेशोपपत्तेरेवमिहापि प्रश्नरूपाभेदात् अन्यदार्तमिति च परि
समाप्त्यविशेषादुपक्रमोपसंहाराभ्यामेकार्थविषयत्वं दृश्यते॥ यदेव साक्षादपरोक्षाद्ब्रह्मेति च द्वितीये प्रश्ने एवकारं प्रयुंजानः पूर्वप्रश्नगतः
वार्थमुत्तरत्रानुकृष्यमाणं दर्शयति॥ पूर्वस्मिंश्च ब्राह्मणे कार्यकरणव्यतिरिक्तस्यात्मनः सद्भावः कथ्यते॥ उत्तरस्मिंस्तु तस्यैवाशनायादि
संसारधर्मातीतत्वं कथ्यते॥ इत्येकार्थतोपपत्तिस्तस्मादेका विद्येति॥छ॥ व्यतिहारो विशिंषंति हीतरवत्॥ ३७॥ तद्योऽहं सोऽसौ योऽसौ सोऽहमि
त्यैतरेयिण आदित्यपुरुषं प्रकृत्य समामनंति॥ तथा जाबालाः त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसीति॥ तत्र संशयः॥ किमिह व्यतिहार
णोभयरूपा मतिः कर्तव्योतैकरूपैवेति॥ एकरूपैवेति तावदाह॥ न ह्यत्रात्मन ईश्वरेणैकत्वमुक्त्वान्यत्किंचिच्चिंतयितव्यमस्ति॥ यदि चैवं चिं
त्यविशेषः परिकल्प्येत संसारिणश्चेश्वरात्मत्वमीश्वरस्य च संसार्यात्मत्वमिति॥ अत्र संसारिणस्तावदीश्वरात्मत्व उत्कर्षो भवेदीश्वर
स्य तु संसार्यात्मत्व इत्येवं प्राप्ते प्रत्याह॥ व्यतिहारोयमाध्यानायाम्नायते॥ इतरवद्यथेतरे गुणाः सर्वात्मत्वप्रभृतय आध्यानायाम्नायंते तद्वत्॥ त
था हि विशिंषंति समाम्नातार उभयोच्चारणेन त्वमहमस्म्यहं च त्वमसीति॥ तच्चोभयरूपायां मतौ कर्तव्यायामर्थवद्भवति॥ अन्यथा हीदं
विशेषेणोभयाम्नानमनर्थकं स्यादेकेनैव कृतत्वात्॥ ननूभयाम्नानस्यार्थविशेषे परिकल्प्यमाने देवतायाः संसार्यात्मत्वापत्तेर्नि
कर्षः प्रसज्येतेत्युक्तं॥ नैष दोषः एकत्वस्यैवानेन प्रकारेणानुचिंत्यमानत्वात्॥ नन्वेवं सति स एवैकत्वदृढीकार आपद्येत॥ न व
यमेकत्वदृढीकारं वारयामः॥ किं तर्हि व्यतिहारेणेह द्विरूपा मतिः कर्तव्या वचनप्रामाण्यात्॥ नन्वेकरूपत्वमेतावदुपपादयामः
फलं तस्यैकत्वमपि दृढीभवति॥ यथा ध्यानार्थेपि सत्यकामादिगुणोपदेशे तद्गुण ईश्वरः प्रसिध्यति॥ तद्वत्॥ तस्मादयमाध्यातव्यो
व्यतिहारः समाने च विषय उपसंहर्तव्य इति॥छ॥ सैव हि सत्यादयः॥ ३८॥ स यो हैतन्महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मेत्यादिना
वाजसनेयके सत्यविद्यां सनामाक्षरोपासनां विधायानंतरमाम्नायते॥ तद्यत्तत्सत्यमसौ स आदित्यो य एष एतस्मिन्मंडले पुरुषो
यश्चायं दक्षिणेऽक्षन्पुरुष इत्यादि॥ तत्र संशयः॥ किं द्वे एते सत्यविद्ये किं वैकैवेति॥ द्वे इति तावत्प्राप्तं॥ भेदेन हि फलसंयोगो भवति जयती
मांल्लोकानिति पुरस्ताद्धंति पाप्मानं जहाति चेत्युपरिष्टात्॥ प्रकृताकर्षणं तूपास्यैकत्वादित्येवं प्राप्ते ब्रूमः॥ एकैवेयं सत्यविद्येति॥ कुतः॥ तद्यत

शा०भा०
२०

सत्यमितिप्रकृताकर्षणात्॥ ननु विद्याभेदेपिप्रकृताकर्षणमुपास्यैकत्वादुपपद्यत इत्युक्तं॥ नैतदेवं यत्र हि विस्पष्टकारणं तद्विद्याभेदः
प्रतीयते तत्रैवं वर्ण्येत अत्र तूभयथासंभवे॥ यत्सत्यमिति प्रकृताकर्षणात्पूर्वं विद्यासंबंधमेव सत्यमुत्तरत्राकृष्यत इत्येकविद्यात्वनिश्च
यः॥ यत्पुनरुक्तं फलांतरश्रवणात्॥ तद्विद्यांतरमिति॥ अत्रोच्यते॥ तस्योपनिषदहरहमिति चांगांतरोपदेशस्य स्तावकमिदं फलांतरश्रव
णमित्यदोषः॥ अपि चार्थवादादेव फलं कल्प्यतेत्यसति विद्यैकत्वे वावयवे श्रूयमाणानि बहून्यपि फलान्यवयविन्यामेव
विद्यायामुपसंहर्तव्यानि भवंति॥ तस्मात्सैवेयमेका सत्यविद्या तेन तेन विशेषेणोपेताम्नातेत्यतः॥ सर्व एव सत्यादयो गुणा एकस्मिन्प्रयो
गे उपसंहर्तव्याः॥ केचित्पुनरस्मिन्सूत्रे इदं वाजसनेयकमक्ष्यादित्यपुरुषविषयं वाक्यं छांदोग्यं वा य एषोंतरादित्ये हिरण्मयः पुरुषो दृ
श्यते॥ य एषोंतरक्षिणि पुरुषो दृश्यत इत्यध्यात्मं सैवेयमक्ष्यादित्यपुरुषविषया विद्योभयत्रैकेति कृत्वा सत्यादीन्गुणान्वाजसनेयिभ्य
श्छंदोगानामुपसंहार्यान्मन्यंते॥ तदसाधु लक्ष्यते छांदोग्ये हि कर्मसंबंधिनीयमुद्गीथव्यपाश्रया विद्या ज्ञायते॥ तत्राद्यादिमध्यावसा
नेषु कर्मसंबंधचिह्नानि भवंति॥ इयमेवर्गग्निः सामेत्युपक्रमः॥ तस्यर्क्च साम च गेष्णौ तस्मादुद्गीथ इति मध्ये य एवं विद्वान्साम गायतीत्यु
पसंहारे॥ नैवं वाजसनेयके किंचित्कर्मसंबंधचिह्नमस्ति॥ तत्र प्रक्रमभेदाद्विद्याभेदे सति गुणव्यवस्थैव युक्तेति॥ ३८॥ कामादीतरत्र तत्र चायतना
दिभ्यः॥ ३९॥ अथ यदिदमस्मिन्ब्रह्मपुरे दहरं पुंडरीकं वेश्म दहरोस्मिन्नंतराकाश इति प्रस्तुत्य छंदोगा अधीयते एष आत्मापहतपाप्मा
विजरो विमृत्युर्विशोको विजिघत्सोपिपासः सत्यकामः सत्यसंकल्प इत्यादि॥ तथा वाजसनेयिनः स वा एष महानज आत्मा योयं विज्ञा
नमयः प्राणेषु य एषोंतर्हृदय आकाशस्तस्मिञ्छेते सर्वस्य वशीत्यादि॥ तत्र विद्यैकत्वं परस्परगुणयोगश्च किं वा नेति संशये विद्यैक
त्वमितीदमुच्यते॥ कामादीति सत्यकामादीत्यर्थः॥ यथा देवदत्तो दत्तः सत्यभामा भामेति॥ यदेतच्छांदोग्ये सत्यकामत्वादिगुणजातमुपलभ्य
ते तदितरत्र वाजसनेयके स वा एष महानज आत्मेत्यत्र संबध्येत॥ यच्च वाजसनेयके वशित्वाद्युपलभ्यते तदपि तत्र छांदोग्ये एष आत्मा
पहतपाप्मेत्यत्र संबध्येत॥ आयतनादिसामान्यात्॥ समानं ह्युभयत्रापि हृदयमायतनं समानश्च वेद्य ईश्वरः॥ समानं च तस्य सेतुत्वं लोकासं २७
भेदप्रयोजनमित्येवमादि बहु सामान्यं दृश्यते॥ ननु विशेषोपि दृश्यते छांदोग्ये हृदयाकाशस्य गुणसंयोगो वाजसनेयके त्वाकाशाश्रय
स्य ब्रह्मण इति॥ न॥ दहर उत्तरेभ्य इत्यत्र छांदोग्येप्याकाशशब्दं ब्रह्मैवेति प्रतिपादितत्वात्॥ अयं त्वत्र विद्यते विशेषः॥ सगुणा हि ब्रह्मविद्या छां
दोग्य उपदिश्यते अथ य इहात्मानमनुविद्य व्रजंत्येतांश्च सत्यान्कामानित्यात्मवत्कामानामपि वेद्यत्वश्रवणात्॥ वाजसनेयके तु निर्गु
णमेव परं ब्रह्मोपदिश्यमानं दृश्यते अत ऊर्ध्वं विमोक्षाय ब्रूह्यसंगो ह्ययं पुरुष इत्यादि॥ प्रश्नप्रतिवचनसमन्वयात्॥ वशित्वादि स्तुत्यर्थमेव गुणजातं वाजसने
यके संकीर्त्यते॥ तथा चोपरिष्टात्स एष नेति नेत्यात्मेत्यादिना निर्गुणमेव ब्रह्मोपसंहरति॥ गुणवतस्तु ब्रह्मण एकत्वाद्विभूतिप्रदर्शनाय

265/1913

यं गुणोपसंहारः सूत्रितो नोपासनायेति द्रष्टव्यं॥ ३९॥ आदरादलोपः॥ ४०॥ छांदोग्ये वैश्वानरविद्यां प्रकृत्य श्रूयते॥ तद्यद्भक्तं प्रथममागच्छे
त्तद्धोमीयं स यां प्रथमामाहुतिं जुहुयात्तां जुहुयात्प्राणाय स्वाहेत्यादि॥ तत्र पंच प्राणाहुतयो विहितास्तासु च परस्तादग्निहोत्रशब्दः प्रयु
क्तो य एतदेवं विद्वानग्निहोत्रं जुहोतीति यथेह क्षुधिता बाला मातरं पर्युपासत एवं सर्वाणि भूतान्यग्निहोत्रमुपासत इति तत्रेदं विचार्य
ते॥ किं भोजनलोपे लोपः प्राणाग्निहोत्रस्योतालोप इति तद्यद्भक्तमिति भक्तागमनसंयोगश्रवणाद्भक्तागमनस्य च भोजनार्थत्वाद्भोजनलो
पः प्राणाग्निहोत्रस्यैवं प्राप्ते न लुप्येतेति तावदाह कस्मादादरात्॥ तथा हि वैश्वानरविद्यायामेव जाबालानां श्रुतिः॥ पूर्वोतिथिभ्यो
श्नीयात्॥ यथा वै स्वयमहुत्वाग्निहोत्रं परस्य जुहुयादेवं तदिति अतिथिभोजनस्य प्राथम्यं निंदित्वा स्वामिभोजनं प्रथमं प्रापयंती प्राणाग्नि
होत्र आदरं करोति॥ या हि न प्राथम्यलोपं सहते न तरां सा प्राथम्यवतोग्निहोत्रस्य लोपं सहतेति मन्यते॥ ननु भोजनार्थभक्तागमनसंयो
गाद्भोजनलोपे लोपः प्रापितः॥ न॥ तस्य द्रव्यविशेषविधानार्थत्वात्॥ प्राकृते ह्यग्निहोत्रे पयःप्रभृतीनां द्रव्याणां नियतत्वात्॥ इहाप्य
ग्निहोत्रशब्दात्कौंडपायिनामयनवत्तद्धर्मप्राप्तौ सत्यां भक्तद्रव्यकता गुणविशेषविधानार्थमिदं वाक्यं तद्यद्भक्तमित्यतो गुणलोपेन
मुख्यस्येत्येवं प्राप्ते भोजनलोपेन मुख्यस्येत्येवं प्राप्ते भोजनलोपेप्यद्भिरन्येन वा द्रव्येणाविरुद्धेन प्रतिनिधानन्यायेन प्राणाग्निहो
त्रस्यानुष्ठानमित्युत्तरं पठति॥ ४०॥ उपस्थितेतस्तद्वचनात्॥ ४१॥ उपस्थिते भोजने ततस्तस्मादेव भोजनद्रव्यात्प्रथमोपनिपतितात्प्राणा
ग्निहोत्रं निर्वर्तयितव्यं॥ तस्मात्तद्वचनात्॥ तथा हि तद्यद्भक्तं प्रथममागच्छेत्तद्धोमीयमिति सिद्धवद्भक्तोपनिपातपरामर्शेन परार्थद्रव्यसा
ध्यतां प्राणाहुतीनां विदधाति ता अप्रयोजकलक्षणापन्नाः आहुतयः सत्यः कथं भोजनलोपे द्रव्यांतरं प्रतिनिधापयेयुः॥ न चात्र प्राकृता
ग्निहोत्रधर्मप्राप्तिरस्ति॥ कुंडपायिनामयने हि मासमग्निहोत्रं जुहोतीति विध्युद्देशगतोग्निहोत्रशब्दस्तद्वद्भावं विधापयेदिति युक्ता तद्ध
र्मप्राप्तिः॥ इह पुनरर्थवादगतोग्निहोत्रशब्दो न तद्भावं विधापयितुमर्हति॥ धर्मप्राप्तौ चाभ्युपगम्यमानायामग्न्युद्धरणादयोपि प्रा
प्येरन्॥ न चास्ति संभवोग्न्युद्धरणस्य तावद्धोमाधिकरणभावाय॥ न चायमग्निहोमो भोजनार्थताव्याघातप्रसंगात्॥ भोजनोपनीत
द्रव्यसंबंधाच्चास्य एवंरूपो होमः॥ तथा च जाबालश्रुतिः॥ पूर्वोतिथिभ्योश्नीयादित्यास्याधारमेवमाहोमनिर्वृत्तिं दर्शयति॥ अत एव
चोपासीत्यादिकान्यग्निहोत्रांगानि दर्शयति॥ उर एव वेदिर्लोमानि बर्हिर्हृदयं गार्हपत्यो मनोन्वाहार्यपचन आस्यमाहवनी
य इति॥ वेदिश्रुतिश्चात्र स्थंडिलमात्रोपलक्षणार्थाद्रष्टव्या॥ मुख्याग्निहोत्रे वेद्यभावात्तदंगानीव संपादयितुत्वाद्भोजनेनैव च कृ
तकालेन संयोगादग्निहोत्रकालावरोधसंभव एव मन्येप्युपस्थानादयो धर्माः केचित्कथंचिद्विरुध्यंते॥ तस्माद्भोजनपक्ष एवैतं मंत्र

ब्रं०भा० २९

द्रव्यदेवतासंयोगात्खं चहोमाभिर्वर्तयितव्याः॥यत्वादर्शनं॥ततः वचनं भोजनपक्षे प्राथम्यविधानार्थं॥नह्यस्तिवचनस्यातिभारो नत्वेते
नास्यनित्यताशक्यतेदर्शयितुं॥तस्माद्भोजनलोपे लोप एव प्राणाग्निहोत्रस्येति॥निर्द्धारणानियमस्तद्दृष्टेः पृथग्घ्यप्रतिबंधः फलं॥४२॥संति
कर्मांगव्यपाश्रयाणि विज्ञानान्योमित्येतदक्षरमुद्गीथमुपासीतेत्येतदक्षरमुद्गीथमुपासीतेत्येवमादीनि किं तान्येव स्युः कर्मसु पर्णमयी
त्वादिवदुतानित्यानि गोदोहनादिवदिति विचारयामः॥किं तावत्प्राप्तं नित्यानीति॥कुतः प्रयोगवचनपरिग्रहात्॥अनारभ्याधीतान्यपिह्ये
तान्युद्गीथादिद्वारेण क्रतुसंबंधात्क्रतुप्रयोगवचनेनांगांतरवत्संस्पृश्यंते यत्तेषां स्ववाक्येषु फलश्रवणमापयिता ह वै कामानां भवतीत्या
दि तद्वर्तमानापदेशरूपत्वादर्थवादमात्रमपापश्लोकश्रवणादिवन्न फलप्रधानं॥तस्माद्यथा यस्य पर्णमयी जुहूर्भवति॥न स पापं श्लोकं
शृणोतीत्येवमादीनामप्रकरणपठितानामपि जुह्वादिद्वारेण क्रतुप्रवेशात्प्रकरणपठितवन्नित्यता एवमुद्गीथाद्युपासनानामपीत्येवं प्राप्ते
ब्रूमः॥तन्निर्द्धारणानियम इति यान्येतान्युद्गीथादिकर्मगुणयाथात्म्यनिर्द्धारणानि रसतम आप्तिः समृद्धिः मुख्यः प्राणः आदित्य इत्येव
मादीनि नैतानि नित्यवत्कर्मसु नियम्येरन्॥कुतः तद्दृष्टेः॥तथाहि अनित्यत्वमेवंजातीयकानां दर्शयति श्रुतिः॥तेनोभौ कुरुतो यश्चैतदेवं वेद
यश्च न वेद इति अविदुषोपि क्रियाभ्यनुज्ञानात् प्रस्तावादिदेवताविज्ञानविहीनानामपि च प्रस्तोत्रादीनां याजनाध्यवसानदर्शनात्॥प्रस्तो
तर्या देवता प्रस्तावमन्वायत्ता तां चेदविद्वान्प्रस्तोष्यसि तां वेदविद्वानुद्गास्यसि तां चेदविद्वान्प्रतिहरिष्यसीति च॥अपि चैवंजातीयकस्य कर्म
व्यपाश्रयस्य विज्ञानस्य पृथगेव कर्मणः फलमुपलभ्यते कर्मफलसिद्ध्यप्रतिबंधः॥तत्समृद्धिरतिशयविशेषः कश्चित्॥तेनोभौ कुरुतो
यश्चैतदेवं वेद यश्च न वेद नाना तु विद्या चाविद्या च यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवतीति॥तत्र नानात्विति विद्वदविद्वत्प्र
योगयोः पृथक्करणाद्वीर्यवत्तरमिति च तरप्प्रयोगाद्विद्याहीनमपि कर्म वीर्यवदिति गम्यते॥तत्रानित्यत्वे विद्याया उपपद्यते॥नित्यत्वे तु कथं त
द्विहीनं कर्म वीर्यवदभ्यनुज्ञायेत॥सर्वांगोपसंहारे हि वीर्यवत्कर्मेति स्थितिः॥तथा लोकसामादिषु प्रतिनियतानि प्रत्युपासनं फलानि शि
ष्यंते॥कल्पंतेऽस्मै लोका ऊर्ध्वाश्चावृत्ताश्चेत्येवमादीनि न चेदं फलश्रवणमर्थवादमात्रं युक्तं प्रतिपत्तुं॥तथा हि गुणवादः स्यात्॥फ
लोपदेशे तु मुख्यवादोपपत्तिः॥प्रयाजादिषु तिकर्तव्यताकांक्षस्य क्रतोः प्रकृतत्वात्तादर्थ्ये सति युक्तं फलश्रुतेरर्थवादत्वं॥तथाना
रभ्याधीतेष्वपि पर्णमयीत्वादिषु॥नहि पर्णमयीत्वादीनामक्रियात्मकानामाश्रयमंतरेण फलसंबंधोवकल्प्यते॥गोदोहनादीनां २९
हि प्रकृतप्रणयनाद्याश्रयलाभादुपपन्नः फलविधिः॥तथा बैल्वादीनामपि प्रकृतयूपाद्याश्रयलाभात्॥नतु पर्णमयीत्वादिष्वेवं
विधिः कश्चिदाश्रयः प्रकृतोस्ति॥वाक्येनैव तु जुह्वाद्याश्रयतां विवक्षित्वा फले विधिविवक्षातो वाक्यभेदः स्यात्॥उपासनानां तु क्रि
यात्मकत्वादिविशिष्टविधानोपपत्तेः॥उद्गीथाद्याश्रयाणां फले विधानं न विरुध्यते॥तस्माद्यथाक्रत्वाश्रयाण्यपि गोदोहनादीनि फ

लसंयोगादनित्यान्येवमुद्गीथाद्युपासनान्यपि द्रष्टव्यं॥अतएव च कल्पसूत्रकारा नैवंजातीयकान्युपासनानि क्रतुषु कल्पयांच
क्रुः॥प्रदानवदेव तदुक्तं॥४३॥वाजसनेयके वदिष्याम्येवाहमिति वाग्दध्र इत्यत्राध्यात्मं वागादीनां प्राणः श्रेष्ठोऽवधारितो ऽधिदैवतमग्न्यादी
नां वायुः॥तथा छांदोग्ये वायुर्वाव संवर्ग इत्यत्राधिदैवमग्न्यादीनां वायुः संवर्गोऽवधारितो अध्यात्मं वागादीनां प्राणः॥तत्र संशयः॥पृथग्
वेमौ वायुप्राणावुपगंतव्यौ स्यातामपृथग्वेति॥अपृथगिति॥तावत्प्राप्तं तत्त्वाभेदात्॥नह्यभिन्ने तत्त्वे सति पृथगनुचिंतनं न्याय्यं॥दर्श
यति च श्रुतिरध्यात्ममधिदैवं च तत्त्वाभेदमग्निर्वाग्भूत्वाभेदमग्निर्वाग्भूत्वा विशं प्राविशदित्यारभ्य तथा स एते सर्व एव समाः सर्वेऽनंता इ
त्याध्यात्मिकानां प्राणानामाधिदैविकीं विभूतिमात्मभूतां दर्शयति॥तथान्यत्रापि तत्र तत्राध्यात्ममधिदैवं च तत्त्वाभेददर्शिनी भवति
क्वचिच्च यः प्राणः स वायुरिति॥स्पष्टमेव वायुप्राणं चैकं करोति॥तथोदाहृतेपि वाजसनेयब्राह्मणे यतश्चोदेति सूर्य इत्यस्मिन्नुपसंहारश्लो
के॥प्राणाद्वा एष उदेति प्राणेऽस्तमेतीति प्राणेनैवोपसंहरन्नेकत्वं दर्शयति॥तस्मादेकमेव व्रतं चरेत्प्राण्याच्चैवापान्याच्चेति प्राणव्रतेनैव
कैनोपसंहरन्नेतदेव द्रढयति॥तथा छांदोग्येपि परस्तान्महात्मनश्चतुरो देवः कः सोऽजागारेत्येकमेव संवर्गं गमयति न ब्रवीत्येक एतेषां संव
र्गोऽपरेषामिति तस्मादपृथक्त्वमुपगमनस्येत्येवं प्राप्ते ब्रूमः॥पृथगेव वायुप्राणावुपगंतव्याविति॥कस्मात्पृथगुपदेशात्॥ध्यानार्थोह्य
यमध्यात्माधिदैवविभागोपदेशः॥सोऽसत्यां ध्यानपृथक्त्वे अनर्थक एव स्यात्॥ननूक्तमपृथगनुचिंतनं तत्त्वाभेदादिति॥नैष दोषः॥तत्त्वा
भेदेप्यवस्थाभेदादुपदेशभेदवशेनानुचिंतनभेदोपपत्तेः॥श्लोकोपन्यासश्च तत्त्वाभेदाभिप्रायेणाप्युपपद्यमानस्य पूर्वोदितमध्येयभेदं नि
राकरणसामर्थ्याभावात्॥यथा चैषां प्राणानां मध्यमः प्राण एवमेतासां देवतानां वायुरिति चोपमानोपमेयकारणात्॥एतेन च व्रतोपन्या
सो व्याख्यातः एकमेव व्रतमिति॥चैवकारो वागादिव्रतनिवर्तनिवर्तनेन प्राणव्रतप्रतिपत्त्यर्थो भग्नव्रताद्धि वागादीन्युः॥क्रानि तानि
मृत्युः श्रमो भूत्वोपयेमे इति श्रुतेः॥न वायुव्रतनिवृत्त्यर्थः॥अथातो व्रतमीमांसेति प्रस्तुत्य तुल्यवद्वायुप्राणयोरभग्नव्रतत्वस्य निर्धारितत्वा
देकमेव व्रतं चरेदिति चोक्त्वा तेनो एतस्यै देवतायै सायुज्यं सलोकतां जयतीति वायुप्राप्तिं फलं ब्रुवन्वायुव्रतमनिवर्तितं दर्शयति॥देवता
त्र वायुः स्यादपरिच्छिन्नात्मत्वस्याप्सितत्वात् पुरस्तात्प्रयोगाच्च॥सैषानस्तमिता देवता यद्वायुरिति॥तथा तो वा एतौ द्वौ संवर्गौ॥वायुरेव
देवेषु प्राणः प्राणेष्विति भेदेन व्यपदिशति॥ते वा एते पंचान्ये पंचान्ये दश संतस्तत्कृतमिति च भेदेनैवोपसंहरति॥तस्मात्पृथगेवोपग
मनं प्रदानवत्॥यथेंद्राय राज्ञे पुरोडाशमेकादशकपालमिंद्रायाधिराजायेंद्राय स्वराज्ञ इत्यस्यां त्रिपुरोडाशायामिष्टौ सर्वेषामभिगमय
न्नवद्यत्यछंबट्कारमित्यतो वचनादिंद्राभेदाच्च सहप्रदानाशंकायां राजादिगुणभेदाद्याज्यानुवाक्याव्यत्यासविधानाच्च यथान्यासमेव दे

267/1913

ब्रं॰भा॰३ वतापृथक्त्वप्रदानपृथक्त्वं भवत्येवं तत्त्वाभेदे याज्येयांशापृथक्त्वादाध्यानपृथक्त्वमित्यर्थः॥ तदुक्तं संकर्षणेनानावादेवतापृथक्त्वज्ञानादि
२९ ति॥ नन्वत्र तु द्रव्यदेवताभेदाद्यागभेदोपि विद्यते नैवमिह विद्याभेदोस्ति॥ उपक्रमोपसंहाराभ्यामध्यात्माधिदैवोपदेशेष्वेकविद्याविधानप्रतीतेः
विधेकत्वेपि त्वध्यात्माधिदैवभेदात्प्रवृत्तिभेदो भवत्यग्निहोत्र इव सायंप्रातःकालभेदादित्येतावदभिप्रेत्य प्रदनवदित्युक्तं॥ छ॥ लिंगभूयस्त्वा
त्तद्धि बलीयस्तदपि॥ ४४॥ वाजसनेयिनोग्निरहस्ये नैव वा इदमग्रे सदासीदित्यस्मिन्ब्राह्मणे मनोधिकृत्याधीयते॥ षट्त्रिंशतं सहस्राण्यप
श्यदात्मनोग्नीनर्कान्मनोमयान्मनश्चित इत्यादि॥ तथैव वाक्चितः प्राणचितश्चक्षुश्चितः श्रोत्रचितः कर्मचितोग्निचित इति॥ पृथगग्नी
नामनंति सांपादिकान्॥ तेषु संशयः क्रियानुप्रवेशिनः॥ तच्छेषभूता उत स्वतंत्राः केवलविद्यात्मका इति॥ तत्र प्रकरणात्॥ नन्वलिंगैमानि
मनसा संकल्पयंति तेषामेव सा कृतिरिति तान्॥ हेतो॥ नैवं वेदे सर्वदा सर्वाणि भूतानि चिन्वंत्यपि स्वपत इति चैवंजातीयकानि॥ तद्धि लिंगं
प्रकरणाद्बलीयस्त्वदप्युक्तं पूर्वकांडे श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षादिति॥ छ॥ पू
र्वविकल्पः प्रकरणात्स्यात्क्रिया मानसवत्॥ ४५॥ नैतद्युक्तं स्वतंत्रा एतेग्नयो नन्यशेषभूता इति॥ पूर्वस्य क्रियामयस्याग्नेः प्रकरणात्तद्विष
य एवायं विकल्पविशेषोपदेशः स्यात्॥ न स्वतंत्रोमनुप्रकरणात् लिंगं बलीयः॥ सत्यमेवं न लिंगमपि त्वेवंजातीयकं न्प्रकरणाद्बलीभव
ति॥ अन्यार्थदर्शनं ह्येतत्सांपादिकाग्निप्रशंसारूपत्वात्॥ अन्यार्थदर्शनं वासत्यामन्यस्यां प्राप्तौ गुणवादेनाप्युपपद्यमानं न प्रकरणं बा
धितुमुत्सहते॥ तस्मात्सांपादिका अप्येतेग्नयः प्रकरणात्क्रियानुप्रवेशिन एवेत्युर्मानसवत्॥ यथा दशरात्रस्य दशमेहन्यविवाक्ये
पृथिव्या पात्रेण समुद्रस्य सोमस्य प्रजापतये देवतायै गृह्यमाणस्य ग्रहणासादनहवनाहरणोपह्वानभक्षणानि मानसान्येवाम्नाय
ते॥ स च मानसोपि ग्रहकल्पः क्रियाप्रकरणात्॥ क्रियाशेष एव भवत्येवमयमप्यग्निकल्प इत्यर्थः॥ छ॥ अतिदेशाच्च॥ ४६॥ अतिदेश
श्चैषामग्नीनां क्रियानुप्रवेशं समुपोद्बलयति॥ षट्त्रिंशत्सहस्राण्यग्नयोर्कास्तेषामेकैक एव तावान्यावानसौ पूर्व इति सति हि सा
मान्ये तिदेशः प्रवर्तते॥ ततश्च पूर्वेणेष्टकाचितेन क्रियानुप्रवेशिनाग्निना सांपादिकानग्नीनतिदिशन्॥ क्रियानुप्रवेशमेवैषां द्योतय
ति॥ छ॥ विद्यैव तु निर्धारणात्॥ ४७॥ तुशब्दः पक्षं व्यावर्तयति॥ विद्यात्मिका एवैते स्वतंत्रा मनश्चिदादयोग्नयः स्युः न क्रियाशेषभू २९
ताः॥ तथा हि निर्धारयति ते हैते विद्याचित एवेति विद्यया हैवैत एवंविदश्चिता भवंतीति च॥ छ॥ दर्शनाच्च॥ ४८॥ दृश्यते चैतेषां स्वा
तंत्र्ये लिंगं तत्पुरस्तात्प्रदर्शितं लिंगभूयस्त्वादित्यत्र॥ ननु लिंगमसत्यामन्यस्यां प्राप्तावसाधकं कस्यचिदर्थस्येत्यपास्य तत्प्रकरणसा
मर्थ्यात्क्रियाशेषत्वमध्यवसितमित्यत उत्तरं पठति॥ छ॥ श्रुत्यादिबलीयस्त्वाच्च न बाधः॥ ४९॥ नैवं प्रकरणसामर्थ्यात्क्रियाशेषत्वमध्यवसा

269/1813

यस्वातंत्र्यपक्षो बाधितव्यः श्रुत्यादिबलीयस्त्वात्॥ बलीयांसि हि प्रकरणात् श्रुतिलिंगवाक्यानीति स्थितं श्रुतिलिंगसूत्रे॥ तानि चेह स्वा
तंत्र्यपक्षं साधयंति दृश्यंते॥ कथं श्रुतिस्तावत् ते हैते विद्याचित एवेति॥ तथा लिंगं सर्वदा सर्वाणि चिन्वंत्यपि स्वपत इति॥ सावधारणेयं श्रुतिः
क्रियानुप्रवेशे त्वेषामभ्युपगम्यमाने पीडिता स्यात्॥ ननु बाह्यसाधनानि प्राप्तमिदमवधारणं भविष्यति॥ नेत्युच्यते॥ तदा हि प्रायेणेयो
ह्ये विद्याचित इति॥ वचनात्स्वरूपसंकीर्तनेन कृतत्वादनर्थकमवधारणं भवेत्॥ स्वरूपमेव ह्येषामबाह्यसाधनमिति॥ अबाह्यसाधनत्वेपि
तु मानसग्रहवत्क्रियानुप्रवेशाशंकायां तन्निवृत्तिफलमवधारणमर्थवद्भविष्यति॥ तथा स्वपते जाग्रते चैवंविदे सर्वदा सर्वाणि भूतान्यग्नी
श्चिन्वंतीति सातत्यदर्शनमेषां स्वातंत्र्ये कल्प्यते यथा सांपादिके वाक्प्राणमयेग्निहोत्रे प्राणं तदा वाचि जुहोति वाचं तदा प्राणे जुहोतीति वाक्यो
च्यते॥ एते अनंते अमृते आहुती जाग्रच्च स्वपंश्च संततं जुहोतीति॥ तद्वत्॥ क्रियानुप्रवेशे तु क्रियाप्रयोगस्याल्पकालत्वान्न सातत्येनैषां प्रयो
गः कल्प्येत॥ न चेदमर्थवादमात्रमिति न्याय्यं॥ यत्र हि विस्पष्टो विधायको लिंगादिरुपलभ्यते॥ युक्तं तत्र संकीर्तनमात्रस्यार्थवादत्वमिह तु वि
स्पष्टविधानांतरानुपलब्धेः संकीर्तनादेवैषां विज्ञानविधानं कल्पनीयं॥ तच्च यथासंकीर्तनमेवैषां कल्पयितुं शक्यत इति सातत्यदर्शनात्॥ त
थाभूतत्वं कल्प्यते॥ ततश्च सामर्थ्यादेषां स्वातंत्र्यसिद्धिः॥ एतेन तद्यत्किंचेमानि भूतानि मनसा संकल्पयंति तेषामेव सा कृतिरित्यादि व्याख्यातं
तथा वाक्यमविद इति पुरुषविशेषसंबंधमेवैषामाचक्षाणं॥ न क्रतुसंबंधं मृष्यते॥ तस्मात्स्वातंत्र्यपक्ष एव न्याय्य इति॥ छ॥ अनुबंधादिभ्यः
प्रज्ञांतरपृथक्त्ववद्दृष्टश्च तदुक्तं॥ ५०॥ इतश्च प्रकरणमुपमृद्य स्वातंत्र्यं मनश्चिदादीनां प्रतिपत्तव्यं॥ यत्क्रियावयवान्मनआदिव्यापारेष्वनुब
ध्नाति मनसैवाधीयंत मनसाचीयंत मनसैषु ग्रहा अगृह्यंत मनसास्तुवत प्रशस्ताः क्रिया च यवाः संतः संपद्यालिप्सन्त्या॥ न चात्रोक्ता
या युपासनवत्क्रियांगसंबंधात्तदनुप्रवेशित्व माशंकितव्यं श्रुतिवत्क्रत्यात्॥ न ह्यत्र क्रियांगानि किंचिदादाय तस्मिन्नंदोनामाध्यास
तव्यमिति वदति॥ षट्त्रिंशतं तु सहस्राणि मनोवृत्तिभेदानादायते यग्नित्वमग्न्यादीश्च कल्पयति॥ पुरुषयज्ञादिवत्॥ संख्या चेयं पुरु
षायुषस्याहस्सु दृष्टा सती तत्संबंधिनीषु मनोवृत्तिष्वारोप्यत इति दृष्टव्यं॥ एवमनुबंधात्स्वातंत्र्यं मनश्चिदादीनामादिशब्दादतिदेशाद्य
पि यथासंभवं योजयितव्यं॥ तथा हि॥ तेषामेकैक एव तावान्यावानसौ पूर्व इति क्रियामयस्याग्नेर्माहात्म्यं ज्ञानमयानामेकैकस्या
तिदिशन्क्रियायामनादरं दर्शयति॥ न चैव सत्या क्रियासंबंधे विकल्पः पूर्वेणोत्तरेषामिति शक्यं वक्तुं॥ न हि येन व्यापारेणाहवनीयधा
रणादिनापूर्वः उपक्रियाया उपकरोति तेनोत्तरे उपकर्तुं शक्नुवंति॥ यत्तु पूर्वपक्षेप्यतिदेश उपोद्बलकत्वेन सति हि सामान्येतिदेशः॥
प्रवर्तत इति तदसत्यपि सत्याग्नित्वसामान्येनातिदेशसंभवात्॥ अस्तुक्तं॥ अस्ति हि सांपादिकानामप्यग्नीनामग्नित्वमिति॥ श्रुत्यादीनि च
कारणानि दर्शितान्येवमनुबंधादिभ्यः कारणेभ्यः स्वातंत्र्यं मनश्चिदादीनां॥ प्रज्ञांतरपृथक्त्ववत्॥ यथा प्रज्ञांतराणि शांडिल्यविद्याप्रभृतीनि स्वन

शं॰भा॰ ३०

स्वेनानुबंधेनानुबध्यमानानित्ययोगकर्मभ्यः प्रज्ञांतरेभ्यश्च स्वतंत्राणि भवंत्येवमिति॥ दृष्टश्चावेष्टेराजसूयप्रकरणपठितायाः प्रकर
णादुत्कर्षो वर्णत्रयानुबंधोद्राजयत्नत्वात्राजसूयस्य तदुक्तं प्रथमकांडे क्रत्वर्थापरामिति चेन्न वर्णसंयोगादिति॥ ७॥ न सामान्यादप्युप
लब्धेर्मृत्युवन्नहि लोकापत्तिः॥ ५१॥ यदुक्तं मानसवदिति तत्प्रत्युक्तं न मानसग्रहसामान्यादप्यग्निविद्यादीनां क्रियाशेषत्वं कल्प्यं पू
र्वोक्तेभ्यः श्रुत्यादिभ्यो हेतुभ्यः केवलपुरुषार्थोपलब्धेः॥ नहि किंचित्कस्यचित्केनचित्सामान्येन भवति न भवति न यथा यथास्वं वैषम्यं निवर
र्तते॥ मृत्युर्यथा एष एव मृत्युर्य एष एतस्मिन्मंडले पुरुष इत्यग्निर्वै मृत्युरिति चाग्न्यादित्यपुरुषयोः समानेपि मृ-
त्युशब्दप्रयोगे नात्यंतसाम्यापत्तिः॥ यथा चासौ वै लोको गौतमाग्निरित्यादौ समिदादिसामान्यान्न लोकस्याग्निभावा
पत्तिस्तद्वत्॥ ७॥ परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबंधः॥ ५२॥ परस्तादप्ययं वाव लोक एषोग्निश्चित इत्यस्मिन्नंतरे ब्राह्मणेनाद्वि
ध्यं केवलविद्याविधित्वं शब्दस्य प्रयोजनं लक्ष्यते न शुद्धकर्मांगविधित्वं॥ तत्र हि विद्यया तदारोहंति यत्र कामाः परागताः॥ न तत्र दक्षि
णा यंति नाविद्वांसस्तपस्विन इत्यनेन श्लोकेन केवलकर्मनिंदया विद्याप्रशंसनेन दर्शयति॥ तथा पुरस्तादपि यदेतन्मंडलं तपतीत्यस्मि
न्ब्राह्मणे विद्याप्रधानत्वमेव लक्ष्यते सोमृतो भवति मृत्युर्ह्यस्यात्मा भवतीति विद्याफलेनैवोपसंहारात्॥ न कर्मप्रधानता तत्सामान्यात्
कल्पसिद्धिः॥ ७॥ एक आत्मनः शरीरे भावात्॥ ५३॥ इहादेहव्यतिरिक्तस्यात्मनः सद्भावः समर्थ्यते बंधमोक्षाधिकारसिद्धये॥ न ह्यसति
देहव्यतिरिक्त आत्मनि परलोकफलाश्चोदना उपपद्येरन् कस्य वा ब्रह्मात्मत्वमुपदिश्येत॥ ननु शास्त्रप्रमुख एव प्रथमपादे स्वाफ
लोपभोगयोग्यस्य देहव्यतिरिक्तस्यात्मनोस्तित्वमुक्तं॥ सत्यमुक्तं भाष्यकृता न तु तत्रात्मास्तित्वे सूत्रमस्ति॥ इह तु स्वयमेव सूत्रकृता
तदस्तित्वमाक्षेपपुरःसरं प्रतिष्ठापितं॥ इत एव चाकृष्याचार्येण शबरस्वामिना प्रमाणलक्षणे वर्णितमत एव च भगवतोपवर्षे
ण प्रथमे तंत्रे आत्मास्तित्वाभिधानप्रसक्तौ शारीरके वक्ष्याम इत्युद्धारः कृतः॥ इह चेदं चोदनालक्षणेषूपासनेषु विचार्यमाणेष्वात्मा
स्तित्वं विचार्यते॥ कृत्स्नशास्त्रशेषत्वप्रदर्शनाय॥ अपि च पूर्वस्मिन्नधिकरणे प्रकरणोत्कर्षाभ्युपगमेन मनश्चिदादीनां पुरुषार्थत्वं वर्णितं॥ ३०
कोसौ पुरुषो यदर्था एते मनश्चिदादय इत्यस्यां प्रसक्ताविदं देहव्यतिरिक्तस्यात्मनोस्तित्वमुच्यते॥ तदस्तित्वाक्षेपार्थं चेदमाद्यं सू
त्रमाक्षेपपूर्विका हि परिहारोक्तिर्विवक्षितेऽर्थे स्थूणानिखनन्यायेन दृढां बुद्धिमुत्पादयेदिति॥ अत्रैके देहमात्रात्मदर्शिनो लोकाय
तिका देहव्यतिरिक्तस्यात्मनोऽभावं मन्यमानाः समस्तव्यस्तेषु बाह्येषु पृथिव्यादिष्वदृष्टमपि चैतन्यं शरीराकारपरिणतेषु स्यादिति
संभावयंतः॥ तेभ्यश्चैतन्यं मदशक्तिवद्विज्ञानं चैतन्यविशिष्टः कायः पुरुष इति चाहुः॥ न स्वर्गगमनायापवर्गगमनाय वा समर्थो देहव्य

27/11913

तिरिक्त आत्मास्ति यत्कृतं चैतन्यं देहस्य देह एव तु चेतनश्चात्मा चेति प्रतिजानते॥ हेतुं चाचक्षते शरीरे भावादिति॥ यद्धि यस्मिन्सति भव
ति न भवति च तत्तद्धर्मत्वेनाध्यवसीयते॥ यथाग्निधर्मावौष्ण्यप्रकाशौ प्राणचेष्टाचैतन्यस्मृत्यादयश्चात्मधर्मत्वेनाभिमता आत्मवादिनां तेप्यंतरेव दे
ह उपलभ्यमाना बहिश्चानुपलभ्यमाना असिद्धे देहव्यतिरिक्ते धर्मिणि देहधर्मा एव भवितुमर्हंति॥ तस्मादव्यतिरेको देहादात्मन इत्येवं प्राप्ते
ब्रूमः॥ ७॥ व्यतिरेकस्तद्भावाभावित्वान्नतूपलब्धिवत्॥ ५४॥ न त्वेतदस्ति यदुक्तमव्यतिरेको देहादात्मन इति व्यतिरेक एवास्य देहाद्भ
वितुमर्हति॥ तद्भावाभावित्वात् यदि देहभावे भावाद्देहधर्मत्वमात्मधर्माणां मन्येत ततो देहभावेप्यभावादतद्धर्मत्वमेषां किं न मन्यते॥ तदेह
धर्मवैलक्षण्याद्धि ये देहधर्मा रूपादयस्ते यावद्देहं भवंति प्राणचेष्टादयस्तु सत्यपि देहे मृतावस्थायां न भवंति॥ देहधर्माश्च रूपादयः परै
रप्युपलभ्यंते न त्वात्मधर्माश्चैतन्यस्मृत्यादयः॥ अपि च सति तावद्देहे जीवदवस्थायामेषां भावः शक्यते निश्चेतुं न त्वसत्यभावः॥ पतितेपि
हि कदाचिदस्मिन्देहे देहांतरसंचारेणात्मधर्मा अनुवर्तेरन् संशयमात्रेणापि परपक्षः प्रतिषिध्यते॥ किमात्मकं च पुनरिदं चैतन्यं मन्यते
यस्य भूतेभ्य उत्पत्तिमिच्छतीति परः पर्यनुयोक्तव्यो॥ न हि भूतचतुष्टयव्यतिरेकेण लोकायतिकः॥ किंचित्तत्त्वं प्रत्येति यदनुभवनं भूतभौ
तिकानां तच्चैतन्यमिति चेत्तर्हि विषयत्वात्तेषां न तद्धर्मत्वमश्नुवीत स्वात्मनि क्रियाविरोधात्॥ न हि भूतभौतिकधर्मेण सता चैतन्येन भू
तभौतिकानि विषयीक्रियेरन् न हि रूपादिभिः स्वरूपं पररूपं वा विषयीक्रियते॥ विषयीक्रियंते तु बाह्याध्यात्मिकानि भूतभौतिकानि
चैतन्येन तेनैव यथैवास्या भूतभौतिकविषयाया उपलब्धेर्भावोऽभ्युपगम्यते एवं व्यतिरेकोप्यस्यास्तेभ्योऽभ्युपगंतव्यः॥ उपलब्धिस्वरूप
एव च न आत्मेत्यात्मनो देहव्यतिरिक्तत्वं नित्यत्वं चोपलब्धेरैकरूप्यादहमिदमद्राक्षमिति चावस्थांतरयोगेप्युपलब्धृत्वेन प्रत्यभिज्ञा
नात्स्मृत्याद्युपपत्तेश्च॥ यत्तूक्तं शरीरे भावाच्छरीरधर्म उपलब्धिरिति तद्वर्णितेन प्रकारेण प्रत्युक्तं॥ अपि च सत्सु प्रदीपादिषूपकरणेषू
पलब्धिर्भवत्यसति च न भवति न चैतावता प्रदीपादिधर्म एवोपलब्धिर्भवति एवं सति देह उपलब्धिर्भवति असति च न भवतीति न देहध
र्मो भवितुमर्हति॥ उपकरणमात्रेणापि प्रदीपादिवद्देहोपयोगोपपत्तेः॥ न चात्यंतं देहस्योपलब्धावुपयोगो दृश्यते॥ निश्चेष्टेपि ह्यस्मि
न्देहे स्वप्ने नानाविधोपलब्धिदर्शनात्॥ तस्मादनवद्यं देहव्यतिरिक्तस्यात्मनोस्तित्वं॥ ७॥ अंगावबद्धास्तु न शाखासु हि प्रतिवेदं॥ ५५॥
समाप्ता प्रासंगिकी कथा॥ संप्रति प्रकृतमेवानुवर्तामहे॥ ओमित्येतदक्षरमुद्गीथमुपासीत लोकेषु पंचविधं सामोपासीत लोके
षु पंचविधं सामोपासीत उक्थमिति वै प्रजा वदंति॥ तदिदमेवोक्थमियमेव पृथिवी अयं वाव लोक एषोग्निश्चित इत्येवमाद्या उद्गीथा
दिकर्मांगावबद्धाः प्रत्ययाः प्रतिवेदं शाखाभेदेषु विहितास्ते तच्छाखागतेष्वेवोद्गीथादिषु भवेयुरथवा सर्वशाखागतेष्विति विशयः॥ प्रतिशा
खं च स्वरादिभेदादुद्गीथादिभेदमाशंक्यायमुपन्यासः॥ किं तावत्प्राप्तं स्वशाखागतेषूद्गीथादिषु विधीयेरन्निति॥ कुतः संनिधानात् उद्गीथमुपासी

शा०भा०३ नेति हि सामान्यविहितानां विशेषाकांक्षायां संनिकृष्टेनैव स्वशाखागतेन विशेषेणाकांक्षानिवर्तनात् तदतिलंघनेन शाखांतरविहि
३१ तविशेषोपादाने कारणं नास्ति तस्मात् प्रतिशाखं व्यवस्थेति एवं प्राप्ते ब्रवीति ॥ अंगावबद्धास्त्विति तुशब्दः पक्षं व्यावर्तयति ॥ नैते प्रतिवेदं शा
खास्वेव व्यवतिष्ठेरन् ॥ अपि तु सर्वशाखास्वनुवर्तेरन् ॥ कुतः ॥ उद्गीथादिश्रुत्यविशेषात् ॥ स्वशाखाव्यवस्थायां ह्युद्गीथमुपासीतेति सा
मान्यश्रुतिरविशेषप्रवृत्ता सती संनिधानवशेन व्यवस्थाप्यमाना पीडिता स्यात् ॥ न चैतन्न्याय्यं ॥ संनिधानाद्धि श्रुतिर्बलीयसी ॥ मंत्रादिवद्वा
विरोधः ॥ न च सामान्याश्रयः प्रत्ययो नोपपद्यते तस्मात् स्वरादिभेदे सत्यप्युद्गीथाद्यविशेषात् सर्वशाखागतेषूद्गीथादिष्वेवंजातीयकाः
प्रत्ययाः स्युः ॥ ७ ॥ मंत्रादिवद्वाविरोधः ॥ ५६ ॥ अथवा नैवात्र विरोध आशंकितव्यः कथमन्यशाखागतेषूद्गीथादिष्वन्यशाखाविहिताः प्र
त्यया भवेयुरिति मंत्रादिवदविरोधोपपत्तेः ॥ तथाहि मंत्राणां कर्मणां गुणानां च शाखांतरोत्पन्नानामपि शाखांतर उपसंग्रहो दृश्यते ॥ येषा
मपि हि शाखिनां कुटरुरसीत्यश्मादानमंत्रो नाम्नातः तेषामप्यसौ विनियोगो दृश्यते कुकुटोसीत्यश्मादानमंत्रो नाम्नातः तेषामप्यसौ वि
नियोगो दृश्यते कुकुटोसीत्यश्मानमादत्ते कुटरुरसीति वेति ॥ येषामपि च समिदादयः प्रयाजा नाम्नातास्तेषामपि तेषु गुणविधिः आम्नाय
ते ऋतवो वै प्रयाजाः समानत्र होतव्या इति ॥ तेषामप्यजोग्नीषोमीय इति जातिविशेषोपदेशो नाम्नातस्तेषामपि तद्विषयो मंत्रवर्ण उपलभ्यते
छागस्य वपाया मेदसोनुब्रूहीति ॥ तथा वेदांतरोत्पन्नानामप्यग्नेर्वै होत्रं वेरध्वरमित्येवमादिमंत्राणां वेदांतरे परिग्रहो दृष्टः ॥ तथा बह्वृचपठितस्य सू
क्तस्य यो जात एव प्रथमो मनस्वानित्यस्याध्वर्यवे सजनीयं शस्यमिति परिग्रहो दृष्टः ॥ तस्माद्यथाश्रयाणां कर्मांगानां सर्वत्रानुवृत्तिरेवमाश्रि
तानामपि प्रत्ययानामविरोधः ॥ ७ ॥ भूम्नः क्रतुवज्ज्यायस्त्वं तथा हि दर्शयति ॥ ५७ ॥ प्राचीनशाल्यप्रमन्यवासृज्यस्यारब्धायिकायां व्यस्तस्य स
मस्तस्य च वैश्वानरस्योपासनं श्रूयते ॥ व्यस्तोपासनं तावदौपमन्यव कं त्वमात्मानमुपास्स इति आदि ॥ तथा समस्तोपासनमपि तस्य ह
वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मात्मा संदेहो बहुलो बस्तिरेव रयिः पृथिव्येव पादावित्यादि ॥ तत्र
संशयः ॥ किमिहोभयथाप्युपासनं स्याद्व्यस्तस्य समस्तस्य वा उत समस्तस्यैवेति किं तावत्प्राप्तं प्रत्येकमवयवेषु सुतेजःप्रभृतिषूपास्स इति क्रि
यापदश्रवणात् ॥ तस्मात्तव सुतं मासुतं कुले दृश्यत इत्यादि फलभेदश्रवणात् ॥ व्यस्तान्युपासनानि स्युरिति प्राप्तं ॥ प्रत्येकं सुतेजः ३१
प्रभृतीषूपास्स इति क्रियापदश्रवणात् ॥ तस्मात्तव सुतं प्रसुतमासुतं कुले दृश्यत इत्यादि फलभेदश्रवणात् ॥ व्यस्तान्युपासनानि स्युरिति
प्राप्तं ॥ ततोभिधीयते ॥ भूम्नः पदार्थोपचयात्मकस्य समस्तवैश्वानरोपासनस्य ज्यायस्त्वं प्राधान्यमस्मिन्वाक्ये विवक्षितं भवितु
मर्हति ॥ न प्रत्येकमवयवोपासनानामपि ॥ क्रतुवद्यथा ॥ क्रतुषु दर्शपूर्णमासप्रभृतिषु सामस्त्येन सांगप्रधानप्रयोग एवैको विवक्ष्य
ते ॥ न व्यस्तानामपि प्रयोगः ॥ प्रयाजादीनां प्राप्येकदेशांगयुक्तस्य प्रधानस्य तद्वत् ॥ कुतः एतद्भूम्नो ज्यायानिति ॥ तथाहि श्रुति

273/1918

भूम्नो ज्यायस्त्वं दर्शयति ॥ एकवाक्यतावगमात् ॥ एकं हीदं वाक्यं वैश्वानरविद्याविषयं पौर्वापर्यालोचनात् प्रतीयते ॥ तथा हि प्राची
नशाल्यप्रभृतय उद्दालकावसानाः षडृषयो वैश्वानरविद्यायां परिनिष्ठामप्रतिपद्यमाना अश्वपतिं कैकेयं राजानमभ्याजग्मुरित्युपक्रम्य
एकैकस्यर्षेरुपास्यं द्युप्रभृतीनामेकैकं श्रावयित्वा मूर्धा त्वेष आत्मन इति होवाचेत्यादिना मूर्धादिभावं तेषां विदधाति मूर्धा ते व्यपतिष्यद्यन्मां ना
गमिष्य इत्यादिना च व्यस्तोपासनमपवदति ॥ पुनश्च व्यस्तोपासनं व्यावर्त्य समस्तोपासनमेवानुवर्त्य सर्वेषु लोकेषु भूतेषु सर्वेष्वात्मस्वन्नम
त्तीति भूमाश्रयमेव फलं दर्शयति ॥ यत्तु प्रत्येकं सुतेजःप्रभृतिषु फलभेदश्रवणं तदेवं सत्यंगफलानि प्रधान एवाभ्युपगच्छतीति द्रष्टव्यं ॥ त
थोपास्स इत्यपि प्रत्यवयवमाख्यानश्रवणं पराभिप्रायानुवादार्थं न व्यस्तोपासनविधानार्थं ॥ तस्मात्समस्तोपासनपक्ष एव श्रेयानिति ॥ केचि
त्तु समस्तोपासनपक्षं ज्यायांसं प्रतिष्ठाप्य ज्यायस्त्ववचनादेव किल व्यस्तोपासनपक्षमपि सूत्रकारो मन्यत इति कल्पयंति ॥ तदयुक्तं ए
कवाक्यतावगतौ सत्यां वाक्यभेदकल्पनस्यान्याय्यत्वात् ॥ मूर्धा ते व्यपतिष्यदिति ॥ चैवमादिनिंदाविरोधात् ॥ स्पष्टे चोपसंहारे समस्तोपासना
वगमे तदभावस्य पूर्वपक्षे वक्तुमशक्यत्वात् ॥ सौत्रस्य ज्यायस्त्ववचनस्य प्रमाणवत्त्वाभिप्रायेणाप्युपपद्यमानत्वात् ॥ ७ ॥ नाना शब्दादिभे
दात् ॥ ५८ ॥ पूर्वस्मिन्नधिकरणे सत्यामपि सुतेजःप्रभृतीनां भेदश्रुतौ समस्तस्योपासनं ज्याय इत्युक्तमतः प्राप्ता बुद्धिरन्यान्यपि च भिन्नश्रुतीनां
पासनानि समस्योपासिष्यंत इति ॥ अपि च ॥ नैवाविद्याभेदे विद्याभेदो विज्ञातुं शक्यते ॥ वेद्यं हि रूपं विद्याया द्रव्यदेवतमिव यागस्य वेद्यश्चैक
एवेश्वरः ॥ श्रुतिनानात्वेष्ववगम्यते मनोमयः प्राणशरीरः कं ब्रह्म खं ब्रह्म सत्यकामः सत्यसंकल्प इत्येवमादिषु ॥
तथैक एव प्राणः प्राणो वाव संवर्गः प्राणो वाव ज्येष्ठश्च श्रेष्ठश्च प्राणो वाव पितेत्येवमादिषु ॥ वेद्यैकत्वाच्च विद्यैकत्वं ॥ श्रुतिनानात्वम
प्यस्मिन्पक्षे गुणांतरपरत्वान्नानर्थकं ॥ तस्मात्स्वपरशाखाविहितमेकवेद्यव्यपाश्रयं गुणजातमुपसंहर्तव्यं विद्याकार्त्स्न्यायेत्येवं प्राप्ते प्र
तिपद्यते ॥ नानेति ॥ वेद्याभेदेप्येवंजातीयका विद्या भिन्ना भवितुमर्हति ॥ कुतः शब्दादिभेदात् ॥ भवति हि शब्दभेदो वेदीत स क्रतुं कुर्वीतेत्ये
वमादिः शब्दभेदश्च कर्मभेदहेतुः समधिगतः पुरस्ताच्छब्दांतरे कर्मभेदः कृतानुबंधत्वादिति ॥ आदिग्रहणाद्गुणादयोपि यथासंभवं
भेदहेतवो योजयितव्याः ॥ ननु वेदेत्यादिषु शब्दभेद एवावगम्यते न यजत्यादिवदर्थभेदः ॥ सर्वेषामेवैषां मनोवृत्त्यर्थत्वाभेदादर्थांतरासं
भवाच्च ॥ तत्कथं शब्दभेदाद्विद्याभेद इति ॥ नैष दोषः मनोवृत्त्यर्थत्वाभेदेप्यनुबंधभेदाद्विद्याभेदोपपत्तेः ॥ एकस्यापि हीश्वरस्योपास्यस्य प्रतिक
रणं व्यावृत्ता गुणाः शिष्यंते ॥ तथैकस्यापि प्राणस्य ॥ तत्रोपास्याभेदेप्यन्यादृग्गुणोन्यत्रोपासितव्योन्यादृग्गुणश्चान्यत्रेत्येवमनुबंधभेदा
द्विधिभेदे सति विद्याभेदो विज्ञायते ॥ न चात्रैको विद्याविधिरितरे गुणविधय इति शक्यं वक्तुं ॥ विनिगमनहेत्वभावादनेकत्वाच्च ॥ प्रतिकरणं
गुणानां प्राप्तविद्यानुवादेन विधानानुपपत्तेः ॥ न चास्मिन्पक्षे समानाः संतः सत्यकामत्वादयो गुणा असकृच्छ्रावयितव्याः प्रतिकरणं ॥ चेदं

ब्रं०भा०३
३२

कामेनेदमुपासितव्यमिदं कामेन चेदमिति नेयं कांक्ष्यावगमान्नैकवाक्यतोपपत्तिः॥ न चात्र वैश्वानरविद्यामिव समस्तचोदना परास्ति
यद्बलेन प्रतिकरणवर्तीन्यवयवोपासनानि भूत्वैकवाक्यतां यायुः॥ वेद्यैकत्वनिमित्ते च विद्यैकत्वे सर्वत्र निरंकुशे प्रतिज्ञायमाने समस्तगुणो
पसंहारोऽप्यशक्यः प्रतिज्ञायेत॥ तस्मात्सूक्तं नानाशब्दादिभेदादिति॥ स्थिते चैतस्मिन्नधिकरणे सर्ववेदान्तप्रत्ययमित्यादि द्रष्टव्यं॥ ७॥
विकल्पोऽविशिष्टफलत्वात्॥ ५९॥ स्थिते विद्याभेदे विचार्यते किमासामिच्छासमुच्चयो विकल्पो वा स्यादथवा विकल्प एव नियमेनेति॥ तत्र
स्थितत्वात्तावद्विद्याभेदस्य न समुच्चयनियमे किंचित्कारणमस्ति॥ ननु भिन्नानामप्यग्निहोत्रदर्शपूर्णमासादीनां समुच्चयनियमो दृश्यते नैष
दोषो नित्यताश्रुतिर्हि तत्र कारणं॥ नैवं विद्यानां काचिन्नित्यताश्रुतिरस्ति तस्मान्न समुच्चयनियमः॥ नापि विकल्पनियमो विद्यान्तराधिकृ
तस्य विद्यान्तराप्रतिषेधात्॥ पारिशेष्याद्यथाकाम्यमापद्येत॥ नन्वविशिष्टफलत्वादासां विकल्पो न्याय्यः॥ तथा हि मनोमयः प्राणशरीरः॥ कं
ब्रह्म खं ब्रह्म सत्यकामः सत्यसंकल्प इत्येवमाद्यास्तुल्यवदीश्वरत्वप्राप्तिफला लक्ष्यन्ते॥ नैष दोषः॥ समानफलेष्वपि स्वर्गादिसाधनेषु क
र्मसु यथाकाम्यदर्शनात्॥ तस्माद्यथाकाम्यप्राप्तावुच्यते॥ विकल्प एवासां भवितुमर्हति न समुच्चयः॥ कस्मादविशिष्टफलत्वादविशिष्टं
ह्यासां फलमुपास्यविषयसाक्षात्करणमेकेन चोपासनेन साक्षात्कृत उपास्ये विषय ईश्वरादौ द्वितीयमनर्थकमपि चासंभवः साक्षात्करणस्य
समुच्चयपक्षे चित्तविक्षेपहेतुत्वात्॥ साक्षात्करणसाध्यं च विद्याफलं दर्शयन्ति श्रुतयो यस्य स्यादद्धा न विचिकित्सास्तीति देवो भूत्वा देवानप्येतीति
चैवमाद्याः॥ स्मृतयश्च सदा तद्भावभावित इत्येवमाद्याः॥ तस्मादविशिष्टफलानां विद्यानामन्यतमामादाय तत्परः स्याद्यावदुपास्यविषयसाक्षा
त्करणेन तत्फलं प्राप्तमिति॥ ७॥ काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात्॥ ६०॥ अविशिष्टफलादित्यस्य प्रत्युदाहरणं यासु
पुनः काम्या विद्याः स य एतमेवं वायुं दिशां वत्सं वेद न पुत्ररोदं रोदितीति॥ स यो नाम ब्रह्मेत्युपास्ते यावन्नाम्नो गतं तत्रास्य यथाकामचारो भव
तीति चैवमाद्यासु क्रियावददृष्टेनात्मनात्मीयं फलं साधयन्तीषु साक्षात्करणापेक्षा नास्ति ता यथाकामं समुच्चीयेरन्न वा समुच्चीयेरन् ३२
पूर्वहेत्वभावात् पूर्वस्याविशिष्टफलत्वादित्यस्य विकल्पहेतोरभावात्॥ अंगेषु यथाश्रयभावः॥ ६१॥ कर्मांगेषूद्गीथादिषु य आश्रिताः प्र
त्ययाः वेदत्रयविहिताः किं ते समुच्चीयेरन् किं वा यथाकामं स्युरिति संशये यथाश्रयभाव इत्याह॥ यथैवैषामाश्रयाः स्तोत्रादयः संभूय भवन्ति
एवं प्रत्यया अप्याश्रयतन्त्रत्वात्प्रत्ययानां॥ ७॥ शिष्टेश्च॥ ६२॥ यथा चाश्रयाः स्तोत्रादयस्त्रिषु वेदेषु शिष्यन्त एवमाश्रिता अपि प्रत्य
याः॥ नोपदेशकृतोऽपि कश्चिद्विशेषोऽङ्गानां तदाश्रयाणां च प्रत्ययानामित्यर्थः॥ ७॥ समाहारात्॥ ६३॥ होतृषदनाद्धैवापि दुरुद्गीतमनुसमाह
रतीति च॥ प्रणवोद्गीथैकत्वविज्ञानमाहात्म्यादुद्गाता स्वकर्मण्युत्पन्नं क्षतं होत्रात्कर्मणः प्रतिसमादधातीति ब्रुवन्वेदान्तरोदितस्य प्रत्यय
स्य वेदान्तरोदितपदार्थसंबन्धसामान्यात्सर्ववेदोदितसकलस्योपसंहारं सूचयतीति लिंगदर्शनं॥ ७॥ गुणसाधारण्यश्रुतेश्च॥ ६४॥ विद्या

275/1913

गुणं च विद्याश्रयं सन्तमोंकारं वेदत्रयसाधारणं श्रावयति॥ तेनेयं त्रयीविद्या वर्तत ओमित्याश्रावयत्योमिति शंसत्योमित्युद्गायतीति॥ ततश्चा
श्रयसाधारण्यादाश्रितसाधारण्यमिति लिंगदर्शनमेव॥ अथवा गुणसाधारण्यश्रुतेश्चेति॥ यदीमे कर्मगुणा उद्गीथादयः सर्वे सर्वप्रयोगसा
धारणा न स्युर्न स्यात्तत आश्रितानां प्रत्ययानां सहभावः ते तूद्गीथादयः सर्वांगग्राहिणा प्रयोगवचनेन सर्वे सर्वप्रयोगसाधारणाः श्राव्यं
तश्चाश्रयसहभाव इति॥ ७॥ न वा तत्सहभावाश्रुतेः॥ ६५॥ न वेति पक्षव्यावर्तनं॥ न यथाश्रयभाव आश्रितानामुपासनानां भवितुमर्हति॥ कुतः॥ त
त्सहभावाश्रुतेः॥ यथा हि त्रिवेदविहितानामंगानां स्तोत्रादीनां सहभावः श्रूयते ग्रहं वाऽगृहीत्वा चमसं वोन्नीय स्तोत्रमुपाकरोति स्तुतमनुशंस
ति प्रस्तोतः साम गाय होतरेतद्यजेत्यादिना नैवमुपासनानां सहभावश्रुतिरस्ति ननु प्रयोगवचन एषां सहभावं प्रापयेदिति नेत्युच्यते॥ पुरुषार्थत्वादु
पासनानां प्रयोगवचनो हि क्रत्वर्थानामुद्गीथादीनां सहभावं प्रापयेन्न तूद्गीथाद्युपासनानि तु क्रत्वर्थाश्रयाण्यपि गोदोहनादिवत्पुरुषार्थानीत्यवो
चाम पृथगप्रतिबन्धः फलमित्यत्र अयमेव चोपदेशाश्रयो विशेषोऽङ्गानां तदालम्बनानां चोपासनानाम्॥ यदेकेषां क्रत्वर्थत्वमेकेषां पुरुषार्थत्वमिति
परं च लिंगद्वयमकारणमुपासनसहभावस्य श्रुतिन्यायाभावात्॥ न च प्रतिप्रयोगमाश्रयकृत्स्नोपसंहारादाश्रितानामपि तथात्वं विज्ञा
तुं शक्यमतत्प्रयुक्तत्वादुपासनानां॥ आश्रयतन्त्राण्यपि ह्युपासनानि काममाश्रयाभावे माभूवन्न त्वाश्रयसहभावनियममर्हन्ति॥ तत्सहभा
वाश्रुतेरेव॥ तस्माद्यथाकाममेवमुपासनान्यनुष्ठीयेरन्॥ ७॥ दर्शनाच्च॥ ६६॥ दर्शयति च श्रुतिरसहभावं प्रत्ययानामेवंविद्ध वै ब्रह्मा यज्ञं
यजमानं सर्वांश्चर्त्विजोऽभिरक्षतीति॥ सर्वप्रत्ययोपसंहारे हि सर्वे सर्वविद इति न विज्ञानवता ब्रह्मणा परिपाल्यत्वमितरेषां संकीर्त्येत॥ तस्मा
द्यथाकाममुपासनानां समुच्चयो विकल्पो वेति॥ ७॥ ६७॥ इति श्रीशारीरकमीमांसाभाष्ये श्रीशंकरभगवत्पादकृतौ तृतीयाध्यायस्य तृतीयः
पादः॥ पुरुषार्थोऽतः शब्दादिति॥ ७॥ बादरायणः॥ १॥ अथेदानीमौपनिषदमात्मज्ञानं किमधिकारिद्वारेण कर्मण्येवानुप्रविशति॥ आहोस्वि
त्स्वतन्त्रमेव पुरुषार्थसाधनं भवतीति मीमांसमानाः सिद्धान्तेनैव तावदुपक्रमन्ते पुरुषार्थोऽत इति॥ अतोऽस्माद्वेदान्तविहितादात्मज्ञानात्स्वतं
त्रात्पुरुषार्थः सिध्यतीति बादरायण आचार्यो मन्यते॥ कुत एतदवगम्यते शब्दादित्याह तथा हि तरति शोकमात्मविदिति॥ स यो ह वै त
त्परमं ब्रह्म वेद ब्रह्मैव भवति॥ ब्रह्मविदाप्नोति परमाचार्यवान्पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्य इति य आत्माप
हतपाप्मेत्युपक्रम्य स सर्वांश्च लोकानाप्नोति सर्वांश्च कामान्यस्तमात्मानमनुविद्य विजानातीति॥ आत्मा वा अरे द्रष्टव्य इत्युपक्रम्यैतावदरे
खल्वमृतत्वमित्येवंजातीयका श्रुतिर्विद्यायाः केवलायाः पुरुषार्थहेतुत्वं श्रावयति॥ अथात्र प्रत्यवतिष्ठते॥ ७॥ शेषत्वात्पुरुषार्थवादो यथा
न्येष्विति जैमिनिः॥ २॥ कर्तृत्वेनात्मनः कर्मशेषत्वात्तद्विज्ञानमपि व्रीहिप्रोक्षणादिवद्विषयद्वारेण कर्मसंबन्ध्येवेत्यतस्तस्मिन्न
वगतप्रयोजन आत्मज्ञाने या फलश्रुतिः सार्थवाद इति जैमिनिराचार्यो मन्यते॥ यथान्येषु द्रव्यसंस्कारकर्मसु यस्य पर्णमयी जुहूर्भव
ति न स पापं श्लोकं शृणोति॥ यदाङ्क्ते चक्षुरेव भ्रातृव्यस्य वृङ्क्ते यत्प्रयाजानुयाजा इज्यन्ते वर्म वा एतद्यज्ञस्य क्रियते वर्म यजमानस्य भ्रातृव्याभि

शं०भा०३
३३

र्थवाद इत्येवं जातीयका फलश्रुतिरर्थवाद इति॥ कथं पुनरस्यानारभ्याधीतस्यात्मज्ञानस्य प्रकरणादीनामन्यतमेनापि हेतुना क्रतुप्रवेश
आशंक्यते॥ कर्तृद्वारेण तद्विज्ञानस्य वाक्यात्क्रतुसंबंध इति चेन्न॥ वाक्यविनियोगानुपपत्तेः॥ अव्यभिचारिणा हि केनचिद्द्वारेणा-
नारभ्याधीतानामपि वाक्यनिमित्तः क्रतुसंबंधोऽवकल्प्यते॥ कर्ता तु व्यभिचारी हि लौकिकवैदिककर्मसाधारण्यात्‌॥ तस्मान्न तद्द्वारेणात्म-
विज्ञानस्य क्रतुसंबंधसिद्धिरिति॥ न व्यतिरेकविज्ञानस्य वैदिकेभ्यः कर्मभ्योऽन्यत्रानुपयोगात्‌॥ न हि देहव्यतिरिक्तात्मज्ञानं लौकि-
केकर्मसाधारण्यात्‌ तस्मान्न तद्द्वारेणात्मविज्ञानस्य क्रतुपुरुषकर्मस्वप्युपयुज्यते सर्वथा दृष्टार्थप्रवृत्त्युपपत्तेः॥ वैदिकेषु देहपातोत्तरकालफलेषु
देहव्यतिरिक्तात्मज्ञानमंतरेण प्रवृत्तिर्नोपपद्यते॥ इत्युपयुज्यते व्यतिरेकविज्ञानं॥ नन्वपहतपाप्मत्वादिविशेषणादसंसार्यात्मविषयमौ-
पनिषदं दर्शनं न प्रवृत्त्यंगं स्यात्‌॥ प्रियादिसंसूचितस्य संसारिण एवात्मनोपदेशायापहतपाप्मत्वादिविशेषणस्य कथं भविष्यति॥ ननु तत्र
तत्र प्रसाधितमेतदधिकमसंसारिब्रह्म जगत्कारणं तदेव च संसारिण आत्मनः पारमार्थिकं स्वरूपमुपनिषत्सूपदिश्यत इति सत्यं प्रसाधि-
तं तस्यैव तु स्थूणानिखननवत्फलद्वारेणाक्षेपप्रतिसमाधाने क्रियेते इत्यदोषः॥ ७॥ आचारदर्शनात्‌॥ ३॥ जनको ह वैदेहो बहुदक्षिणे-
न यज्ञेनेजे यक्ष्यमाणो वै भगवंतोऽहमस्मीत्येवमादीनि ब्रह्मविदामप्यन्यपरेषु वाक्येषु कर्मसंबंधदर्शनानि भवंति॥ तथोद्दालकादीनामपि पु-
त्रानुशासनादिविशेषादर्शनाद्गार्हस्थ्यसंबंधोऽवगम्यते केवलाच्चेज्ज्ञानात्पुरुषार्थसिद्धिः स्यात्‌ किमर्थमनेकायाससमन्वितानि कर्माणि ते कुर्युरर्के चेन्मधु
विन्देत किमर्थं पर्वतं व्रजेदिति न्यायात्‌॥ ७॥ तच्छ्रुतेः॥ ४॥ यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवतीति च कर्मशेषत्वश्रव-
णात्‌॥ विद्याया न केवलायाः पुरुषार्थहेतुत्वं॥ ७॥ समन्वारंभणात्‌॥ ५॥ तं विद्याकर्मणी समन्वारभेते इति च विद्याकर्मणोः फलारंभे साहि-
त्यदर्शनान्न स्वातंत्र्यं विद्यायाः॥ तद्वतो विधानात्‌॥ ६॥ स्वाध्यायमधीयान इति चैवंजातीयका श्रुतिः॥ समस्तवेदार्थविज्ञानवतः कर्माधि-
कारं दर्शयति॥ तस्मादपि न विज्ञानस्य स्वातंत्र्येण फलहेतुत्वं॥ नन्वत्राधीतवेदस्याध्ययनमात्रं वेदस्य श्रूयते॥ नार्थविज्ञानं॥ नैष दोषः॥ दृ-
ष्टार्थत्वाद्वेदाध्ययनमर्थावबोधपर्यंतमिति स्थितं॥ ७॥ नियमाच्च॥ ७॥ कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः॥ एवं त्वयि नान्यथेतो- ३३
ऽस्ति न कर्म लिप्यते नरे इति॥ एतद्वै जरामर्यं सत्रं यदग्निहोत्रं जरया वा ह्येवास्मान्मुच्यते मृत्युना वेति॥ एवंजातीयकान्नियमादपि क-
र्मशेषत्वमेव विद्याया इत्येवं प्राप्ते प्रतिविधत्ते॥ ७॥ अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात्‌॥ ८॥ तुशब्दात्पक्षो विपरिवर्तते यदुक्तं शेष-
त्वात्पुरुषार्थवाद इति तन्नोपपद्यते॥ कस्मादधिकोपदेशात्‌॥ यदि संसार्येवात्मा शारीरः कर्ता भोक्ता च शरीरमात्रव्यतिरेकेण वेदांतेषूप-
दिष्टः स्यात्ततो वर्णितेन प्रकारेण फलश्रुतेरर्थवादत्वं स्यात्‌ अधिकस्तु शारीरादात्मनोऽसंसारीश्वरः कर्तृत्वादिसंसारधर्मरहितोऽपहतपाप्म-
त्वादिविशेषणः परमात्मा वेद्यत्वेनोपदिश्यते वेदांतेषु॥ न च तद्विज्ञानं कर्मणां प्रवर्तकं भवति प्रत्युत कर्माण्युच्छिनत्तीति वक्ष्यत्युपम-

277/1913

र्दं चेत्यत्र॥ तस्मात्पुरुषार्थोऽतः शब्दादिति यदुक्तं भगवता बादरायणेन तत्तथैव तिष्ठति॥ न शेषत्वप्रभृतिभिर्हेत्वाभासैस्तच्चालयितुं शक्यते॥ तथा हि
तमधिकं शारीरादीश्वरमात्मानं दर्शयंति॥ यः सर्वज्ञः सर्ववित्‌॥ भीषास्माद्वातः पवते॥ महद्भयं वज्रमुद्यतमेतस्य वा अक्षरस्य प्रशासने
गार्गि॥ तदैक्षत बहु स्यां प्रजायेयेति॥ तत्तेजोऽसृजतेत्येवमाद्याः॥ यत्तु प्रियादिसंसूचितस्य संसारिण एवात्मनो वेद्यतयानुकर्षणमात्मनस्तु का-
माय सर्वं प्रियं भवत्यात्मा वा अरे द्रष्टव्यो यः प्राणेन प्राणिति स त आत्मा सर्वांतरो य एषोऽक्षिणि पुरुषो दृश्यत इत्युपक्रम्य एतं त्वेव ते भूयोऽनुव्या-
ख्यास्यामीति चैवमादि॥ अस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदो योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येति परं ज्योतिरुपसंपद्य स्वेन रूपेणाभि-
निष्पद्यते स उत्तमः पुरुष इत्येवमादिभिर्वाक्यशेषैः सत्यामेवाधिकोपदिदिक्षायामनत्यंतभेदाभिप्रायमित्यविरोधः॥ पारमेश्वरमेव हि शा-
रीरस्य पारमार्थिकं स्वरूपमुपाधिकृतं तु शारीरत्वं॥ तत्त्वमसि नान्यदतोऽस्ति द्रष्टेत्यादिश्रुतिभ्यः॥ सर्वं चैतद्विस्तरेणास्माभिः पुरस्ता-
त्तत्र तत्र निर्णीतं॥ ७॥ तुल्यं तु दर्शनं॥ ९॥ यत्तूक्तमाचारदर्शनात्कर्मशेषो विद्येत्यत्र ब्रूमः॥ तुल्यमाचारदर्शनमकर्मशेषत्वेऽपि विद्यायाः॥ तथा
हि श्रुतिर्भवत्येतद्ध स्म वै तद्विद्वांस आहुः ऋषयः कावषेयाः किमर्था वयमध्येष्यामहे किमर्था वयं यक्ष्यामहे॥ एतद्ध स्म वै तत्पूर्वे विद्वांसोऽग्निहो-
त्रं न जुहवांचक्रिरे॥ एतं वै तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरंतीति॥ एवंजातीयि-
का॥ याज्ञवल्क्यादीनामपि ब्रह्मविदामकर्मनिष्ठत्वं दृश्यते॥ एतावदरे खल्वमृतत्वमिति होक्त्वा याज्ञवल्क्यः प्रवव्राजेत्यादिश्रुतिभ्यः॥ अपि च यः
यक्ष्यमाणो वै भगवंतोऽहमस्मीत्येतल्लिंगदर्शनं वैश्वानरविद्याविषयं संभवति च सोपाधिकायां ब्रह्मविद्यायां कर्मसाहित्यदर्शनं॥ न त्वत्रापि वि-
द्यांगत्वमस्ति॥ प्रकरणाभावात्‌॥ यत्पुनरुक्तं तच्छ्रुतेरित्यत्र ब्रूमः॥ ७॥ असार्वत्रिकी॥ १०॥ यदेव विद्यया करोतीत्येषा श्रुतिर्न सर्वविद्या-
विषया॥ प्रकृतविद्याभिसंबंधात्‌॥ प्रकृता चोद्गीथविद्या ओमित्येतदक्षरमुद्गीथमुपासीतेत्यत्र॥ ७॥ विभागः शतवत्‌॥ ११॥ यदप्युक्तं विद्या-
कर्मणी समन्वारभेते इत्यत्र समन्वारंभवचनमस्वातंत्र्ये विद्याया लिंगमिति॥ तत्प्रत्युच्यते विभागोऽत्र द्रष्टव्यो विद्यान्यं पुरुषमन्वारभते क-
र्मान्यमिति शतवद्यथा शतमाभ्यां दीयतामित्युक्ते विभज्य दीयते पंचाशदेकस्मै पंचाशदपरस्मै तद्वत्‌॥ न चेदं समन्वारंभवचनं मुमुक्षुविषयमिति कामय-
मान इति संसारिविषयत्वोपसंहारात्‌॥ अथाकामयमान इति च मुमुक्षोः पृथगुपक्रमात्‌॥ तत्र संसारिविषये विद्या विहिता प्रतिषिद्धा च प-
रिगृह्यते विशेषाभावात्‌॥ कर्माणि विहितप्रतिषिद्धानि च यथाप्राप्तमनुवादितानि॥ एवं सत्यविभागेनापीदं समन्वारंभवचनमवकल्प्यते॥ यच्च
एतद्वतो विधानादित्यत उत्तरं पठति॥ ७॥ अध्ययनमात्रवतः॥ १२॥ आचार्यकुलाद्वेदमधीत्येत्यत्राध्ययनमात्रस्य श्रवणादध्ययनमात्रवत
एव कर्मविधिरित्यध्यवस्यामः॥ नन्वेवं सत्यविज्ञानत्वादनधिकारः कर्मसु प्रसज्येत॥ नैष दोषः॥ न वयमध्ययनप्रभवं कर्मावबोधन-
मधिकारकारणं वारयामः॥ किं तर्हि यौपनिषदमात्मज्ञानं स्वातंत्र्येणैव प्रयोजनवत्प्रतीयमानं न कर्माधिकारकारणतां प्रतिपद्यत इत्येतावत्प्रति-

पादयामः॥ यथा वनकत्वेन रत्नानं कृतं तदधिकारेणापेक्ष्यते एवमेतदपि द्रष्टव्यमिति॥ यदप्युक्तं नियमाद्वेत्यत्राभिधीयते॥छ॥ नावि
शेषात्॥१३॥ कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समा इत्यादिषु नियमश्रवणेषु न विदुष इति विशेषोऽस्ति अविशेषेण नियमविधानात्॥छ॥ सु
तयेऽनुमतिर्वा॥१४॥ कुर्वन्नेवेह कर्माणीत्यत्रापरो विशेष आख्यायते॥ यद्यप्यत्र प्रकरणसामर्थ्याद्विद्वानेव कुर्वन्निति संबध्यते तथा
पि विद्यास्तुतये कर्मानुज्ञानमेतद्द्रष्टव्यं॥ न कर्म लिप्यते नरे इति हि वक्ष्यति॥ एतदुक्तं भवति यावज्जीवं कर्म कुर्वत्यपि विदुषि पुरुषे न कर्म लेपा
य भवति विद्यासामर्थ्यादिति तदेवं विद्या स्तूयते॥छ॥ कामकारेण चैके॥१५॥ अपि चैके विद्वांसः प्रत्यक्षीकृतविद्याफलाः संतस्तदवष्टंभा
त्फलांतरसाधनेषु प्रजादिषु प्रयोजनाभावं परामृशंति कामकारेणेति॥ श्रुतिर्भवति वाजसनेयिनामेतद्ध स्म वै तत्पूर्वे विद्वांसः प्रजां न कामयं
ते किं प्रजया करिष्यामो येषां नोऽयमात्मायं लोक इति॥ अनुभवारूढमेव च विद्याफलं न क्रियाफलवत्कालांतरभावीत्यसकृदवोचाम॥ अ
तोऽपि न विद्यायाः कर्मशेषत्वं॥ नापि तद्विषयायाः फलश्रुतेर्यथार्थत्वमाश्रयितुं शक्यं॥छ॥ उपमर्दं च॥१६॥ अपि च कर्माधिकारहेतोः क्रि
याकारकफललक्षणस्य समस्तस्य प्रपंचस्याविद्याकृतस्य विद्यासामर्थ्यात्स्वरूपोपमर्दमामनंति॥ यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्ये
दित्यादिना वेदांतोदितात्मज्ञानपूर्विकां तु कर्माधिकारसिद्धिं प्रत्याशासानस्य कर्माधिकारोच्छित्तिरेव प्रसज्यते॥ तस्मादपि स्वातंत्र्यं विद्यायाः॥
ऊर्ध्वरेतःसु च शब्दे हि॥१७॥ ऊर्ध्वरेतःसु चाश्रमेषु विद्या श्रूयते॥ न च तत्र कर्मांगत्वं विद्याया उपपद्यते॥ कर्माभावात्॥ न ह्यग्निहोत्रादीनि वै
दिकानि कर्माणि तेषां संति॥ स्यादेतदूर्ध्वरेतआश्रमा न श्रूयंत एवेति॥ तदपि॥ नास्ति तेषामपि हि वैदिकेषु शब्देष्ववगम्यंते॥ त्रयो धर्मस्कंधा ये च
मेऽरण्ये श्रद्धा तप इत्युपासते॥ तपःश्रद्धे ये ह्युपवसंत्यरण्ये एतमेव प्रव्राजिनो लोकमिच्छंतः प्रव्रजंति॥ ब्रह्मचर्यादेव प्रव्रजेदित्येवमादिषु॥ प्र
तिपन्नाप्रतिपन्नगार्हस्थ्यानामपाकृतानपाकृतर्णानां चोर्ध्वरेतस्त्वं श्रुतिस्मृतिप्रसिद्धं॥ तस्मादपि स्वातंत्र्यं विद्याया इति॥छ॥ परामर्शं जै
मिनिरचोदना चापवदति हि॥१८॥ त्रयो धर्मस्कंधा इत्यादयो ये शब्दा ऊर्ध्वरेतसामाश्रमाणां सद्भावायोदाहृतास्ते न तत्प्रतिपादनाय प्र
भवंति॥ यतः परामर्शमेषु शब्देष्वाश्रमांतराणां जैमिनिराचार्यो मन्यते॥ न विधिं॥ कुतः न ह्यत्र लिङादीनामन्यतमश्चोदनाशब्दोऽस्ति॥ अ
र्थांतरपरत्वं चैषु प्रत्येकमुपलभ्यते त्रयो धर्मस्कंधा इत्यत्र तावद्यज्ञोऽध्ययनं दानमिति प्रथमः तप एव द्वितीयो ब्रह्मचार्याचार्यकुलवासी तृ
तीयोऽत्यंतमात्मानमाचार्यकुलेऽवसादयन् सर्व एते पुण्यलोका भवंतीति॥ परामर्शपूर्वकमाश्रमाणामनात्यंतिकफलत्वं संकीर्त्य संति ३४
ष्ठस्य फलत्वेनामृतत्वं संकीर्तयते ब्रह्मसंस्थोऽमृतत्वमेतीति॥ ननु परामर्शेऽप्याश्रमा गम्यंत एव॥ सत्यं गम्यंते स्मृत्याचाराभ्यां तु तेषां प्रसिद्धिर्न
प्रत्यक्षायाः श्रुतेः॥ अतश्च प्रत्यक्षश्रुतिविरोधेनाऽनादरणीया स्मृतिर्भविष्यति॥ अनधिकृतविषया वा॥ ननु गार्हस्थ्यमपि सहैवोर्ध्वरेतोभिः
परामृष्टं यज्ञोऽध्ययनं दानमिति प्रथम इति॥ सत्यमेवं तथापि तु गृहस्थं प्रत्येवाग्निहोत्रादीनां कर्मणां विधानात् श्रुतिप्रसिद्धमेव तदस्तित्वं॥ न

279/1913

स्मात्कृतार्थ एवायं परामर्शो न चोदनार्थः॥ अपि चापवदति हि प्रत्यक्षा श्रुतिराश्रमांतरं वीरहा वा एष देवानां योऽग्निमुद्वासयते॥
आचार्याय प्रियं धनमाहृत्य प्रजातंतुं मा व्यवच्छेत्सीः॥ नापुत्रस्य लोकोऽस्तीति तत्सर्वे पशवो विदुरित्येवमाद्या॥ तथा ये चेमेऽरण्ये श्रद्धा त
प इत्युपासते॥ तपःश्रद्धे ये ह्युपवसंत्यरण्य इति॥ चेदेवयानोपदेशो नाश्रमांतरोपदेशः संदिग्धं चाश्रमांतराभिधानं तप एव द्वितीय इ
त्येवमादिषु॥ तथैतमेव प्रव्राजिनो लोकमिच्छंतः प्रव्रजंतीति लोकसंस्तवोऽयं न पारिव्राज्यविधिः॥ ननु ब्रह्मचर्यादेव प्रव्रजेदिति वि
स्पष्टमिदं प्रत्यक्षं पारिव्राज्यविधानं जाबालानां॥ सत्यमेवमेतदनपेक्ष्य त्वेतां श्रुतिमयं विचार इति द्रष्टव्यं॥छ॥ अनुष्ठेयं बादरायणः
साम्यश्रुतेः॥१९॥ अनुष्ठेयमाश्रमांतरं बादरायण आचार्यो मन्यते॥ वेदेषु श्रवणादग्निहोत्रादीनामवश्यानुष्ठेयत्वाद्विरोधेनेति र
कृतानुष्ठेयमाश्रमांतरमिति निराकरोति गार्हस्थ्यवदेवाश्रमांतरमपीच्छता प्रतिपत्तव्यमिति मन्यमानः कुतः साम्यश्रुतेः॥ समा हि
गार्हस्थ्येनाश्रमांतरस्य परामर्शश्रुतिर्दृश्यते॥ त्रयो धर्मस्कंधा इत्याद्या यथेह श्रुत्यंतरविहितमेव गार्हस्थ्यं परामृष्टमेवमाश्रमांत
रमपीति प्रतिपत्तव्यं॥ यथा शास्त्रांतरप्राप्तयोरेव निवीतप्राचीनावीतयोः परामर्श उपवीतविधिपरे वाक्ये॥ तस्मात्तुल्यमनुष्ठेय
त्वं गार्हस्थ्येनाश्रमांतरस्य॥ तथैतमेव प्रव्राजिनो लोकमिच्छंतः प्रव्रजंतीत्यस्य वेदानुवचनादिभिः समभिव्याहारो ये चेमेऽरण्ये श्रद्धा
तप इत्युपासते इत्यस्य चाग्निविद्यया॥ यत्तूक्तं तप एव द्वितीय इत्यादिष्वाश्रमांतराभिधानं संदिग्धमिति॥ नैष दोषो निश्चयकारणस
द्भावात्॥ त्रयो धर्मस्कंधा इति हि धर्मस्कंधत्रित्वं प्रतिज्ञातं॥ न च यज्ञादयो भूयांसो धर्मा उत्पत्तिभिन्नाः संतोऽन्यत्राश्रमसंबंधात्त्रित्वेन
भावयितुं शक्यंते॥ तत्र यज्ञादिलिंगो गृहाश्रम एको धर्मस्कंधो निर्दिष्टो ब्रह्मचारीति च स्पष्ट आश्रमनिर्देशस्तप इत्यपि कोऽन्यस्तपःप्र
धानादाश्रमाद्धर्मस्कंधोऽभ्युपगम्येत॥ ये चेमेऽरण्य इति चारण्यलिंगाच्छ्रद्धातपोभ्यामाश्रमगृहीतिः॥ तस्मात्परामर्शेऽप्यनुष्ठेयमा
श्रमांतरं॥छ॥ विधिर्वा धारणवत्॥२०॥ विधिर्वायमाश्रमांतरस्य न परामर्शमात्रं॥ ननु विधित्वाभ्युपगम एकवाक्यताप्रतीति
रुपरुध्येत॥ प्रतीयते ह्यत्रैकवाक्यता पुण्यलोकफलास्त्रयो धर्मस्कंधा ब्रह्मसंस्थता त्वमृतत्वफलेति॥ सत्यमेतत्सतीमपि त्वेतामे
कवाक्यताप्रतीतिं परित्यज्य विधिरेवाभ्युपगंतव्यः॥ अपूर्वत्वाद्विध्यंतरस्यादर्शनाद्विस्पष्टाच्चाश्रमांतरप्रत्ययाद्गुणवादकल्पनयैकवा
क्यत्वयोजनानुपपत्तेः॥ धारणवत्॥ यथाधस्तात्समिधं धारयन्ननुद्रवेदुपरि हि देवेभ्यो धारयतीत्यत्र सत्यामप्यधोधारणेनैकवा
क्यताप्रतिपत्तौ विधीयत एवोपरिधारणमपूर्वत्वात्॥ तथा चोक्तं शेषलक्षणे विधिस्तु धारणेऽपूर्वत्वादिति॥ तद्वदिहाप्याश्रमपरि
मर्शश्रुतिर्विधिरेवेति कल्प्यते॥ यदापि परामर्श एवायमाश्रमांतराणां तदापि ब्रह्मसंस्थता तावत्संस्तवसामर्थ्याद्विधेया

शां॰भा॰
३५

भ्युपगंतव्या॥ सा च किं चतुर्थाश्रमेषु यस्य कस्यचिदेवाहोस्वित्परिव्राजकस्यैवेति विवेक्तव्यं॥ यदि च ब्रह्मचार्यंतेष्वाश्रमेषु परामृश्यमानेषु परि
व्राजकोऽपि परामृष्टस्तेन चतुर्णामप्याश्रमाणां परामृष्टत्वाविशेषादनाश्रमित्वानुपपत्तेश्च यः कश्चिच्चतुर्थाश्रमेषु ब्रह्मचार्यंतेष्वाश्रमे
षु ब्रह्मसंस्थो भविष्यत्यथ न परामृष्टस्ततः परिशिष्यमाणः परिव्राडेव ब्रह्मसंस्थ इति सिद्धमिति तत्र यतः शब्देनैवानुस्वग्राहिणा परा
मृष्टः परिव्राडपीति केचिदाहुर्युक्तं॥ न हि सत्यागतो वानप्रस्थविशेषणेन परिव्राजको ग्रहणमर्हति॥ यथात्र ब्रह्मचारिगृहमेधिनावसाधार
णेनैव स्वेन विशेषणेन विशेषितावेवं भिक्षुवैखानसावपीति युक्तं॥ तपश्च सो धारणाधर्मो वानप्रस्थानां कायक्लेशप्रधानत्वात्॥ तपः
शब्दस्य तत्र रूढेः॥ भिक्षोस्तु धर्म इंद्रियसंयमादिलक्षणो नैव॥ तपःशब्देनाभिलप्येत॥ चतुःशब्देनाच प्रसिद्धा आश्रमास्त्रित्वेन परामृ
श्यंत इत्यनुपपन्नं॥ अपि च त्रयो व्यपदेशोऽत्र भवति ते पुण्यलोकभाज एषोऽमृतत्वभागिति॥ पृथक्त्वेन व्यपदेशो न कल्प्यते॥ न ह्येवं भवति देवदत्तयज्ञ
दत्तौ मंदप्रज्ञावेकस्तयोर्महाप्रज्ञ इति॥ भवति त्वेवं देवदत्तयज्ञदत्तौ विष्णुमित्रस्तु महाप्रज्ञ इति॥ तस्मात्पूर्वे त्रय आश्रमिणः पुण्यलो
कभाजः परिशिष्यमाणः परिव्राडमृतत्वभाक्॥ कथं पुनर्ब्रह्मसंस्थशब्दो योगात्प्रवर्तमानः सर्वत्र संभवन्परिव्राजक एवावतिष्ठेत॥ रू
ढ्यभ्युपगमे वाश्रममात्रादमृतत्वप्राप्तेर्ज्ञानानर्थक्यप्रसंग इत्युच्यते॥ ब्रह्मसंस्थ इति हि ब्रह्मणि परिसमाप्तिरनन्यव्यापारतारूपं तन्नि
ष्ठत्वमभिधीयते॥ तच्च त्रयाणामाश्रमाणां न संभवति॥ स्वाश्रमविहितकर्माननुष्ठाने प्रत्यवायश्रवणात्॥ परिव्राजकस्य तु सर्वकर्मसं
न्यासात्प्रत्यवायो न संभवति॥ अननुष्ठाननिमित्तः॥ शमदमादिस्तु तदीयो धर्मो ब्रह्मसंस्थताया उपोद्बलको न विरोधी॥ ब्रह्मनिष्ठत्वमेव
हि तस्य शमदमाद्युपबृंहितं स्वाश्रमविहितं कर्म॥ यज्ञादीनि चेतरेषां॥ तद्व्यतिक्रमे च तस्य प्रत्यवायः॥ तथा च न्यास इति ब्रह्मा हि परः
परो हि ब्रह्मा तानि वा एतान्यवराणि तपांसि न्यास एवात्यरेचयत्॥ वेदांतविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धस
त्त्वाद्याः श्रुतयः॥ स्मृतयश्च तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणा इत्याद्या ब्रह्मसंस्थस्य कर्माभावं दर्शयंति॥ तस्मात्परिव्राजकस्या
श्रममात्रादमृतत्वप्राप्तेर्ज्ञानानर्थक्यप्रसंग इत्येषो नावतरति तदेवं परामर्शेऽपीतरेषामाश्रमाणां पारिव्राज्यं नैव ब्रह्मसंस्थतालक्षणं लभ्य
ते॥ अनपेक्ष्यैव जाबालश्रुतिमाश्रमांतरविधायिनीमय
माचार्येण विचारः प्रवर्तितः॥ विद्यत एव त्वाश्रमांतरविधिः श्रुतिः प्रत्यक्षा॥ ब्रह्मचर्यं समाप्य गृही भवेद्गृही भूत्वा वनी भवेद्वनी भूत्वा
प्रव्रजेद्यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेद्गृहाद्वा वनाद्वेति॥ न चेयं श्रुतिरनधिकृतविषया शक्या वक्तुमविशेषश्रवणात्॥ पृथग्विधानाच्च
अनधिकृतानां॥ अथ पुनरेव व्रती वा अव्रती वा स्नातको वा अस्नातको वोत्सन्नाग्निरनग्निको वेत्यादिना॥ ब्रह्मज्ञानपरिपाकांगत्वाच्च पारिव्राज्यस्य नान
धिकृतविषयत्वं॥ तच्च दर्शयति॥ अथ परिव्राड्विवर्णवासा मुंडोऽपरिग्रहः शुचिरद्रोही भैक्षाणो ब्रह्मभूयाय कल्पते॥ ब्रह्म भवतीति॥ तस्मात्सिद्धा ३५

281/1913

ऊर्ध्वरेतसः आश्रमाः सिद्धा ऊर्ध्वरेतःसु विधानाद्विद्यायाः स्वातंत्र्यमिति॥ ७॥ स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात्॥ २१॥ स एष
रसानां रसतमः परमः परार्ध्योऽष्टमो यदुद्गीथः॥ इयमेवर्गग्निः साम॥ अयं वाव लोक एषोऽग्निश्चितः॥ तदिदमेवोक्थमियमेव पृथिवीत्येवंजाती
यकाः श्रुतयः किमुद्गीथादिस्तुत्यर्था आहोस्विदुपासनविध्यर्था इति॥ अस्मिन्संशये स्तुत्यर्था युक्ता उद्गीथादीनि कर्मांगान्युपादाय श्रवणा
त्॥ यथेयमेव जुहूरादित्यः कूर्मः स्वर्गो लोक आहवनीय इत्याद्या जुह्वादिस्तुत्यर्थास्तद्वदिति॥ चेन्नेत्याह॥ न स्तुतिमात्रमासां श्रुतीनां प्रयोजनं
युक्तमपूर्वत्वात्॥ विध्यर्थतायां ह्यपूर्वोऽर्थो विहितो भवति स्तुत्यर्थतायां त्वानर्थक्यमेव स्यात्॥ विधायकस्य हि शब्दस्य वाक्यशेषभावं प्रतिप
द्यमानास्तुतिरुपयुज्यते स्तुतं विधिनैकवाक्यत्वात्॥ स्तुत्यर्थेन विधिनां स्तुतिरित्यत्र प्रदेशांतरविहितानां तदुद्गीथादीनामिह प्रदेशां
तरपठितानां स्तुतिर्वाक्यशेषभावमप्रतिपद्यमानानां नार्थिकैव स्यात्॥ इयमेव जुहूरित्यादिषु विधिसंनिधावेवाम्नाता इति वैषम्यं॥ तस्माद्विध्यर्था
एवंजातीयकाः श्रुतयः॥ ७॥ भावशब्दाच्च॥ २२॥ उद्गीथमुपासीत सामोपासीताहमुक्थमस्मीति विद्यादित्यादयश्च विस्पष्टा विधिश
ब्दाः श्रूयंते॥ ते च स्तुतिमात्रप्रयोजनतायां व्याहन्येरन्॥ तथा च न्यायविदां स्मरणं॥ कुर्यात्क्रियेत कर्तव्यं भवेत्स्यादिति पंचमं॥ एतत्स्यात्सर्व
वेदेषु नियतं विधिलक्षणमिति लिङाद्यर्थो विधिरिति मन्यमाना एवं स्मरंति॥ प्रतिप्रकरणं च फलानि श्राव्यंते॥ आपयिता ह वै काभ
वंति॥ एष ह्येव कामागानस्येष्टे कल्पंते ह्यस्मै लोका ऊर्ध्वाश्चावृत्ताश्चेत्यादीनि॥ तस्मादप्युपासनविधानार्था उद्गीथादिश्रुतयः॥ ७॥ पा
रिप्लवार्था इति चेन्न विशेषितत्वात्॥ २३॥ अथ ह याज्ञवल्क्यस्य द्वे भार्ये बभूवतुर्मैत्रेयी च कात्यायनी च॥ प्रतर्दनो ह वै दैवोदासिरिंद्रस्य प्रि
यं धामोपजगाम॥ जानश्रुतिर्ह पौत्रायणः श्रद्धादेयो बहुदायी बहुपाक्य आस इत्येवमादिषु वेदांतपठितेष्वाख्यानेषु संशयः किमि
मानि पारिप्लवप्रयोगार्थानि आहोस्वित्संनिहितविद्याप्रतिपत्त्यर्थानीति पारिप्लवार्था इमा आख्यानश्रुतयः आख्यानसामान्यादाख्या
नप्रयोगस्य च पारिप्लवे चोदितत्वात्॥ ततश्च विद्याप्रधानत्वं वेदांतानां न स्यान्मंत्रवत्प्रयोगशेषत्वादिति चेत्तन्न॥ कस्माद्विशेषितत्वात्॥
पारिप्लवमाचक्षीतेति हि प्रकृत्य मनुर्वैवस्वतो राजेत्येवमादीनि कानिचिदेवाख्यानानि तत्र विशेष्यंते॥ आख्यानसामान्याच्चेत्सर्वगृही
तिः स्यादनर्थकमेवेदं विशेषणं भवेत्तस्मान्न पारिप्लवार्था एता आख्यानश्रुतयः॥ ७॥ तथा चैकवाक्यतोपबंधात्॥ २४॥ असति च पा
रिप्लवार्थत्वे आख्यानानां संनिहितविद्याप्रतिपादनोपयोगितैव न्याय्या एकवाक्यतोपबंधात्॥ तथा हि॥ तत्र तत्र संनिहिताभिर्वि
द्याभिरेकवाक्यता दृश्यते॥ प्ररोचनोपयोगात्॥ प्रतिपत्तिसौकर्योपयोगाच्च मैत्रेयीब्राह्मणे तावदात्मा वा अरे द्रष्टव्य इत्याद्यया विद्य
यैकवाक्यता दृश्यते॥ प्रातर्दनेऽपि प्राणोऽस्मि प्रज्ञात्मेत्याद्यया॥ जानश्रुतिरित्यत्रापि वायुर्वाव संवर्ग इत्याद्यया॥ यथा च स आत्मनो वपामुद
खिददित्येवमादीनां कर्मश्रुतिगतानामाख्यानानां संनिहितविधिस्तुत्यर्थता तद्वत्तस्मान्न पारिप्लवार्थत्वं॥ ७॥ अत एव चाग्नींधनाद्य

ब्रं॰भा॰३

३६

नं स्वय॥२५॥पुरुषार्थोतः शब्दादित्येन द्दितमपि संभवात्तदृति बुद्ध्या स्मृयते॥अतएव च विद्यायाः पुरुषार्थहेतुत्वादग्नीधनादीन्याश्रम
कर्माणि विद्यायाः स्वार्थसिद्धौ नापेक्षितव्यानीत्याद्यस्यैवाधिकरणस्य फलमुपसंहरत्यधिकविवक्षया॥छ॥सर्वापेक्षा च यज्ञादिश्रुते
रश्ववत्॥२६॥इदमिदानीं चिंत्यते॥किं विद्याया अत्यंतमेवानपेक्षाश्रमकर्मणामुतास्ति काचिदपेक्षेति॥तत्रातएवाग्नीधनादीन्याश
श्रमकर्माणि विद्यायाः स्वार्थसिद्धौ नापेक्ष्यंतइत्येवमत्यंतमेवानपेक्षायां प्राप्तायामिदमुच्यते सर्वापेक्षा चेति॥अपेक्षते च विद्या सर्वाण्याश्रमकर्माणि
नात्यंतमनपेक्षैव॥ननु विरुद्धमिदं वचनमपेक्षते चाश्रमकर्माणि विद्या नापेक्षते चेति॥नेति ब्रूमः॥उत्पन्ना हि विद्या फलसिद्धिं प्रति नकिं
चिदन्यदपेक्षते उत्पत्तिं प्रति त्वपेक्षते॥कुतः यज्ञादिश्रुतेः॥तथाहि श्रुतिः॥तमेतं वेदानुवचनेन ब्राह्मणा विविदिषंति॥यज्ञेन दानेन तपसाना
शकेनेति यज्ञादीनां विद्यासाधनभावं दर्शयति विविदिषासंयोगाच्चैषामुत्पत्तिसाधनभावोवसीयते॥अथ यद्यज्ञ इत्याचक्षते ब्रह्मचर्यमेवि
तदृदंति॥यदिच्छंतो ब्रह्मचर्यं चरंतीति तत्ते पदं संग्रहेण ब्रवीमीत्येवमाद्याश्च श्रुतय आश्रमकर्मणां विद्यासाधनभावं सूचयंति॥स्मृतिरपि कषायपक्तिः
कर्माणि ज्ञानं तु परमा गतिः॥कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्तते इत्येवमाद्या॥अश्ववदिति योग्यतानिदर्शनं॥यथा च योग्यतावशेना
श्वो न लांगलाकर्षणे युज्यते॥रथचर्यायां युज्यते॥एवमाश्रमकर्माणि विद्यया फलसिद्धौ नापेक्ष्यंते उत्पत्तौ चापेक्ष्यंत इति॥शमदमाद्यु
पेतस्यात्तथापि तु तद्विधेस्तदंगतया तेषामवश्यानुष्ठेयत्वात्॥२७॥ यदि कश्चिन्मन्येत यज्ञादीनां विद्यासाधनभावो न न्याय्यो विध्यभा
वात्॥यज्ञेन विविदिषंतीत्येवंजातीयका हि श्रुतिरनुवादस्वरूपा विद्याभिष्टवपरा न यज्ञादिविधिपरा॥इत्थं महाभागा विद्या यद्यज्ञा
दिभिरेनामवाप्तुमिच्छंतीति॥तथापि तु शमदमाद्युपेतः स्यात् विद्यार्थी तस्मादेवंवित् शांतो दांत उपरतस्तितिक्षुः समाहितो भूत्वात्म
न्येवात्मानं पश्यतीति विद्यासाधनत्वेन शमदमादीनां विद्यानाद्विहितानां चावश्यानुष्ठेयत्वात्॥नच्चापि शमाद्युपेतो भूत्वा पश्यतीति व
र्तमानापदेशरूप उपदेशो लभ्यते न तु विधिरिति चेत्॥तस्मादिति प्रकृतप्रशंसापरिग्रहाद्विधित्वप्रतीतेः॥पश्येदिति च माध्यंदिनाः स्पष्ट
मेव विधिमधीयते॥तस्माद्यज्ञाद्यनपेक्षायामपि शमादीन्यपेक्षितव्यानि॥यज्ञादीन्यपि त्वपेक्षितव्यानि श्रुतेरेव॥ननूक्तं यज्ञा
दिभिर्विविदिषंतीत्यत्र न विधिरुपलभ्यत इति॥सत्यमुक्तं तथापि त्वपूर्वत्वात्संयोगस्य विधिः प्रकल्प्यते॥नह्ययं यज्ञादीनां विविदिषासं
योगः पूर्वप्राप्तो येनान्द्येत॥तस्मात्पूषाप्रपिष्टभागोऽदंतको हीत्येवमादिषु श्रुतेष्वपि विधिकल्पनावत् अपूर्वत्वाद्विधिः प्रकल्प्यत इति सं
पूर्णविकृतानीयते त्यादिविचारः प्रथमे तंत्रे प्रदर्शितः॥तथा चोक्तं विधिर्वा धारणवदिति॥स्मृतिष्वपि भगवद्गीताद्यासु अनभिसंधा
यफलमनुष्ठितानि यज्ञादीनि मुमुक्षोर्ज्ञानसाधनानि भवंतीति प्रपंचितं॥तस्माद्यज्ञादीनि च यथाश्रमं सर्वाण्याश्रमकर्माणि विद्यो
त्पत्तावपेक्षितव्यानि॥तत्राप्येवंविदिति विद्यासाधनानि शमादीनि॥विविदिषासंयोगाद्बाह्यतराणि यज्ञादीनीति विवेक्तव्यम्॥ ३६

285/1913

सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात्॥२८॥प्राणसंवादे श्रूयते छंदोगानां नहवा एवंविदि किंचनानन्नं भवतीति॥तथा वाजसने
यिनां नहवा अस्यानन्नं जग्धं भवति नानन्नं प्रतिगृहीतमिति सर्वमस्यादनीयमेव भवतीत्यर्थः॥किमिदं सर्वान्नानुज्ञानं शमादिवद्विद्यांगं
विधीयते उत स्तुत्यर्थं संकीर्त्यत इति संशये विधिरिति तावत्प्राप्तं॥तथाहि प्रवृत्तिविशेषकर उपदेशो भवत्यतः॥प्राणविद्यासंनिधा
नाच्च तदंगत्वेनेयं नियमनिवृत्तिरुपदिश्यते॥नन्वेवं सति भक्ष्याभक्ष्यविभागशास्त्रव्याघातः स्यात्॥नैष दोषः॥सामान्यविशेषभावाद्बा
धोपपत्तेः॥यथा प्राणिहिंसाप्रतिषेधस्य पशुसंज्ञपनविधिना बाधो यथा च न कांचन परिहरेत्तद्व्रतमित्यनेन वामदेव्यविद्याविषयेण
सर्वास्त्रीपरिहारवचनेन सामान्यविषयं गम्यागम्यविभागशास्त्रं बाध्यते॥एवमनेनापि प्राणविद्याविषयेण सर्वान्नभक्षणवचनेन
भक्ष्याभक्ष्यविभागशास्त्रं बाध्येतेत्येवं प्राप्ते ब्रूमः॥नेदं सर्वान्नानुज्ञानं विधीयत इति॥नह्यत्र विधायकः शब्द उपलभ्यते॥नहवा एवंविदि
किंचनानन्नं भवतीति वर्तमानापदेशात्॥नचासत्यामपि विधिप्रतीतौ प्रवृत्तिविशेषकरत्वलोभेन विधिरभ्युपगंतुं शक्यते॥अपि च श्वादि
मर्यादं प्राणस्यान्नमित्युक्त्वेदमुच्यते॥नैवंविदः किंचिदनन्नं भवतीति न च श्वादिमर्यादमन्नं मानुषेण देहेनोपभोक्तुं शक्यते॥तु प्राणस्यान्न
मिदं सर्वमिति चिंतयितुं॥तस्मात्प्राणान्नविज्ञानप्रशंसार्थोयमर्थवादो न सर्वान्नानुज्ञाने विधिरस्तीति दर्शयति॥सर्वान्नानुमतिश्च प्राणात्यय
इति॥एतदुक्तं भवति प्राणात्यय एव हि परस्यामापदि सर्वमन्नमदनीयत्वेनाभ्यनुज्ञायते तद्दर्शनात्॥तथाहि श्रुतिश्चाक्रायणस्य कष्टा
यामवस्थायामभक्ष्यभक्षणे प्रवृत्तिं दर्शयति॥मटचीहतेषु कुरुष्विति ब्राह्मणे॥चाक्रायणः किल ऋषिरापद्गत इभ्येन सामिखादितान्
कुल्माषांश्चखाद॥अनुपानं तु तदीयमुच्छिष्टदोषात्प्रत्याचचक्षे कारणं चात्राह नवा अजीविष्यमिमानखादन्निति कामो म उदक
पानमिति च॥पुनश्चोत्तरेद्युस्तानेव स्वपरोच्छिष्टान्पर्युषितान्कुल्माषान्भक्षयांबभूवेति तदेव दुच्छिष्टोच्छिष्टपर्युषितभक्षणं दर्शय
त्याः श्रुतेराशयो लक्ष्यते॥प्राणात्यये प्रसंगे प्राणसंधारणायाभक्ष्यमपि भक्षयितव्यमिति॥स्वस्थावस्थायां तु तन्न कर्तव्यं विद्यावतापी
त्यनुपानप्रत्याख्यानाद्गम्यते॥तस्मादर्थवादो नहवा एवंविदीत्येवमादिः॥छ॥अबाधाच्च॥२९॥एवं च सत्याहारशुद्धौ सत्त्वशुद्धिरित्येव
मादि भक्ष्याभक्ष्यविभागशास्त्रमबाधितं भविष्यति॥छ॥अपि च स्मर्यते॥३०॥अपि चापदि सर्वान्नभक्षणमपि स्मर्यते विदुषोविदुष
श्च विशेषेण॥जीवितात्ययमापन्नो योन्नमत्ति यतस्ततः॥लिप्यते न स पापेन पद्मपत्रमिवांभसेति॥तथा मद्यं ब्राह्मणस्य सुरापानस्य
ब्राह्मणस्योष्णामासिंचेयुः॥सुरापाश्च कृमयो॥अस्य॥क्रियामायोभवंत्यभक्ष्यभक्षणादिति च स्मर्यते॥वर्जनमन्नेनस्य॥छ॥शब्दश्चा
तोकामकारे॥३१॥शब्दश्चानन्नस्य प्रतिषेधकः कामकारनिवृत्तिप्रयोजनः॥काठानां संहितायां श्रूयते तस्माद्ब्राह्मणः सुरां न पिबेदि
ति॥सोपि नहवा एवंविदीत्यस्यार्थवादत्वादुपपन्नतरो भवति॥तस्मादेवंजातीयकोऽर्थवादो न विधिरिति॥छ॥विहितत्वाच्चाश्रमकर्मापि॥

ब्र०भा०
३०

॥३२॥ सर्वापेक्षा चेत्यत्राश्रमकर्मणां विद्यासाधनत्वमवधारितं॥ इदानीं तु किममुमुक्षोरपि आश्रममात्रनिष्ठस्य विद्यामकामयमान
स्यापि अनुष्ठेयान्युताहो नेति विचार्यते॥ तत्र मतं वेदानुवचनेन ब्राह्मणा विविदिषन्तीत्यादिनाश्रमकर्मणां विद्यासाधन [illegible]
न्यनुष्ठेयान्यथ तस्याप्यनुष्ठेयानि तर्हि तेषां विद्यासाधनत्वं नित्यानित्यसंयोगविरोधादित्यां प्राप्तौ पठति॥ आश्रममात्रस्य निष्ठस्याप्य
मुमुक्षोः कर्तव्यान्येव नित्यानि कर्माणि यावज्जीवमग्निहोत्रं जुहोतीत्यादिना विहितत्वात्॥ न हि वचनस्यातिभारो नाम कश्चिदस्ति॥ अ
थ यदुक्तं नैवं सति विद्यासाधनत्वमेषां स्यादित्यत उत्तरं पठति॥ ०॥ सहकारित्वेन च॥ ३३॥ विद्यासहकारिणी चैतानि स्युर्विहितत्वादेव
तमेतं वेदानुवचनेन विविदिषन्तीतिदिनादुक्तं सर्वापेक्षा च यज्ञादिश्रुतेरश्ववदिति॥ न चेदं विद्यासहकारित्ववचनमाकर्मणामथ यज्ञादिवद्वि
फलविषयं मंतव्यं मविधिलक्षणत्वाद्विद्यायाः असाध्यत्वाच्च विद्याफलस्य विधिलक्षणं हि साधनं दर्शपूर्णमासादि स्वफलसिसाधयिष
या सहकारिसाधनांतरमपेक्षते नैवं विद्या॥ तथा चोक्तं अत एवाग्नीन्धनाद्यनपेक्षेति॥ तस्मादुत्पत्तिसाधनत्व एवैषां सहकारित्वमित्युक्तिं
न चात्र नित्यानित्यसंयोगविरोधआशंक्यः कर्माभेदेपि संयोगभेदात्॥ नित्यो ह्येकः संयोगो यावज्जीवादिवाक्यकल्पितो न तस्य विद्याफ-
लत्वं॥ अनित्यस्त्वपरः संयोगः तमेतं वेदानुवचनेनेत्यादिवाक्यकल्पितस्तस्य विद्याफलत्वं यथैकस्यापि खादिरत्वस्य नित्येन संयोगेन क्रत्वर्थ
ता अनित्येन संयोगः न पुरुषार्थत्वं॥ तद्वत्॥ सर्वथापि त एवोभयलिंगात्॥ ३४॥ सर्वथाप्याश्रमकर्मत्वपक्षे विद्यासहकारित्वपक्षे
च त एवाग्निहोत्रादयो धर्मा अनुष्ठेयाः॥ त एवेत्यवधारयन्नाचार्यः॥ किं निवर्तयति॥ कर्मभेदाशंकामिति ब्रूमः॥ यथा मासमग्नि
होत्रं जुहोतीत्यत्र नित्यादग्निहोत्रात्कर्मांतरमपदिश्यते॥ नैवमिह कर्मभेदोस्तीत्यर्थः॥ कुतः उभयलिंगात्॥ स्मृतिलिंगाच्च॥ श्रुतिलिं
गं तावत् तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्तीति॥ सिद्धवदुत्पन्नरूपाण्येव यज्ञादीनि विविदिषायां विनियुंक्ते न तु जुहुयादित्यादिवदपूर्वमेषां
रूपमुत्पादयतीति॥ स्मृतिलिंगमपि॥ अनाश्रितः कर्मफलं कार्यं कर्म करोति यः इति विज्ञातकर्तव्यतासकमेव कर्म विद्योत्पत्त्यर्थं दर्शय
ति॥ अष्टाचत्वारिंशत्संस्कारा इत्याद संस्कारत्वप्रसिद्धं वैदिकेषु कर्मसु तत्संस्कृतस्य विद्योत्पत्तिमभिप्रेत्य स्मृतौ भवति तस्मात्साधिद
मभेदावधारणं॥ ०॥ अनभिभवं च दर्शयति॥ ३५॥ सहकारित्वस्यैव तदुपोद्बलकलिंगदर्शनमनभिभवं च दर्शयति॥ श्रुतिर्ब्रह्मच
र्यादिसाधनसंपन्नस्य रागादिभिः क्लेशैः एष ह्यात्मा न नश्यति यं ब्रह्मचर्येणानुविंदते इत्यादिना॥ तस्माद्यज्ञादीन्याश्रमकर्माणि च भ ३८
वंति विद्यासहकारिणि चेति स्थितं॥ अंतरा चापि तु तद्दृष्टेः॥ विधुरादीनां द्रव्यादिसंपद्रहितानां चान्यतमाश्रमप्रतिपत्तिहीनानामंतरा
लवर्तिनां किं विद्यायामधिकारोस्ति॥ किं वा नास्तीति संशये नास्तीति तावत्प्राप्तं॥ आश्रमकर्मणां विद्याहेतुत्वावधारणादाश्रमकर्मा
संभवाच्चैतेषामित्येवं प्राप्ते इदमाह॥ अंतरा चापि तु अनाश्रमित्वेन वर्तमानोपि विद्यायामधिक्रियते॥ कुतः॥ तद्दृष्टेः॥ रैक्वाचक्नवीप्रभृ

285/1913

तीनामेवंभूतानामपि ब्रह्मवित्त्वश्रुत्युपलब्धेः॥ ३६॥ अपि च स्मर्यते॥ ३७॥ संवर्तप्रभृतीनां च नग्नचर्यादियोगादनपेक्षिताश्रमकर्मणामपि म
हायोगित्वं स्मर्यत इतिहासे॥ ननु लिंगमिदं श्रुतिस्मृतिमुपदर्शितमुपन्यस्तं का नु खलु प्राप्तिरिति साभिधीयते॥ ०॥ विशेषानुग्रहश्च॥ ते
षामपि च विधुरादीनामविरुद्धैः पुरुषमात्रसंबंधिभिर्जपोपवासदेवताराधनादिभिर्धर्मविशेषैरनुग्रहो विद्यायाः संभवति तथा च स्मृ
तिः॥ जप्येनैव तु संसिद्ध्येद्ब्राह्मणो नात्र संशयः॥ कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते॥ इति संभवात् आश्रमकर्मणोपि ज्याप्यधिकारं द
र्शयति॥ जन्मान्तरानुष्ठितैरपि चाश्रमकर्मभिः संभवत्येव विद्याया अनुग्रहः॥ तथा च स्मृतिः॥ अनेकजन्मसंसिद्धस्ततो याति परां गति
मिति॥ जन्मांतरसंचितानपि संस्कारविशेषाननुग्रहीतत्वं विद्याया दर्शयति॥ दृष्टार्था च विद्या प्रतिषेधाभावमात्रेणाप्यर्थिनमधिकारोन
विरुध्यते॥ ०॥ अतस्त्वितरज्ज्यायो लिंगाच्च॥ ३८॥ अतस्त्वंतराले वर्तित्वादितरदाश्रमवर्तित्वं ज्यायो विद्यासाधनं॥ श्रुतिस्मृतिसंदृब्धत्वात्॥
श्रुतिलिंगाच्च तेनैति ब्रह्मवित्पुण्यकृत्तैजसश्चेति अनाश्रमी न तिष्ठेत दिनमेकमपि द्विजः॥ संवत्सरमनाश्रमी स्थित्वा कृच्छ्रं चरेदिति च
स्मृतिलिंगात्॥ ०॥ तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमात् तद्रूपाभावेभ्यः॥ ४०॥ संत्यूर्ध्वरेतस आश्रमा इति स्थापितं॥ तासु प्राप्तः
स्य कथं चित्ततः प्रच्युतिरस्ति नेति संशयः॥ पूर्वधर्मस्वनुष्ठानचिकीर्षया रागादिवशेन वा प्रच्युतोपि स्याद्विभागाभावादिति एवं प्राप्ते उ
च्यते॥ तस्य प्राप्तस्य तु प्रतिपन्नोर्ध्वरेतोभावस्य न कथंचिदप्यतद्भावो न ततः प्रच्युतिः स्यात्॥ कुतः॥ नियमातद्रूपाभावेभ्यः॥ तथा-
त्यंतमात्मानमाचार्यकुलेवसादयन्निति॥ अरण्यमियादिति पदं ततो न पुनरेयादित्युपनिषदिति॥ आचार्येणाभ्यनुज्ञातश्चानुज्ञातश्च
तुर्णामेकमाश्रमं॥ आविमोक्षाच्छरीरस्य सोनुतिष्ठेद्यथाविधीति चैवंजातीयको नियमः प्रच्युत्यभावं दर्शयति॥ तथा च ब्रह्मचर्यं समाप्य गृ
ही भवेत्॥ ब्रह्मचर्यादेव प्रव्रजेदिति चैवं मार्गेण्याचारोहरूपाणि वास्य पलभ्यंते नैवं प्रत्यवरोहणमिति॥ तदसत्॥ ब्रह्मचर्यादिवश्रेयान
स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् इति स्मरणात्॥ न्यायाच्च यो हि यं प्रति विधीयते॥ स तस्य धर्मो न तु यो येन स्वनुष्ठातुं शक्यते॥
चोदनालक्षणत्वाद्धर्मस्य॥ न च रागादिवशात्प्रच्युतिः नियमशास्त्रस्य बलीयस्त्वात्॥ जैमिनेरपीत्यपिशब्देन जैमिनिबादरायणयोरत्र सं
प्रतिपत्तिं शास्ति प्रतिपत्तिदार्ढ्याय॥ ०॥ न चाधिकारिकमपि पतनानुमानात्तदयोगात्॥ ४१॥ यदि नैष्ठिको ब्रह्मचारी प्रमादवदवकीर्येत॥
किं तस्य ब्रह्मचार्यवकीर्णी नैरृतं गर्दभमालभेतेत्यनेन प्रायश्चित्तं स्यादिति चेन्नेत्युच्यते॥ यदप्यधिकारलक्षणे निर्णीतं प्रायश्चित्तमवकीर्णि
पशुश्च तद्वदाधीनत्वात्तस्य प्रकाशत्वादिति तदपि नानैष्ठिकस्य भवितुमर्हति॥ किं कारणं॥ आरूढो नैष्ठिकं धर्मं यस्तु प्रच्यवते पुनः॥ प्राय
श्चित्तं न पश्यामि येन शुध्येत्स आत्महा॥ इत्यप्रतिसमाधेयपतनस्मरणात्॥ छिन्नशिरस इव प्रतिक्रियानुपपत्तेः॥ उपकुर्वाणकस्य तु
तादृक्पतनस्मरणाभावादुपपद्यते तत्प्रायश्चित्तं॥ ०॥ उपपूर्वमपीत्येके भावमशनवत्तदुक्तं॥ ४२॥ अपि त्वेके आचार्या उपपातकमेवैतदिति
मन्यंते यन्नैष्ठिकस्य गुरुदारादिभ्योन्यत्र ब्रह्मचर्यं विशीर्येत॥ न तत्महापातकं भवति गुरुतल्पादिषु महापातकेष्वपरिगणनात्॥ तस्मादुप

शा०भा०
३८

कुर्वाणकवन्नैष्ठिकस्यापि प्रायश्चित्तभावमिच्छंतीत्येके ब्रह्मचारित्वाविशेषात्॥ अवकीर्णित्वादिदोषाच्च अशनवत् यथा ब्रह्मचारिणो मधुमांसा
शने व्रतलोपः पुनःसंस्कारश्चैवमिति। यदि ह्यप्रायश्चित्तस्य भावमिच्छंति तेषां न मूलमुपलभ्यते॥ यस्तु भावमिच्छंति तेषां ब्रह्मचार्यवकीर्णीत्येत
तदविशेषश्रवणं मूलं॥ तस्माद्भावो युक्ततरः॥ तदुक्तं प्रमाणलक्षणे॥ समा विप्रतिपत्तिः स्यात्॥ शास्त्रस्थत्वात्तन्निमित्तत्वादिति प्रायश्चित्त
भावस्मरणं त्वेवं सति गौरवापादनार्थमिति व्याख्यानं॥ एवं भिक्षुवैखानसयोरपि॥ वानप्रस्थो दीक्षाभेदे कृच्छ्रं द्वादशरात्रं चरित्वा महाकक्षं वर्द्ध
येत्॥ भिक्षुर्वानप्रस्थवत्सोमवल्लिवर्जं॥ स्वशास्त्रसंस्कारश्चेत्येवमादि प्रायश्चित्तस्मरणमनुसर्तव्यं॥ छ॥ बहिस्तूभयथापि स्मृतेराचा
राच्च॥ ४३॥ यदूर्ध्वरेतसां स्वाश्रमेभ्यः प्रच्यवनं महापातकं वा यदि वोपपातकमुभयथापि शिष्टैस्ते बहिः कर्तव्याः॥ आरूढो नैष्ठिकं धर्मं यस्तु प्र
च्यवते पुनः प्रायश्चित्तं न पश्यामि येन शुद्ध्येत्स आत्महेति॥ आरूढपतितं विप्रं मंडलाच्च विनिःसृतं उद्बद्धं॥ कृमिदष्टं च स्पृष्ट्वा चान्द्रायणं चरेदिति चै
वमादिस्मृतिभ्यः शिष्टाचाराच्च न हि यज्ञाध्ययनविवाहादीनि तैः सहाचरंति शिष्टाः॥ छ॥ स्वामिनः फलश्रुतेरित्यात्रेयः॥
॥ ४४॥ अंगेषूपासनेषु संशयः॥ फलं हि श्रूयते॥ वर्षति हास्मै वर्षयति ह य एतदेवं विद्वान् वृष्टौ पंचविधं सामोपास्त इत्यादि॥ तच्च याजमा
नत्वाव्या॥ तस्य सांगप्रयोगे कर्तृत्वादधिकृताधिकारत्वाच्चैवंजातीयकस्य फलं च कर्तृत्वमुपासनानां श्रूयते॥ वर्षत्यास्मै य उपास्त इति आ
दि॥ ननु ऋत्विजोऽपि फलं दृष्टं॥ आत्मने वा यजमानाय वा यं कामं कामयते तमागायतीति॥ न तस्य वाचनिकत्वात्॥ तस्मात्स्वामिन एव फ
लवत्सूपासनेषु कर्तृत्वमित्यात्रेय आचार्यो मन्यते॥ छ॥ आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रीयते॥ ४५॥ नैतदस्ति स्वामिकर्मण्युपा
सनानीति ऋत्विक्कर्माण्येतानि स्युरित्यौडुलोमिराचार्यो॥ किं कारणं॥ तस्मै हि सांगाय कर्मणे ऋत्विक्परिक्रीयते॥ तत्प्रयोगांतःपातीनि चोद्गी
थाद्युपासनान्यधिकृताधिकारत्वात्॥ तस्मात् गोदोहनादिनियमवदृत्विग्भिर्निर्वर्त्येरंस्तथा च सह बको दाल्भ्यो विदांचकार स ह नैमि
शीयानामुद्गाता बभूवेत्युद्गातृकर्तृकतां विज्ञानस्य दर्शयति॥ यत्तु कर्त्राश्रयं फलं श्रूयत इति॥ नैष दोषः॥ परार्थत्वादृत्विजोऽन्यत्र वच
नात्फलसंबंधानुपपत्तेः॥ छ॥ श्रुतेश्च॥ ४६॥ यां वै कांच॥ यज्ञ ऋत्विज आशिषमाशासत इति यजमानायैव तामाशासत इति होवा
चेति॥ तस्मादु हैवंविदुद्गाता ब्रूयात्कं ते काममागायानीति चैवंकर्तृकस्य विज्ञानस्य यजमानगामि फलं दर्शयति॥ तस्मादंगोपास
नानामृत्विक्कर्मत्वसिद्धिः॥ छ॥ सहकार्यंतरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत्॥ ४७॥ तस्माद्ब्राह्मणः पांडित्यं निर्विद्य बाल्ये ३८
न तिष्ठासेद्बाल्यं च पांडित्यं च निर्विद्याथ मुनिरमौनं च मौनं च निर्विद्याथ ब्राह्मण इति बृहदारण्यके श्रूयते तत्र संशयः॥ मौनं विधीय
ते॥ न वेति॥ न विधीयत इति तावत्प्राप्तं॥ बाल्येन तिष्ठासेदित्यत्रैव विधेरवसितत्वात्॥ न ह्यथ मुनिरित्यत्र विधायिका विभक्तिरुप
लभ्यते तस्मादयमनुवादो युक्तः॥ कुतः॥ प्राप्तिरिति चेत्॥ मुनिपंडितशब्दयोर्ज्ञानार्थत्वात्पांडित्यं निर्विद्येत्येव प्राप्तं मौनं॥ अपि च
मौनं च मौनं च निर्विद्याथ ब्राह्मण इत्यत्र तावन्न ब्राह्मणत्वं विधीयते॥ प्रागेव प्राप्तत्वात्॥ तस्मादथ ब्राह्मण इति प्रशंसावादस्त

287/1913

थैवाथ मुनिरित्यपि भवितुमर्हति॥ समाननिर्देशत्वादित्येवं प्राप्ते ब्रूमः॥ सहकार्यंतरविधिरिति॥ विद्यासहकारिणो मौनस्य बाल्या
पांडित्यवद्विधिरेवाश्रयितव्योऽपूर्वत्वात्॥ ननु पांडित्यशब्देनैव मौनस्य गतत्वमुक्तं॥ नैष दोषः॥ मुनिशब्दस्य ज्ञानातिशयार्थत्वात्॥
मननान्मुनिरिति च व्युत्पत्तिसंभवात्॥ मुनीनामप्यहं व्यास इति च प्रयोगदर्शनात्॥ ननु मुनिशब्द उत्तमाश्रमवचनोऽपि श्रूयते गार्ह
स्थ्यमाचार्यकुलं मौनं वानप्रस्थ्यमित्यत्र न वाल्मीकिर्मुनिपुंगव इत्यत्र व्यभिचारदर्शनात्॥ इतराश्रमसंनिधानात्तु पारिशेष्या
त्तत्रोत्तमाश्रमोपादानं ज्ञानप्रधानत्वादुत्तमाश्रमस्य॥ तस्माद्बाल्यपांडित्यापेक्षया तृतीयमिदं मौनं ज्ञानातिशयरूपं विधीयते॥ य
त्तु बाल्य एव विधिपर्यवसानमिति॥ तथाप्यपूर्वत्वान्मुनित्वस्य विधेयत्वमाश्रीयते॥ मुनिः स्यादिति॥ निर्वेदनीयत्वनिर्देशादपि मौ
नस्य बाल्यपांडित्यवद्विधेयत्वाश्रयणं॥ ननु विद्यावतः संन्यासिनः कथं च विद्यावतः संन्यासिन इति गम्यते तदधिकारादात्मा
नं विदित्वा पुत्राद्येषणाभ्यो व्युत्थायाथ भिक्षाचर्यं चरंतीति॥ ननु सति विद्यावत्त्वे प्राप्नोत्येव तद्ज्ञानातिशयः॥ किं मौनविधिनेति॥ अत
आह पक्षेणेति॥ एतदुक्तं भवति॥ यस्मिन्पक्षे भेददर्शनप्राबल्यान्न प्राप्नोति॥ तस्मिन्विधिरिति विध्यादिवद्यथा दर्शपूर्णमासाभ्यां स्वर्ग
कामो यजेतेत्येवंजातीयके विध्यर्थे सहकारित्वेनाग्न्याधानादिकमंगजातं विधीयते॥ एवमविधिप्रधानेऽप्यस्मिन्वाक्ये विधिरिति विध्या
दिवद्यथा दर्शपूर्णमासादिवाक्ये मौनविधिरित्यर्थः॥ एवं बाल्यादिविशिष्टे कैवल्याश्रमे श्रुतिमत्यपि विद्यमाने कस्मात् छांदोग्ये गृहिणो
पसंहारेणाभिसमावृत्य कुटुंबे इत्यत्र तेनोपसंहारस्तद्विषयमादरं दर्शयतीत्यत उत्तरं पठति॥ छ॥ कृत्स्नभावात्तु गृहिणोपसंहारः॥ ४८॥
तुशब्दो विशेषणार्थः॥ कृत्स्नभावोऽस्य विशेष्यते॥ बहुलायासानि हि बहून्याश्रमकर्माणि यज्ञादीनि तं प्रति कर्तव्यतयोपदिष्टानि आश्रमां
तरकर्माणि च यथासंभवमहिंसेंद्रियसंयमादीनि तस्य विद्यंते तस्माद्गृहमेधिनोपसंहारो न विरुध्यते॥ छ॥ मौनवदितरेषामप्युपदेशात्॥ ४९॥ यथा
मौनं गार्हस्थ्यं चैतावाश्रमौ श्रुतिमंतावेवमितरावपि वानप्रस्थ्यगुरुकुलवासौ॥ दर्शिता हि पुरस्तात् श्रुतिस्तप एव द्वितीयो ब्रह्मचार्याचा
र्यकुलवासी तृतीय इत्याद्या॥ तस्माच्चतुर्णामप्याश्रमाणामुपदेशाविशेषात्तुल्यवद्विकल्पसमुच्चययोः प्रतिपत्तिरितरेषामिति द्वयो
राश्रमयोर्बहुवचनं वृत्तिभेदापेक्षयानुष्ठातृभेदापेक्षया वेति द्रष्टव्यं॥ छ॥ अनाविष्कुर्वन्नन्वयात्॥ ५०॥ तस्माद्ब्राह्मणः पांडित्यं नि
र्विद्य बा मिति द्वयोराश्रमयोर्बहुवचनं वृत्तिभेदापेक्षयानुष्ठातृभेदापेक्षया ल्येन तिष्ठासेदिति बाल्यमनुष्ठेयतया श्रूयते तत्र बाल्यस्य
भावः कर्म वा बाल्यमिति तद्धिते सति बालभावस्य वयोविशेषस्य इच्छया संपादयितुमशक्यत्वाद्यथोपपादमूत्रपुरीषत्वादि बालचरित
मंतर्गतो भावविशुद्धिर्दंभदर्पप्ररूढेंद्रियत्वादिरहितत्वं वा बाल्यं स्यादिति संशयः॥ किं तावत्प्राप्तं कामचारवादभक्षता यथोपपाद
मूत्रपुरीषत्वं च प्रसिद्धतरं लोके बाल्यमिति तद्ग्रहणं॥ ननु पतितत्वादिदोषप्राप्तेर्न युक्तं कामचारताद्याश्रयणं॥ न विद्यावतः संन्या
सिनो वचनसामर्थ्याद्दोषनिवृत्तेः॥ पशुहिंसादिष्विवेत्येवं प्राप्ते अभिधीयते॥ नावचनस्य गतं तत्र संभावात्॥ अविरुद्धं ह्यस्मिन्बाल्यश

दृष्टाभिलष्ये लभ्यमाने न विध्यंतरव्याघातकल्पना युक्ता प्राधान्योपकाराय चांगं विधीयते॥ ज्ञानाभ्यासश्चात्र ध्यानमिह यतीनामनवे

यं॥ न च सकलायां बाल्यवयस्यां गीक्रियमाणायां ज्ञानाभ्यासः संभाव्यते॥ तस्माद्दान्तरो भावविशेषो बाल्यस्याप्ररूढेंद्रियत्वादिरिह बा
ल्यमाशीयते॥ तदाहानादिकुर्वन्निति ज्ञानाध्ययनधार्मिकत्वादिभिरात्मानमविख्यापयन्दंभदर्पादिरहितो भवेत्॥ यथा बालोऽप्ररूढेंद्रियत
या न परेषामात्मानं भावयितुमीहते॥ तद्देवमस्य वाक्यस्य प्रधानोपकार्यर्थानुगम उपपद्यते॥ यथा चोक्तं स्मृतिकारैः॥ यं न संतं न चासंतं नाश्रु
तं न बहुश्रुतं॥ न सुवृत्तं न दुर्वृत्तं वेद कश्चित्स ब्राह्मणः॥ गूढधर्माश्रितो विद्वानज्ञातचरितं चरेत्॥ अंधवज्जडवच्चापि मूकवच्च महीं चरेत्॥ अव्य
क्तलिंगो व्यक्ताचार इति चैवमादि॥छ॥ ऐहिकमप्रस्तुतप्रतिबंधे तद्दर्शनात्॥५१॥ सर्वापेक्षा च यज्ञादिश्रुतेरित्यत आरभ्योच्चावचं विद्या
साधनमवधारितं॥ तस्य फलं विद्यासिध्यंति किमिहैव जन्मनि सिध्यति॥ उत कदाचिदमुत्रापीति चिंत्यते॥ किं तावत्प्राप्तमिहैवेति॥ किं कारणं॥
श्रवणादिपूर्विका हि विद्या॥ न च कश्चिदमुत्र मे विद्या जायतामित्यभिसंधाय श्रवणादिषु प्रवर्तते॥ समान एव तु जन्मनि विद्याजन्माभिसंधाय
तेषु प्रवर्तमानो दृश्यते॥ यज्ञादीन्यपि श्रवणादिद्वारेणैव विद्यां जनयंति॥ प्रमाणजन्यत्वाद्विद्यायाः॥ तस्मादैहिकमेव विद्याजन्मेत्येवं प्राप्ते व
दामः॥ ऐहिकं विद्याजन्म भवति॥ असति प्रस्तुतप्रतिबंधे एतदुक्तं भवति॥ यदा प्रक्रांतस्य विद्यासाधनस्य कश्चित्प्रतिबंधो न क्रियते॥ उप
स्थितविपाकेन कर्मांतरेण तदेहैव विद्योत्पद्यते॥ यदा तु खलु तत्प्रतिबंधः क्रियते तदामुत्रेति॥ उपस्थितविपाकत्वं च कर्मणो देशकालनिमि
त्तोपनिपाताद्भवति॥ यानि चैकस्य कर्मणो विपाकाभिव्यंजकानि देशकालनिमित्तानि तान्येवान्यस्यापीति न नियंतुं शक्यते॥ यतो विरुद्धफलान्यपि क
र्माणि भवंति॥ शास्त्रमप्यस्य कर्मण इदं फलमित्येतावति पर्यवसितं॥ न देशकालनिमित्तविशेषमपि संकीर्तयति॥ साधनवीर्यविशेषा
त्त्वतींद्रिया कस्यचिच्छक्तिराविर्भवति॥ तत्प्रतिबद्धा परस्य तिष्ठति॥ न चाविशेषेण विद्यायामभिसंधिर्नोत्पद्यते॥ इहामुत्र वा मे विद्या जायता
मित्यभिसंधेर्निरंकुशत्वात्॥ श्रवणादिद्वारेणापि विद्योत्पद्यमाना प्रतिबंधक्षयापेक्षयैवोत्पद्यते॥ तथा च श्रुतिर्दुर्बोधत्वमात्मनो दर्शयति॥
श्रवणायापि बहुभिर्यो न लभ्यः शृण्वंतोऽपि बहवो यं न विद्युः॥ आश्चर्यो वक्ता कुशलोऽस्य लब्धा आश्चर्यो ज्ञाता कुशलानुशिष्ट इति॥ गर्भ
स्थ एव च वामदेवः प्रतिपेदे ब्रह्मभावमिति वदंती जन्मांतरसंचितात्साधनाज्जन्मांतरे विद्योत्पत्तिं दर्शयति॥ न हि गर्भस्थस्यैवैहिकं किंचि
त्साधनं संभाव्यते॥ स्मृतावपि॥ अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छतीत्यर्जुनेन पृष्टो भगवान्वासुदेवो न हि कल्याणकृत्कश्चिद्दु ३९
र्गतिं तात गच्छतीत्युक्त्वा पुनस्तस्य पुण्यलोकप्राप्तिं साधुकुले संभूतिं चाभिधायानंतरं॥ तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकमित्या
दिनानेकजन्मसंसिद्धस्ततो याति परां गतिमित्यंतेनैतदेव दर्शयति॥ तस्मादैहिकमामुष्मिकं वा विद्याजन्म प्रतिबंधक्षयापेक्ष
मिति स्थितं॥छ॥ एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः॥५२॥ यथा मुमुक्षोर्विद्यासाधनावलंबिनः साधनवीर्यविशेषाद्विद्याल

289/1913

क्षणे फले ऐहिकामुष्मिकफललक्षणो विशेषप्रतिनियमो दृष्टः॥ एवं मुक्तिफललक्षणोऽप्युत्कर्षापकर्षकृतः कश्चिद्विशेषप्रतिनि
यमः स्यादित्याशंक्याहैवं मुक्तिफलानियम इति॥ न खलु मुक्तिफले कश्चिदेवंभूतो विशेषनियम आशंकनीयः॥ कुतः॥ तदवस्था
वधृतेः॥ मुक्त्यवस्था हि सर्ववेदांतेष्वेकरूपैवावधार्यते॥ ब्रह्मैव हि मुक्त्यवस्था॥ न च ब्रह्मणोऽनेकाकारयोगोऽस्ति॥ एकलिंगत्वावधारणात्॥
अस्थूलमनणु॥ स एष नेति नेत्यात्मा॥ यत्र नान्यत्पश्यति॥ ब्रह्मैवेदममृतं पुरस्तात्॥ इदं सर्वं यदयमात्मा॥ स वा एष महानज आ
त्माऽजरोऽमरोऽमृतोऽभयो ब्रह्म॥ यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदित्यादिश्रुतिभ्यः॥ अपि च विद्यासाधनं स्ववीर्यविशेषात्स्वफ
ल एव विद्यायां कंचिदतिशयमासंजयेत्॥ न विद्याफले मुक्तौ॥ तत्साध्यं नित्यसिद्धस्वभावमेव विद्ययाधिगम्यत इत्यसकृद्वादिष्म
न च तस्यामप्युत्कर्षनिकर्षात्मकोऽतिशय उपपद्यते॥ निकृष्टाया विद्यात्वाभावात्॥ उत्कृष्टैव हि विद्या भवति॥ तस्मात्तस्यां चिराचिरोत्पत्ति
रूपोऽतिशयो भवन्भवेत्॥ न तु मुक्तौ कश्चिदतिशयसंभवोऽस्ति॥ विद्याभेदाभावादपि तत्फलनियमाभावः॥ कर्मफलवत्॥ न हि मुक्ति
साधनभूताया विद्यायाः कर्मणामिव भेदोऽस्ति॥ सगुणासु तु विद्यासु मनोमयः प्राणशरीर इत्याद्यासु गुणावापोद्वापवशाद्भेदोप
पत्तौ सत्यामुपपद्यते यथास्वं फलनियमः॥ कर्मफलवत्॥ तथा च लिंगदर्शनं यथायथोपासते तदेव भवतीति॥ नैवं निर्गुणायां विद्यायां
गुणाभावात्॥ तथा च स्मृतिः॥ न हि गतिरधिकास्ति कस्यचित्सति हि गुणे प्रवदंत्यतुल्यतां॥ इति॥ तदवस्थावधृतेरिति पदाभ्यासो
ध्यायपरिसमाप्तिं द्योतयति॥छ॥ ॥इति शारीरकमीमांसाभाष्ये शंकरभगवत्पादकृतौ तृतीयाध्यायस्य चतुर्थः पादः समाप्तः॥३॥
श्रीकृष्णार्पणमस्तु॥

291/1913

॥ॐ नमः श्रीगणेशाय॥ ॥आवृत्तिरसकृदुपदेशात्॥१॥ तृतीयेध्यायेसगुणनिर्गुणासु विद्यासु साधनाश्रयो विचारः प्रायेणात्य
गात्॥ अथेह चतुर्थे फलाश्रय आगमिष्यति। प्रसंगागतं चान्यदपि वा किंचिच्चिंतयिष्यति। प्रथमं तावत्कतिभिश्चिदधिकरणैः साधनाश्र
यविचारशेषमेवानुसरामः॥ आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्य विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः। आत्मानमुपासीतेत्ये
वमादिश्रवणेषु संशयः। किं सकृत्प्रत्ययः कर्तव्यः आहोस्विदावृत्तिरिति। किं तावत्प्राप्तं सकृत्प्रत्ययस्यात् प्रयाजादिवत्। तावता शास्त्रार्थस्य कृ
तार्थत्वात्। अश्रूयमाणायां ह्यावृत्तौ क्रियमाणायामशास्त्रार्थकृतो भवेत्। नन्वसकृदुपदेशा उदाहृताः श्रोतव्यो मंतव्यो निदिध्यासितव्य इ
ति। एवमपि यावच्छब्दमावर्तयेत् सकृच्छ्रवणं सकृन्मननं सकृन्निदिध्यासनं चेति नातिरिक्तं। सकृदुपदेशेषु तु वेदोपासीतेत्यादिष्वनावृत्ति
रित्येवं प्राप्ते ब्रूमः। प्रत्ययावृत्तिः कर्तव्या कुतः। असकृदुपदेशात्। श्रोतव्यो मंतव्यो निदिध्यासितव्य इत्येवंजातीरोभयोक्तः। यत्रत्वस्य
सर्वमात्मैवाभूत्तत्केन कं पश्येदित्यादिश्रुतिभ्यः) नायकोऽप्यसकृदुपदेशः प्रत्ययावृत्तिं सूचयति। नन्वुक्तं यावच्छब्दमेवावर्तयेन्नाधिकमि
ति दर्शनपर्यवसानत्वादेषां। दर्शनपर्यवसानानि हि श्रवणादीन्यावर्त्यमानानि दृष्टार्थानि भवंति। यथावघातादीनि तंडुलादिनि
ष्पत्तिपर्यवसानानि तद्वत्। अपि च। उपासनं निदिध्यासनं चेत्यंतरणीतावृत्तिगुणैव क्रियाभिधीयते। तथा हि। लोके गुरुमुपास्ते राजान
मुपास्त इति च यस्तात्पर्येण गुर्वादीननुवर्तते स एवमुच्यते। तथा ध्यायति प्रोषितनाथा पतिमिति या निरंतरस्मरणा पतिं प्रति सोत्कंठा सैव
मभिधीयते। विद्युपास्त्योश्च वेदांतेषु व्यतिकरेण प्रयोगो दृश्यते। कचिद्धि विदिनोपक्रम्योपासिनोपसंहरति। यथा यस्तद्वेद यत्स वेद स मयैत
दुक्तस्यात्रानु म एतां भगवो देवतां शाधि यां देवतामुपास्स इति। क्वचिच्चोपासिनोपक्रम्य विदिनोपसंहरति। यथा मनो ब्रह्मेत्युपासीतेत्य
त्र भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेदेति। तस्मादसकृदुपदेशेष्वप्यावृत्तिसिद्धिः। असकृदुपदेशस्त्वावृत्तेः सूचकः॥ ॥
लिंगाच्च॥ लिंगमपि प्रत्ययावृत्तिं प्रत्याययति। तथा हि। उद्गीथविज्ञानं प्रस्तुत्यादित्य उद्गीथ इत्येतदेकपुत्रतादोषेणापोद्य रश्मींस्त्वं पर्यावर्तय परि
रश्मिबहुत्वविज्ञानं बहुपुत्रताये विदधात्सिद्धवत्प्रत्ययावृत्तिं दर्शयति तत्सामान्यात्सर्वप्रत्ययेष्वावृत्तिसिद्धिः॥ ॥अत्राह॥ भवतु नाम सा
ध्यफलेषु प्रत्ययेष्वावृत्तिः साध्यस्य निर्वाहस्य संभवात् यस्तु परब्रह्मविषयः प्रत्ययो नित्यशुद्धबुद्धमुक्तस्वभावमेवात्मभूतं परं ब्रह्म सम
र्पयति तत्र किमर्थावृत्तिरिति॥ सकृत्तु तौ ब्रह्मात्मत्वप्रतीत्यनुपपत्तेरावृत्त्यभ्युपगम इति चेत्। नावृत्तावपि तदनुपपत्तेः॥ यदि हि त
त्त्वमसीत्येवं। जातीयकं वाक्यं सकृच्छ्रूयमाणं ब्रह्मात्मत्वप्रतीतिं नोत्पादयेत्तत्तदेवावर्त्यमानमुत्पादयिष्यतीति का प्रत्याशा स्यात्॥

अथोच्येत॥ न केवलं वाक्यं कंचिदर्थं साक्षात्कर्तुं शक्नोति। अतो युक्त्यपेक्षं वाक्यमनुभावयिष्यति ब्रह्मात्मत्वमिति। तथाप्यावृत्त्यानर्थक्यमेव। सापि हि युक्तिः सकृत्प्रवृत्तैव स्वमर्थमनुभावयिष्यति। अथापि स्यात्॥ युक्त्या वाक्येन च सामान्यविषयमेव विज्ञानं क्रियते न विशेषविषयं। यथास्ति मे हृदये शूलमित्यतो वाक्याद्गात्रकंपादिलिंगाच्च शूलसद्भावसामान्यमेव परः प्रतिपद्यते न विशेषमनुभवति यथास एव शूली। विशेषानुभवाच्चाविद्याया निवर्तकः तदर्थमावृत्तिरिति चेत्। न। असकृदपि तावन्मात्रे क्रियमाणे विशेषविज्ञानोत्पत्त्यसंभवात्। न हि सकृत्प्रयुक्ताभ्यां शास्त्रयुक्तिभ्यामनवगतो विशेषः शतकृत्वोपि प्रयुज्यमानाभ्यामवगंतुं शक्यते। तस्माद्यदि शास्त्रयुक्तिभ्यां विशेषः प्रतिपाद्येत यदि वा सामान्यमुभयथापि सकृत्प्रवृत्ते एवैते स्वकार्यं कुरुत इत्यावृत्त्यनुपयोगः। न च सकृत्प्रयुक्ते शास्त्रयुक्ती कस्यचिदनुभवं नोत्पादयत इति शक्यं नियंतुं विचित्रप्रज्ञत्वात्प्रतिपत्तॄणां। अपि च। अनेकांशोपेते लौकिके पदार्थे सामान्यविशेषवत्येकेनावधानेनैकमंशमवधारयत्परेणापरमिति स्यात्तत्राभ्यासोपयोगः। यथा दीर्घप्रपाठकग्रहणादिषु। न तु निर्विशेषे ब्रह्मणि सामान्यविशेषरहिते चैतन्यमात्रात्मके प्रमोत्पत्तावभ्यासापेक्षा युक्तेति अत्रोच्यते॥ भवेदावृत्त्यानर्थक्यं तं प्रति यस्तत्त्वमसीति सकृदुक्तमेव ब्रह्मात्मत्वमनुभवितुं शक्नुयात्। यस्तु न शक्नोति तं प्रत्युपयुज्यत एवावृत्तिः। तथा हि छांदोग्ये तत्त्वमसि श्वेतकेतो इत्युपदिश्य भूय एव मा भगवान्विज्ञापयत्विति पुनः पुनः परिचोद्यमानस्तत्तदाशंकाकारणं निराकृत्य तत्त्वमसीत्येवासकृदुपदिशति। तथा च श्रोतव्यो मंतव्यो निदिध्यासितव्य इत्यादि दर्शितं। ननूक्तं सकृच्छ्रुतं चेत्तत्त्वमसीति वाक्यं स्वमर्थमनुभावयितुं न शक्नोति तत आवर्त्यमानमपि नैव शक्ष्यतीति। नैष दोषः। न हि दृष्टेऽनुपपन्नं नाम। दृश्यंते हि सकृच्छ्रुताद्वाक्यान्मंदं प्रतीयमानं वाक्यार्थमावृत्तिपक्षे तत्तदाभासव्युदासेन सम्यक्प्रतिपद्यमानाः। अपि च। तत्त्वमसीत्येतद्वाक्यं त्वंपदार्थस्य तत्पदार्थभावमाचष्टे॥ तत्पदेन च प्रकृतं सद्ब्रह्मेक्षितृ जगतो जन्मादिकारणमभिधीयते॥ सत्यं ज्ञानमनं ब्रह्म नं विज्ञानमानंदं ब्रह्म अदृष्टं द्रष्टृ अविज्ञातं विज्ञातृ अजमजरममरमस्थूलमनण्वह्रस्वमदीर्घमित्यादिशास्त्रप्रसिद्धं। तत्राजादिशब्दैर्जन्मादयो भावविकारा निवर्तिताः। अस्थूलादिशब्दैः स्थौल्यादयो द्रव्यधर्माः। विज्ञानादिशब्दैश्चैतन्यप्रकाशात्मकत्वमुक्तं एष व्यावृत्तसर्वसंसारधर्मकोनुभवात्मको ब्रह्मसंज्ञकस्तत्पदार्थो वेदांताभियुक्तानां प्रसिद्धः॥ तथा त्वंपदार्थो

293/19/3

पि प्रत्यगात्मा श्रोता देहादारभ्य प्रत्यगात्मतया संभाव्यमानश्चैतन्यपर्यंतत्वेनावधारितः। तत्र येषामेतौ पदार्थावज्ञानसंशयविपर्ययप्रतिबद्धौ तेषां तत्त्वमसीत्येतद्वाक्यं स्वार्थे प्रमां नोत्पादयितुं शक्नोति। पदार्थज्ञानपूर्वकत्वाद्वाक्यार्थस्येति। अतस्तान्प्रत्येष्टव्यः पदार्थविवेकप्रयोजनः शास्त्रयुक्त्यभ्यासः। यद्यपि च प्रतिपत्तव्य आत्मा निरंशस्तथाप्यध्यारोपितं तस्मिन्बह्वंशत्वं देहेंद्रियमनोबुद्धिविषयवेदनादि लक्षणं तत्रैकेनावधानेनैकमंशमपोहति परेणापरमिति युज्यते तत्र क्रमवती प्रतिपत्तिः। तत्तु पूर्वरूपमेवात्मप्रतिपत्तेः। येषां पुनर्निपुणमतीनां नाज्ञानसंशयविपर्ययलक्षणः पदार्थविषयः प्रतिबंधोस्ति ते शक्नुवंति सकृदुक्तमेव तत्त्वमसिवाक्यार्थमनुभवितुमिति तान्प्रत्यावृत्त्यानर्थक्यमिष्टमेव। सकृदुत्पन्नैव ह्यात्मप्रतिपत्तिरविद्यां निवर्तयतीति नात्र कश्चिदपि क्रमोऽभ्युपगम्यते। सत्यमेवं युज्येत यदि कस्यचिदेवं प्रतिपत्तिर्भवेत्॥ बलवती ह्यात्मनो दुःखित्वादिप्रतिपत्तिः। अतो न दुःखित्वाद्यभावं कश्चित्प्रतिपद्यत इति चेत्। न। देहाद्यभिमानवद्दुःखित्वाद्यभिमानस्य मिथ्याभिमानत्वोपपत्तेः। प्रत्यक्षं हि देहे छिद्यमाने दह्यमाने वाहं छिद्ये दह्ये इति च मिथ्याभिमानो दृष्टः। तथा बाह्यतरेष्वपि पुत्रमित्रादिषु संतप्यमानेष्वहमेव संतप्य इत्यध्यारोपयति। तथा दुःखित्वाद्यभिमानोपि स्यात् देहादिवदेव। चैतन्याद्बहिरुपलभ्यमानत्वाद्दुःखित्वादीनां। सुषुप्तादिषु चाननुवृत्तेः। चैतन्यस्य तु सुषुप्तेप्यनुवृत्तिमामनंति। यद्वै तन्न पश्यति पश्यन्वै तन्न पश्यतीत्यादिना तस्मात्सर्वदुःखविनिर्मुक्तैकचैतन्यात्मकोहमित्येष आत्मानुभवः। न चैवमात्मानमनुभवतः किंचिदन्यत्कृत्यमवशिष्यते। तथा च श्रुतिः किं प्रजया करिष्यामो येषां नोयमात्मायं लोक इत्यात्मविदः कर्तव्याभावं दर्शयति। स्मृतिरपि। यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः। आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यत इति॥ यस्य तु नैषोनुभवो द्रागिव जायते तं प्रत्यनुभवार्थ एवावृत्त्यभ्युपगमः। तत्रापि न तत्त्वमसिवाक्यार्थात्प्रच्याव्यावृत्तौ प्रवर्तयेत्॥ न हि वरघाताय कन्यामुद्वाहयंति। नियुक्तस्य चास्मिन्नधिकृतोहं कर्ता ममेदं कर्तव्यमित्यवश्यं ब्रह्मप्रत्ययविपरीतः प्रत्यय उत्पद्यते। यस्तु स्वयमेव मंदमतिरप्रतिभानात्तं वाक्यार्थं जिहासेत्तस्यैतस्मिन्नेव वाक्यार्थे स्थिरीकार आवृत्त्यादिवाचोयुक्त्याऽभ्युपेयते। तस्मात्परब्रह्मविषयेपि प्रत्ययेन तदुपायोपदेशेष्वावृत्तिसिद्धिः॥४।१।२॥ आत्मेति तूपगच्छंति ग्राहयंति च॥४।१।३॥ यः शास्त्रोक्तविशेषणः परमात्मा स किमहमिति ग्रहीतव्यः किं वा मदन्य इति। कथं पुनरात्मशब्दे प्रत्यगात्मविषये श्रूयमाणे संशय इत्युच्यते। अयमात्मशब्दो मुख्यः शक्यतेभ्युपगंतुं सति जीवेश्वरयोरभेदसंभवे। इतरथा तु गौणोयमभ्युपगंतव्य इति मन्यते। किं तावत्प्राप्तं। नाहमिति ग्राह्यः। न ह्यपहतपाप्मत्वादिगुणो विपरी

शा० भा०
२

न गुणत्वेन शक्यो ग्रहीतुं विपरीतगुणो वापहतपाप्मादिगुणत्वेन। अपहतपाप्मादिगुणश्च परमेश्वरो विपरीतगुणः शारीरः। ईश्वरस्य च
संसार्यात्मत्वे ईश्वराभावप्रसङ्गः। ततः शास्त्रानर्थक्यं। संसारिणोऽपीश्वरात्मत्वे अधिकार्यभावाच्छास्त्रानर्थक्यमेव प्रत्यक्षादिविरोधश्च। अन्य
त्वेऽपि तादात्म्यदर्शनं शास्त्रात्कर्तव्यं। प्रतिमादिष्विव विष्ण्वादिदर्शनमिति चेत्॥ काममेवं भवतु। न तु संसारिणो मुख्य आत्मेश्वर इत्येतन्ना
यन्तः प्रापयितव्यं। एवं प्राप्ते ब्रूमः॥ आत्मेत्येव परमेश्वरः प्रतिपत्तव्यः। तथा हि परमेश्वरप्रक्रियायां जाबाला आत्मत्वेनैवैतमुपगच्छन्ति। त्वं
वा अहमस्मि भगवो देवते अहं वै त्वमसि देवते। तथान्येऽप्यहं ब्रह्मास्मीत्येवमादय आत्मत्वोपगमा द्रष्टव्याः॥ ग्राहयन्ति चात्मत्वेनैवेश्वरं वे
दवाक्यानि। एष त आत्मान्तर्याम्यमृतस्तत्सत्यं स आत्मा तत्त्वमसीत्येवमादीनि। यदुक्तं। प्रतीकदर्शनमिदं विष्णुप्रतिमान्याये
न भविष्यतीति। तदयुक्तं। गौणत्वप्रसङ्गात्॥ वाक्यवैरूप्याच्च। यत्र हि प्रतीकदृष्टिरभिप्रेयते सकृदेव तत्र वचनं भवति यथा मनो ब्रह्म आदि
त्यो ब्रह्मेत्यादि। इह पुनस्त्वमहमस्म्यहं च त्वमसीत्याह। अतः प्रतीकश्रुतिवैरूप्यादभेदप्रतिपत्तिः। भेददृष्ट्यपवादाच्च। त
था हि। अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति न स वेद। मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति सर्वं तं परादाद्योऽन्यत्रात्मनः स
र्वं वेदेत्येवमाद्या भूयसी श्रुतिर्भेददर्शनमपवदति। यत्तूक्तं न विरुद्धगुणयोरन्योन्यात्मत्वसंभव इति। नायं दोषः॥ विरुद्धगुणताया मिथ्यात्वो
पपत्तेः। यत्पुनरुक्तं। ईश्वराभावप्रसङ्ग इति। तदसत्। शास्त्रप्रामाण्यात्। अनभ्युपगमाच्च। न हीश्वरस्य संसार्यात्मत्वं प्रतिपाद्यत इत्य
भ्युपगच्छामः। किं तर्हि संसारिणः संसारित्वापोहेनेश्वरात्मत्वं प्रतिपिपादयिषितमिति। एवं च सत्यद्वैतेश्वरस्यापहतपाप्मत्वादिगु
णता विपरीतगुणता त्वितरस्य मिथ्येति व्यवतिष्ठते। यदप्युक्तं। अधिकार्यभावः प्रत्यक्षादिविरोधश्चेति। तदप्यसत्। प्राक्प्रबोधा
त्संसारित्वाभ्युपगमात्। तद्विषयत्वाच्च प्रत्यक्षादिव्यवहारस्य। यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदित्यादिना हि प्रबोधे प्रत्य
क्षाद्यभावं दर्शयति। प्रत्यक्षाद्यभावे श्रुतेरप्यभावप्रसङ्ग इति चेन्न। इष्टत्वात्। अत्र पितापिता भवतीत्युपक्रम्य वेदा अवेदा इति वचनादिष्यत
एवास्माभिः श्रुतेरप्यभावः प्रबोधे। कस्य पुनरयमप्रबोध इति चेत्। यस्त्वं पृच्छसि तस्येति वदामः। नन्वहमीश्वर एवोक्तः श्रुत्या। यद्येवं
प्रतिबुद्धोऽसि नास्ति कस्यचिदप्रबोधः। योऽपि दोषश्चोद्यते कैश्चिदविद्यया किलात्मनः सद्वितीयत्वादद्वैतानुपपत्तिरिति सोऽप्येते
न प्रत्युक्तः। तस्मादात्मेत्येवेश्वरे मनो दधीत ॥३॥ न प्रतीके न हि सः ॥४॥ मनो ब्रह्मेत्युपासीतेत्यध्यात्ममथाधिदैवतमाकाशो ब्र
ह्मेति तथादित्यो ब्रह्मेत्यादेशः। स यो नाम ब्रह्मेत्युपास्त इत्येवमादिषु प्रतीकोपासनेषु संशयः। किं तेष्वात्मग्रहः कर्तव्यो न वेति।
किं तावत्प्राप्तं। तेष्वप्यात्मग्रह एव युक्तः। कस्मात्। ब्रह्मणः श्रुतिष्वात्मत्वेन प्रसिद्धत्वात्॥ प्रतीकानामपि ब्रह्मविकारत्वाद्ब्रह्मत्वे
सत्यात्मत्वोपपत्तेरित्येवं प्राप्ते ब्रूमः। न प्रतीकेष्वात्ममतिं बध्नीयात्। न हि स उपासकः प्रतीकानि व्यस्तान्यात्मत्वेनाकलयेत्। यत्पुन २

295/1913

ब्रह्मविकारत्वात्प्रतीकानां ब्रह्मत्वं ततश्चात्मत्वमिति तदसत्। प्रतीकाभावप्रसङ्गात्। विकारस्वरूपोपमर्देन हि नामादिजातस्य ब्रह्मत्वमे
वाश्रितं भवति। स्वरूपोपमर्दे च नामादीनां कुतः प्रतीकत्वमात्मग्रहो वा। न च ब्रह्मण आत्मत्वाद्ब्रह्मदृष्ट्युपदेशेष्वात्मदृष्टिः कल्प्या। कर्तृ
त्वाद्यनिराकरणात्॥ कर्तृत्वादिसर्वसंसारधर्मनिराकरणेन हि ब्रह्मण आत्मत्वोपदेशस्तदनिराकरणेन चोपासनविधानं॥ अतश्चोपास
कस्य प्रतीकैः समत्वादात्मग्रहो नोपपद्यते। न हि रुचकस्वस्तिकयोरितरेतरात्मत्वमस्ति। सुवर्णात्मनेव तु ब्रह्मात्मनैकत्वे प्रतीकाभावप्रसङ्गम
वोचाम। अतो न प्रतीकेष्वात्मदृष्टिः क्रियते ॥४॥ ब्रह्मदृष्टिरुत्कर्षात्॥ तेष्वेवोदाहरणेष्वन्यः संशयः। किमादित्यादिदृष्टयो ब्रह्मण्यध्या
सितव्याः। किं वा ब्रह्मदृष्टिरादित्यादिष्विति। कुतः संशयः। समानाधिकरण्ये कारणानवधारणात्। अत्र हि ब्रह्मशब्दस्यादित्यादिशब्दैः सा
मानाधिकरण्यमुपलभ्यते। आदित्यो ब्रह्म प्राणो ब्रह्म विद्युद्ब्रह्मेत्यादिसमानविभक्तिनिर्देशात्। न चात्राञ्जसं सामानाधिकरण्यमव
कल्पते। अर्थान्तरवचनत्वाद्ब्रह्मादित्यादिशब्दानां। न हि भवति गौरश्व इति सामानाधिकरण्यं। ननु प्रकृतिविकारभावाद्ब्रह्मादित्यादीनां मृच्छरा
वादिवत्सामानाधिकरण्यं स्यात्। नेत्युच्यते। विकारप्रलयो ह्येवं प्रकृतिसामानाधिकरण्यात्स्यात्। ततश्च प्रतीकाभावप्रसङ्गमवोचाम।
परमात्मवाक्यं चेदं तदानीं स्यात्। ततश्चोपासनाधिकारो बाध्येत। परिमितविकारोपादानं च व्यर्थं॥ तस्माद्ब्राह्मणोऽग्निर्वैश्वानर इत्यादि
वत्। अन्यतरत्रान्यतरदृष्ट्यध्यासे सति क्व कस्य दृष्टिरध्यस्यतामिति संशयः। तत्रानियमः। नियमकारिणः शास्त्रस्याभावादिति प्राप्तं। अ
थवा॥ आदित्यादिदृष्टय एव ब्रह्मणि कर्तव्या इत्येवं प्राप्तं। एवं ह्यादित्यादिदृष्टिभिर्ब्रह्मोपासितं भवति। ब्रह्मोपासनं च फलवदिति शा
स्त्रमर्यादा। तस्मान्न ब्रह्मदृष्टिरादित्यादिष्विति। एवं प्राप्ते ब्रूमः॥ ब्रह्मदृष्टिरेवादित्यादिषु स्यादिति कस्मात्॥ उत्कर्षात्। एवमुत्कर्षे
णादित्यादयो दृष्टा भवन्ति। उत्कृष्टदृष्टेस्तेष्वध्यासात्। तथा च लौकिको न्यायोऽनुगतो भवति। उत्कृष्टदृष्टिर्हि निकृष्टेऽध्यसितव्येति लौकिको
न्यायः। यथा राजदृष्टिः क्षत्तरि। स चानुसर्तव्यः। विपर्यये प्रत्यवायप्रसङ्गात्॥ न हि क्षत्तृदृष्टिपरिगृहीतो राजा निकर्षं नीयमानः श्रेयसे स्या
त्। ननु शास्त्रप्रामाण्यादनाशङ्कनीयोऽत्र प्रत्यवायप्रसङ्गः। न च लौकिकेन न्यायेन शास्त्रीया दृष्टिर्नियन्तुं युक्तेति। अत्रोच्यते। नि
र्धारिते शास्त्रार्थ एतदेवं स्यात्। संदिग्धे तु तस्मिंस्तन्निर्णयं प्रति लौकिकोऽपि न्याय आश्रीयमाणो न विरुध्यते। तेन चोत्कृष्टदृष्ट्यध्या
से शास्त्रार्थेऽवधार्यमाणे निकृष्टदृष्टिमध्यस्यन्प्रत्यवेयादिति श्लिष्यते। प्राथम्याच्चादित्यादिशब्दानां मुख्यार्थत्वमविरोधाद्ग्रहीतव्यं
तैः स्ववृत्त्यावरुद्धायां बुद्धौ पश्चादवतरतो ब्रह्मशब्दस्य मुख्यया वृत्त्या सामानाधिकरण्यासंभवाद्ब्रह्मदृष्टिविधानार्थतैवा
वतिष्ठते। इतिपरत्वादपि ब्रह्मशब्दस्यैष एवार्थो न्याय्यः॥ तथा हि॥ ब्रह्मेत्यादेशः। ब्रह्मेत्युपासीत। ब्रह्मेत्युपास्त इति सर्वत्रेतिपर
ब्रह्मशब्दमुच्चारयति। शुद्धांस्त्वादित्यादिशब्दांस्ततश्च यथा शुक्तिकां रजतमिति प्रत्येतीत्यत्र शुक्तिवचन एव शुक्तिकाशब्दो रजत

३ शब्दस्मरणजननीनिलक्षणार्थाः ॥ प्रत्येकत्वेव हिंकारादिषु लोकजनमितिनतु नत्वरजनमस्ति। एवमप्याप्यादित्यादीनामुद्गीथादिषु गयितिगम्यते। वाक्यशेषो
पि च हितोपासितिदृष्टेनादित्यादिनेवोपासिता किंपंचा आप्यमानान्दर्शयति। सयएतदेवं विद्वानादित्यं ब्रह्मेत्युपास्ते। पोवा चं ब्रह्मेत्युपास्ते। यः संकल्पं
ब्रह्मेत्युपास्त इति च। एवमर्कं। ब्रह्मोपासनत्वादित्याद्युपासने पित्र्यमेव स्यात्। सर्वाध्यक्षत्वानुवर्णितं चेत्फलमनउपपद्यते इत्यत्र ईदृशं। चात्र
प्रमाणउपास्यत्वं यत्प्रतीकेषु नहदृस्य आरोपणं। प्रतिमादिषु विष्णवादीनाम् ॥ ५७.६ ॥ आदित्यादिमतयश्चाङ्ग उपपत्तेः ॥ पएवासीत्यत्र तेन मु
द्गीथमुपासीत लोकेषु पंचविधं सामोपासीत वाचि सप्तविधं सामोपासीत। इयमेवर्गग्निः साम। ए च सा मा दिष्टं गावचद्रु पासनेषु संशयः। किं
मादित्यादिष्टद्गीथादिषु दृष्टयो विधीयन्ते। किं वोद्गीथादिष्वेवादित्यादिदृष्टय इति न त्वानियमः नियमकारणाभावादिति प्राप्ते ॥ नत्वत्र ब्रह्मणइव
त्यापि विरुत्कर्षविशेषावधारणे। ब्रह्म हि समस्तजगत्कारणत्वादपहतपाप्मत्वादिगुणयोगाच्चादित्यादिभ्य उत्कृष्टमिति शक्यमेवधारयि
तुं। नत्वादित्यादीनामुद्गीथादीनां च विकारत्वाविशेषात्किंचिदुत्कर्षविशेषावधारणकारणमस्ति। अथवा नियमेनैवोद्गीथादिमतय आदित्यादिषु अध्यस्ये
रन्। कस्मात् ॥ कर्मात्मकत्वादुद्गीथादीनां कर्मणश्च फलप्राप्तिप्रसिद्धेः। उद्गीथादिमतिभिरुपास्यमाना आदित्यादयः कर्मात्मकाः संतः फल
हेतवो भविष्यन्ति। तथा चेयमेवर्गग्निः सामेत्यत्र तदेतदेतस्यामृच्यध्यूढं सामेत्यच्छन्न पृथिवी निर्दिश्यतिसामशब्देनाग्निं। तत्र पृथिव्यग्न्योर्ऋ
क्सामदृष्टि चिकीर्षितो यामवकल्पते। नत्वृक्साम योः पृथिव्यग्निदृष्टि चिकीर्षितां अत्र हि राजवद्भिः करणाद्ब्राह्मणत्वस्यउपवर्यतेन
राजनिक्षत्रवाचः। अपि च लोकेषु पंचविधं सामोपासीतेत्य धिकरणनिर्देशात् लोकेषु सामाध्यस्तव्यमितिप्रतीयते एत गायत्रप्राणेषु
प्रोतमिति चैतदेवं दर्शयति। प्रथमनिर्दिष्टेषु चादित्यादिषु चरमनिर्दिष्टं ब्रह्मत्वाध्यस्तं। आदित्योब्रह्मेत्यादेशादित्यादिषु प्रथमनिर्दिष्टत्वात्
पृथिव्यादयश्चरमनिर्दिष्टा हिंकारादयः। पृथिवी हिंकारइत्यादिश्रुतिषु अतोनांगेष्वादित्यादिष्वंगमतिक्षेपत इत्येवंप्राप्ते ब्रूमः। आदित्यादिमतय
एवांगेषूद्गीथादिषु कर्मसंपद्धिः। पदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवतीति च विद्यायाः कर्मसमृद्धिहेतुतां दर्शयति। भवतु
कर्मसमृद्धिफलत्वेवं। स्वतन्त्रफलपुनरुक्थं येन देवं विद्वान्लोकेषु पंचविधं सामोपास्त इत्यादिषु। तेष्वप्यधिकृताधिकारात्प्रकृतापे
क्षैव संनिकर्षेण ब्रह्मफलकल्पना पुत्रुकागोदोहनादिनियमवत्। फलात्मकत्वादादित्यादीनामुद्गीथादिभ्यः कर्मात्मकेभ्य उत्कर्षोपपत्तिः। आ
दित्यादिप्राप्तिलक्षणं हि कर्मफलं शिष्यते श्रुतिषु। अपि च। ओमित्येतदक्षरमुद्गीथमुपासीत खल्वेतस्यैवाक्षरस्योपव्याख्यानं भवतीति
चोद्गीथमेवोपास्यत्वेनोपक्रम्यादित्यादिमतिः विधाति। पत्तत्कं ॥ उद्गीथादिमतिभिरुपास्यमाना आदित्यादयः कर्मभूयं भूत्वा फलं करिष्यन्तीति। तद
युक्तं। स्वयमेवोपासनस्य कर्मत्वात्फलवत्त्वोपपत्तेः ॥ आदित्यादिभावेनापि च दृश्यमानानामुद्गीथादीनां कर्मात्मकत्वानपायात्। तदेतदेतस्यामृच्य
ध्यूढं सामेति तु लाक्षणिकः पृथिव्यग्न्योर्ऋक्सामशब्दप्रयोगः। लक्षणा च यथासंभव सन्निकृष्टेन विप्रकृष्टेन वास्वार्थसंबंधेन प्रवर्तते। तत्र य
द्यप्यृक्सामयोर्याथाः पृथिव्यग्निदृष्टि चिकीर्षितास्तथापि प्रसिद्धयोर्ऋक्सामयोर्भेदेनानुकीर्तनात्पृथिव्याग्न्योः सन्निधानात्तयोरेवैषऋक्साम

297/1913

शब्दप्रयोगऋक्सामसंबंधादिति निश्चीयते। ऋग्वाक्यमपि हि कारणाद्वाज्ञानमुपसर्पेत्सन्निवारयितुं पार्यते। इयमेवर्गग्निरिति च पथाक्षरन्यासमृचि पृथिवीत्व
मवधारयति। पृथिव्यां हि ऋक्त्वमवधार्यसा दृष्टिरयमेवर्गित्यक्षरन्यासः स्यात्। यएवं विद्वान्साम गायतीति चांगाश्रयमेव विज्ञानमुपसंहरति न पृथिव्याश्रयत्वं॥ त
था लोकेषु पंचविधं सामोपासीतेति यद्यपि सप्तमीनिर्दिष्टा लोकास्तथापि सामस्वेव ते ध्यस्येरन्। द्वितीयानिर्दिष्टत्वात्साम्न उपास्यत्वावगमात्। साम
नि हि लोकेष्वध्यस्यमानेषु साम लोकात्मनोपासितं भवति। अन्यथा पुनर्लोकाः सामात्मनोपासिताः स्युः। एतेन गायत्रं प्राणेषु प्रोतमित्यादि व्याख्या
तं। यत्रापि तुल्यो द्वितीयानिर्देश अथ खल्वमुमादित्यं सप्तविधं सामोपासीतेति। तत्रापि समस्तस्य खलु साम्न उपासनं साधु इति पंचविधस्य च सप्तवि
धस्य च साम्न एवोपास्यत्वोपक्रमात्तस्मिन्नेवादित्याद्यध्यासः। एतस्मादेव च साम्न उपास्यत्वावगमात् पृथिवी हिंकार इत्यादिनिर्देशविपर्ययेपि हिं
कारादिष्वेव पृथिव्यादिदृष्टिः। तस्मादनंगाश्रया आदित्यादिमतयोंगेषूद्गीथादिषु क्षिप्येरन्निति सिद्धं ॥ ५.७ ॥ आसीनः संभवात् ॥ कर्मांगसंबद्धेषु
तावदुपासनेषु कर्मतंत्रत्वान्नासीनादि चिन्ता। नापि सम्यग्दर्शने वस्तुतंत्रत्वात् ज्ञानस्य। इतरेषु तूपासनेषु किमनियमेन तिष्ठन्नासीनः शयानो वा
प्रवर्तेतानियमेनास्यै वा निवर्तयति (गत्यादीनां चित्तविक्षेपकत्वात्) नवामानसत्वादुपासनस्यानियमः शरीरस्थितेरित्येवं प्राप्ते ब्रवीत्यासीन एवोपासी
तेति। कुतः संभवात् ॥ उपासनं नाम समानप्रत्ययप्रवाहकरणं न च तद्गच्छतो धावतो वा संभवति। गत्यादीनां चित्तविक्षेपकरत्वात्। तिष्ठतोपि देह
धारणे व्यापृतं मनो न सूक्ष्मवस्तुनिरीक्षणक्षमं भवति। शयानस्याप्यकस्मादेव निद्रयाभिभूयेत। आसीनस्य त्वेवंजातीयको भूयान्दोषः सुपरि
हर इति संभवति तस्योपासनं॥ ध्यानाच्च ॥ अपि च ॥ ध्यायत्यर्थ एष यत्समानप्रत्ययप्रवाहकरणं ध्यायतिश्च प्रशिथिलांगचेष्टेषु प्रतिष्ठितदृष्टि
ष्वेकविषयाक्षिप्तचित्तेषूपचर्यमाणो दृश्यते ॥ ध्यायति बकः ध्यायति प्रोषितबंधुरिति ॥ आसीनश्चानायासो भवति। तस्मादप्यासीनक
र्मोपासनम् ॥ ॥ अचलत्वं चापेक्ष्य ॥ अपि च ॥ ध्यायतीव पृथिवीत्यत्र पृथिव्यादिष्वचलत्वमेवापेक्ष्य ध्यायतिवादो भवति ॥ तच्च लिंगमुपासनस्या
सीनकर्मत्वे ॥ ॥ स्मरन्ति च ॥ १० ॥ स्मरन्त्यपि च शिष्टा उपासनांगत्वेनासनं। शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मन इत्यादिना। अतएव च पद्मा
सनादीनामासनविशेषाणामुपदेशो योगशास्त्रे ॥ ५७६ ॥ यत्रैकाग्रता तत्राविशेषात् ॥ ११ ॥ दिग्देशकालेषु संशयः। किमस्ति कश्चिन्नियमो नास्ति
वेति। प्रायेण वैदिकेष्वारंभेषु दिगादिनियमदर्शनात्स्यादिहापि कश्चिन्नियम इति यस्य मतिस्तं प्रत्याह दिग्देशकालेष्वर्थलक्षण एव नियमः यत्रै
वास्य दिशि देशे काले वा मनसः सौकर्येणैकाग्रता भवति तत्रैवोपासीत। प्राचीदिक् पूर्वाह्णप्राचीनप्रवणादिवद्विशेषाश्रवणात्॥ एकाग्र
तायाइष्टायाः सर्वत्राविशेषात्। ननु विशेषमपि केचिदामनन्ति समे शुचौ शर्करावह्निवालुकाविवर्जिते शब्दजलाश्रयादिभिः॥ मनोनुकूले न
तु चक्षुपीडने गुहानिवाताश्रयणे प्रयोजयेदिति यथेति। उच्यते। सत्यमस्त्येवंजातीयको नियमः। सति त्वेतस्मिन् तेषु विशेषेष्वनियम इति सुहृद्भू
त्वा आचार्य आचष्टे मनोनुकूल इति चैषा श्रुतिर्यत्रैकाग्रता तत्रैवेत्येतदेव दर्शयति ॥ ११ ॥ आप्रयाणात्तत्रापि हि दृष्टम् ॥ १२ ॥ आवृत्तिः सर्वोपा
सनेष्वादर्तव्येति स्थितमाद्यधिकरणे। तत्र यानि तावत्सम्यग्दर्शनार्थान्युपासनानि तान्यवघातादिवत्कार्यपर्यवसानानीति ज्ञातमेवेषामावृत्ति

शा०भा०
६ ४

नियमाणं।।नहिसम्यग्दर्शनेकार्यंनिष्पन्नेपश्चात्तदनंतरंकिंचित्साधयितुंशक्यं।अनियोज्यब्रह्मात्मत्वप्रतिपत्तेःशास्त्रस्याविषयत्वात् यानिपुनरभ्यु
दयफलानितेषांविनाकिंचित्प्रयत्नंचिरकालंप्रत्ययमभ्यस्यादृसेन।आरात्तिविशिष्टस्योपासनशब्दार्थस्यचलनत्वादिसेवंप्राप्तेभ्रमः।।आप्रा
यणादावर्तयेत्प्रत्ययं।अंत्यप्रत्ययवशाद्धदृष्टफलप्राप्तेः।कर्माण्यपिहिजन्मांतरोपभोग्यंफलमारभमाणानितदनुरूपंभावनाविज्ञानंप्रया
णकाल आक्षिपंति।सविज्ञानोभवतिसविज्ञानमेवान्ववक्रामति।यच्चित्तस्तेनैषप्राणमायाति।प्राणस्तेजसायुक्तःसहात्मनायथासंकल्पितं
लोकंनयतीत्येवमादिश्रुतिभ्यः।तृणजलूकानिदर्शनाच्चप्रत्ययास्त्वेतत्स्वरूपानुवर्तिनः किमन्यत्प्रायणकालभाविभावनाविज्ञानमपेक्षे
रन्।तस्माद्येप्रतिपत्तव्यफलभावनात्मकाःप्रत्ययास्तेषामाप्रायणादावृत्तिः।।तथाचश्रुतिःसयावत्क्रतुरयमस्माल्लोकात्प्रैतीतिप्रायणकालेपि
प्रत्ययानुवृत्तिंदर्शयति।स्मृतिरपि।यंयंवापिस्मरन्भावंत्यजत्यंतेकलेवरं।तंतमेवैतिकौंतेयसदातद्भावभावितइति।।प्रयाणकालेमनसाचलेन
नियमेनवेलायामेवमुपप्रतिपद्यंतेत्यिवमरणवेलायामपिकर्तव्यशेषंश्रावयति।१२।।तदधिगमउत्तरपूर्वाघयोरश्लेषविनाशौतद्व्यप
देशात्।।१३।।गतस्तृतीयशेषः।अथेदानींब्रह्मविद्याफलंप्रतिचिंताप्रतायते।ब्रह्माधिगमेसतितद्विपरीतफलंदुरितंक्षीयतेनवेतिसंशयः
।।किंतावत्प्राप्तं।फलार्थत्वात्कर्मणःफलमदत्वानसंभवतिक्षयःफलदायिनीह्यस्यशक्तिःश्रुत्यासमधिगता।यदितदंतरेणैवफलोपभोगमु
पशमेतश्रुतिःकदर्थितास्यात्।स्मरंतिच।नहिकर्मक्षीयतइति।नन्वेवंसतिप्रायश्चित्तोपदेशोनर्थकःप्राप्नोति।नैषदोषः।प्रायश्चित्ता
नांनैमित्तिकत्वोपपत्तेर्गृहदाहेष्ट्यादिवत्।अपिच।प्रायश्चित्तानांदोषसंयोगेनविधानाद्भवेदपिदोषक्षपणार्थता।नत्वेवंब्रह्मविद्याया
विधानमस्ति।नन्वनभ्युपगम्यमानेब्रह्मविदःकर्मक्षयेतत्फलस्यावश्यंभोक्तव्यत्वादनिर्मोक्षःस्यात्।नेत्युच्यते।।देशकालनिमित्तापेक्षोमोक्षःकर्म
फलवद्भविष्यति।तस्मान्नब्रह्माधिगमेदुरितनिवृत्तिरित्येवंप्राप्तेब्रूमः।तदधिगमेब्रह्माधिगमेसतिउत्तरपूर्वयोरघयोरश्लेषविनाशौभवतः।उत्तरस्या
श्लेषःपूर्वस्यविनाशः।कस्मात्।तद्व्यपदेशात्।तथाहिब्रह्मविद्याप्रक्रियायांसंभाव्यमानसंबंधस्यागामिनोदुरितस्यानभिसंबंधंविदुषोव्यप
दिशतियथापुष्करपलाशआपोनश्लिष्यंतएवमेवंविदिपापंकर्मनश्लिष्यतइति।तथाविनाशमपिपूर्वोपचितस्यदुरितस्यव्यपदिशति।तद्य
थेषीकातूलमग्नौप्रोतंप्रदूयेतैवंहास्यसर्वेपाप्मानःप्रदूयंतइति।अयमपरःकर्मक्षयव्यपदेशोभवति।भिद्यतेहृदयग्रंथिश्छिद्यंतेसर्वसंशयाःक्षी
यंतेचास्यकर्माणितस्मिन्दृष्टेपरावरइति।यदुक्तं।।अनुपभुक्तफलस्यकर्मणःक्षयकल्पनायांशास्त्रंकदर्थितंस्यादिति।नैषदोषः।नहिवयंक
र्मणःफलदायिनींशक्तिमवजानीमहेविद्यतएवसासातुविद्यादिनाकारणांतरेणप्रतिबध्यतइतिवदामः।शक्तिसद्भावमात्रेचस्याच्छास्त्रंव्याप्रिय
तेनप्रतिबंधाप्रतिबंधयोरपि।नहिकर्मक्षीयतइत्येतदपिस्मरणमौत्सर्गिकं।नभोगादृतेकर्मक्षीयतेतदर्थत्वादिति।इष्यतएवतुप्रायश्चित्ताद्
नानस्यक्षयः।सर्वंपाप्मानंतरतितरतिब्रह्महत्यांयोश्वमेधेनयजतेयउचैनमेवंवेदेत्यादिश्रुतिस्मृतिभ्यः।यत्तूक्तं।नैमित्तिकानिप्रायश्चित्ता
निभविष्यंतीति।तदसत्।दोषसंयोगेनचोद्यमानानामेषांदोषनिर्घातफलसंभवेफलांतरकल्पनानुपपत्तेः।यत्पुनरुक्तं।नप्रायश्चित्तवद्दो
षक्षयोद्देशेनविद्याविधानमस्तीति।अत्रब्रूमः।सगुणासुतावद्विद्यासुविद्यतएवविधानं।तासुचवाक्यशेषएैश्वर्यप्राप्तिःपाप्मनिवृत्तिश्च ४

299/1913

विद्यावतउच्यते।।तयोश्चाविवक्षाकारणंनास्तीति।।अतःपाप्मप्रहाणपूर्वकैश्वर्यप्राप्तिस्तासांफलमितिनिश्चीयते।।निर्गुणा
यांतुविद्यायांयद्यपिविधानंनास्तितथाप्यकर्तात्मत्वबोधात्कर्मप्रदाहप्रसिद्धिः।।अश्लेषइतिचागामिषुकर्मसुकर्तृत्वमेवनप्रति
पद्यतेब्रह्मविदितिदर्शयति।अतिक्रांतेषुतुयद्यपिमिथ्याज्ञानात्कर्तृत्वंप्रतिपेदइवतथापिविद्यासामर्थ्यान्मिथ्याज्ञाननिवृत्तेस्ता
न्यपिप्रलीयंतइत्याहविनाशइति।पूर्वप्रसिद्धकर्तृत्वभोक्तृत्वविपरीतंहित्रिष्वपिकालेष्वकर्तृत्वाभोक्तृत्वस्वरूपंब्रह्माहमस्मिनेतःपूर्व
मपिकर्ताभोक्तावाहमासनेदानींनापिभविष्यत्कालइतिब्रह्मविदवगच्छति।।एवमेवचमोक्षउपपद्यते।।अन्यथाह्यनादिका
लप्रवृत्तानांकर्मणांक्षयाभावेमोक्षाभावःस्यात्।।नचदेशकालनिमित्तापेक्षोमोक्षःकर्मफलवद्भवितुमर्हति।।अनित्यत्वप्रसंगा
त्परोक्षत्वानुपपत्तेश्चज्ञानफलस्यतस्माद्ब्रह्माधिगमेदुरितक्षयइतिस्थितम् १२ इतरस्याप्येवमसंश्लेषःपातेतु १४ पूर्वस्मि
न्नधिकरणेबंधहेतोरघस्यस्वाभाविकस्याश्लेषविनाशौज्ञाननिमित्तौशास्त्रव्यपदेशान्निरूपितौ।।धर्मस्यपुनःशास्त्रीयत्वाच्छा
स्त्रीयेणज्ञानेनाविरोधइत्याशंक्य।।तन्निराकरणायपूर्वाधिकरणन्यायातिदेशःक्रियतेइतरस्यापिपुण्यकर्मणःएवंअघवदसंश्ले
षविनाशौज्ञानवतोभवतः।।कुतःतस्यापिस्वफलहेतुत्वेनज्ञानफलप्रतिबंधित्वप्रसंगात्।।उभेउहैवैषएतेतरतीत्यादिश्रुतिषु
चदुःकृतवत्सुकृतस्यापिप्रणाशव्यपदेशात्।।अकर्त्रात्मत्वबोधनिमित्तस्यचकर्मक्षयस्यसुकृतदुष्कृतयोस्तुल्यत्वात्।।क्षीयंतेचा
स्यकर्माणीतिचाविशेषश्रुतेः।।यत्रापिकेवलएवपाप्मशब्दःपठ्यतेतत्रापितेनैवपुण्यमप्याकलितमितिद्रष्टव्यं।।ज्ञानापेक्षयानि
कृष्टफलत्वात्।।अस्तिचश्रुतौपुण्येपिपाप्मशब्दः।नैनंसेतुमहोरात्रेतरतइत्यत्रसहदुष्कृतेनसुकृतमप्यनुक्रम्यसर्वेपाप्मानोतो
निवर्तंतइत्यविशेषेणैवप्रकृतेपुण्येपाप्मशब्दप्रयोगात्।।पातेत्विति।।तुशब्दोवधारणार्थः।।एवंधर्माधर्मयोर्बंधहेत्वोर्विद्यासाम
र्थ्यादश्लेषविनाशसिद्धेरवश्यंभाविनीविदुषःशरीरपातेमुक्तिरित्यवधारयति १४२ अनारब्धकार्येएवतुपूर्वेतदवधेः १५ पू
र्वयोरधिकरणयोर्ज्ञाननिमित्तःसुकृतदुष्कृतयोर्विनाशोवधारितःसकिमविशेषेणारब्धकार्ययोरनारब्धकार्ययोश्चभवतिउतविशे
षेणारब्धकार्ययोरेवेतिविचार्यते।।तत्रउभेउहैवैषएतेतरतीत्येवमादिश्रुतिविशेषाश्रवणादविशेषेणैवक्षयइत्येवंप्राप्तेप्रत्याह

शा॰भा॰
५

अनारब्धकार्येएवत्वितिअप्रवृत्तफलएवेतिपूर्वजन्मांतरसंचितेअस्मिन्नपिचजन्मनिप्राक्ज्ञानायतनंजन्मेतिनिर्मितं॥कुतए
तत्॥तस्यतावदेवचिरंयावन्नविमोक्ष्यइतिशरीरपातावधिकरणात्क्षेमप्राप्तेः॥इतरथाहिज्ञानादशेषकर्मक्षयेसतिस्थितिहे
त्वभावात्ज्ञानप्राप्त्यनंतरमेवक्षेममश्नुवीततत्रशरीरपातप्रतीक्षांनाचक्षीत॥अकर्त्रात्मबोधःकर्माणिक्षपयन्कथंकानिचित्क्षपयेत्॥
कानिचिच्चोपेक्षेत॥नहिसमानेग्निबीजसंपर्केकेषांचिद्बीजशक्तिःक्षीयतेकेषांचिन्नक्षीयतइतिशक्यमंगीकर्तुमिति॥उच्यते॥नताव
दनाश्रित्यारब्धकार्यंकर्माशयंज्ञानोत्पत्तिरुपपद्यते॥आश्रितेचतस्मिन्कुलालचक्रवत्प्रवृत्तवेगस्यांतरालेप्रतिबंधासंभवाद्भवति
वेगक्षयप्रतिपालनं॥अकर्त्रात्मबोधोपिहिमिथ्याज्ञानबाधनेनकर्माण्युच्छिनत्तिबाधितमपितुमिथ्याज्ञानंद्विचंद्रज्ञानवत्सं
स्कारवशात्कंचित्कालमनुवर्ततएव॥अपिच॥नैवात्रविवदितव्यंब्रह्मविदःकंचित्कालंशरीरंध्रियतइति॥कथंह्येकस्यस्वहृदय
प्रत्ययंब्रह्मवेदनंदेहधारणंचापरेणप्रतिक्षेप्तुंशक्येत॥श्रुतिस्मृतिषुचस्थितप्रज्ञलक्षणनिर्देशेनैतदेवनिरुच्यते॥तस्मादनारब्ध
कार्ययोरेवसुकृतदुष्कृतयोर्विद्यासामर्थ्यात्क्षयइतिनिर्णयः ३६२ अग्निहोत्रादितुतत्कार्यायैवतद्दर्शनात् १५ पुण्यस्याप्यश्ले
षविनाशयोरघन्यायोतिदिष्टःसोतिदेशःसर्वपुण्यविषयइत्याशंक्यप्रतिवक्ति॥अग्निहोत्रादित्वितितुशब्दआशंकामपनुदति॥
यन्नित्यंकर्मवैदिकमग्निहोत्रादितत्तत्कार्यायैवभवति॥ज्ञानस्ययत्कार्यंतदेवास्यापिकार्यमित्यर्थः॥कुतः॥तमेतंवेदानुवचनेनब्रा
ह्मणाविविदिषंतियज्ञेनदानेनेत्यादिदर्शनात्॥ननुज्ञानकर्मणोर्विलक्षणकार्ययोःकार्यैकत्वानुपपत्तिः॥नैषदोषः॥ज्वरमरणकार्य
योरपिदधिविषयोर्गुडमंत्रसंयुक्तयोस्तुष्टिपुष्टिकार्यंदर्शनात्॥तद्वत्कर्मणोपिज्ञानसंयुक्तस्यमोक्षकार्योपपत्तेः॥नन्वनारभ्योमोक्षः
कथमस्यकर्मकार्यत्वमुच्यते॥नैषदोषः॥आरादुपकारकत्वात्कर्मणः॥ज्ञानस्यैवहिप्रापकंसत्कर्मप्रणाड्यामोक्षकारणमित्युपचर्य
ते॥अतएवचातिक्रांतविषयमेतत्कार्यैकत्वाभिधानं॥नहिब्रह्मविदआगाम्यग्निहोत्रादिसंभवति॥अनियोज्यब्रह्मात्मत्वप्रति
पत्तेःशास्त्रस्याविषयत्वात्॥सगुणासुतुविद्यासुकर्तृत्वानतिवृत्तेःसंभवत्यागाम्यप्यग्निहोत्रादि॥तस्यापिनिरभिसंधिनःकार्यांत
राभावाद्विद्यासंगत्युपपत्तिः॥किंविषयंपुनरिदमश्लेषविनाशवचनंकिंविषयंवाविनियोगवचनमेकेषांशाखिनां॥तस्यपुत्रादाय ५
मुपयन्तिसुहृदःसाधुकृत्यामितीदंविचार्यते॥किंविद्यासंयुक्तमेवाग्निहोत्रादिकंकर्ममुमुक्षोर्विद्याहेतुत्वेनतयासहैककार्यत्वंप्रतिप

301/1913

द्यतेनकेवलंउतविद्यासंयुक्तंकेवलंचाविशेषेणेतिकुतःसंशयः॥तमेतमात्मानंयज्ञेनविविदिषंतीतियज्ञादीनामविशेषेणात्मवेद
नांगत्वेनश्रवणात्॥विद्यासंयुक्तस्यचाग्निहोत्रादेर्विशिष्टत्वावगमात्॥किंतावत्प्राप्तंविद्यासंयुक्तमेवकर्माग्निहोत्राद्यात्मविद्याशे
षत्वंप्रतिपद्यतेनविद्याविहीनंविद्यायुक्तस्यविशिष्टत्वावगमाद्विद्याविहीनात्॥यदहरेवजुहोतितदहःपुनर्मृत्युमपजयत्येवंविद्वानि
त्यादिश्रुतिभ्यः॥बुद्ध्यायुक्तोययापार्थकर्मबंधंप्रहास्यसिदूरेणह्यवरंकर्मबुद्धियोगाद्धनंजयेत्यादिस्मृतिभ्यश्चेत्येवंप्राप्तेप्रतिप
द्यतेयदेवविद्ययेतिहि॥सत्यमेतत्॥विद्यासंयुक्तंकर्माग्निहोत्रादिकंविद्यासंयुक्तंकर्माग्निहोत्रादिकं॥कस्मात्॥तमेतमात्मानंयज्ञेन
विविदिषंतीत्यत्राविशेषेणाग्निहोत्रादेर्विद्याविहीनाद्विशिष्टत्वावगमाद्विद्वान्द्विषंतःपापकृत्यामिति॥अतउत्तरंपठति॥ ॥अ
तोन्यापित्येकेषामुभयोः १७ अतोग्निहोत्रादेर्नित्यात्कर्मणोन्यापिह्यस्तिसाधुकृत्यायाफलमभिसंधायक्रियतेतस्याएषविनि
योगउक्तएकेषांशाखिनांसुहृदःसाधुकृत्यामुपयंतीति॥तस्याएवचेदमघवदश्लेषविनाशनिरूपणं॥इतरस्याप्येवमसंश्लेषइ
ति॥तथाजातफलकस्यकाम्यस्यकर्मणोविद्याप्रत्यनुपकारकत्वेसंप्रतिपत्तिरुभयोरपिजैमिनिबादरायणयोराचार्ययोः ३६४
यदेवविद्ययेतिहि १८ समधिगतमेतदनंतराधिकरणेनित्यमग्निहोत्रादिकंकर्ममुमुक्षुणामोक्षप्रयोजनोद्देशेनकृतमुपात्त
दुरितक्षयहेतुत्वद्वारेणसत्त्वशुद्धिकारणतांप्रतिपद्यमानंमोक्षप्रयोजनब्रह्माधिगमनिमित्तत्वेनब्रह्मविद्ययासहैककार्यंभवती
ति॥तत्राग्निहोत्रादिकर्मांगव्यपाश्रयविद्यासंयुक्तंकेवलंचास्ति॥यएवंविद्वान्जुहोति॥यएवंविद्वान्शंसति॥यएवंविद्वानुद
गायतितस्मादेवंविदमेवब्रह्माणंकुर्वीतनानेवंविदं॥तेनोभौकुरुतोयश्चैतदेवंवेदयश्चनवेदेत्यादिवचनेभ्योविद्यासंयुक्तंकेव
लमसंयुक्तमस्ति॥विद्याविहीनमग्निहोत्राद्यात्मविद्याहेतुनानपेक्ष्यमितियुक्तं॥नैतदेवं॥विद्यासहायस्याग्निहोत्रादेर्विद्यानिमित्ते
नसामर्थ्यातिशयेनयोगादात्मज्ञानंप्रतिकश्चित्कारणत्वातिशयोभविष्यतिनतथाविहीनस्येतियुक्तंकल्पयितुंनतुयज्ञेनविवि
दिषंतीत्यविशेषेणात्मज्ञानांगत्वेनश्रुतस्याग्निहोत्रादेरनंगत्वंशक्यमभ्युपगंतुं॥तथाहिश्रुतिर्यदेवविद्ययाकरोतिश्रद्धयोपनिष
दातदेववीर्यवत्तरंभवतीतिविद्यासंयुक्तस्यकर्मणोग्निहोत्रादेर्वीर्यवत्तरत्वाभिधानेनस्वकार्यंप्रतिकंचिदतिशयंब्रुवाणाविद्या
विहीनस्यतस्यैवतत्प्रयोजनंप्रतिवीर्यवत्त्वंदर्शयति॥कर्मणोवीर्यवत्त्वंतद्यत्स्वप्रयोजनसाधनसहत्वं॥तस्माद्विद्यासंयुक्तंनित्य

शा॰ भा॰
६

मग्निहोत्रादि विद्याविहीनं केवलमपि मुमुक्षुणा मोक्षप्रयोजनेन देशेन हजन्मनि जन्मांतरे च प्राक् ज्ञानोत्पत्तेः कृतं यत्तद्यथासामर्थ्यं
ब्रह्माधिगमनप्रतिबंधकारणोपात्तदुरितक्षयहेतुत्वद्वारेण ब्रह्माधिगमप्रकारणत्वं प्रतिपद्यमानं श्रवणमननश्रद्धातात्पर्याद्यंतरं
गकारणापेक्षं ब्रह्मविद्यायासहैककार्यं भवतीति स्थितं १६५ भोगेन त्वितरे क्षपयित्वा संपद्यते १९ अनारब्धकार्ययोः पुण्यपा
पयोर्विद्यासामर्थ्यात्क्षय उक्तः ॥ इतरे तु आरब्धकार्ये पुण्यपापे उपभोगेन क्षपयित्वा ब्रह्म संपद्यते ॥ तस्य तावदेव चिरं यावन्न विमो
क्ष्येथ संपत्स्य इति ब्रह्मैव सन् ब्रह्माप्येतीति चैवमादिश्रुतिभ्यः ॥ ननु सत्यपि सम्यग्दर्शने यथा प्राक् देहपातात् भेददर्शनं द्विचंद्रदर्श
नन्यायेनानुवृत्तमेवं पश्चादप्यनुवर्तेत ॥ न निमित्ताभावात् ॥ उपभोगशेषक्षपणं हि तत्रानुवृत्तिनिमित्तं न च तादृशमत्र किंचिदस्ति
॥ नन्वपरः कर्माशयो भिन्नवमुपभोगमारभ्यते ॥ तस्य दग्धबीजत्वात् ॥ मिथ्याज्ञानावष्टंभं हि कर्मांतरं देहपात उपभोगांतरमार
भेत तच्च मिथ्याज्ञानं सम्यग्ज्ञानेन दग्धमिति ॥ अतः साध्वेतदारब्धकार्यक्षये विदुषः कैवल्यमवश्यं भवतीति १५ इती श्रीशारीर
कमीमांसाभाष्ये शंकरभगवत्पादकृतौ चतुर्थाध्यायस्य प्रथमः पादः ॥ वाङ् मनसि दर्शनाच्छब्दाच्च ॥ अथापरासु विद्यासु फ
लप्राप्तये देवयानं पंथानमवतारयिष्यन् प्रथमं तावद्यथाशास्त्रमुत्क्रांतिक्रममाचष्टे ॥ समाना हि विद्वदविदुषोरुत्क्रांतिरिति वक्ष्य
ति ॥ अस्ति प्रायणविषया श्रुतिः ॥ अस्य सोम्य पुरुषस्य प्रयतो वाङ् मनसि संपद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायामि
ति ॥ किमिह वाच एव वृत्तिमत्या मनसि संपत्तिरुच्यत उत वाग्वृत्तेरिति विशयः ॥ तत्र वागेव तावन्मनसि संपद्यत इति प्राप्तं ॥ तथा हि
श्रुतिरनुगृहीता भवति ॥ इतरथा लक्षणा स्यात् ॥ श्रुतिलक्षणाविषये च श्रुतिर्न्याय्या न लक्षणा तस्माद्वाच एवायं मनसि प्रलय इत्ये
वं प्राप्ते ब्रूमः ॥ वाग्वृत्तिर्मनसि संपद्यत इति ॥ कथं वाग्वृत्तिरिति व्याख्यायते ॥ यावता वाङ्मनसीत्येवाचार्यः पठति ॥ सत्यमेतत् ॥
पठिष्यति तु परस्तादविभागो वचनादिति ॥ तस्मादत्र वृत्त्युपशममात्रं विवक्षतीति मन्यते ॥ तत्त्वप्रलयविवक्षायां तु सर्वत्रैवावि
भागसाम्यात् किं परत्रैव विशिंष्यादविभाग इति तस्मादत्र वृत्त्युपसंहारविवक्षायां वाग्वृत्तिः पूर्वमुपसंह्रियते मनोवृत्ताववस्थिता
यामित्यर्थः ॥ कस्मात् ॥ दर्शनात् ॥ दृश्यते हि वाग्वृत्तेः पूर्वोपसंहारो मनोवृत्तौ विद्यमानायां न तु वाच एव वृत्तिमत्या मनस्युपसंहारः के ६
नचिदपि द्रष्टुं शक्यते ॥ ननु श्रुतिसामर्थ्याद्वाच एवायं मनस्यप्ययो युक्त इत्युक्तं ॥ नेत्याह ॥ अतत्प्रकृतित्वात् ॥ यस्य हि यत उत्पत्तिस्त

303/1913

यस्य हि यत उत्पत्तिस्तस्य तत्र प्रलयो न्याय्यः ॥ मृदीव शरावस्य न च मनसो वागुत्पद्यत इति किंचन प्रमाणमस्ति ॥ वृत्त्युद्भवाभिभवौ त्वप्रकृतिस
माश्रयावपि दृश्येते ॥ पार्थिवेभ्यो हीधनेभ्यस्तैजसस्याग्नेर्वृत्तिरुद्भवति अद्भ्यश्च उपशाम्यति ॥ कथं तर्ह्यस्मिन्पक्षे शब्दः वाङ् मन
सि संपद्यत इति ॥ अत आह ॥ शब्दाच्चेति ॥ शब्दोप्यस्मिन्पक्षेवकल्पते ॥ वृत्तिवृत्तिमतोरभेदोपचारादित्यर्थः ॥ अत एव च सर्वाण्यनु तस्मादु
पशांततेजाः पुनर्भवमिंद्रियैर्मनसि संपद्यमानैरित्यत्राविशेषेण सर्वेषामेवेंद्रियाणां मनसि संपत्तिः श्रूयते ॥ तत्रापि ॥ अत एव वाचश्चक्षु
रादीनामपि सवृत्तिके मनस्यवस्थिते वृत्तिलोपदर्शनात् ॥ तत्त्वप्रलयासंभवात् ॥ शब्दोपपत्तेश्च ॥ वृत्तिद्वारेणैव सर्वाणींद्रियाणि मनो
नुवर्तंते ॥ सर्वेषां करणानां मनस्युपसंहाराविशेषे सति वाचः पृथग्ग्रहणं वाङ् मनसि संपद्यत इत्युदाहरणानुरोधेन १६७ तन्मनः
प्राण उत्तरात् ॥ समधिगतमेतद्वाङ्मनसि संपद्यत इत्यत्र वृत्तिसंपत्तिविवक्षेति ॥ अथ यदुत्तरं वाक्यं मनः प्राण इति ॥ किमत्रापि वृत्ति
संपत्तिरेव विवक्ष्यते ॥ उत वृत्तिमत्संपत्तिरिति विचिकित्सायां वृत्तिमत्संपत्तिरिति विचिकित्सायां वृत्तिमत्संपत्तिरेवात्रेति प्राप्तं श्रु
त्यनुग्रहात् तत्प्रकृतित्वोपपत्तेश्च ॥ तथा ह्यन्नमयं हि सोम्य मनः आपोमयः प्राण इत्यन्नयोनि मन आमनंत्यब्योनिं च प्राणं ॥ आपश्चा
न्नमसृजंतेति श्रुतिः अतश्च यन्मनः प्राणे प्रलीयते ॥ अन्नमेव तदप्सु प्रलीयते अन्नमेव तदप्सु प्रलीयते अन्नं हि मनः आपश्च प्राणः
प्रकृतिविकाराभेदादित्येवं प्राप्ते ब्रूमः ॥ तदप्यगृहीतबाह्येंद्रियवृत्ति मनो वृत्तिद्वारेणैव प्राणे प्रलीयत इत्युत्तराद्वाक्यादवगंतव्यं ॥ तथा
हि ॥ सुषुप्सोर्मुमूर्षोश्च प्राणवृत्तौ परिस्पंदात्मिकायामवस्थितायां मनोवृत्तीनामुपशमो दृश्यते ॥ न च मनसः स्वरूपाप्ययः प्राणे संभ
वति ॥ अतत्प्रकृतित्वात् ॥ ननु दर्शितं मनसः प्राणप्रकृतित्वं ॥ नैतत्सारं ॥ न हीदृशेन प्राणाडिकेन तत्प्रकृतित्वेन मनः प्राणे संपत्तुमर्ह
ति ॥ एवमपीद्यन्ने मनः संपद्येताप्सु वान्नमप्स्वेव प्राणः नह्येतस्मिन्नपि पक्षे प्राणभावपरिणताभ्योऽद्भ्यो मनो जायत इति किंचन प्रमा
णमस्ति ॥ तस्मान्न मनसः प्राणे स्वरूपाप्ययः ॥ वृत्त्यप्ययेपि तु शब्दोवकल्पते ॥ वृत्तिवृत्तिमनोरभेदोपचारादिति दर्शितं ॥ सोध्यक्षे त
दुपगमादिभ्यः ४ स्थितमेतत् यस्य यतो नोत्पत्तिर्न तस्य तस्मिन्वृत्तिलयो न स्वरूपप्रलय इति ॥ इदमिदानीं प्राणस्तेजसीत्यत्र किं त्व
ते ॥ किं यथाश्रुति प्राणस्य तेजस्येव वृत्त्युपसंहारः किं वा देहेंद्रियपंजराध्यक्षे जीव इति ॥ तस्य श्रुतेरनतिशंकनीयत्वात् प्राणस्य तेजस्येव
संपत्तिः स्यात् ॥ अश्रुतकल्पना या अन्याय्यत्वादिति एवं प्राप्ते प्रतिपद्यते सोध्यक्ष इति ॥ स प्रकृतः प्राणः ॥ अध्यक्षे अविद्याकर्मपू
र्वप्रज्ञोपाधिके विज्ञानात्मन्यवतिष्ठते ॥ तत्प्रधाना प्राणवृत्तिर्भवतीत्यर्थः कुतः तदुपगमादिभ्यः ॥ एवमेवेममात्मानमंतकाले सर्वे प्रा

ब्र०भा० ७ णमभिसमायंति यत्रैतदूर्ध्वोछ्वासी भवतीति श्रुत्यंतरमध्यक्षोपगामिनः सर्वान् ॥ प्राणान् विशेषेण दर्शयति ॥ विशेषेण च
तमुत्क्रामंतं प्राणोनूत्क्रामतीति पंचवृत्तेः प्राणस्याध्यक्षानुगामित्वं दर्शयति ॥ तदनुवृत्तितां चेतरेषां ॥ प्राणमनूत्क्रामंतं सर्वे प्राणा अ
नूत्क्रामंतीति ॥ सविज्ञानो भवतीति चाध्यक्षस्यांतर्विज्ञानवत्त्वप्रदर्शनेन तस्मिन्नपीतकरणग्रामस्य प्राणस्यावस्थानं गमयति ॥ न
नु प्राणस्तेजसीति श्रूयते कथं प्राणोध्यक्ष इत्यधिकावापः क्रियते ॥ नैष दोषः ॥ अध्यक्षप्रधानत्वादुत्क्रमणादिव्यवहारस्य श्रुत्यं
तरगतस्यापि च विशेषस्यापेक्षणीयत्वात् ॥ कथं तर्हि प्राणस्तेजसीति श्रुतिरित्यत आह ॥ भूतेषु तत्श्रुतेः ५ स प्राणसंपृक्तोध्यक्ष
स्तेजःसहचरितेषु भूतेषु सूक्ष्मेष्ववतिष्ठत इत्यवगंतव्यं प्राणस्तेजसीत्यतःश्रुतेः ॥ ननु चेयं श्रुतिः प्राणस्य तेजसि स्थितिं दर्शयति न प्रा
णसंपृक्तस्याध्यक्षस्य ॥ नैष दोषः ॥ सोध्यक्ष इत्यध्यक्षस्याप्यंतराल उपसंख्यातत्वात् ॥ योपि हि स्रुघ्नान्मथुरां गत्वा मथुरायाः पाटलि
पुत्रं व्रजति सोपि स्रुघ्नात्पाटलिपुत्रं यातीति शक्यते वदितुं ॥ तस्मात्प्राणस्तेजसीति प्राणसंपृक्तस्याध्यक्षस्यैवैतत्तेजःसहचरितेषु भू
तेष्ववस्थानं कथं तेजःसहचरितेषु भूतेष्वित्युच्यते ॥ यावतैकमेव तेजः श्रूयते ॥ प्राणस्तेजसीत्यत आह ॥ नैकस्मिन्दर्शयतो हि ॥ नैक
स्मिन्नेव तेजसि शरीरांतरप्रेप्सावेलायां जीवोवतिष्ठते ॥ कार्यस्य शरीरस्यानेकात्मकत्वदर्शनात् ॥ दर्शयतश्चैतमर्थं प्रश्नप्रतिवच
ने ॥ आपः पुरुषवचस इति व्याख्यातं त्र्यात्मकत्वात्तु भूयस्त्वादित्यत्र श्रुतिस्मृती चैतमर्थं दर्शयतः श्रुतिः पृथिवीमय आपोमयो वायुम
य आकाशमयस्तेजोमय इत्याद्या ॥ स्मृतिरपि ॥ अण्व्यो मात्रा विनाशिन्यो दशार्धानां तु याः स्मृताः ॥ ताभिः सार्धमिदं सर्वं संभवत्यनु
पूर्वश इत्याद्या ॥ ननु चोपसंहृतेषु वागादिषु करणेषु शरीरांतरप्रेप्सावेलायां कायं तदा पुरुषो भवतीत्युपक्रम्य श्रुत्यंतरं कर्माश्रयतां
निरूपयति ॥ तौ ह यदूचतुः कर्म हैव तत्प्रशशंसतुरिति ॥ अत्रोच्यते ॥ तत्र कर्मप्रयुक्तस्य ग्रहातिग्रहसंज्ञकस्येंद्रियविषयात्मकस्य बं
धनस्य प्रवृत्तिरिति कर्मणः प्राधान्यं प्रदर्शितं न त्वाश्रयांतरं निवारितं ॥ तस्मादविरोधः ६ समाना चासृत्युपक्रमादमृतत्वं चानुपोष्य ॥ से
यमुत्क्रांतिः किं विद्वदविदुषोः समाना किं वा विशेषवतीति विशयानां विशेषवतीति तावत्प्राप्तं ॥ भूताश्रयविशिष्टा ह्येषा ॥ पुनर्भवाय च भू
तान्याश्रीयते ॥ न च विदुषः पुनर्भवः संभवति ॥ अमृतत्वं हि विद्वानश्नुत इति श्रुतिः ॥ तस्मादविदुष एवैषोत्क्रांतिः ॥ ननु विद्याप्रकरणे समा
म्नानाद्विदुष एवैषा भवेत् ॥ न स्वापादिवद्यथाप्राप्तानुकीर्तनात् ॥ यथा हि यत्रैतत्पुरुषः स्वपिति नामाशिशिषति नाम पिपासति नामेति
च सर्वप्राणिसाधारणा एव स्वापादयोनुकीर्त्यंते विद्याप्रकरणे प्रतिपिपादयिषितवस्तुप्रतिपादनानुगुण्येन न तु विदुषो विशेषवत्त्वो ७

305/1913

विधित्स्यंते एवमियमप्युत्क्रांतिरिदानीं गतेनानुकीर्त्यते ॥ यस्यां परस्यां देवतायां पुरुषस्य प्रयतस्तेजः संपद्यते स आत्मा तत्त्व
मसीति प्रतिपादयितुं प्रसिद्धा त्वेषाविदुषः ॥ न तस्य प्राणा उत्क्रामंतीति तस्मादविदुष एवैषेत्येवं प्राप्ते ब्रूमः ॥ समानैवैषोत्क्रांतिर्वाङ्म
नसीत्याद्या विद्वदविदुषोरासृत्युपक्रमाद्भवितुमर्हति ॥ अविशेषश्रवणात् ॥ अविद्वान् देहबीजभूतानि भूतसूक्ष्माण्याश्रित्य क
र्मप्रयुक्तो देहग्रहणमनुभवितुं संसरति विद्वांस्तु ज्ञानप्रकाशितं मोक्षनाडीद्वारमाश्रयते ॥ तदेतदासृत्युपक्रमादित्युक्तं ॥ ननु अमृ
तत्त्वं हि विदुषा प्राप्तव्यं न च तद्देशांतरायत्तं तत्र कुतो भूताश्रयत्वं सृत्युपक्रमो वेति ॥ अत्रोच्यते ॥ अनुपोष्य चेदमदग्ध्वात्यंतमवि
द्यादीन् क्लेशानपरविद्यासामर्थ्यादापेक्षिकममृतत्वं प्रेप्स्यते ॥ संभवति तत्र सृत्युपक्रमो भूताश्रयत्वं वा ॥ नहि निराश्रयाणां प्रा
णानां गतिरुपपद्यते ॥ तस्माददोषः ७ तदापीतेः संसारव्यपदेशात् ८ तेजः परस्यां देवतायामित्यत्र प्रकरणसामर्थ्यात्तद्य
थाप्रकृतं तेजः साध्यक्षं सप्राणं सकरणग्रामं भूतांतरसहितं प्रयतः पुंसः परस्यां देवतायां संपद्यत इत्येतदुक्तं भवति कीदृशी पु
नरियं संपत्तिः स्यादिति चिंत्यते ॥ तत्रात्यंतिक एव तावत्तत्स्वरूपप्रविलय इति प्राप्तं ॥ तत्प्रकृतित्वोपपत्तेः ॥ सर्वस्य हि जनिमतो वस्तु
जातस्य प्रकृतिः परा देवतेति प्रतिष्ठापितं ॥ तस्मादात्यंतिकोयमविभागापत्तिरित्येवं प्राप्ते ब्रूमः ॥ तत्तेज आदि भूतसूक्ष्मं श्रोत्रा
दिकरणाश्रयभूतं ॥ आपीतेः ॥ आसंसारमोक्षात्सम्यग्ज्ञाननिमित्तादवतिष्ठते ॥ योनिमन्ये प्रपद्यंते शरीरत्वाय देहिनः ॥ स्था
णुमन्येनुसंयंति यथाकर्म यथाश्रुतमित्यादिसंसारव्यपदेशात् ॥ अन्यथा हि सर्वः प्रायणसमय एवोपाधिप्रत्यस्तमयाद
त्यंतं ब्रह्म संपद्येत तत्र विधिशास्त्रं चानर्थकं स्याद्विद्याशास्त्रं च ॥ मिथ्याज्ञाननिमित्तश्च बंधो न सम्यग्ज्ञानादृते विस्रंसितुमर्ह
ति ॥ तस्मात्तत्प्रकृतित्वेपि सुषुप्तप्रलयवद्बीजभावावशेषैवैषा सत्संपत्तिः ॥ सूक्ष्मं प्रमाणतश्च तथोपलब्धेः ९ तच्चेतरभूतस
हितं तेजो जीवस्यास्माच्छरीरात्प्रवसत आश्रयभूतं स्वरूपतः परिमाणतश्च सूक्ष्मं भवितुमर्हति तथा हि नाडीनिष्क्रमणश्रवणा
दिभ्योस्य सौक्ष्म्यमुपलभ्यते ॥ तत्र तनुत्वात्संचारोपपत्तिः स्वच्छत्वाच्चाप्रतिघातोपपत्तिः ॥ अत एव च देहान्निर्गच्छन्पार्श्वस्थैर्नोप
पद्यते ॥ ॥ नोपमर्देनातः १० अत एव सूक्ष्मत्वान्नास्य स्थूलस्य शरीरस्योपमर्देन दाहादिनिमित्तेनेतरसूक्ष्मशरीरमुपमृद्य
ति ॥ ॥ अस्यैव चोपपत्तेरूष्मा ॥ ११ ॥ अस्यैव च सूक्ष्मस्य शरीरस्यैष ऊष्मा यमेतमस्मिञ्छरीरे संस्पर्शेनोष्माणं विजानंति

श०भा०
८

तथा हि मृतावस्थायामवस्थितेपि देहे विद्यमानेष्वपि रूपादिषु सर्वेषु देहगुणेषु नोष्मोपलभ्यते ॥ जीवदवस्थायां तूपलभ्यत
इति ॥ अत उपपद्यते प्रसिद्धशरीरव्यतिरिक्तव्यपाश्रय एवैष ऊष्मेति ॥ तथा च श्रुतिः ॥ उष्ण एव जीविष्यन् शीतो मरिष्यन्निति ॥
१७१ अप्रतिषेधादिति चेन्न शारीरात् १२ अमृतत्वं आनुपोष्येत्यतो विशेषणादात्यंतिकेमृतत्वे गत्युत्क्रांत्योरभावोभ्युप
गतस्तत्रापि केनचित्कारणेनोत्क्रांतिमाशंक्य प्रतिषेधति ॥ अथाकामयमानो योकामो निष्कामः आप्तकामः आत्मकामो नत
स्य प्राणा उत्क्रामंति ब्रह्मैव सन् ब्रह्माप्येतीत्यतः परविद्याविषयात्प्रतिषेधान्न परब्रह्मविदो देहात्प्राणानामुत्क्रांतिरस्तीति
चेत् ॥ नेत्युच्यते ॥ यतः शारीरादात्मन एष उत्क्रांतिप्रतिषेधः प्राणानां न शरीरात् ॥ कथमवगम्यते ॥ न तस्मात्प्राणा उत्क्रामंती
ति शाखांतरे पंचमीप्रयोगात् ॥ संबंधसामान्यविषया हि षष्ठी शाखांतरगतया पंचम्या संबंधविशेषे व्यवस्थाप्यते ॥ तस्मा
दिति च प्राधान्यादभ्युदयनिःश्रेयसाधिकृतो देही संबध्यते न देहः ॥ न तस्मादुच्चिक्रमिषोर्जीवात्प्राणा उत्क्रामंति सहैव तेन भवं
तीत्यर्थः सप्राणस्य प्रवसतो भवत्युत्क्रांतिर्देहादिति एवं प्राप्ते प्रत्युच्यते ॥ स्पष्टो ह्येकेषां १३ नैतदस्ति ॥ यदुक्तं परब्रह्मविदोपि
देहादस्त्युत्क्रांतिः प्रतिषेधस्य देह्यपादानत्वादिति ॥ यतो देहापादान एवोत्क्रांतिप्रतिषेध एकेषां समाम्नातॄणां स्पष्ट उपलभ्यते
॥ तथा हि आर्तभागप्रश्ने यत्रायं पुरुषो म्रियत उदस्मात्प्राणाः क्रामंत्याहो नेति नेति होवाच याज्ञवल्क्य इत्यनुत्क्रांतिपक्षं
परिगृह्य न तर्ह्ययमनुत्क्रांतेषु प्राणेषु मृत इत्यस्यामाशंकायामत्रैव समवनीयंत इति प्रविलयं प्राणानां प्रतिज्ञाय तत् ॥ सिद्
ये स उच्छ्वयत्याध्मायत्याध्मातो मृतः शेत इति सशब्दस्य परामृष्टस्य प्रकृतस्योत्क्रांत्यवधेरुच्छ्वयनादीनि समामनंति ॥ देहस्यैवैता
नि स्युर्न देहिनः तत्सामान्यान्न तस्मात्प्राणा उत्क्रामंति ॥ अत्रैव समवनीयंत इत्यत्राप्यभेदोपचारेण देहापादानस्यैवोत्क्रमणस्य
प्रतिषेधो यद्यपि प्राधान्यं देहिन इति व्याख्येयं येषां पंचमीपाठः ॥ येषां तु षष्ठीपाठस्तेषां तत्संबंधिन्युत्क्रांतिः प्रतिषिध्यत इति
प्राप्तोत्क्रांतिप्रतिषेधार्थत्वादस्य वाक्यस्य देहापादानैव सा प्रतिषिद्धा भवति देहादुत्क्रांतिः प्राप्ता न देहिनः ॥ अपि च चक्षुष्टो वा मूर्ध्नो
वान्येभ्यो वा शरीरदेशेभ्यस्तमुत्क्रामंतं प्राणोनूत्क्रामति प्राणमनूत्क्रामंतं सर्वे प्राणा अनूत्क्रामंतीत्येवमविद्वद्विषये सप्रपंचमु
क्रमणं संसारगमनं च दर्शयित्वेति तु कामयमान इत्युपसंहृत्याविद्वत्कथामथाकामयमान इति व्यपदिश्य विद्वांसं यदि तद्वि ८

307/19/3

षये प्राप्तयोर्गत्युत्क्रांत्योर्विद्वद्विषये प्रतिषेध इत्येवमेव व्याख्यायं व्यपदेशार्थवत्त्वाय ॥ न च ब्रह्मविदः सर्वगतब्रह्मात्मभूतस्य प्रक्षी
णकामकर्मण उत्क्रांतिर्गतिर्वोपपद्यते ॥ निमित्ताभावात् अत्र ब्रह्म समश्नुत इति चैवंजातीयकाः श्रुतयो गत्युत्क्रांत्योरभावं सू
चयंति ॥ ॥ स्मर्यते च १४ स्मर्यतेपि च महाभारते गत्युत्क्रांत्योरभावः सर्वभूतात्मभूतस्य सम्यग्भूतानि पश्यतः ॥ देवा अपि मार्गे मु
ह्यंत्यपदस्य पदैषिण इति ॥ ननु गतिरपि ब्रह्मविदः सर्वगतब्रह्मात्मभूतस्य स्मर्यते ॥ शुकः किल वैयासकिर्मुमुक्षुरादित्यमंडलमभिप्रत
स्थे पित्रा चानुगम्याहूतो भो इति प्रतिशुश्रावेति ॥ न ॥ सशरीरस्यैव योगबलेन विशिष्टदेशप्राप्तिपूर्वकः शरीरोत्सर्ग इति द्रष्टव्यं ॥ सर्वभू
तदृश्यत्वाद्युपन्यासात् ॥ न ह्यशरीरं गच्छंतं सर्वभूतानि द्रष्टुं शक्नुयुः ॥ तथा च तत्रैवोपसंहृतं ॥ शुकस्तु मारुताच्छीघ्रां गतिं कृत्वांतरिक्षगः
दर्शयित्वा प्रभावं स्वं सर्वभूतगतोऽभवदिति ॥ तस्मादभावः परब्रह्मविदो गत्युत्क्रांत्योः ॥ गतिश्रुतीनां तु विषयमुपरिष्टाद्व्याख्यास्यामः
१७२ तानि परे तथा ह्याह ॥ तानि पुनः प्राणशब्दोदितानींद्रियाणि भूतानि च परब्रह्मविदस्तस्मिन्नेव परमात्मनि प्रलीयंते ॥ कस्मा
त् तथा ह्याह श्रुतिः ॥ एवमेवास्य परिद्रष्टुरिमाः षोडश कलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छंतीति ॥ ननु गताः कलाः पंचदश प्रतिष्ठा इति विद्व
द्विषयैवापरा श्रुतिः परस्मादात्मनोन्यत्रापि कलानां प्रलयमाह स्म न सा खलु व्यवहारापेक्षा पार्थिवाद्याः कलाः पृथिव्यादीरेव स्वप्रकृतीरपियं
तीति ॥ इतरा तु विद्वत्प्रतिपत्त्यपेक्षा कृत्स्नं कलाजातं परब्रह्मविदो ब्रह्मैव संपद्यत इति ॥ तस्माददोषः ॥ ॥ अविभागो वचनात् १५ स
पुनर्विदुषः कलाप्रलयः किमितरेषामिव सावशेषो भवति ॥ आहोस्विन्निरवशेष इति ॥ तत्र प्रलयसामान्याच्छक्त्यवशेषताप्रसक्तौ ब्रवी
ति ॥ अविभागापत्तिरेवेति कुतः वचनात् तथा हि कलाप्रलयमुक्त्वा वक्ति भिद्येते चासां नामरूपे पुरुष इत्येवं प्रोच्यते स एषोऽकलोऽमृतो भव
तीति ॥ अविद्यानिमित्तानां च कलानां न विद्यानिमित्ते प्रलये सावशेषत्वोपपत्तिः ॥ तस्मादविभाग एवेति ॥ तदोकोग्रज्वलनं तत्प्रकाशितद्वा
रो विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया १७ समाप्ता प्रासंगिकी परविद्यागता चिंता संप्रति त्वपरविद्यावि
षयामेव चिंतामनुवर्तयति ॥ समाना चासृत्युपक्रमादिति विद्वदविदुषोरुत्क्रांतिरित्युक्तं ॥ तमिदानीमुत्क्रांत्युपक्रमं दर्शयति ॥ तस्योपसंहृतवागादि
कलापस्योच्चिक्रमिषतो विज्ञानात्मन ओकः आयतनं ॥ स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामतीति श्रुतेः ॥ तदग्रप्रज्वलनपूर्वि
का चक्षुरादिस्थानापादाना चोत्क्रांतिः श्रूयते ॥ तस्य हैतस्य हृदयस्याग्रं प्रद्योतते तेन प्रद्योतेनैष आत्मा निष्क्रामति चक्षुष्टो वा मूर्ध्नो वान्येभ्यो वा शरीरदेशे
भ्य इति ॥ सा किमनियमेनैव विद्वदविदुषोर्भवति अथास्ति कश्चिद्विदुषो विशेषनियम इति विचिकित्सायां श्रुत्यविशेषादनियमप्राप्तावाच
ष्टे ॥ समानेपि विद्वदविदुषोर्हृदयाग्रप्रद्योतने तत्प्रकाशितद्वारत्वे च मूर्धस्थानादेव विद्वान्निष्क्रामति स्थानांतरेभ्यस्त्वितरे ॥ कुतः विद्यासाम
र्थ्यात् यदि विद्वानपीतरवद्यतः कुतश्चिद्देहदेशादुत्क्रामेत्तदा नैवोत्कृष्टं लोकं लभेत ॥ तत्रानर्थिकैव विद्या स्यात् ॥ तच्छेषगत्यनुस्मृतियोगाच्च ॥

शा०भा० १

विद्याशेषभूतत्वाच्च मूर्धन्यनाडीसंबद्धा गतिरनुशीलयितव्या विद्याविशेषेण विहिता॥ तामभ्यस्यंस्तयैव प्रतिष्ठत इति युक्तं॥ तस्माद्धृदया
लयेनैव ब्रह्मणोपासितेनानुगृहीतस्तद्भावं समापन्नो विद्वान्मूर्धन्ययैव शतादतिरिक्तयैकशततम्या नाड्या निष्क्रामति॥ इतराभिरितरे ५
तथा हि हार्दविद्यां प्रकृत्य समामनंति॥ शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका॥ तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या
उत्क्रमणे भवंतीति॥ ॥रश्म्यनुसारी॥ अस्ति दहरोऽस्मिन्नंतराकाश इति हार्दविद्या अथ यदिदमस्मिन्ब्रह्मपुरे दहरं पुंडरीकं वेश्मेत्युप
क्रम्य विहिता॥ तत्प्रक्रियायां अथ या एता हृदयस्य नाड्य इत्युपक्रम्य सप्रपंचं नाडीरश्मिसंबंधमुक्त्वोक्तं॥ अथ यत्रैतदस्माच्छरीरादुत्क्राम
त्यथैतैरेव रश्मिभिरूर्ध्वमाक्रमत इति॥ पुनश्चोक्तं तयोर्ध्वमायन्नमृतत्वमेतीति॥ तस्माच्छताधिकया नाड्या निःक्रामन् रश्म्यनुसारी निष्क्रा
मतीति गम्यते॥ तत्किमविशेषेणाहनि रात्रौ वा म्रियमाणस्य रश्म्यनुसारित्वं॥ आहोस्विदहन्येवेति संशये सत्यविशेषश्रवणादविशेषेणै
वेति॥ अथ तु विद्वानपि रात्रिप्रायणापराधमात्रेण नोर्ध्वमाक्रमेत पाक्षिकफला विद्येत्यप्रवृत्तिरेव तस्यां स्यात्॥ मृत्युकालानियमात्॥ अ
थापि रात्रावुपरतोऽहरागममुदीक्षेत॥ अहरागमेऽप्यस्य कदाचिदरश्मिसंबंधार्हं शरीरं स्यात् पावकादिसंपर्कात्॥ न यावच्छिष्येत न तावदा
दित्यं गच्छतीति च श्रुतिरनुदीक्षां दर्शयति॥ तस्मादविशेषेणेदं रात्रिदिवं रश्म्यनुसारित्वं १७६, अतश्चायनेऽपि दक्षिणे २१ अतएवोदी
क्षानुपपत्तेरपाक्षिकफलत्वाच्च विद्याया अनियतकालत्वाच्च मृत्योर्दक्षिणायनेऽपि म्रियमाणो विद्वान् प्राप्नोत्येव विद्याफलं॥ उत्तरायणम
रणप्राशस्त्यप्रसिद्धेः भीष्मस्य च प्रतीक्षादर्शनादापूर्यमाणपक्षाद्यान्षडुदङ्ङेति मासांस्तानिति च श्रुतेरपेक्षितव्यमुत्तरायणमिती
माशंकामनेन सूत्रेणापनुदति॥ प्राशस्त्यप्रसिद्धिरविद्वद्विषया॥ भीष्मस्य प्रतिपालनमाचारप्रतिपालनार्थं॥ पितृप्रसादलब्धस्वच्छंद
मृत्युताख्यापनार्थं च॥ श्रुतेस्त्वर्थं वक्ष्यति॥ आतिवाहिकास्तल्लिंगादिति॥ ननु च यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः॥ प्रयाता यांति
तं कालं वक्ष्यामि भरतर्षभेति कालप्राधान्येनोपक्रम्याहरादिकालविशेषः स्मृतावनावृत्तये नियतः कथं रात्रौ दक्षिणायने वा प्रयातो
नावृत्तिं यायादिति॥ अत्रोच्यते॥ योगिनः प्रति च स्मर्यते स्मार्ते चैते २२ योगिनः प्रति चायमहरादिकालविनियोगोऽनावृत्तये स्मर्यते॥
स्मार्ते चैते योगसांख्ये न श्रौते॥ अतो विषयभेदात्प्रमाणविशेषाच्च नास्य स्मार्तस्य कालविनियोगस्य श्रौतेष्वपि विज्ञानेष्ववतारः॥ नन्व
ग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणं॥ धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनमिति च श्रौतावेव देवयानपितृयानौ प्रत्यभि
ज्ञायेते स्मृतावपीति॥ उच्यते॥ तं कालं वक्ष्यामीति स्मृतौ कालप्रतिज्ञानाद्विरोधमाशंक्य परिहार उक्तः॥ यदा पुनः स्मृतावप्यग्न्याद्या दे
वता एवातिवाहिका गृह्यंते तदा न कश्चिद्विरोध इति १७१ इति श्रीशारीरकमीमांसाभाष्ये शंकरभगवत्पादकृतौ चतुर्थाध्याय
स्य द्वितीयः पादः॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ १

309/1913

अर्चिरादिना तत्प्रथितेः॥ आस्रुतेरुपक्रमात्समानोत्क्रांतिरुक्ता॥ सृतिस्तु श्रुत्यंतरेष्वनेकविधा श्रूयते॥ नाडीरश्मिसंबंधेनैका अथैतैरेव
रश्मिभिरूर्ध्व आक्रमत इति॥ अर्चिरादिकैका तेऽर्चिरभिसंभवंत्यर्चिषोऽहरिति स एतं देवयानं पंथानमापद्याग्निलोकमागच्छतीत्यन्या॥
यदा वै पुरुषोऽस्माल्लोकात्प्रैति स वायुमागच्छतीत्यपरा॥ सूर्यद्वारेण ते विरजाः प्रयांतीति चापरा॥ तत्र संशयः॥ किं परस्परभिन्ना एताः
सृतयः किं वैकैवानेकविशेषणेति॥ तत्र प्राप्तं तावत्॥ भिन्ना एवैताः सृतय इति॥ भिन्नप्रकरणत्वाद्भिन्नोपासनशेषत्वाच्च॥ अ
पि च अथैतैरेव रश्मिभिरित्यवधारणमर्चिराद्यपेक्षायामुपरुध्येत॥ त्वरावचनं च पीड्येत॥ स यावत्क्षिप्येन्मनस्तावदादित्यं ग
च्छतीति तस्मादन्योन्यभिन्ना एवैते पंथान इत्येवं प्राप्ते ब्रूमहे॥ अर्चिरादिनेति सर्वो ब्रह्मप्रेप्सुरर्चिरादिनैवाध्वना रंहतीति दन्यो
न्यभिन्ना एवैते पंथान इत्येवं प्राप्ते ब्रूमहे॥ अर्चिरादिनेति प्रतिजानीमहे॥ कुतस्तत्प्रथितेरिति विद्यांतरशीलिनां प्रथितो ह्ये
ष मार्गः सर्वेषां विदुषां॥ तथा पंचाग्निविद्याप्रकरणे ये चेमे अरण्ये श्रद्धां सत्यमुपासत इति विद्यांतरशीलिनामप्यर्चिरादिगतिः
श्राव्यते॥ स्यादेतत् यासु किमितः अर्चिराद्याश्रयणमिति अत्रोच्यते भवेदेतदेवं यद्यमी भिन्ना एव तास्सृतयः स्युः एकैव त्वेषा सृति
रनेकविशेषणा ब्रह्मलोकप्रतिपादिनी क्वचित्केनचिद्विशेषणेनोपलक्षितेति वदामः॥ सर्वत्रैकदेशप्रत्यभिज्ञानादितरेतरविशेषणविशेष्य
भावोपपत्तेः प्रकरणभेदेऽपि ह्येकविद्यात्वं भवतीतरेतरविशेषणोपसंहारवद्गतिविशेषणानामप्युपसंहारो विद्याभेदेऽपि गत्येकदेशप्रत्यभि
ज्ञानाद्गंतव्याभेदाच्च गत्यभेद एव॥ तथा हि ते तेषु ब्रह्मलोकेषु पराः परावतो वसंति॥ तस्मिन्वसंति शाश्वतीः समाः सा या ब्रह्मणो जि
तिर्या व्युष्टिस्तां जितिं जयति तां व्युष्टिं व्यश्नुते तद्य एवैतं ब्रह्मलोकं ब्रह्मचर्येणानुविंदंतीति च॥ तत्र तत्र तदेवैकं फलं ब्रह्मलोकप्राप्तिल
क्षणं प्रदर्श्यते॥ यत्त्वेतैरेवेत्यवधारणमर्चिराद्याश्रयणे न स्यादिति॥ नैष दोषः॥ रश्मिप्राप्तिपरत्वादस्य॥ न ह्येक एवशब्दो रश्मींश्च
प्रापयितुमर्हति अर्चिरादींश्च व्यावर्तयितुं॥ तस्माद्रश्मिसंबंध एवायमवधार्यत इति द्रष्टव्यं॥ त्वरावचनं त्वर्चिराद्यपेक्षायामपि शै
घ्र्यार्थत्वान्नोपरुध्यते॥ यथा निमेषमात्रेणागत इति॥ अपि चाथैतयोः पथोर्न कतरेणचनेति मार्गद्वयभ्रष्टानां कष्टं तृतीयस्थान
माचक्षाणा पितृयाणव्यतिरिक्तमेकं देवयानमर्चिरादिपर्वाणं पंथानं प्रथयति॥ भूयांसि चार्चिरादिसृतौ मार्गपर्वाणि अल्पीयांसि त्वन्य
त्र॥ भूयसां चानुगुण्येनाल्पीयसां नयनं न्याय्यमित्यतोऽप्यर्चिरादिना तत्प्रथितेरित्युक्तं॥ वाय्वब्दादविशेषविशेषाभ्यां॥ केन पुनः
सन्निवेशेन गतिविशेषणानामितरेतरविशेष्यविशेषणभाव इति॥ तदेतत्सुहृद्भूत्वाचार्यो ग्रथयति॥ स एतं देवयानं पंथानमाप
द्याग्निलोकमागच्छति॥ स वायुलोकं स वरुणलोकं स इंद्रलोकं स प्रजापतिलोकं स ब्रह्मलोकमिति कौषीतकिनां देवयानः पंथाः पठ्यते॥ तत्र

ब्रा०भा० १० ॥ अर्चिरग्निलोकशब्दौ तावदेकार्थौ ज्वलनवचनत्वादिति नात्र सन्निवेशक्रमः कश्चिदन्वेष्यः ॥ वायुस्त्वर्चिरादौ वर्त्मन्यश्रुतः कतमस्मिन् स्था-
ने निवेशयितव्य इति ॥ उच्यते ॥ ते ऽर्चिषमभिसंभवन्त्यर्चिषो ऽहरह्न आपूर्य्यमाणपक्षमापूर्य्यमाणपक्षाद्यान्षडुदङ्ङेति मासांस्तान्मासेभ्यः सं-
वत्सरं संवत्सरादादित्यमित्यत्र संवत्सरात्परं चादित्यादर्वाञ्चं वायुमभिसंभवन्ति ॥ कस्मात् ॥ अविशेषविशेषाभ्यां ॥ तथाहि ॥ स वायुलोक-
मित्यविशेषोपदिष्टस्य वायोः श्रुत्यन्तरे विशेषोपदेशो दृश्यते ॥ यदा वै पुरुषो ऽस्माल्लोकात्प्रैति स वायुमागच्छति तस्मै स तत्र विजिहीते यथा रथ-
चक्रस्य खं तेन स ऊर्ध्व आक्रमते स आदित्यमागच्छतीति ॥ एतस्मादादित्याद्वायोः पूर्वत्वदर्शनाद्विशेषादब्दादित्ययोरन्तराले वायुर्निवेशयि-
तव्यः ॥ कस्मात्पुनरग्नेः परत्वदर्शनाद्विशेषादर्चिषो ऽनन्तरं वायुर्न निवेश्यते ॥ नैषास्ति विशेष इति वदामः ॥ ननूदाहृता श्रुतिः स एतं देवया-
नं पन्थानमापद्याग्निलोकमागच्छति स वायुलोकमिति ॥ उच्यते ॥ केवलो ऽत्र पाठः पौर्वापर्येणावस्थितो नात्र क्रमवचनः कश्चिच्छब्दो ऽस्ति ॥
पदार्थोपदर्शनमात्रं ह्यत्र क्रियते एतं चैतं च गच्छतीति ॥ इतरत्र पुनर्वायुप्रत्तेन रथचक्रमात्रेण छिद्रेणोर्ध्वमाक्रम्यादित्यमागच्छतीत्य-
वगम्यते क्रमः ॥ तस्मात्सूक्तमविशेषविशेषाभ्यामिति ॥ वाजसनेयिनस्तु मासेभ्यो देवलोकं देवलोकादादित्यमिति समामनन्ति ॥ तत्रादित्यानन्तर्या-
य देवलोकाद्वायुलोकमभिसंभवेयुः ॥ वायुमब्दादिति तु छान्दोग्यश्रुत्यपेक्षयोक्तं ॥ छान्दोग्यवाजसनेयकयोस्त्वेकत्र देवलोको न विद्यते ऽपर-
त्र संवत्सरस्तत्र श्रुतिद्वयप्रत्ययादुभावप्युभयत्र ग्रथयितव्यौ ॥ तत्रापि मासंबन्धात्संवत्सरः पूर्वः पश्चिमो देवलोक इति विवेक्तव्यं ॥१७९॥
अतडितो ऽधि वरुणः संबन्धात् ॥ आदित्याच्चन्द्रमसं चन्द्रमसो विद्युतमित्यस्या विद्युत उपरिष्टात्स वरुणलोकमित्ययं वरुणः संबध्यते ॥ अस्ति
हि संबन्धो विद्युद्वरुणयोः ॥ यदा हि विशाला विद्युतस्तीव्रस्तनितनिर्घोषा जीमूतोदरेषु प्रनृत्यन्त्यथापः प्रपतन्ति विद्योतते स्तनयति
वर्षिष्यति वा इति च ब्राह्मणं ॥ अपां चाधिपतिर्वरुण इति श्रुतिस्मृतिप्रसिद्धिः ॥ वरुणाच्चाधीन्द्रप्रजापती स्थानान्तराभावात् ॥ पाठ-
सामर्थ्याच्च ॥ आगन्तुकत्वादपि वरुणादीनामन्त एव निवेशो वैशेषिकस्थानाभावात् ॥ विद्युच्चान्त्यार्चिरादौ वर्त्मनि ॥१८०॥ आतिवाहि-
कास्तल्लिङ्गात् ॥ तेष्वेवार्चिरादिषु संशयः किमेतानि मार्गचिह्नान्युत भोगभूमयः अथवा नेतारो गन्तॄणामिति ॥ तत्र मार्गल-
क्षणभूता अर्चिरादय इति तावत्प्राप्तं तत्स्वरूपत्वादुपदेशस्य ॥ यथा हि लोके कश्चिद्ग्रामं नगरं वा प्रतिष्ठासमानो ऽनुशिष्यते गच्छेतस्त्वममुं गिरिं
ततो न्यग्रोधं ततो ग्राममिति प्राप्तं तथाहि लोकशब्देनाग्न्यादीननुबध्नाति अग्निलोकमागच्छतीत्यादि ॥ लोकशब्दश्च प्राणिनां भोगायतनेषु भा-
ष्यते मनुष्यलोकः पितृलोको देवलोक इति च ॥ तथा च ब्राह्मणं ॥ अहोरात्रेषु ते लोकेषु सज्जन्त इत्यादि ॥ तस्मान्नातिवाहिका अर्चिरादयः अचेतन-
त्वादप्येतेषामातिवाहिकत्वानुपपत्तिः ॥ चेतना हि लोके राजनियुक्ताः पुरुषा दुर्गेषु मार्गेष्वतिवाहयन्तीत्येवं प्राप्ते ब्रूमः ॥ अतिवा १०

311/1913

हिकास्ते भवितुमर्हन्ति ॥ कुतः ॥ तल्लिङ्गात् ॥ तथाहि चन्द्रमसो विद्युतं तत्पुरुषो ऽमानवः स एतान्ब्रह्म गमयतीति सिद्धवद्गमयितृत्वं दर्शय-
ति तद्वचनं तद्विषयमेवोपक्षीणमिति चेत् ॥ न ॥ प्राप्तमानवत्वनिवृत्तिमात्रपरत्वाद्विशेषणस्य यद्यर्चिरादिषु पुरुषा गमयितारः प्राप्तास्ते च मा-
नवास्ततो युक्तं तन्निवृत्त्यर्थं पुरुषविशेषणममानव इति ॥ ननु लिङ्गमात्रमगमकं न्यायाभावात् ॥ नैष दोषः ॥ छ ॥ उभयव्यामोहात्त-
त्सिद्धेः ॥ एतावदर्चिरादिमार्गगामिनो देहवियोगात्संपिण्डितकरणग्रामत्वादस्वतन्त्राः अर्चिरादीनामप्यचेतनत्वादस्वातन्त्र्यमित्यतो ऽर्चिराद्यभि-
मानिनश्चेतना देवताविशेषा अतियात्रायां नियुक्ता इति गम्यते ॥ लोके ऽपि हि मत्तमूर्छितादयः संपिण्डितकरणाः परप्रयुक्तवर्त्मानो भवन्ति ॥
अनवस्थितत्वादप्यर्चिरादीनां न मार्गलक्षणत्वोपपत्तिः ॥ न हि रात्रौ प्रेतस्याह्नः स्वरूपाभिसंभव उपपद्यते ॥ न च प्रतिपालनमस्तीत्युक्तं
पुरस्तात् ॥ ध्रुवत्वात्तु देवतात्मनां नायं दोषो भवति ॥ अर्चिरादिशब्दता चैषामर्चिराद्यभिमानादुपपद्यते ॥ अर्चिषो ऽहरित्यादिनिर्देशस्त्वा-
तिवाहिकत्वे ऽपि न विरुध्यते ॥ अर्चिषा हेतुनाहरभिसंभवन्त्यह्ना हेतुनाहरभिसंभवन्त्यापूर्यमाणपक्षमिति ॥ तथा च लोके प्रसिद्धेष्वप्या-
तिवाहिकेष्वेवंजातीयक उपदेशो दृश्यते ॥ गच्छ त्वमितो बलवर्माणं ततो जयसिंहं ततः कृष्णगुप्तमिति ॥ अपि चोपक्रमे ऽर्चिरभिसंभवन्तीति
संबन्धमात्रमुक्तं न संबन्धविशेषः कश्चित् ॥ उपसंहारे तु स एनान्ब्रह्म गमयतीति संबन्धविशेषो ऽतिवाह्यातिवाहकत्वलक्षण उक्तस्तेन स एवोप-
क्रमे ऽपीति निर्धार्यते ॥ संपिण्डितकरणत्वादेव च गन्तॄणां न तत्र भोगसंभवः ॥ लोकशब्दस्त्वनुपभुञ्जानेष्वपि गन्तृषु गमयितुं शक्यते ॥ अन्येषां त-
ल्लोकवासिनां भोगभूमित्वात् ॥ अतो ऽग्निस्वामिकं लोकं प्राप्तो ऽग्निनातिवाह्यते ॥ वायुस्वामिकं प्राप्तो वायुनेति योजयितव्यं ॥ कथं पुनरातिवाहिक-
त्वपक्षे वरुणादिषु तत्संभवः ॥ विद्युतो ह्यधि वरुणादय उपक्षिप्ताः विद्युतस्त्वनन्तरमाब्रह्मप्राप्तेरमानवस्यैव पुरुषस्य गमयितृत्वं श्रुतमिति ।
अत उत्तरं पठति ॥ वैद्युतेनैव ततस्तच्छ्रुतेः ॥ ततो विद्युदभिसंभवनादूर्ध्वं विद्युदनन्तरवर्तिनैवामानवेन पुरुषेण वरुणलोकादिष्वतिवाह्यमाना
ब्रह्मलोकं गच्छन्तीत्यवगन्तव्यं ॥ तान्वैद्युतात्पुरुषो ऽमानवः स एत्य ब्रह्मलोकान्गमयतीति तस्यैव गमयितृत्वश्रुतेः ॥ वरुणादयस्तु तस्यैवाप्रतिबन्धक-
रणेन साहाय्यानुष्ठानेन वानुग्राहका इत्यवगन्तव्यं ॥ तस्मात्साधूक्तमातिवाहिका देवतात्मानो ऽर्चिरादय इति ॥१८१॥ कार्यं बादरिर-
स्य गत्युपपत्तेः ॥ स एनान्ब्रह्म गमयतीत्यत्र विचिकित्स्यते ॥ किं कार्यमपरं ब्रह्म गमयत्याहोस्वित्परमेवाविकृतं मुख्यं ब्रह्मेति ॥ कुतः संश-
यः ॥ ब्रह्मशब्दप्रयोगाद्गतिश्रुतेश्च ॥ तत्र कार्यमेव सगुणमपरं ब्रह्मैनान्गमयत्यमानव इति बादरिराचार्यो मन्यते ॥ कुतः ॥ अग-
त्युपपत्तेः ॥ अस्य हि कार्यब्रह्मणो गन्तव्यत्वमुपपद्यते ॥ प्रदेशवत्त्वात् ॥ न तु परस्मिन्ब्रह्मणि गन्तृत्वं गन्तव्यत्वं गतिर्वावकल्पते सर्वगतत्वात्प्र-
त्यगात्मत्वाच्च गन्तॄणाम् ॥ ७ ॥ विशेषितत्वाच्च ॥ ब्रह्मलोकान्गमयतीति तेषु ब्रह्मलोकेषु पराः परावतो वसन्तीति च श्रुत्यन्तरे विशेषित-
त्वात्कार्यब्रह्मविषयैव गतिरिति गम्यते ॥ न हि बहुवचनेन विशेषणं परस्मिन्ब्रह्मण्यवकल्पते ॥ कार्ये त्ववस्थाभेदोपपत्तेः संभवति

वद्वचनं॥ लोकश्रुतिरपि विकारगोचरायामेव संनिवेशविशिष्टायां भोगभूमावासीगौणी त्वन्यत्र॥ ब्रह्मलोक एष सम्राडि
त्यादिषु अधिकरणाधिकर्तव्यमिदं शोऽपि परस्मिन्ब्रह्मण्यनाञ्जसः स्यात्॥ तस्मात्कार्यविषयमेवेदं नयनं॥ ननु कार्यविषयेपि ब्रह्म
शब्दो नोपपद्यते॥ समन्वयस्य हि ब्रह्मणो जन्मादिकारणं ब्रह्मेति प्रतिष्ठापितमिति॥ अत्रोच्यते॥ सामीप्यात्तु तद्व्यपदेशः॥९॥ तु शब्द
आशंकाव्यावृत्त्यर्थः॥ परब्रह्मसामीप्यादपरस्य ब्रह्मणस्तस्मिन्नपि ब्रह्मशब्दप्रयोगो न विरुध्यते परमेव हि ब्रह्म विशुद्धोपाधिसंब
न्धं क्वचित्कैश्चिद्विकारधर्मैर्मनोमयत्वादिभिरुपासनायोपदिश्यमानमपरमिति स्थितिः॥ ननु कार्यप्राप्तौ नावृत्तिश्रवणं न घटते
न हि परस्माद्ब्रह्मणोऽन्यत्र कचिन्नित्यता संभवतीति दर्शयति च देवयानेन पथा प्रस्थितानामनावृत्तिमेतेन प्रतिपद्यमाना इमं मानवमावर्तं
नावर्तंत इति तेषामिह न पुनरावृत्तिरस्ति॥ तयोर्ध्वमायन्नमृतत्वमेतीति चेत्॥ अत्र ब्रूमः॥ कार्यात्यये तदध्यक्षेण॥ हिरण्यगर्भेण स
हातः परं परिशुद्धं विष्णोः परमं पदं प्रतिपद्यंत इतीत्थं क्रममुक्तिरनावृत्त्यादिश्रुत्यभिधानेभ्योऽभ्युपगंतव्या॥ न ह्यंजस्यैव गतिपूर्विका परप्रा
प्तिः संभवतीत्युपपादितं॥ स्मृतेश्च॥ स्मृतिरप्येतमर्थमनुजानाति ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे॥ परस्यांते कृतात्मानः प्रविश
न्ति परं पदमिति तस्मात्कार्यब्रह्मविषया गतिश्रुतय इति सिद्धांतः॥ कं पुनः पूर्वपक्षमाशंक्यायं सिद्धांतः प्रतिष्ठापितः कार्यं बादरिरित्या
दिनेति स इदानीं सूत्रैरेवोपदर्श्यते॥ छ॥ परं जैमिनिर्मुख्यत्वात्॥ जैमिनिस्त्वाचार्यः स एतान्ब्रह्म गमयतीत्यत्र परमेव ब्रह्म प्रापयतीति
मन्यते॥ कुतः॥ मुख्यत्वात्॥ परं हि ब्रह्म ब्रह्मशब्दस्य मुख्यमालंबनं गौणमपरं मुख्यगौणयोश्च मुख्ये संप्रत्ययो भवति॥ दर्शनाच्च॥
तयोर्ध्वमायन्नमृतत्वमेतीति च गतिपूर्वकममृतत्वं दर्शयति॥ अमृतत्वं च परस्मिन्ब्रह्मण्युपपद्यते॥ न कार्ये विनाशित्वात्कार्यस्य अ
थ यत्रान्यत्पश्यति तदल्पं तन्मर्त्यमिति वचनात्॥ परविषयैव च गतिः कठवल्ल्युपपद्यते॥ न हि तत्र विद्यांतरप्रक्रमोऽस्ति॥ अन्यत्र ध
र्मादन्यत्राधर्मादिति परस्यैव ब्रह्मणः प्रक्रांतत्वात्॥ न च कार्ये प्रतिपत्त्यभिसंधिः॥१३॥ अपि च॥ प्रजापतेः सभां वेश्म प्रपद्ये इ
ति नायं कार्यविषयः प्रतिपत्त्यभिसंधिः॥ नामरूपयोर्निर्वहिता ते यदंतरा तद्ब्रह्मेति कार्यविलक्षणस्य परस्यैव ब्रह्मणः प्रकृतत्वा
त्॥ यशोऽहं भवामि ब्राह्मणानामिति च सर्वात्मत्वेनोपक्रमणात्॥ न तस्य प्रतिमास्ति यस्य नाम महद्यश इति च परस्यैव ब्रह्मणो य
शो नामत्वप्रसिद्धेः॥ सा चेयं वेश्मप्रतिपत्तिर्गतिपूर्विका हार्दविद्यायामुदिता तदपराजिता पूर्ब्रह्मणः प्रभुविमितं हिरण्मय
मित्यत्र॥ पदेरपि च गत्यर्थत्वान्मार्गापेक्षतावसीयते॥ तस्मात्परब्रह्मविषया गतिश्रुतय इति पक्षांतरं॥ तावेतौ द्वौ पक्षावाचार्ये
ण सूत्रितौ॥ गत्युपपत्त्यादिभिरितरो मुख्यत्वादिभिः परः॥ तत्र गत्युपपत्त्यादयः प्रभवंति मुख्यत्वादीनाभासयितुं न तु मुख्यत्वाद ११
यो गत्युपपत्त्यादीनि आद्यपक्ष सिद्धांतो व्याख्यातो द्वितीयः पूर्वपक्षः न ह्यसत्यपि संभवे मुख्यस्यैवार्थस्य ग्रहणमिति कश्चिद

313/1913

आपयितुं विद्यते॥ परविद्याप्रकरणेऽपि तु तत्स्तुत्यर्थं विद्यांतराश्रयगत्यनुकीर्तनमुपपद्यते विष्वङ्ङन्या उत्क्रमणे भवंतीति वत् प्रजा
पतेः सभां वेश्म प्रपद्ये इति तु पूर्ववाक्यविच्छेदेन कार्येऽपि प्रतिपत्त्यभिसंधिर्न विरुध्यते॥ सगुणेऽपि च ब्रह्मणि सर्वात्मत्वसंकीर्त
नं सर्वकर्मा सर्वकाम इत्यादिवदवकल्प्यते॥ तस्मादपरब्रह्मविषया एव गतिश्रुतीः प्रतिष्ठापयंति॥ तदनुपपत्तिः॥ गंतव्यत्वानु
पपत्तेर्ब्रह्मणः॥ यत्सर्वगतं सर्वांतरं सर्वात्मकं च परं ब्रह्म॥ आकाशवत्सर्वगतश्च नित्यो यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वांतर आ
त्मैवेदं सर्वं विश्वमिदं वरिष्ठमित्यादिश्रुतिनिर्धारितविशेषं ब्रह्म तस्य गंतव्यता न कदाचिदप्युपपद्यते॥ न हि गतमेव गम्यते अ
न्यो ह्यन्यद्गच्छतीति प्रसिद्धं लोके॥ ननु लोके गतस्यापि गंतव्यता देशांतरविशिष्टा दृष्टा॥ यथा पृथिवीस्थ एव पृथिवीं देशांतरद्वारे
ण गच्छति तथाऽनन्यत्वेऽपि बालस्य कालांतरविशिष्टं वार्धकं स्वात्मभूतमेव गंतव्यं दृष्टं तद्ब्रह्मणोऽपि सर्वशक्त्युपेतत्वात्कथंचिद्गंत
व्यता स्यादिति॥ न प्रतिषिद्धसर्वविशेषत्वाद्ब्रह्मणः॥ निष्कलं निष्क्रियं शांतं निरवद्यं निरंजनं॥ अस्थूलमनण्वह्रस्वमदीर्घं सबाह्याभ्यं
तरो ह्यजः॥ स वा एष महानज आत्माजरोऽमृतोऽभयो ब्रह्म स एष नेति नेत्यात्मेत्यादिश्रुतिस्मृतिन्यायेभ्यो न देशकालादिविशेषयो
गः परमात्मनः कल्पयितुं शक्यते येन तस्य प्रदेशावस्थांतरयोगेनास्य गंतव्यता स्यात्पृथिव्यास्तु प्रदेशावस्थादिविशेषयोगादुपप
द्यते देशकालविशिष्टा गंतव्यता॥ जगदुत्पत्तिस्थितिप्रलयहेतुत्वश्रुतेरनेकशक्तित्वं ब्रह्मण इति चेत्॥ न विशेषनिराकरणश्रुतीना
मनन्यार्थत्वात्॥ उत्पत्त्यादिश्रुतीनामपि समानमनन्यार्थत्वमिति चेत्॥ न॥ तासामेकत्वप्रतिपादनपरत्वात्॥ मृदादिदृष्टांतैर्हि सतो
ब्रह्मण एकस्य सत्यत्वं विकारस्य चानृतत्वं प्रतिपादयच्छास्त्रं नोत्पत्त्यादिपरं भवितुमर्हति॥ कस्मात्पुनरुत्पत्त्यादिश्रुतीनां विशेषनि
राकरणश्रुतिशेषत्वं न पुनरितरशेषत्वमितरासामिति उच्यते॥ विशेषनिराकरणश्रुतीनां निराकांक्षार्थत्वात्॥ न ह्यात्मन एकत्व
नित्यशुद्धत्वाद्यवगतौ सत्यां भूयः काचिदाकांक्षोपजायते॥ पुरुषार्थसमाप्तिबुद्ध्युत्पत्तेः॥ तत्र को मोहः कः शोक एकत्वमनुपश्यतः
अभयं वै जनक प्राप्तोऽसीति विद्वान्न बिभेति कुतश्चन॥ एतं ह वाव न तपति किमहं साधु नाकरवं किमहं पापमकरवमित्यादिश्रुतिः॥
तथैव च विदुषां तुष्ट्यनुभवादिदर्शनात्॥ विकारानृताभिसंधापवादाच्च मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यतीति॥ अतो
न विशेषनिराकरणश्रुतीनामन्यशेषत्वमवगंतुं शक्यं॥ नैवमुत्पत्त्यादिश्रुतीनां निराकांक्षार्थप्रतिपादनसामर्थ्यमस्ति प्रत्य
क्षं तु तासामन्यार्थत्वं समनुगम्यते॥ तथा हि॥ तत्रैतच्छुंगमुत्पतितं सोम्य विजानीहि नेदममूलं भविष्यतीत्युपन्यस्योदके
सत एवैकस्य जगन्मूलस्य विज्ञेयत्वं दर्शयति॥ यतो वा इमानि भूतानि जायंते येन जातानि जीवंति॥ यत्प्रयंत्यभिसंविशंति तद्वि
जिज्ञासस्व तद्ब्रह्मेति च॥ एवमुत्पत्त्यादिश्रुतीनामेकात्म्यावगमपरत्वान्नानेकशक्तियोगो ब्रह्मणः॥ अतश्च गंतव्यत्वानुपपत्तिः॥

न तस्य प्राणा उत्क्रामंति ब्रह्मैव सन् ब्रह्माप्येतीति च परस्मिन् ब्रह्मणि गतिं निवारयति ॥ तद्व्याख्यातं स्पष्टो ह्येकेषामित्यत्र ॥ गतिं क
ल्पनायां च गंता जीवो गंतव्यस्य ब्रह्मणोवयवो विकारोन्यो वा ततः स्यात् ॥ अत्यंततादात्म्ये गमनानुपपत्तेः ॥ यद्येवं ततः किं स्यादिति
उच्यते ॥ यद्येकदेशस्तेनैकदेशिनो नित्यप्राप्तत्वान्न पुनर्ब्रह्मगमनमुपपद्यते ॥ एकदेशैकदेशिकल्पना च ब्रह्मण्यनुपपन्ना
निरवयवत्वप्रसिद्धेः ॥ विकारपक्षेप्येतत्तुल्यं ॥ विकारेणापि विकारिणो नित्यप्राप्तत्वात् ॥ न हि घटो मृदात्मतां परित्यज्यावति
ष्ठते ॥ परित्यागे वाभावप्राप्तेः ॥ विकारावयवपक्षयोश्च तद्वतः स्थिरत्वाद्ब्रह्मणः संसारगमनमप्यनवकॢप्तं ॥ अथान्य एव जीवो
ब्रह्मणः ॥ सोणुर्व्यापी मध्यमो ॥ परिमाणो वा भवितुमर्हति ॥ व्यापित्वे गमनानुपपत्तिः ॥ मध्यमपरिमाणत्वे वानित्यत्वप्रसंगः ॥ अ
णुत्वेपि कृत्स्नशरीरवेदनानुपपत्तिः ॥ प्रतिषिद्धे चाणुत्वमध्यमपरिमाणत्वे विस्तरेण पुरस्तात् ॥ परस्माच्चान्यत्वे जीवस्य तत्त्वम
सीत्यादिशास्त्रबाधप्रसंगः विकारावयवपक्षयोरपि समानोयं दोषः विकारावयवयोस्तद्वतोनन्यत्वाददोष इति चेत् ॥ न ॥ मुख्यै
कत्वानुपपत्तेः ॥ सर्वेषु चैतेषु पक्षेष्वनिर्मोक्षप्रसंगः ॥ संसार्यात्मत्वानिवृत्तौ वा स्वरूपनाशप्रसंगः ॥ ब्रह्मात्मत्वानभ्युपगमो वा ॥
यत्तु केचिज्जल्पंति ॥ नित्यानि नैमित्तिकानि च कर्माण्यनुष्ठीयंते ॥ प्रत्यवायानुत्पत्तये काम्यानि प्रतिषिद्धानि च परिह्रियंते स्वर्गन
रकानवाप्तये सांप्रतदेहोपभोग्यानि च कर्माण्युपभोगेनैव क्षपयंत इति ॥ अतो वर्तमानदेहपातादूर्ध्वं देहांतरप्रतिसंधानकारणाभा
वात्स्वरूपावस्थानलक्षणं कैवल्यं विनापि ब्रह्मात्मतयैवं वृत्तस्य सेत्स्यतीति ॥ तदसत् ॥ प्रमाणाभावात् ॥ न ह्येतच्छास्त्रेण केनचि
त्प्रतिपादितं मोक्षार्थिभ्यः समाचरेदिति ॥ स्वमनीषया त्वेतत्तर्कितं ॥ यस्मात्कर्मनिमित्तः संसारस्तस्मान्निमित्ताभावान्न भविष्यती
ति ॥ न चैतत्तर्कयितुं शक्यते निमित्ताभावस्य दुर्ज्ञानत्वात् ॥ बहूनि हि कर्माणि जात्यंतरसंचितानीष्टानिष्टविपाकान्येकैकस्य
जंतोः संभाव्यंते ॥ तेषां विरुद्धफलानां युगपदुपभोगासंभवात् कानिचिल्लब्धावसराणीदं जन्म निर्मिमते कानिचित्तु देशकालनि
मित्तप्रतीक्षाण्यासत इत्यतस्तेषामवशिष्टानां सांप्रतेनोपभोगेन क्षपणासंभवान्न यथावर्णितचरितस्यापि वर्तमानदेहपाते देहांतर
निमित्ताभावः शक्यते निश्चेतुं ॥ कर्मशेषसद्भावसिद्धिश्च ॥ तद्य इह रमणीयचरणास्ततः शेषेणेत्यादि श्रुतिस्मृतिभ्यः स्यादेतत्
नित्यनैमित्तिकानि तेषां क्षपकाणि भविष्यंतीति ॥ तन्न विरोधाभावात् ॥ सति हि विरोधे क्षेप्यक्षेपकभावो भवति ॥ न च जन्मांतरसं
चितानां सुकृतानां नित्यनैमित्तिकैरस्ति विरोधः ॥ शुद्धिरूपत्वाविशेषात् ॥ दुरितानां त्वशुद्धिरूपत्वात् सति विरोधे भवतु क्षपणं ॥ न तु ता १२
वता देहांतरनिमित्ताभावसिद्धिः ॥ सुकृतनिमित्तोपपत्तेः ॥ दुरितस्याप्यशेषक्षपणानवगमात् ॥ न च नित्यनैमित्तिकानुष्ठानात्प्र

315/19/3

त्यवायानुत्पत्तिमात्रं न पुनः फलांतरोत्पत्तिरिति प्रमाणमस्ति ॥ फलांतरस्याप्यनुनिष्पादिनः संभवात् ॥ स्मरति ह्यापस्तंबः ॥ तद्यथा
म्रे फलार्थे निमित्ते छायागंध इत्यनूत्पद्येते ॥ एवं धर्मं चर्यमाणमर्था अनूत्पद्यंत इति ॥ न चासति सम्यग्दर्शने सर्वात्मना काम्यप्रतिषि
द्धवर्जनं जन्मप्रयाणांतराले केनचित्प्रतिज्ञातुं शक्यं ॥ सुनिपुणानामपि सूक्ष्मापराधदर्शनात् ॥ संशयितव्यं तु भवति ॥ तथापि नि
मित्ताभावस्य दुर्ज्ञानत्वमेव ॥ न चानभ्युपगम्यमाने ज्ञानगम्ये ब्रह्मात्मत्वे कर्तृत्वभोक्तृत्वस्वभावस्यात्मनः कैवल्यमाकांक्षितुं शक्यं ॥ अ
ग्न्यौष्ण्यवत् ॥ स्वभावस्यापरिहार्यत्वात् ॥ स्यादेतत् ॥ कर्तृत्वभोक्तृत्वकार्यमनर्थो न तच्छक्तिः ॥ तेन शक्त्यवस्थानेपि कार्यपरिहारादुपप
न्नो मोक्ष इति ॥ तन्न ॥ शक्तिसद्भावे कार्यप्रसवस्य दुर्निवारत्वात् ॥ अथापि स्यात् ॥ न केवला शक्तिः कार्यमारभते ॥ अनपेक्ष्यान्यन्निमि
त्तानि ॥ अत एकाकिनी स्थितापि नापराध्यतीति ॥ तन्न ॥ निमित्तानामपि शक्तिलक्षणेन संबंधेन संनिबद्धत्वात् ॥ तस्मात्कर्तृत्व
भोक्तृत्वस्वभावसत्यामन्यस्यां विद्यागम्यायां ब्रह्मात्मतायां न कथंचन मोक्षं प्रत्याशास्ति ॥ श्रुतिश्च नान्यः पंथा विद्यतेयनायेति ज्ञाना
दन्यं मोक्षमार्गं वारयति ॥ परस्मादनन्यत्वेपि जीवस्य सर्वव्यवहारलोपप्रसंगः ॥ प्रत्यक्षादिप्रमाणाप्रवृत्तेरिति चेत् ॥ न प्राक्प्रबोधा
त्स्वप्नव्यवहारवत्तदुपपत्तेः ॥ शास्त्रं च यत्र हि द्वैतमिव भवति तदितर इतरं पश्यतीत्यादिना ऽप्रबुद्धविषये प्रत्यक्षादिव्यवहारमुक्त्वा पु
नः प्रबुद्धविषये यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदित्यादिना तदभावं दर्शयति ॥ तदेवं परब्रह्मविदो गंतव्यादिविज्ञानस्य बाधि
तत्वान्न कथंचन गतिरुपपादयितुं शक्या ॥ किंविषयाः पुनर्गतिश्रुतय इति ॥ उच्यते ॥ सगुणविद्याविषया भविष्यंति ॥ तथा हि ॥
क्वचित्पंचाग्निविद्यां प्रकृत्य गतिरुच्यते ॥ क्वचित्पर्यंकविद्यां ॥ यत्रापि ब्रह्म प्रकृत्य गतिरुच्यते ॥ क्वचित्पर्यंकविद्यां ॥ यत्रापि ब्रह्म
प्रकृत्य गतिरुच्यते ॥ यथा प्राणो ब्रह्म ॥ कं ब्रह्म खं ब्रह्मेति ॥ अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुंडरीकं वेश्मेति ॥ तत्रापि वामनीत्वादिभिः
सत्यकामत्वादिभिश्च गुणैः सगुणस्योपास्यत्वात् संभवति गतिः ॥ न क्वचित्परब्रह्मविषये गतिः श्राव्यते ॥ यथा गतिप्रतिषेधः श्रावि
तः न तस्य प्राणा उत्क्रामंतीति ॥ ब्रह्मविदाप्नोति परमित्यादिषु तु सत्यप्याप्नोतेर्गत्यर्थत्वे वर्णितेन देशांतरप्राप्त्यसंभवात्स्वरूपपरेवे
यमविद्याध्यारोपितनामरूपप्रविलयापेक्षयाभिधीयते ॥ ब्रह्मैव सन् ब्रह्माप्येतीत्यादिवदिति द्रष्टव्यं ॥ अपि च ॥ परविषयाग
तिर्व्याख्यायमाना प्ररोचनाय वा स्यात् ॥ अनुचिंतनाय वा ॥ तत्र प्ररोचनं ॥ तावत् ब्रह्मविदो न गत्युक्त्या क्रियते ॥ स्वसंवेद्येनैवाव्य
वहितेन विद्यासमर्पितेन स्वास्थ्येन तत्सिद्धेः ॥ न च नित्यसिद्धनिःश्रेयसनिवेदनस्यासाध्यफलस्य विज्ञानस्य गत्यनुचिंतने का
चिदपेक्षोपपद्यते ॥ तस्मादपरविषयैव गतिः ॥ तत्र परापरब्रह्मविवेकावधारणेनापरस्मिन् ब्रह्मणि वर्तमाना गतिश्रुतयः प

शा॰भा॰ ९३

रस्मिन्नध्यारोप्यते ॥ किं द्वे ब्रह्मणी परमपरं चेति ॥ बाढं ॥ एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोंकार इत्यादिदर्शनात् ॥ किं पुनः प
रं ब्रह्म किमपरमिति उच्यते ॥ यत्राविद्याकृतनामरूपादिविशेषप्रतिषेधेनास्थूलादिशब्दैर्ब्रह्मोपदिश्यते तत्परं ॥ तदेव यत्र नाम
रूपादिविशेषाणां केनचिद्विशेषेणोपासनायोपदिश्यते मनोमयः प्राणशरीरो भारूप इत्यादिशब्दैः तदपरं ॥ नन्वेवमद्वितीयश्रु
तिरुपरुध्येत न ॥ अविद्याकृतनामरूपोपाधिकतया परिहृतत्वात् ॥ तस्य चापरब्रह्मोपासनस्य तत्संनिधौ श्रूयमाणं स यदि पितृलो
ककामो भवतीत्यादि जगदैश्वर्यलक्षणं संसारगोचरमेव फलं भवति ॥ अनिवर्तितत्वादविद्यायाः ॥ तस्य चैकदेशविशेषावबद्धत्वा
त्प्राप्तव्यं गमनमविरुद्धं ॥ सर्वगतत्वेपि चात्मन आकाशस्येव घटादिगमने बुध्याद्युपाधिगमनेन गमनप्रसिद्धिरित्यवादिष्म त
द्गुणसारत्वादित्यत्र ॥ तस्मात्कार्यं बादरिरित्येष स्थितः पक्षः परं जैमिनिरिति तु पक्षांतरप्रतिभानमात्रप्रदर्शनं प्रज्ञाविकाशनाये
ति द्रष्टव्यं ३८२ अप्रतीकालंबनान्नयतीति बादरायण उभयथादोषात्तत्क्रतुश्च १६ स्थितमेतत्कार्यविषया गतिर्न परविषये
ति इदानीमिदं संदिह्यते ॥ किं सर्वान्विकारालंबनान विशेषेणैवामानवः पुरुषः प्रापयति ब्रह्मलोकमुत कांश्चिदेवेति ॥ किं ता
वत्प्राप्तं ॥ सर्वेषामेवैषामेवं विदुषामन्यत्र परस्माद्ब्रह्मणो गतिः स्यात् ॥ तथा ह्यनियमः सर्वासामित्यत्राविशेषेणैवैषा विद्यां
तरेष्ववतारितेत्येवं प्राप्ते प्रत्याह ॥ अप्रतीकालंबनानिति ॥ प्रतीकालंबनान्वर्जयित्वा सर्वानन्यान्विकारालंबनान्नयति ब्रह्मलोक
मिति बादरायण आचार्यो मन्यते ॥ न ह्येवमुभयथाभावाभ्युपगमे कश्चिद्दोषोस्ति ॥ अनियमन्यायस्य प्रतीकव्यतिरिक्तेष्वुपा
सनेषूपपत्तेः ॥ तत्क्रतुश्चास्योभयथाभावस्य समर्थको हेतुर्द्रष्टव्यः ॥ यो हि ब्रह्मक्रतुः स ब्राह्ममैश्वर्यमासीदिति श्लिष्यते ॥ तं य
था यथोपासते तदेव भवतीति श्रुतेः ॥ न तु प्रतीकेषु ब्रह्मक्रतुत्वमस्ति प्रतीकप्रधानत्वादुपासनस्य ॥ न च ब्रह्मक्रतुरपि ब्रह्म गच्छ
तीति श्रूयते ॥ यथा पंचाग्निविद्यायां स एनान्ब्रह्म गमयतीति मन्यते ॥ विशेषं च दर्शयति १७ नामादिषु च प्रतीकोपासनेषु पू
र्वस्मात्पूर्वस्मात्फलविशेषमुत्तरस्मिन्नुत्तरस्मिन्नुपासने दर्शयति ॥ यावन्नाम्नो गतं तत्रास्य यथाकामचारो भवति वाग्वाव नाम्नो
भूयसी यावद्वाचो गतं तत्रास्य यथाकामचारो भवति मनो वाव वाचो भूय इत्यादिना ॥ स चायं फलविशेषः प्रतीकतंत्रत्वादुपासनाना
मुपपद्यते ॥ ब्रह्मतंत्रत्वे तु ब्रह्मणोविशिष्टत्वात्कथं फलविशेषः स्यात् ॥ तस्मान्न प्रतीकालंबनानामितरैस्तुल्यफलत्वमिति ॥ ॥ इ
ती श्रीशारीरकमीमांसाभाष्ये शंकरभगवत्पादकृतौ चतुर्थस्याध्यायस्य तृतीयः पादः ॥ ॥ संपद्याविर्भावः स्वेन शब्दात् ॥ ९३
एवमेवैष संप्रसादोस्माच्छरीरात्समुत्थाय परं ज्योतिरूपसंपद्य स्वेन रूपेणाभिनिष्पद्यत इति श्रूयते ॥ तत्र संशयः ॥ किं देवलोका

317/1913

द्युपभोगस्थानेष्विवागंतुकेन केनचिद्विशेषेणाभिनिष्पद्यते ॥ आहोस्विदात्ममात्रेणेति ॥ किं तावत्प्राप्तं ॥ स्थानांतरेष्विवागंतुकेन केनचिद्रू
पेणाभिनिष्पत्तिः स्यात् ॥ मोक्षस्यापि फलत्वप्रसिद्धेः ॥ अभिनिष्पद्यत इति चोत्पत्तिपर्यायत्वात् ॥ स्वरूपमात्रेण चेदभिनिष्प
त्तिः पूर्वास्वप्यवस्थासु स्वरूपानपायाद्विभाव्येत ॥ तस्माद्विशेषेण केनचिदभिनिष्पद्यत इत्येवं प्राप्ते ब्रूमः केवलेनैवात्मनाविर्भवति
न धर्मांतरेणेति ॥ कुतः ॥ स्वेन रूपेणाभिनिष्पद्यत इति स्वशब्दात् ॥ अन्यथा हि स्वशब्देन विशेषणविशेषणमनर्थकं स्यात् ॥ आत्मव
चनतायां त्वर्थवत् ॥ केवलेनैवात्मरूपेणाभिनिष्पद्यते नागंतुकेनापररूपेणापीति ॥ कः पुनर्विशेषः पूर्वावस्थास्विव स्वरूपानपाय
साम्ये सतीति ॥ अत आह ॥ मुक्तः प्रतिज्ञानात् ॥ योत्राभिनिष्पद्यत इत्युक्तः स सर्वगंधविनिर्मुक्तः शुद्धेनैवात्मनावतिष्ठते ॥ पूर्वत्र
त्वंधो भवत्यपि रोदितीव विनाशमेवापीतो भवतीति चावस्थात्रयकलुषितेनात्मनेत्ययं विशेषः ॥ कथं पुनरिव गम्यते मुक्तोयमिदा
नीं भवतीति ॥ प्रतिज्ञानादित्याह ॥ तथा हि ॥ एतं त्वेव ते भूयोनुव्याख्यास्यामीत्यवस्थात्रयदोषविहीनमात्मानं व्याख्येयत्वेन प्रतिज्ञा
याशरीरं वाव संतं न प्रियाप्रिये स्पृशत इति चोपन्यस्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुष इति चोपसंहरति ॥ तथाख्यायिको
पक्रमेपि य आत्मापहतपाप्मेत्यादि मुक्तात्मविषयमेव प्रतिज्ञानं फलत्वप्रसिद्धिरपि मोक्षस्य बंधननिवृत्तिमात्रापेक्षा नापूर्वोप
जनापेक्षा ॥ यदप्यभिनिष्पद्यत इत्युत्पत्तिपर्यायत्वं तदपि पूर्वावस्थापेक्षं ॥ यथा रोगनिवृत्तावरोगोनिष्पद्यत इति तद्वत् ॥ तस्माददो
षः ॥ ॥ आत्मा प्रकरणात् २ कथं पुनर्मुक्त इत्युच्यते ॥ यावता परं ज्योतिरुपसंपद्येति कार्यगोचरमेवैनं श्रावयति ॥ ज्योतिःश
ब्दस्य भौतिके ज्योतिषि रूढत्वात् ॥ न चानतिवृत्तो विकारविषयात्कश्चिन्मुक्तो भवितुमर्हति ॥ विकारस्यार्तत्वप्रसिद्धेरिति ॥ नैष दो
षः ॥ यत आत्मैवात्र ज्योतिःशब्देनावेद्यते प्रकरणात् ॥ य आत्मापहतपाप्मा विजरो विमृत्युरिति हि प्रकृते परस्मिन्नात्मनि नाकस्मा
द्भौतिकं ज्योतिः शक्यं ग्रहीतुं प्रकृतहानाप्रसंप्रकृतप्रक्रियाप्रसंगात् ॥ ज्योतिःशब्दस्त्वात्मन्यपि दृश्यते तद्देवा ज्योतिषां ज्योतिरि
ति ॥ प्रपंचितं चैतज्ज्योतिर्दर्शनादित्यत्र ३८४ अविभागेन दृष्टत्वात् ४ परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते यः स
किं परस्मादात्मनः पृथगेव भवत्युताविभागेनैवावतिष्ठत इति वीक्षायां स तत्र पर्येतीत्यधिकरणाधिकर्तृनिर्देशात् ज्योतिरूप
संपद्येतीति च कर्तृकर्मनिर्देशाद्भेदेनैवावस्थानमिति यस्य मतिस्तं प्रत्यादयति ॥ अविभक्त एव परेणात्मना मुक्तोवतिष्ठते ॥ कुतः ॥ द
ष्टत्वात् ॥ तथा हि ॥ तत्त्वमस्यहं ब्रह्मास्मि ॥ यत्र नान्यत्पश्यति न तु तद्द्वितीयमस्ति ततोन्यद्विभक्तं यत्पश्येदित्येवमादीनि वाक्यान्यवि

शा॰भा॰
१४

भागेनैव परमात्मानं दर्शयति ॥ यथादर्शनमेव च फलं युक्तं न क्रतुन्यायात् ॥ यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति एवं मुनेर्वि
जानत आत्मा भवति गौतमेति चैवमादीनि मुक्तस्वरूपनिरूपणपराणि वाक्यान्यविभागमेव दर्शयति नदी समुद्रादिनिदर्शनानि
च भेदनिर्देशस्तु भेदेप्युपचर्यते स भगवः कस्मिन्प्रतिष्ठित इति स्वे महिम्नीति आत्मरतिरात्मक्रीड इति चैवमादिदर्शनात् ४८५
ब्राह्मेण जैमिनिरुपन्यासादिभ्यः ५ स्थितं मे तत् स्वेन रूपेणेत्यशात्यमात्ररूपेणाभिनिष्पद्यते नागन्तुना पररूपेणेति ॥ अधुना
तु तद्विशेषबुभुत्साया धीयते ॥ स्वमस्य रूपं ब्राह्ममपहतपाप्मत्वादि सत्यसंकल्पत्वावसानं ॥ तथा सर्वज्ञत्वं सर्वेश्वरत्वं च तेन रूपेणा
भिनिष्पद्यत इति जैमिनिराचार्यो मन्यते ॥ कुतः ॥ उपन्यासादिभ्यस्तथात्वावगमात् ॥ तथा हि ॥ य आत्मापहतपाप्मेत्यादिना सत्यः
कामः सत्यसंकल्प इत्येवमन्तेनोपन्यासेनैवमात्मकतामात्मनो बोधयति ॥ तथा स तत्र पर्येति जक्षत्क्रीडन्रममाण इत्यैश्वर्यरूपमावे
दयति ॥ तस्य सर्वेषु लोकेषु कामचारो भवतीति च ॥ सर्वज्ञः सर्वेश्वर इत्यादिव्यपदेशाश्चैवमुपपन्ना भविष्यन्तीति ॥ ॥ चिति तन्मा
त्रेण तदात्मकत्वादित्यौडुलोमिः ॥ यद्यप्यपहतपाप्मत्वादयो भेदेनैव धर्मा निर्दिश्यन्ते तथापि शब्दविकल्पजा एवैते ॥ पाप्मादीनिवृ
त्तिमात्रं हि तत्र गम्यते ॥ चैतन्यमेव तु अस्यात्मनः स्वरूपमिति तन्मात्रेण रूपेणाभिनिष्पत्तिर्युक्ता ॥ तथा च श्रुतिरेवं वा अरेऽयमात्मानन्त
रोऽबाह्यः कृत्स्नः प्रज्ञानघन एवेत्येवंजातीयका अनुगृहीता भविष्यति ॥ सत्यकामत्वादयस्तु यद्यपि वस्तुरूपेणैव धर्मा उच्यन्ते सत्याः
कामा अस्येति तथाप्युपाधिसंबन्धाधीनत्वात्तेषां न चैतन्यवत्स्वरूपत्वसंभवः ॥ अनेकाकारत्वप्रतिषेधात् ॥ प्रतिषिद्धं हि ब्रह्मणोनेका
कारत्वं ॥ न स्थानतोपि परस्योभयलिंगमित्यत्र ॥ अत एव जक्षणादिसंकीर्तनमपि दुःखाभावमात्राभिप्रायं स्तुत्यर्थं आत्मरतिरित्यादि
वत् ॥ न हि मुख्यान्येव रतिक्रीडामिथुनान्यात्मनि शक्यन्ते वर्णयितुं द्वितीयविषयत्वात्तेषां तस्मान्निरस्ताशेषप्रपंचेन प्रस
न्नेनाव्यपदेश्येन बोधात्मनाभिनिष्पद्यत इत्यौडुलोमिराचार्यो मन्यते ॥ ॥ एवमप्युपन्यासात्पूर्वभावादविरोधं बादरायणः ॥ एव
मपि पारमार्थिकचैतन्यमात्रस्वरूपाभ्युपगमेपि व्यवहारापेक्षया पूर्वस्याप्युपन्यासादिभ्योवगतस्य ब्राह्मस्यैश्वर्यरूपस्याप्रत्याख्याना
दविरोधं बादरायण आचार्यो मन्यते ४०६ संकल्पादेव तु तच्छ्रुतेः ॥ हार्दविद्यायां श्रूयते ॥ स यदि पितृलोककामो भवति संकल्पादेवास्य १४

पितरः समुत्तिष्ठन्तीत्यादि ॥ तत्र संशयः किं संकल्प एव केवलः पित्रादिसमुत्थानहेतुः उत निमित्तान्तरसहित इति ॥ तत्र सत्यपि संकल्पा
देवेति श्रवणे लोकवन्निमित्तान्तरापेक्षता युक्ता ॥ यथा लोके स्मदादीनां संकल्पाद्गमनादिभ्यश्च हेतुभ्यः पित्रादिसंपत्तिर्भवत्येवं मुक्तस्या
प्यपि देवं दृष्टविपरीतं न कल्पितं भविष्यति ॥ संकल्पादेवेति तु राजवत्संकल्पितार्थसिद्धिकरीं साधनान्तरसामग्रीं सुलभामपेक्ष्योच्यते
न च संकल्पमात्रसमुत्थाना पित्रादयो मनोरथविजृम्भितवच्चंचलत्वात्पुष्कलं भोगं समर्पयितुं पर्याप्नुयुरित्येवं प्राप्ते ब्रूमः संकल्पादेव तु के
वलात्पित्रादिसमुत्थानमिति ॥ कुतः ॥ तच्छ्रुतेः संकल्पादेवास्य पितरः समुत्तिष्ठन्तीत्यादिका हि श्रुतिर्निमित्तान्तरमिष्यते ॥ प्राकृतसंपत्तेर्वि
र्या संकल्पत्वप्रसंगात् ॥ न च श्रुतिगम्येर्थे लोकवदिति सामान्यतो दृष्टं क्रमेते ॥ संकल्पबलादेव चैषां यावत्प्रयोजनं स्थैर्योपपत्तिः ॥ प्राकृत
संकल्पविलक्षणत्वान्मुक्तसंकल्पस्य ॥ अत एव चानन्याधिपतिः ॥ अत एव चाबाधासंकल्पत्वादनन्याधिपतिर्विद्वान्भवति ॥ नास्यान्योधि
पतिर्भवतीत्यर्थः ॥ न हि प्राकृतोपि संकल्पयत्नन्यस्वामिकत्वमात्मनः सत्यां गतौ संकल्पयति ॥ श्रुतिश्चैवं तद्दर्शयति ॥ अथ य इहात्मानमनु
विद्य व्रजन्त्येतांश्च सत्यान्कामांस्तेषां सर्वेषु लोकेषु कामचारो भवतीति ४०७ अभावं बादरिराह ह्येवं २० संकल्पादेवास्य पितरः समुत्ति
ष्ठन्तीत्यतः श्रुतेर्मनस्तावत्संकल्पसाधनं सिद्धं ॥ शरीरेन्द्रियाणि पुनः प्राप्तैश्वर्यस्य विदुषः सन्ति न सन्तीति समीक्ष्यते ॥ तत्र बादरिस्तावदा
चार्यः शरीरस्येन्द्रियाणां चाभावं महीयमानस्य विदुषो मन्यते ॥ कस्मात् ॥ एवं ह्याहाम्नायो मनसैतान्कामान्पश्यन्रमते य एते ब्रह्मलोक
इति ॥ यदि मनसा शरीरेन्द्रियैश्च विहरेत् ॥ मनसेति विशेषणं न स्यात् ॥ तस्मादभावः शरीरेन्द्रियाणां मोक्षे ॥ ॥ भावं जैमिनिर्विकल्पा
मननात् ११ जैमिनिस्त्वाचार्यो मनोवच्छरीरस्यापि सेन्द्रियस्य भावं मुक्तं प्रति मन्यते ॥ यतः स एकधा भवति त्रिधा भवतीत्यादिनानेक
धाभावविकल्पमामनन्ति ॥ न ह्यनेकविधता विना शरीरभेदेनांजसी स्यात् ॥ यद्यपि निर्गुणायां भूमविद्यायामयमनेकधाभावविकल्पः
पठ्यते तथापि विद्यमानमेवेदं सगुणावस्थायामैश्वर्यं भूमविद्यास्तुतये संकीर्त्यत इत्यतः सगुणविद्याफलभावेनोपतिष्ठत इत्युच्यते
॥ द्वादशाहवदुभयविधं बादरायणोतः ॥ बादरायणः पुनराचार्योत एवोभयलिंगश्रुतिदर्शनादुभयविधत्वं साधु मन्यते ॥ यदा तु स
शरीरतां संकल्पयति तदा सशरीरो भवति यदा त्वशरीरतां तदाशरीर इति सत्यसंकल्पत्वात् संकल्पवैचित्र्याच्च ॥ द्वादशाहवत् ॥ यथा द्वाद

319/1915

शा० भा०
९५

शाहः सत्र महीतश्च भवति ॥ उभयलिंगश्रुतिदर्शनात् ॥ एवमिदमपीति ॥ ॥ तदभावे संध्यवदुपपत्तेः १३ यदा तु तनोः सेंद्रिय
स्य शरीरस्याभावस्तदा यथा संध्यस्थाने शरीरेंद्रियविषयेष्वविद्यमानेष्वप्युपलब्धिमात्रा एव पित्रादिकामा भवति एवं मोक्षेपि स्युः
एवं ह्येतदुपपद्यते ॥ ॥ भावे जाग्रद्वत् ॥ भावे पुनस्तनोर्यथा जागरिते विद्यमाना एव पित्रादिकामा भवंत्येवं मुक्तस्याप्युपपद्यते
३८८ प्रदीपवदावेशस्तथा हि दर्शयति १५ भावं जैमिनिर्विकल्पामननादित्यत्र सशरीरत्वं मुक्तस्योक्तं ॥ तत्र त्रिधाभावादिश्रुते
क शरीरान्सर्गादिं निरात्मकानि शरीराणि दारुयंत्रवत्प्रवर्त्यंते किं वा सात्मकान्यस्मदादिशरीरवदिति भवति वीक्षा ॥ तत्रात्ममनसोर्भे
दानुपपत्तेरेकेन शरीरेण योगादितराणि निरात्मकानीत्येवं प्राप्ते प्रतिपद्यते ॥ प्रदीपवदावेश इति ॥ यथा प्रदीप एकोनेकप्रदीपभा
वमावमापद्यते ॥ प्रदीपवदावेशादि विकारशक्तियोगादेवमेकोपि सन् विद्वानैश्वर्ययोगादनेकभावमापद्य सर्वाणि शरीराण्या
विशति ॥ कुतः ॥ तथा हि दर्शयति शास्त्रमेकस्यानेकभावं ॥ स एकधा भवति त्रिधा भवति पंचधा सप्तधा नवधेत्यादि ॥ नैतदारुयंत्रो
पमाभ्युपगमे कल्पते ॥ नापि जीवांतरावेशे ॥ न च निरात्मकानां शरीराणां प्रवृत्तिः संभवति ॥ यत्त्वात्ममनसोर्भेदानुपपत्तेरनेकयो
गासंभव इति ॥ नैष दोषः ॥ एकमनोनुवर्तीनि समनस्कान्येवापराणि शरीराणि सत्यसंकल्पत्वात्स्रक्ष्यति ॥ सृष्टेषु चैतेषूपाधिभेदा
दात्मनोपि भेदेनाधिष्ठातृत्वं योक्ष्यत इत्येषैव च योगशास्त्रेषु योगिनामनेकशरीरयोगप्रक्रिया ॥ कथं पुनर्मुक्तस्यानेकशरीरावेशादि
लक्षणमैश्वर्यमभ्युपगम्यते ॥ यावता तत्केन कं विजानीयान्न तु तद्द्वितीयमस्ति ततोन्यद्विभक्तं यद्विजानीयात्सलिल एको द्रष्टाद्वै
तो भवतीत्येवंजातीयिका श्रुतिर्विशेषविज्ञानं वारयतीति ॥ अत उत्तरं पठति ॥ ॥ स्वाप्ययसंपत्त्योरन्यतरापेक्षमाविष्कृतं हि १६
स्वाप्ययः सुषुप्तं ॥ स्वमपीतो भवति तस्मादेनं स्वपितीत्याचक्षत इति श्रुतेः ॥ संपत्तिः कैवल्यं ब्रह्मैव सन्ब्रह्माप्येतीति श्रुतेः ॥ तयोर
न्यतरामवस्थामपेक्ष्यैतद्विशेषसंज्ञाभाववचनं ॥ क्वचित्सुषुप्तावस्थामपेक्ष्योच्यते ॥ क्वचित्कैवल्यावस्थां ॥ कथमवगम्यते ॥ यतस्तत्रै
वैतदधिकारवशादाविष्कृतं ॥ एतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्ति यत्र त्वस्य सर्वमात्मैवाभूद्यत्र सुप्तो न
कंचन कामं कामयते न कंचन स्वप्नं पश्यतीत्यादिश्रुतिभ्यः ॥ सगुणविद्याविपाकस्थानं त्वेतत्स्वर्गादिवदवस्थांतरं यत्रैतदैश्वर्यमुपव ९५

र्ण्यते तस्माददोषः ३८८ जगद्व्यापारवर्जं प्रकरणादसंनिहितत्वाच्च ॥ ये सगुणब्रह्मोपासनात्सहैव मनसेश्वरसायुज्यं व्रज
न्ति किं तेषां निरवग्रहमैश्वर्यं भवत्याहोस्वित्सावग्रहमिति संशयः ॥ किं तावत्प्राप्तं ॥ निरंकुशमेवैषामैश्वर्यं भवितुमर्हति ॥ आ
प्नोति स्वाराज्यं सर्वेस्मै देवा बलिमावहंति ॥ तेषां सर्वेषु लोकेषु कामचारो भवतीत्यादिश्रुतिभ्य इत्येवं प्राप्ते पठति जगद्व्यापारवर्जमि
ति ॥ जगदुत्पत्त्यादिव्यापारं वर्जयित्वान्यदणिमाद्यात्मकमैश्वर्यं मुक्तानां भवितुमर्हति ॥ जगद्व्यापारस्तु नित्यसिद्धस्यैवेश्वर
स्य ॥ कुतः ॥ तस्य तत्र प्रकृतत्वात् ॥ असंनिहितत्वाच्चेतरेषां परएवहीश्वरो जगद्व्यापारे विरुतः ॥ तमेव प्रकृत्योत्पत्त्याद्युपदेशात्
नित्यशब्दनिबंधनत्वाच्च ॥ तदन्वेषणविजिज्ञासनपूर्वकं त्वितरेषामादिमदैश्वर्यं मुक्तानां श्रूयते ॥ तेनासंनिहितास्ते जगद्व्यापारे ॥
समनस्कत्वादेव चैषामनैकमत्ये कस्यचित्स्थित्यभिप्रायः कस्यचित्संहाराभिप्राय इत्येवं विरोधोपि कदाचित्स्यात् ॥ अथ कस्यचित्
संकल्पमन्वन्यस्य संकल्प इत्यविरोधः समर्थ्येत ततः परमेश्वराकूततंत्रत्वमेवेतरेषामिति व्यवतिष्ठते ॥ ॥ प्रत्यक्षोपदेशादिति
चेन्नाधिकारिकमंडलस्थोक्तेः अथ यदुक्तमाप्नोति स्वाराज्यमित्यादिप्रत्यक्षोपदेशान्निरवग्रहमेवैश्वर्यं विदुषान्याय्यमिति तत्प
रिहर्तव्यं ॥ अत्रोच्यते ॥ नायं दोषः ॥ आधिकारिकमंडलस्थोक्तेः आधिकारिको यः सवितृमंडलादिषु विशेषायतनेष्ववस्थितः पर
ईश्वरस्तदायत्तैवेयं स्वाराज्यप्राप्तिरुच्यते ॥ यत्कारणं ॥ अनंतरं आप्नोति मनसस्पतिमित्याह ॥ यो हि सर्वमनसां पतिः पूर्वसिद्ध
ईश्वरस्तं प्राप्नोतीत्येतदुक्तं भवति ॥ तदनुसारेणैव चानंतरं वाक्पतिश्चक्षुष्पतिः श्रोत्रपतिर्विज्ञानपतिश्च भवतीत्याह ॥ एवम
न्यत्रापि यथासंभवं नित्यसिद्धेश्वरायत्तमेवेतरेषामैश्वर्यं योजितव्यं ॥ ॥ विकारावर्ति च तथा हि स्थितिमाह ॥ विकारावर्ति
च नित्यमुक्तं पारमेश्वरं रूपं न केवलं विकारमात्रगोचरं सवितृमंडलाद्यधिष्ठानं ॥ तथा ह्यस्य द्विरूपां स्थितिमाहाम्नायः ॥ तावान
स्य महिमा ततो ज्यायांश्च पूरुषः ॥ पादोस्य विश्वा भूतानि त्रिपादस्यामृतं दिवीत्येवमादिः ॥ न च तन्निर्विकारं रूपमितरालंबनाः
प्राप्नुवंतीति शक्यं वक्तुं ॥ अतत्क्रतुत्वात्तेषां अतश्च यथैव द्विरूपे परमेश्वरे निर्गुणं रूपमनवाप्य सगुण एवावतिष्ठते ॥ एवं सगुणे
पि निरवग्रहमैश्वर्यमनवाप्य सावग्रह एवावतिष्ठत इति द्रष्टव्यं ॥ ॥ दर्शयतश्चैवं प्रत्यक्षानुमाने २० दर्शयतश्च विकारावर्ति

शा॰भा॰
३५

त्वंपरस्यज्योतिषः श्रुतिस्मृतीनतत्रसूर्योभातिनचंद्रतारकंनेमाविद्युतोभांतिकुतोयमग्निरिति॥नतद्भासयतेसूर्योनशशांको
नपावकइतिच॥तदेवंनिर्विकाररूपवर्तिपरस्यज्योतिषःप्रसिद्धमित्यभिप्रायः॥ ॥भोगमात्रसाम्यलिंगाच्च २१ इतश्चननि
रंकुशंविकारालंबनानांमैश्वर्यं॥यस्माद्भोगमात्रमेवैषामादिसिद्धेनेश्वरेणसमानमितिश्रूयते॥तमाहापोवैखलुमीयंतेलो
कोसाविति॥सयथैतांदेवतांसर्वाणिभूतान्यवंति॥एवंहैवंविदंसर्वाणिभूतान्यवन्ति॥तेनोएतस्यैदेवतायैसायुज्यंसलोकतां
जयतीत्यादिभेदव्यपदेश्यपदेशलिंगेभ्यः॥नन्वेवंसतिसातिशयत्वादंतवत्वमैश्वर्यस्यास्यततश्चैषामावृत्तिःप्रसज्येतेति॥अ
तउत्तरंभगवान्बादरायणआचार्यःपठति॥अनावृत्तिःशब्दादनावृत्तिःशब्दात् २२ नाडीरश्मिसन्वितेनार्चिरादिपर्वणादे
वयानेनपथायेब्रह्मलोकंशास्त्रोक्तविशेषणंगच्छंति॥यस्मिन्नरश्चण्यश्चार्णवौ ब्रह्मलोकेतृतीयस्यामितोदिवि॥यस्मिन्नैर
मदीयंसरोयस्मिन्नश्वत्थःसोमसवनोयस्मिन्नपराजिता यश्चप्रभुविमितंहिरण्मयंवेश्मयश्चानेकधमंत्रार्थवादादि
प्रदेशेषुसंप्रपंच्यतेतंप्राप्यनचंद्रलोकादि स्तयोर्ध्वमायन्नमृतत्वमेतितेषांनपुनरावृत्तिरेतेनप्रतिपद्यमा
नाइमंमानवमावर्तंनावर्तंतेब्रह्म रापद्यतेनचपुनरावर्ततइत्यादिशब्देभ्यः अंतवत्वेपित्वैश्वर्यस्ययथानावृत्तिस्तथा
वर्णितंकार्यात्ययेतद स्ततमसांतुनित्यसिद्धनिर्वाणपरायणानांसिद्धैवानावृत्तिस्तदाश्रयणेनैवहिसगु
वृत्तिसिद्धिरितिअनावृत्तिःशब्दादनावृत्तिःशब्दादित्यभ्यासःशास्त्रपरिसमाप्तिंद्योतयति॥ ॥इतिश्री
शारीरकमीमांसाभाष्येशंकरभगवत्पादकृतौचतुर्थाध्यायस्यचतुर्थःपादःसमाप्तः श्रीशंकरार्पणमस्तु॥ ॥
७ ७ ७ ७ ७ ७ ७ ७

३६

323/1913

Bombay Branch of the Royal Asiatic Society

इतिशांकरभाष्यचतुर्थाध्यायसमाप्तः ॥

OF THE
LIBRARY
BRANCH
OF THE

325/1913